॥ श्रीः ॥

प्रास्ताविकं किंचित्।

अयि सहृदयाः! श्रीमत्कविकुलतिलकायमानश्रीमर्तृहरिविरचितं नीतिशृंगारवैराग्यशतकत्रयाख्यं काव्यं विदितचरमेव तत्रभवद्भिः श्रीमद्भिः। तदेतत् कविवरभर्तृहरिविरचितमनुपमं काव्यं सुव्याख्याया अलाभात् मेघच्छन्नचन्द्रिकेवास्पष्टप्रकाशमभवत्। यद्यप्यस्य काव्यस्य सन्त्यन्यानि व्याख्यानान्यन्यत्रात्र च मुद्रितानि परन्तु तानि अल्पास्फुटार्थद्योतकत्वात् न प्रीणयन्त्यध्येतृजनचेतांस्यतो नार्हाणि तान्येतत्काव्यस्येति निश्चित्यास्माभिर्लब्धं महता प्रयत्नेन रामचन्द्रबुधेन्द्रविरचितं सहृदयनन्दिन्याख्यं व्याख्यानम्। एतद्व्याख्यानं स्फुटत्वात् विस्तृतत्वाच्छास्त्रप्रमाणितयुक्तिमत्त्वाच्छ्रीभर्तृहरेः कवीशहृदयस्य सर्वतः प्रकाशनेऽलमतः एतदेव उक्तकविकृतशतकत्रयेण साकं मुद्रितम् एतद्व्याख्यानमान्ध्रलिपितोऽस्माभिर्देवनागराक्षरैर्विपरिवर्त्य मुद्रितम्। एभी रामचन्द्रबुधेन्द्रैः शतकत्रयस्य पद्धत्यादिप्रदर्शनेन व्यवस्था कृतास्ति। सा चानुक्रमण्याद्यवलोकनेन स्फुटीभविष्यति। अस्मिन् शतकत्रये रामचन्द्रबुधेन्द्रादृता एव पाठा मूले स्थापिताः पाठान्तराणि च तत्र तत्र टिप्पणीरूपेण स्थापितानि। अस्मिन् शतकत्रये शतसंख्यावहिर्भूतत्वात् रामचन्द्रबुधेन्द्रस्य येषु श्लोकेषु व्याख्यानं नास्ति तेषु श्लोकेषु पूर्वतनं व्याख्यानं स्थापितम्। किं च हिन्दीभाषाभिज्ञजनसौकर्याय हिन्दीभाषाव्याख्यानमप्यनेन साकं मुद्रितम्। तदेतदनुपमं पुस्तकं संपाद्य शतकत्रयरसपिपासवो लभन्तामनवरतानन्दमिति शम्।

सविनयं निवेदयिता—

श्रीकृष्णदासात्मजो गङ्गाविष्णुः।

अथ

शतकत्रयस्थविषयानुक्रमणिका ।

इति विषयानुक्रमणिका समाप्ता ।



॥ श्रीगणेशाय नमः ॥

अथ

संस्कृतटीका-भाषाटीकासहितं भर्तृहरिकृतं

शतकत्रयम् ।

नीतिशतकम् १ ।

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ॥
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

वन्देऽहं रघुनन्दनाङ्घ्रिसरसीजातद्वयीमद्वया-
मन्दानन्दमरन्दबिन्दुलहरीसन्दोहनिष्यन्दिनीम् ।
यत्रेन्दिन्दिरजातवन्मुनिमनोवृन्दकृतस्वाश्रय
काञ्चित्तुन्दिलतामविन्दत परानन्दाववोधोदयात् ॥ १ ॥

श्रीमांस्त्रैलिङ्गदेशे स जयति विबुधश्रेणिकोटीरकोटी-
कोटीमाणिक्यभूतागणितगुणगणोऽखण्डपाण्डित्यशौण्ड' ।
धीर. शाण्डिल्यगोत्रः सकलकविकुलाह्लादिसूक्तिप्रवीणो
वीणोदाहार्यविद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्र. ॥ २ ॥

वेदान्तोदन्तचिन्तामतनुत चतुरेणान्तरेणाकुतर्क
तर्क चातर्कयद्य फणिपतिवचना सारमाधत्त योगे ।
योगे य मात्यसत्यागमसमयविवावप्यल तन्त्रविद्या-
विद्यायामित्यधीशः स्फुरति निरुपमो वचवगाम्बुराशि ॥ ३ ॥

विप्रेणाभूतपूर्वं फलमधितपमालम्भि सूर्यप्रसादा-
ल्लब्ध्वा तस्मात्स्वयं तत्प्रचुरनरजरापश्चताकुञ्चनाक्षम् ।

---

१ आनन्द इति पाठान्तरम् । २ सागर इति पाठान्तरम् ।

त्यक्त्वा मोहं स्वकान्तारमतिमिव धिया तं निवेश्याऽऽत्ममध्ये
योगीन्द्रो भर्तृहर्याह्वय इह कुरुतेऽद्यापि विद्याविलासम् ॥ ४ ॥
सोऽहमेतत्प्रणीतायाः सुभाषितकृतेः कृती ।
कुर्वे सहृदयानन्दिन्याख्या व्याख्या सतां मुदे ॥ ५ ॥
व्याकुर्वन्ति निबद्धगौरवभयान्नैव स्फुटं युक्तिभि-
र्ये तेऽध्येतृजनप्रतारणपराः का नैपुणी वा ततः ।
वैखर्या वचसा कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रविवृणोम्युक्तित्रजोज्जृम्भितम् ॥ ६ ॥

संस्कृतटीका—इह खलु तत्रभवानशेषविशेषसारपारदृश्वा विश्वातिशायी गुणगरिमाधनारो भर्तृहरिनामा महायोगीश्वरो निजयोगमहिमानुसारेण करतलामलकीकृताखिलविरिञ्चिप्रपञ्चस्तृणकणमिव जगज्जालमालोकयन्परमकारुणिको लोकव्यवहारपरिज्ञानखिन्नान्तःकरणो लोकानुजिघृक्षयानीतिशृङ्गारवैराग्यवर्णनप्रख्यं सुभाषितत्रिशत्याख्यं कञ्चित्प्रबन्धं प्रारभमाणस्तत्परिपन्थिनिर्मथनद्वारा परिसमाप्तिप्रचयगमनलक्षणफलमाशासानः शिष्टाचारपरिप्राप्तविशिष्टपरज्योतीरूपेष्टदेवतानमस्काराकारं मङ्गलमादौ निबध्नाति—दिगिति ॥ दिशः प्राच्यादिदिक्प्रदेशाः । कालाः भूतभविष्यद्वर्तमानरूपाः । आदिशब्दसंगृहीतानि वस्तूनि । तथा च दिक्काला आदयो येषां तानि दिक्कालादीनि । तद्गुणसंविज्ञानबहुव्रीहिः । अन्यथा तेषामप्राधान्ये विनाभावे शास्त्रविरोधः स्यात् । तैरनवच्छिन्ना अपरिकृता । विभुत्वान्नित्यत्वादेकत्वाच्च देशतः कालतो वस्तुतश्चापरिच्छिन्नेत्यर्थः । अत एवानन्ता परिमिता त्रिविधपरिच्छेदशून्यत्वादखण्डदण्डायमानेत्यर्थः । एतेन सजातीयविजातीयस्वगतभेदत्रयराहित्यमर्थात्सूचितमिति विज्ञेयम् । आनन्देति पाठे आनन्दचिच्छब्दयोर्द्वन्द्वान्ते श्रूयमाणो मात्रशब्दः प्रत्येकं सम्बध्यते । तथा चानन्दमात्रा आनन्दमयी चिन्मात्रज्ञानघना च । चिदेकरसेति यावत् । तादृशी मूर्तिस्तस्यै तद्रूपायै इत्यर्थः । "सत्यं ज्ञानमनन्तं ब्रह्म, एकमेवाद्वितीयं ब्रह्म, विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानात्, आनन्दमयोऽभ्यासात्, सत्यं ज्ञानमनन्तं यत्सानन्दं ब्रह्म

केवलम् " इत्यादिश्रुतिस्मृतिकदम्बकमत्र प्रमाणमिति भावः । नात्र बहुव्रीहिराश्रयणीयः । अन्यथा "इकोऽचि विभक्तौ" इति नुमि 'मूर्तिने' इति स्यात् । न च "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इति न पुंवद्भाव इति वाच्यम् । मूर्तिशब्दस्य नियतस्त्रीलिंगत्वेनाभाषितपुंस्कत्वात् । तस्माद्यथाश्रुतमेव साधु मन्तव्यम् । भाषितपुंस्कत्वस्यानित्यत्वविवक्षाया तु बहुव्रीहिर्विहिते तदा न काप्यनुपपत्तिरिति सर्वं सुस्थम् । तथा स्वानुभूतिरात्मानुभव एव एकं मुख्यमद्वितीयं वा मानं स्वप्रकाशसाधनं यस्य तस्मै स्वयंप्रकाशसंविद्रूपत्वादस्य प्रदीपवत्स्वपरप्रकाशकतया स्वसाक्षात्कारे स्वानुभव एव प्रमाणं नतु घटादेरिव चक्षुरादि प्रामाणिकत्वमिति भाव. । एतेन वृत्तिविषयत्वमेव न तु फलविषयत्वमित्यवधेयम् । तदुक्तमाचार्यैः । "स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः । न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥" इति । तथा शान्ताय अविद्यातत्कार्यसम्बन्धशून्यत्वात्प्रसन्नाय । "निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः । तेजसे ज्योतीरूपाय ब्रह्मणे नमः प्रह्वीभावः । "नमः स्वस्ति०" इत्यादिना चतुर्थी । अत्र "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते । वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्ति । अध्येतारश्च प्रवक्तारो भवन्ति ।" इति भगवत्पाणिनीयवचनप्रामाण्यात् । 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।' इत्यादिदण्डिवचनाच्चादौ नमस्काररूपमन्ते परब्रह्मस्मरणलक्षणं च मध्ये तदुभयात्मकं च मङ्गलमाचरतीत्यवगन्तव्यम् । "अथ शब्दानुशासनम्" इत्यादौ सर्वत्र शास्त्रारम्भे मङ्गलार्थत्वेनाथशब्दप्रयोगदर्शनात् तस्य तदर्थत्वं च । "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।" इत्यभिधानात् । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥" इति स्मरणाच्च । तच्च निर्विघ्नं प्रारिप्सितपरिसमाप्तिकामेनावश्यं कर्तव्यम् । "परिसमाप्तिकामो मङ्गलमाचरेत्" इत्यनुमितश्रुतिबोधितकर्तव्यताकत्वात् । अनुमानं च मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् । दर्शाद्याचारवदित्यन्वयव्यतिरेकाभ्यां तस्य कारणत्वानिश्चयात् । कथमवश्यकर्तव्यताकत्वम् । तस्मादि

शावरभाष्यादौ कृतेऽपि मङ्गले समाप्तेरजातत्वात् किरणावल्यादावकृतेऽपि जातत्वादिति चेत् सत्यम् । क्वचिद्विघ्नबाहुल्येन तत्समसंख्याकमङ्गलाभावात् । क्वचित्प्राचीनमङ्गलबाहुल्याच्च व्यत्यय इत्यलमतिप्रसङ्गेन । अत्र चारुत्वेन यथावद्वस्तुवर्णनात् स्वभावोक्तिरलङ्कार । " स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् । " इति लक्षणात् । श्लोकाख्यमेतदानुष्टुभ वृत्तम् । " पञ्चम लघु सर्वत्र सप्तम द्विचतुर्थयोः । गुरु षष्ठं च सर्वेषामेतच्छ्लोकस्य लक्षणम् ॥" इति वचनात् ॥ १ ॥

भा० टी०–दिशा और काल जिसकी मूर्तिका संकोच नहीं कर सकते और जो अंतरहित और चेतनरूप है और जो अपनेही अनुभवमे जाना जाता है ऐसे शांत और तेजोरूप ब्रह्मको नमस्कार है ॥ १ ॥

यां चिन्तयामि सततं मयि सा विरक्ता ।
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥
अस्मत्कृते च परितुष्यति काचिदन्या ।
धिक् तां च तं च मदनं च इमां च मां च ॥ २ ॥

" प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते । ' एव नीतिर्वर्तते तर्हि केन कारणेन ग्रन्थः कृतस्तत्कारणं येन वैराग्योत्पत्तिस्तद्दिखाति—यामिति ॥ धिग्योगे द्वितीया [illegible] अतो द्वितीया विभक्तिरुक्ता । राज्ञा विक्रमशकेन स्वलब्ध फलं [illegible] दत्त तस्य फलस्य महिमा येन भक्षित सोऽमरो भवति [illegible] मनसि विचार्य बहूना पालको राजा भर्तृहरिस्तस्मै दत्त तेन भर्तृहरिणा स्वपत्नी प्रियतमा तस्यै दत्त तयापि कश्चन जारस्तस्मै दत्त [illegible] तस्य प्रिया काचन पुंश्चली तस्यै दत्त तत्फलम [illegible] पुंश्चलीसकाशे राज्ञा दृष्ट पश्चात्क्रोध कृत । तावत्पूर्वापर ज्ञात्वा [illegible] स्त्रियं चिन्तयामि प्राणादधिका मन्ये सा [illegible] अन्यजार प्रियतममिच्छति सोऽपि अन्या पुंश्चली प्रिय चेते- [illegible] कामदेव [illegible] भवितव्य इति मनसि

मतोऽप्र प्राप्नोति एव न कश्चित्कस्यचित्प्रिय अतो निन्दति । सा पुंश्चली ता धिक् स जारः तं धिक् इयं मदीया स्त्री इमां च धिक् अहमपि एतादृशो मूर्खो मां च धिक् । इदं सर्वं मदनकृतं जातमतो मदनं च धिक् ॥ २ ॥

जिसकी मैं निरन्तर चिन्ता करता हूं सो मुझसे विरक्त होकर दूसरे जनकी इच्छा करती है और वह जन अन्य स्त्रीपर आसक्त है और वह अन्य स्त्री हमसे प्रसन्न है इसलिये मेरी प्रिया (जो दूसरे जनको चाहती है) को और दूसरे जन (जो अन्य-स्त्रीको चाहता है) को और इस अन्य स्त्री (जो फिर मुझसे प्रसन्न है) को और मुझे (जो इससे फँसा हूं) और कामदेवकोभी धिक्कार है कि जिसकी यह प्रेरणा है ॥ २ ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ॥
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ ३ ॥

ग्रन्थकारस्य विविधस्वरूपपरिज्ञानार्थं नानापद्धतिनिबन्धनतया चिकीर्षितत्वात्तत्र मूर्खविद्वत्पद्धत्योर्यद्यप्येकभावस्याविशिष्टत्वेनोभयनिरूपणे सम्प्राप्ते प्राथम्ये सुलभप्रसङ्गसङ्गत्योरन्यतरस्याभावादशोकवनिकान्यायप्रायत्वात्तावदौ मूर्खपद्धतिं वर्णयितुमारभते । तत्र प्रथमं सहृदयाभावात्सुभाषितस्य वक्तुमनवकाश इत्याह—बोद्धार इति ॥ बोद्धारः परिज्ञातारः । " बुध अवगमने " इत्यस्माद्धातोस्तृच । मत्सरेणासूयया परोत्कर्षासहनेन ग्रस्ताः समाक्रान्ता न ते हृदयालवः अतो नानुमोदन्ते इति भावः । प्रभवो राजानः । स्मयदूषिता गर्वदुर्विनीता न तु विनयप्रह्वाः । अतो न शृण्वन्तीति भावः । अन्ये उक्तोभयव्यतिरिक्ता जना अबोधेनाज्ञानेनोपहता नष्टास्तस्मात्ते न स्वधिकारिणः । अतस्तेषामाकर्णनयोग्यतापि नास्तीति भावः । तस्मात्सुभाषितं साधुभाषणं प्रियवचनमिति यावत् । नपुंसके भावे क्तः । अङ्गे स्वशरीरे जीर्णमन्तर्हितम् । न कस्यापि बहिः प्रकटितम् । तथापि वक्ष्यामीति तात्पर्यम् । इत्यर्थः ॥ ३ ॥

विद्याभिमानी लोग तो अपने मत्सरहीसे ग्रसित हैं और धनवान् लोग अपने द्रव्यके गर्वसे किसी गुणीका आदरही नहीं करते और जो हैं सो साधारण अल्पज्ञ हैं इसलिये उनसे कहनेकोभी नहीं चाहता इन कारणोंसे सुभाषित (उत्तम काव्य) शरीरहीमें जीर्ण हो जाता है अर्थात् कदाचित् संसारमें प्रकट नहीं होता ॥ ३ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि च तं नरं न रंजयति ॥ ४ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांतरात् ।
समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ॥
भुजङ्गमपि कोपितं सिरसि पुष्पवद्धारयेत् ।
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ८ ॥

अथ द्वाभ्यां मूर्खजनचित्तस्य दुराराध्यतामाह—प्रसह्येति ॥ मकरः शिशुमाराख्यो जलग्राहविशेषः । तस्य वक्त्रे वदनगह्वरे । दंष्ट्राणां निशिताग्रदशनविशेषाणाम् । अन्तरात् अन्तरालात् । अतिसंकटादित्यर्थः । प्रसह्य बलात्कारेण । मणिं रत्नं दुर्धरमपीति भावः । उद्धरेत् उद्धर्तुं शक्नुयात् । जन इति शेषः । केनचिदवधानेनानयेदित्यर्थः । तथा प्रचलन्तो लोलायमाना ये ऊर्मयस्तेषां मालाभिः परम्पराभिराकुलं संकुलम् । उल्लोलकल्लोलोज्जृम्भितमित्यर्थः । समुद्रमपि दुस्तरमपीति भावः । संतरेत् सम्यक् तरितुं शक्नुयात् । केनचित्प्लवनसाधनेनेति भावः । लंघयेदिति पाठे हनुमानिव केनचिच्छक्तिविशेषेण लंघितुं शक्नुयादित्यर्थः । तथा कोपितं संजातकोपं कोपवशात्सफूत्कारं जिह्वयासृक्किप्रान्तौ लेलिहानमित्यर्थः । "तदस्य संजातं तारकादिभ्य इतच्" इतीतच्प्रत्ययः । तारकादिराकृतिगणः । भुजगं सर्पमपि दुर्द्धरमपीति भावः । शिरसि केशपाशे पुष्पेण तुल्यं पुष्पवत् । पुष्पस्रजमिवेत्यर्थः । "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः । धारयेत् धारयितुं शक्नुयात् । मणिमन्त्रादिसाधनेनेति भावः । किंतु प्रतिनिविष्टमभिनिवेशाक्रान्तम् । दुराग्रहाविष्टमिति यावत् । मूर्खजनस्य दुर्विदग्धस्य चित्तं नाराधयेत् आराधयितुं समाधातुं न शक्नुयात् । उपायालाभादिति भावः । मकरदंष्ट्रान्तस्थमण्युद्धरणादिप्रायं मूर्खजनचित्तसमाराधनमिति श्लोकार्थः ॥ ८ ॥

बलात्कारसे मगरके मुखके दाढोंकी जडमेंसे मणिको मनुष्य निकाल सकता है और चंचलतरंगोंवाले भरेहुए समुद्रको तैरके

१ अश्नुयादिति पाठान्तरम् । २ लंघयेत् इति पाठांतरम् ।

पार हो सकता है और क्रोधित सर्पको फूलकी समान मनुष्य शिर पर धर सकता है परन्तु मूर्खका चित्त जो असत् वस्तुमें धसाहुआ है उसे कोई नहीं विलगा सकता है ॥ ५ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन् ।
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥
कदाचिदपि पर्यटञ्छशविषाणमासादयेत् ।
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ६ ॥

-सम्भावनाया चेत्तदनुवाद इति विवेक । उभयथाप्यनुशासनसम्भवात् प्रकृतार्थोपपत्तेश्च । यथाहामरसिंहः । "गर्हासमुच्चयप्रश्नशङ्कासम्भावना-स्वपि ।" इति । अत्र समुद्रं लङ्घयेदित्युदाजहार स्वामी । अत्र मण्युद्धर-णाद्यसम्बन्धेऽपि तत्सम्बन्धाभिधानादतिशयोक्तिः । श्लोकद्वयमेतत्पृथ्वीवृ-त्तम् । तदुक्तं केदारेण वृत्तरत्नाकरे । "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।" इति । अत एव सिकतासु तैलमित्यत्र, मृगतृष्णिकासु सलिल-मित्यत्र, मूर्खजनचित्तमित्यत्र च अष्टमवर्णे विहितस्य विच्छेदस्याभावाद्यतिभ्रष्ट नाम दोष । इममेव केचिदपस्थयति वदन्ति । तदुक्तं विद्यानाथेन । "यत्र स्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते ।" इति । "कुत्रचित्पदमध्ये तु यतिमिच्छन्ति सूरयः । यत्र पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥" इति दतिलवचनमपि समाधातुं न शक्नोति पूर्वापरभागयोरेकवर्णनगदत्वात् । 'निरङ्कुशा खलु कवयो भवन्ति सर्वपर्थीनाः' इत्यलमतिप्रपञ्चेन ॥ ६ ॥

यदि यत्नसे पेरै तो वालूमभी तेल पावे और मृगतृष्णामें प्यासा कदाचित् जलभी पीवे और ढूंढनेसे शशका सींगभी मिलसके परंतु मूर्खका चित्त जो असत्वस्तुमें धसा है उसे कोई नहीं भिन्न कर सम्भाल सकता है ॥ ६ ॥

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते ।
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ॥
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते ।
मूर्खान्यः प्रतिनेतुमिच्छति बलात्सूक्तैः सुधास्यंदिभिः

अथ मूर्खानुनयेच्छोरत्यन्ताऽविवेकितामाह—व्यालमिति ॥ असौ पुमान् व्यालं दुष्टगजं न तु साधारणजन्तुमित्यर्थः । "व्यालो दुष्ट-गजे सर्पे" इति विश्वः । बालमृणालतन्तुभिः कोमलबिसकिसलयसूत्रैः ईष-न्निरोधस्याप्यनुपयुक्तैरिति भावः । रोद्धुं नियन्तुम् । समुज्जृम्भते कृतप्रयत्नो

१ उद्धुमिति पाठान्तरम् । २ नेतुं वाञ्छति यः खलान्पथि सतां इति पाठान्तरम् ।

संमोहयन्ति मदयन्ति विडम्बयन्ति ।
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ॥
एताः प्रविश्य सदयं हृदयं नराणां ।
किं नाम वामनयना न समाचारन्ति ॥ ४९ ॥

समोहयंतीति ॥ एता वामानि सुन्दराणि नयनानि यासां ताः वामनयनाः नराणां पुरुषाणां सदयं दयायुक्तं हृदयं प्रविश्य समोहयन्ति मोहमुत्पादयन्ति, मदयन्ति, विडम्बयन्ति, निर्भर्त्सयन्ति, परं च रमयन्ति विषादयन्ति विषादमुत्पादयन्ति तस्मात् एताः स्त्रियः किं नाम न समाचरन्ति अपि तु सर्वमेव आचरन्ति ॥ ४९ ॥

मोह लेती, मत्त कर देती, विडंबना करती, डांट झिडकन देती, रमण कराती और विरहका विषाद देती है । ऐसी स्त्रियां मनुष्यके सदय हृदयमें प्रवेश करके क्या नहीं करती हैं ॥ ४९ ॥

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृतिपरं ।
मुखाब्जं तन्वंग्याः किल वसति यत्राधरमधु ॥
इदं तत्किंपाकद्रुमफलमिदानीमतिरसं ।
व्यतीतेऽस्मिन्काले विषमिव भविष्यत्यसुखदम् ॥ ५० ॥

अथापातरमणीयरमणीमुखावलोकनेन न विमोहितव्यमित्याह—यदेतदिति ॥ यदेतद्वर्णनीयं तन्वंग्यास्तरुण्याः मुखमब्जमिव मुखाब्जं वक्त्रपद्मं कर्तृ पूर्णेन्दोः पूर्णचन्द्रस्य द्युतिहरं कांतिचोरकं तत्कल्पमित्यर्थः । अब्जस्य पूर्णेन्दुद्युतिहरत्वं विरुद्धमिति ध्वनिः । तथा परमत्यन्तमुदारा रम्या आकृतिराकारो यस्य तत्तथोक्तम् । किं च यत्र मुखाब्जे अधरमधरोष्ठमवच्छिद्य मधु मकरन्दः अमृतं वा वसति अस्ति किल । किलेति वार्तायाम् । न तु कदाप्यनुभूतमित्यर्थः । प्रसिद्धाब्जे तु मकरन्दो वर्तते मुखाब्जे तु वार्तामात्रमेव न तु वस्तुतस्तु तद-

१ दल, वरम् इति च पाठान्तरम् । २ तत्र इति पाठान्तरम् । ३ [illegible] इति पाठान्तरम् । ४ निवसति किल इति पाठान्तरम् ।

अथैषां गतिमाह—स्वायत्तमिति ॥ विधात्रा ब्रह्मणा कर्त्रा । स्वायत्तमात्माधीनं न तु परोपदेशसापेक्षम् । " अधीनो निघ्न आयत्तः " इत्यमरः । एकान्तहितमत्यन्ताहितकारि । स्वानुगुणाच्छादकत्वादिति भावः । तथा विशेषकारेण सार्वविभक्तिकस्तासि । सर्वविदां समाजे सर्वज्ञसभायाम् । विभूषणमुपस्कारहेतुभूतत्वाद्भूषणप्रायकमौनं तूष्णींभावः कर्म वा । " इगन्ताच्च लघुपूर्वात् " इत्यण् । अपण्डितानामविदुषां सम्बन्धिन्याः अज्ञतायाः मौढ्यस्य छादनमाच्छादकं सद्भिर्निर्मितं रचितम् । अतोऽपण्डितैर्निजमौढ्यसङ्गोपनार्थं मौनेनैव वर्तितव्यमिदमेवैतेषां गतिः अन्यथा हास्यास्पदता स्यादिति भावः । एकान्तकृतमिति पाठे तु कृतं कर्म । भावे क्तः । एकान्तकृतं रहस्यनुष्ठितं कर्म अज्ञतायाः छादनं सद्भिर्निर्मितमपण्डितानां मौनम् । भूषणं सद्भिर्निर्मितमिति प्रत्येकमन्वयो द्रष्टव्यः । अज्ञताच्छादनार्थमेकान्त एव कर्म कर्तव्यमपण्डितैर्मौनिभिरेव स्थातव्यम् । अन्यथा स्वरूपप्रकाशनेनापहास्यास्पदता स्यादिति भावः । उपजातिवृत्तम् । इन्द्रोपेन्द्रवज्रामिति लक्षणात् । तौ द्वौ कीदृग्विधौ । " स्यादिन्द्रवज्रा यदि तौ जगौ ग । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजः पादा यदीयाः उपजातयस्ताः । " इति वृत्तरत्नाकरे उक्तत्वात् ॥ ८ ॥

'मौन अर्थात् चुप रहना एक तो अपने अधीन है और भी इसमें अत्यंत हित हैं, विधाताने इसको अज्ञानताका ढकना बनाया है और विशेषकरके सर्वज्ञोंकी सभामें मूर्खोंका मौनही भूषण है ॥८॥

यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवं ।
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ॥
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं ।
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ९ ॥

अथ कस्याचिदनुभाविनः परान् प्रति स्वानुभवप्रकारमाह—यदेति ॥ अकिंचिज्ज्ञः अल्पज्ञः सन् यदा यस्मिन् समये गज इव मदेन दर्पेणान्धः

१ द्विप इति पाठान्तरम् ।

कर्तव्याकर्तव्यविवेकशून्यः समभव जातोऽस्मि तदा तस्मिन् समये सर्वज्ञः अशेषज्ञोऽस्मीति मम मनोऽवलिप्त गर्वितमभवत् । " अल्पविद्यो महागर्वी " इति न्यायादल्पज्ञस्यैव गर्वहेतुत्वादिति भाव । " अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च । " इति विश्वप्रकाश । तदा यदा बुधजनसकाशाद्विद्वज्जनमुखादित्यर्थ । " आख्यातोपयोगे " इत्यपादानात्पञ्चमी । किंचित्किंचित् स्वल्प स्वल्पम् । शास्त्रबोधिताचारादिकमिति शेषः । अवगत ज्ञात तदा मूर्खो मूढोऽस्मीति मे मम मदो ज्वर इव व्यपगतो निर्गतः । अभूदिति शेषः । ज्वरवद्विकारकारित्वान्मदस्यैतत्साम्यमित्यवगन्तव्यम् । " आचार्यवान्पुरुषो वेद " इति श्रवणादाचार्यादवगतविद्यस्यैव विवेकसम्भवादिति भावः । अल्पज्ञोऽपि सन् यः सर्वज्ञमात्मान मनुते स एव मूर्खः । यस्तु सर्वज्ञोऽपि मूढमानी भवति स एव विद्वानिति विवेकः । मदो गर्वहेतुर्गुरुशुश्रूषादिर्विनयहेतुरिति फलितार्थः । यद्वा एतावन्त काल मदवशान्मूढोऽस्मि इदानी गुरुशिक्षावशाद्विवेकावगतिरिति वा योजनीयम् । शिखरिणीवृत्तम् । " रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी " इति लक्षणात् ॥ ९ ॥

जब मै अज्ञ रहा हाथीके समान मदान्ध था तब मेरे मनमें ऐसा गर्व हुआ कि, मै सर्वज्ञ हूं और जब मुझे कुछ कुछ पण्डितोंसे ज्ञान प्राप्त हुआ तब मैंने अपनेको मूर्ख जाना और मेरा वह मद ज्वरके समान उतर गया ॥ ९ ॥

कृमिकुलचितं लालाक्लिन्नं विगंधि जुगुप्सितं ।
निरुपमरसप्रीत्या खादन्खरास्थि निरामिषम् ॥
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते ।
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥१०॥

[illegible] कृमिकुलचितमिति ॥ श्वा शुनकः [illegible] लालाक्लिन्न

१ [illegible] पाठान्तरम् । २ [illegible] इति पाठान्तरम् ।

वसापूरार्द्रम् । यद्वा लाला सृणिका दन्तान्तर्जलमिति यावत् । " सृणिका स्यन्दिनी लाला " इत्यमरः । तया क्लिन्नं खादनसमये तस्यास्तत्र स्रवणादिति भावः । विगन्धि दुर्गंधि । अत्र विशब्दस्य पूतिपर्याय-त्वविवक्षाया " गन्धस्ये० " इत्यादिना समासान्त इकारान्तादेशः । यद्वा विगन्ध आमगन्धोऽस्यास्तीति विगंधि । अत एव जुगुप्सितं तदपि हेयं निरामिषं मांसलेशशून्यं तदपि खरास्थि रासभकीकसम् । निरुपमः उपमानरहितो यो रसः स्वादः तत्र या प्रीतिः प्रेम तया खादन् भक्षयन् पार्श्वस्थमन्तिकस्थम् । " सुपि स्थः " इति कप्रत्ययः । सुरपतिमिन्द्रमपि किमुतान्यमिति भावः । विलोक्य न शंकते न लज्जते । तथाहि क्षुद्रो जन्तुः नीचजन्तुः । परिग्रहे स्वीकृतवस्तुनि फल्गुतां तुच्छत्वं न गणयति न मनुते इत्यर्थः । जुगुप्सितकर्माचरणतत्परो मूर्खोऽप्येवं न महद्भिर्गर्हणाद्बिभेतीति भावः । " पत्नीपरिजनादानमूलशापाः परिग्रहाः । " इत्यमरः । फल्गु तुच्छमसारं च । " फल्गु तुच्छमसारं च " इति यादवश्च । अत्राप्रस्तुतवृत्तान्तकथनात्प्रस्तु-तमूर्खजनप्रतीतेरप्रस्तुतप्रशंसालंकारः । " अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते । अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥ " इति लक्षणात् । इयं चोक्तार्थानुप्राणितेति संकरः । हरिणीवृत्तम् । " भवति हरिणी न्सौ म्रौ स्लौ गौ रसाम्बुधिविष्टपैः " इति लक्षणात् ॥ १० ॥

कीडोंके समूहसे भरा, लारसे भीगा, दुर्गंधसे भरा हुआ निंदित नीरस और निर्मांस, खरके हाडको निर्लज्ज श्वान प्रीतिपूर्वक खाते समय इंद्रकोभी अपने पास खडे हुए देखकर शंका नहीं करता है इससे यह सिद्ध हुआ कि, क्षुद्रजीव जिस वस्तुको ग्रहण करता है उसकी स्वच्छतापर ध्यान नहीं करता ॥ १० ॥

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः[1] क्षितिधरं ।
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ॥

---

१ पतति शिरस्तत इति पाठान्तरम् ।

अथो गङ्गा सेयं पदमुपगता स्तोकमथवा ।
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ११ ॥

अथाविवेकस्यानर्थादिकथनद्वारा विवेकस्यावश्यकत्वं प्रदर्शयति शिर इति ॥ अत्रोत्तरवाक्ये तच्छब्दस्य विद्यमानत्वाद्यच्छब्दोऽध्याहर्तव्यः यत्तदोर्नित्यसम्बन्धात् । उत्तरवाक्यस्थयच्छब्दस्यैव पूर्ववाक्यतच्छब्दानपेक्षितत्वानियमात् । तथा च या गङ्गा स्वर्लोकात् शर्वस्येदं शार्वमैश्वरम् । " ईश्वरः शर्व ईशान " इत्यमरः । " तस्येदम् " इत्यण्प्रत्ययः । शिरः शीर्षमुपगतेति सर्वत्रानुषज्यते प्रथमविशेष । तदनु पशुपतेः शर्वस्य शिरस्तः शीर्षात् । " पञ्चम्यास्तसिल् " । धरतीति धरः । पचाद्यच् । क्षित्याः धरं क्षितिधरं, न हिमवन्तम् उपगता । महीं धरतीति महीध्रः मूलविभुजादित्वात्कप्रत्ययः । यदाह वामनः । महीध्रादयो मूलविभुजादिदर्शनादिति अत एव " महीध्रः शिखरी क्ष्माभृत् " इत्यमरः । उत्तुङ्गादुन्नतान्महीध्राद्धिमवतः पर्वतादवनिं भुवमुपगता । अवनेश्चापि जलधिं समुद्रमुपगता । " नदीनां सागरो गतिः " इति । गङ्गा सागरपूरणेति वचनादिति भावः । अथो अनन्तरम् । " मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथ । " इत्यमरः । सेयं पारिदृश्यमाना गङ्गा मन्दाकिनी स्तोकमल्पं परिमितमिति यावत् । पदं स्थानमुपगता प्राप्ता । यद्वा अधः उक्तप्रकारेणाधःप्रदेशे पाताले वा पदमिति योजना । अथवा तथा हीत्यर्थः । पक्षान्तरे वा । विवेकभ्रष्टानां विवेकशून्यानां स्थानभ्रष्टानां च शतमुखो बहुप्रकारः विनिपातो भङ्गः अधोऽधः पतनं च भवति । विवेकयुक्तानां तु नैवमतो विवेकान्न भ्रशितव्यमिति भावः । यतः सकललोकमहितायाः अपि गङ्गायाः अविवेकादीदृगवस्थापत्तिः किमुतान्येषामिति विवेकस्यात्यन्तावश्यकत्वमित्यवगन्तव्यम् । पुरा किल तत्रभवान् भगीरथो अश्वमेधीयाश्वान्वेषणतत्परतया पातालमुपगतानां कपिलविलोचनानलभस्मीकृतानां सगरकुमारगणानामूर्ध्वलोकप्राप्त्यर्थं स्वर्लोकात्सुरसरितमवतारयामासेति पौराणिकी कथात्रानुसन्धेया । अत्रानेकस्मिन्नाधारे क्रमेणैकस्याधेयस्योक्तत्वात् गङ्गायाः स्थितिकथनात्पर्यायाख्योऽलङ्कारः । यदुक्तं विद्यानाथेन ।

" क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि । एकस्मिन्नथवानेके पर्यायालङ्कृतिर्मता ॥" इति । शिखरिणीवृत्तलक्षणमुक्तम् ॥ ११ ॥

यह गंगा पहिले स्वर्गसे शिवजीके मस्तकपर गिरी फिर वहाँसे ऊँचे पर्वतपर और पर्वतसे पृथ्वीपर पृथ्वीसे समुद्रमे इस क्रमसे नीचे नीचेही गिरती गई और स्वल्प भी होती गई तैसेही विवेकभ्रष्ट लोग भी सर्वदा सौ सौ प्रकारसे गिरतेही जाते हैं ॥ ११ ॥

[1]शक्यो वारयितुं जलेन हुतभुक् शूर्पेण सूर्यातपो ।
नागेन्द्रो निशितांकुशेन समदो दण्डेन गौर्गर्दभः ॥
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं ।
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम १२

अथाग्न्यादीनां निवारणे शास्त्रप्रतिपादितजलादिरूपहेतून् प्रतिपाद्य मौर्ख्यस्य निवारणे शास्त्राभाव हेत्वभाव च स्फुटीकुर्वन्नाह—शक्य इति ॥ हुतभुक् हुत होमद्रव्य हवि पुरोडाशवपादि भुनक्तीति हुतभुक् वैदिकाग्निः । अत्र तु गृहादिदाहकृत् लौकिकोऽग्निरिति मन्तव्यम् । जलेन उदकेन वारयितु निवारयितु शक्य. । एवमग्रेऽपि सूर्यातप सूर्यस्य रवेरातप शूर्पेण वारयितु शक्य इति पदद्वयस्योत्तरत्राप्यनुषग इति मन्तव्यम् । समद मदसहित नागेन्द्रो गजश्रेष्ठ. निशिताकुशेन तीक्ष्णाकुशेन । गौ· वृषभ गर्दभः रासभश्च दण्डेन । व्याधि कुष्ठादिरोग भेषजसग्रहै औषधिसग्रहणैश्च । अत्र चकारात् महामन्त्रजपहोमसुरार्चनदानादिकमपि गृह्यते । " तच्छान्तिरौषधैर्दानैर्जपहोमसुरार्चनै । " इति स्मरणात् । विष कालकूटादि । विविधैर्नानाविधैः मन्त्रै. मन्तार त्रायन्ते रक्षन्तीति मन्त्राः तैर्मन्त्रैः प्रणवादिभिः विविधैः प्रयोगैश्च निवारयितु शक्यमित्यर्थ । तस्मात् सर्वस्य प्राणिहिंसाकारणीभूतदुष्टजन्तुजातस्य शास्त्रविहित शास्त्रविधिचोदितमौषध जलादिरूपभेषजमस्ति । मूर्खस्य तु औषध मूर्खतानिवारणसमर्थ सुभाषितादिरूप नास्ति शास्त्रविहित न वर्तते ॥ १२ ॥

---

१ छत्रेण इति पाठान्तरम् ।

जलसे अग्निका, छातेसे धूपका, पैने अंकुशसे उन्मत्त हाथीका, दंडसे दुष्ट बैल और गदहेका, नानाप्रकारकी औषधियोंसे व्याधिका और मन्त्रप्रयोगसे विषका निवारण होसकता है । ऐसे शास्त्रकी विधिसे सबकी औषधी है परंतु मूर्खकी औषधी नही होसकती ॥ १२ ॥

साहित्यसंगीतकलाविहीनः ।
साक्षात्पशुः पुच्छविषाणहीनः ॥
तृणं न खादन्नपि जीवमान- ।
स्तद्भागधेयं परमं पशूनाम् ॥ १३ ॥

साहित्ये ॥ साहित्ये संगीतस्य कलानामनभिज्ञः ज्ञानं नास्ति एवंभूतो यो नरः स पुच्छविषाणरहितः साक्षात्पशुरेव । तर्हि यदा पशुस्तदा तेन तृणं भक्षणीयं तत्तु न खादति जीवत्यपि । इदं तु इतरपशूनां परममुत्कृष्टं भागधेयमदृष्टम् ॥ १३ ॥

साहित्य और संगीतशास्त्रकी कलासे जो मनुष्य हीन है वह पूंछ और सींगरहित साक्षात् पशु है तृण नहीं खाता और जीता है यह उन पशुओंका परम उत्तम भाग है ॥ १३ ॥

येषां न विद्या न तपो न दानं ।
ज्ञानं न शीलं न गुणो न धर्मः ॥
ते मर्त्यलोके भुवि भारभूताः ।
मनुष्यरूपेण मृगाश्चरन्ति ॥ १४ ॥

येषामिति ॥ येषां न विद्या न तपो न दानं न शीलं सद्वृत्तं तदपि च न गुणः सत्त्वो गुणो न धर्म एवंभूता ये मनुष्यास्तेऽस्मिन्मर्त्यलोके भुवि भारभूताः ततो मनुष्यरूपेण मृगा एव विचरन्ति ॥ १४ ॥

जिनको विद्या, तप, दान, ज्ञान, शील, गुण और धर्म नहीं वे मृत्युलोकमे पृथ्वीपर भाररूप साक्षात् पशु हैं और मनुष्यके स्वरूपसे विचरते हैं ॥ १४ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ॥
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥ १५ ॥

वरमिति ॥ पर्वतदुर्गेषु वनचरैर्व्याघ्रादिभिः सह भ्रमणं वरमुत्कृष्टं परंतु मूर्खजनसंबंध इंद्रभवनेष्वपि मास्त्वित्यर्थः ॥ १५ ॥

पर्वत और वनमें वनचरोंके संग भ्रमण करना अच्छा परंतु मूर्खजनका संसर्ग इन्द्रभवनमें भी बुरा है ॥ १५ ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा ।
विख्याताः कवयो वसंति विषये यस्य प्रभोर्निर्धनाः ॥
तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः ।
कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः १६

अथ मूर्खपद्धतिविलक्षण्येन विद्वत्पद्धतिं वर्णयति । यद्वा यदुक्तं विवेकस्यात्यन्तावश्यकत्वं तस्य शास्त्रपरिज्ञानसाध्यत्वात्तस्य च विद्वदधीनत्वात्तत्पद्धतिवर्णनमिदानीमारभते—शास्त्रेति ॥ शास्त्रैः काणादगौतमीयादिभिरुपस्कृताः अलंकृतास्तथा शब्देन सुन्दराः मनोहरा गिरो वाचो येषां ते तथोक्ताः । अत्र यद्यपि शास्त्रपदग्रहणेनैव सर्वेषां शास्त्राणां संग्रहात्पार्थक्येन शब्दशास्त्रग्रहणे पौनरुक्त्यदूषणं स्यात्तथापि गोबलीवर्दन्यायेन समाधेयम् । तथा शिष्येभ्योऽन्तेवासिभ्यः प्रदेया व्याख्यानरूपेण प्रदातुं योग्या आगमाः सर्वशास्त्राणि येषां ते तथोक्ताः । सम्यक् शिक्षापाटवात् प्रबुद्धाखिलशास्त्रसिद्धान्तत्वेन शिष्यद्वारा व्याख्यातनिखिलागमा इत्यर्थः । यद्वा शिष्येभ्यः प्रदेया विनियोगार्हा न तु कुहकतया गर्भे एव विजीर्णीकृता इत्यर्थः । तथाभूता आगमा येषां ते तथोक्ताः । "आगमः शास्त्र आयतौ" इति विश्वः । अत एव विख्याताः सर्वत्र प्रसिद्धाः कवयो विद्वांसः । निर्धना धनहीनाः सन्तः यस्य प्रभोः राज्ञो विषये देशे सन्निधौ वा सन्ति तिष्ठन्ति । तन्निरर्थत्वेनावस्थानं तस्य वसुधाधिपस्य प्रभोरेव जाड्यं मान्द्यं हैन्यमिति यावत् । "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ् प्रत्ययः । सुधियो विद्वांसस्तु अर्थं धनं विनापि । पृथग्विनेत्यादिना समु-

१ कवयो ऽर्थं इति पाठान्तरम् । २ कुत्सा इति पाठान्तरम् ।

च्यन । ईश्वरा. समर्था. पूज्या इत्यर्थः । विद्याया एव तेषां महाधनत्वादिति भावः । किं तु यैः कुपरीक्षकैः रत्नशास्त्रपरिज्ञानाभावात्कुत्सितपरिज्ञानिभि मणय अमूल्या अपीति भाव. । अर्घतो मूल्यत. पातिता । बहुमूल्याः मणयोऽल्पमूल्याः कृता इत्यर्थः । कुत्स्याः स्युः किम । न स्युरेवेत्यर्थ. । अयमर्थ । विद्वद्भिः प्रभुसमाश्रयेणैव स्थातव्यम् । "सदाश्रयेण शोभन्ते पण्डिता वनिता लता ।" इति न्यायात् । तत्र न ते यदि विद्वन्मनोरथ पूरयेयुस्तत्तेषामेव कुत्सितत्वम् । विद्वासस्तु कुपरीक्षकोपहतमणय इव न कुत्स्या इति । अतः श्रेयस्कामैः प्रभुभिस्तन्मनोरथपूरकैरेव भवितव्यमिति तात्पर्यम् । शार्दूलविक्रीडित वृत्तम् । लक्षण तूक्तम् ॥ १६ ॥

शास्त्रोक्तशब्दोंसे जिनकी वाणी सुन्दर है और शिष्योंके पढाने योग्य जिनकी विद्या है और वे आपभी प्रसिद्ध हैं ऐसे विद्वान् जिस राजाके देशमे निर्धन रहते हैं उसमें जडता राजाहीकी है और कवि लोग तो विना द्रव्यके भी श्रेष्ठ ही हैं जिन्होंने मणियोंका मोल घटाया वे परीक्षा करनेवालेही खोटे है मणि नही ॥१६॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदाऽ- ।
प्यर्थिभ्यः[1] प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ॥
कल्पांतेष्वपि न प्रयाति निधनं विद्याख्यमंतर्धनम् ।
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥१७॥

अथ विद्याधनस्य प्रसिद्धधनवैलक्षण्यवर्णनद्वारा विदुषामुत्कर्षमापादयंस्तेषु गौरवेण विश्वासोत्पादनार्थं नृपान् संबोधयति—हर्तुरिति ॥ यद्विद्याख्य धन हर्तुश्चौरादे । हर्तुमिति तुमुन्नन्तपाठे अपहर्तुमित्यर्थ. । गोचर न याति विषयतां न प्राप्नोतीति नञ्प्रयोगो निर्देश । तस्यात्यन्तदुर्ग्रहत्वादिति भाव । तथा सर्वदा कदाचिदपि किमप्यनिर्वाच्य शं सुख पुष्णाति प्रवर्धयति । "अर्थानामर्जने दुःखम् इति स्मरणात्प्रसिद्ध तु नैवमिति भाव. । अनिशं सर्वदा अर्थिभ्यो विद्यार्थिभ्य याचकेभ्यश्च प्रतिपाद्यमान व्याख्यायमान दीयमानमपि च

[1] यर्थिभ्य इति पाठान्तरम् ।

परामुत्कृष्टां वृद्धिमभ्युच्छ्रय प्राप्नोति । विद्याया व्याख्यानेनाभिवृद्धिसद्भावादिति भावः । तथा कल्पान्तेषु प्रलयेष्वपि निधनं नाशं न प्रयाति न नश्यतीत्यर्थः । कल्पान्तेष्वपीति बहुवचनग्रहणं विद्याधनस्यात्यन्तविनाशाभावप्रकाशनार्थम् । प्रसिद्धं तूक्तविपरीतामिति भावः । तदुक्तम्—" न भोगहार्यो न च बन्धुहार्यो न भ्रातृहार्यो न च राजहार्यो । स्वदेशमित्रं परदेशबन्धुर्विद्यासुधां ये पुरुषाः पिबन्ति ॥ " इति तद्विद्याख्यं विद्याभिधानम् । यत्तदोर्नित्यसम्बन्धात्तच्छब्दस्याध्याहारः । अन्तर्धनमभ्यन्तरस्थवित्तं येषां पुरुषाणामस्तीति शेषः । अतस्तान्विद्याधनान् प्रति हे नृपा राजानो । मानं कोपं दुराग्रहमिति यावत् । उज्झत त्यजत । तैर्विद्वद्भिः सह कः पुमान् स्पर्धते निगृह्णाति । न कोऽपीत्यर्थः । ततस्ते सदा सर्वदा गौरवेण बहुमाननीया इति भावः । अत्रोपमानोरप्रसिद्धधनादुपमेयस्य विद्याधनस्याधिक्यकथनाद्व्यतिरेकालङ्कारः । " उपमानाद्यदन्यस्य व्यतिरेकः स एव सः । " इति काव्यप्रकाशकारलक्षणात् । वृत्तं पूर्ववत् ॥ १७ ॥

चुरानेवालेको नही देख पडता और सदा सुखकी वृद्धि करता है और निरंतर याचकोंको दिया जाय तो परम वृद्धिको प्राप्त होता है और कल्पांतमभी जिसका नाश नही ऐसा विद्यारूपी अंतर्धन जिनके पास है तिनसे हे राजालोगो ! अभिमान छोड दो क्योंकि उनके समान जगत्में दूसरा कौन है ? ॥ १७ ॥

अधिगतपरमार्थान्पण्डितान्मावमंस्था-।
स्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि ॥
अभिनवमदरेखाश्यामगण्डस्थलानां ।
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १८ ॥

अथ त्वदीयलक्ष्मीर्न तेषां प्रतिबन्धिका अतस्तेषु बहुमानाचरणतत्परेणैव भवितव्यमिति सदृष्टान्तं राजानं सम्बोधयति—अधीति ॥ हे नृप ! अधिगतपरमार्थान् विज्ञाततत्त्वार्थान् सर्वे गत्यर्था ज्ञानार्था इति न्यायात् । अथवा प्राप्तपुरुषार्थान् । पण्डितान् विदुषो मावमंस्थाः मावमानय । मन्यतेरवपूर्वा-

स्त्वाङि थाम् । " न माङ्योगे " इत्यट्प्रतिषेधः । कुतस्तृणमिव लघु लक्ष्मीः निःसारा लक्ष्मीस्त्वदीयसम्पत्तिः । " शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति गीयते । " इति विश्वः । तान् पण्डितान् नैव सरुणद्धि । ईषदपि सरोद्धुं न शक्नोतीत्यर्थः । तत्र दृष्टान्तः । अभिनवमदरेखाभिः दानधाराभिः श्यामानि गण्डस्थलानि येषां तेषां वारणानां मत्तेभानां बिसतन्तुः मृणालसूत्रं वारणं प्रतिबन्धकभूतं न भवति । अतः पण्डितेषु बहुमानाचरणतत्परत्वेनैव वर्तितव्यमित्यर्थः । अत्र दृष्टान्तालङ्कारः । " यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते । सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते ॥ " इति लक्षणात् । स चोक्तोपमयाङ्गेन सङ्कीर्यते । मालिनीवृत्तम् । " ननमयययुतेयं मालिनी भोगिलोकैः । " इति लक्षणात् ॥ १८ ॥

जिनको परमार्थ अर्थात् मोक्षपर्यंतका साधन प्राप्त है ऐसे पंडितोंका अपमान मत करो क्योंकि उनको तृणकी तुल्य तुम्हारी लक्ष्मी न रोकसकेगी जैसे नवीन मदकी धारासे शोभित श्याममस्तकवाले हाथीको कमलकी डंडीका सूत नहीं रोकसकता ॥ १८ ॥

अम्भोजिनीवनविहारविलासमेव ।
हंसस्य हन्ति नितरां कुपितो विधाता ॥
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां ।
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ १९ ॥

किं बहुना ब्रह्मापि तदीयवैदग्ध्यापहरणे न शक्त इति दृष्टान्तमुखेनाह— अम्भोजिनीति ॥ विधाता ब्रह्मा कुपितः केनचिद्धेतुना क्रुद्धः सन् हंसस्य निवासभूतमम्भोजिनीवने पद्मिनीवने यो विहारः क्रीडा स एव विलासः लीला तमेव न त्वन्यत् नितरामतिशयेन हन्ति नाशयति । अपहर्तुं विहन्तुमिति पाठे एकं केवलं विलासमित्यन्वयः । अम्भोजाकरमशोषणे तत्र विहरणसुखमपहर्तुं शक्नोतीत्यर्थः । किं त्वसौ विधाता हंसस्य दुग्धजलयोः क्षीरनीरयोर्भेदविधौ विभागकरणे विषये प्रसिद्धां प्रख्याता

१ निवास इति पाठान्तरम् । २ हन्तुं इति पाठान्तरम् ।

वैदग्ध्यकीर्ति वैदग्ध्येन । " कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते ।" इत्युक्तलक्षणनैपुण्येन प्रयुक्ता या कीर्तिस्तामपहर्तुं न शक्नोति । हंसो हि क्षीरमिश्रिते नीरं नीरं विहाय क्षीरं गृह्णातीति प्रसिद्धिः । एवं कुपितः राजा स्वविषयवासादिभङ्गमात्रमेव कर्तुं शक्नोति न तु तेषामशेषविद्यापरिशीलनजनितचातुर्यभङ्गमतो निष्कोपेन भवितव्यं विद्वत्सु शक्नोति तात्पर्यम् । अत्राप्रकृतविधातृवृत्तान्तकथनात् प्रस्तुतराजविद्वज्जनप्रतीतेरप्रस्तुतप्रशंसालङ्कारः । लक्षणं तूक्तम् । वसन्ततिलकावृत्तम् । " उक्ता वसन्ततिलका तभजा जगौ गः " इति लक्षणात् ॥ १९ ॥

हंसपर यदि विधाता कोप करे तो उसका कमलवनमें विहाररूप विलास नष्ट करसकता है परंतु उसके दूध और जल विलगानेकी प्रसिद्ध पंडिताई (चतुराई) की कीर्तिको विधाताभी नहीं नाश करसकता ॥ १९ ॥

केयूराणि न भूषयंति पुरुषं हारा न चंद्रोज्ज्वला ।
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः ॥
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते ।
क्षीयंतेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥२०॥

अथ विदुषां तावद्विद्यैव भूषणरूपमस्त्यातिरित्याह द्वाभ्याम्—केयूराणीति ॥ केयूराण्यङ्गदानि । यद्यपि केयूरयोर्निजभुजाशिरोभूषणत्वेन द्वित्वमेव वक्तव्यं तथापि तद्विशेषविवक्षायां बहुवचनप्रयोग इति मन्तव्यम् । पुरुषं जनं न भूषयन्ति नालङ्कुर्वन्तीति यथायोगं सम्बध्यते । चन्द्रवदुज्ज्वला धवलतराः हारा मुक्ताहाराश्च न भूषयन्ति । स्नानमभिषेकोऽपि न भूषयति । विलेपनं घनसारकस्तूरीगन्धसारचर्चापि न भूषयति । कुसुमं मल्लिकामालतीचम्पकादिपुष्पमपि । जातावेकवचनम् । न भूषयति । अलङ्कृता अन्यङ्गपुष्पमाल्यादिना सम्यक्प्रसाधिता मूर्धजाः शिरोरुहा अपि न भूषयन्ति । पुरुषमिति सर्वत्रानुषङ्गः । किंतु एका केवला वाणी पुरुषं समलङ्करोति । सम्यग्भूषयति । केयं वाणीत्यत आह ।

या सम्कृता व्याकरणादिपरिशुद्धा धार्यते स्वायत्ताक्रियते । सेत्यस्याहनतच्छब्देन सम्बन्धः । ननु केयूरादीना विभूषणत्वेन प्रसिद्धत्वात्तन्निषेधे प्रत्यक्षापलापः स्यादित्याशङ्क्य तेषा क्षयिष्णुत्वान्न तथात्वमित्याह । अखिलभूषणानि केयूरायुक्ताशेषभूषणानि क्षीयन्ते कालक्रमेण नश्यन्ति । क्षीयन्ते खल्विति पाठे खलुशब्दो वाक्यालङ्कारे । वाग्भूषण सस्कृतवाग्रूपभूषण तु सतत भूषण नित्यभूषण कदापि न नश्यतीत्यर्थः । व्यतिरेकालङ्कारः । लक्षण तदुक्तम् । एतत्पादद्वयेकृतचतुष्टय शार्दूलविक्रीडित वृत्तम् ॥ २० ॥

बिजायठ कंकण और चन्द्रमाके समान उज्ज्वल मोतियोंके हार स्नान चंदनलेपन फूलोंका शृंगार और सुधरे हुए केशादि पुरुषोंको भूषित नहीं करसकते केवल वह वाणी जो संस्कारयुक्त धारण की गई हो सो पुरुषको भूषित करसकती है और सब भूषण अवश्य क्षय हो जाते हैं परन्तु केवल वाणीहीका भूषण भूषणकी ठौर रह जाता है ॥ २० ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं ।
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥
विद्या बंधुजनो विदेशगमने विद्या परा देवता ।
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः२१

उभयत्रापि "कृञो हेतुताच्छील्यानुलोम्येषु" इति टप्रत्यये टित्त्वात् ङाप् । तथा विद्यां गृणन्त्युपदिशन्तीति गुरवस्तेषां हिताहितोपदेष्टॄणामाचार्याणामपि । गुरुरुपदेष्टृभूता । तथा परमार्थबोधकत्वादिति भावः । विद्या विदेशगमने प्रवासे बन्धुजनः सुहृज्जन । तद्वद्विशेषोपचारसम्पादकत्वादिति भावः । तदुक्तम्—"स्वदेशमित्र परदेशबन्धु विद्यासुधा ये पुरुषाः पिबन्ति ।" विद्या परा देवता परमात्मभूता मोक्षदायकत्वादिति भावः । यद्वा परा देवता स्वामीष्टदेवता ऐहिकामुष्मिकफलत्वादिति भावः । विद्या राजसु राजमध्ये पूज्यते प्रशस्यते । गौरवसम्पन्नत्वाद्राजपूज्या भवतीत्यर्थः । यद्वा विद्याशब्देन विद्यावान् लक्ष्यते राजशब्देन च तत्सभा लक्ष्यते । तथा च विद्यावान् राजसभासु पूज्यते पुरस्क्रियते सम्भाव्यत इति यावत् । धन द्रव्य तु न ह्युक्त-प्रकार भवतीत्यर्थः । तस्माद्विद्यया उक्तरूपया विहीनः शून्यः जनः पशुः पशुप्रायः कर्तव्याकर्तव्यविवेकराहित्यादिति भावः । अतो बहूपकारकत्वा-द्विशिष्टविद्यैव प्रधान न त्वन्यदिति तात्पर्यम् । अत्र विद्यायाः रूपधनाद्याकारेण बहुधानिरूपणान्निरवयवमालारूपकालङ्कारः ॥ २१ ॥

'विद्यारूपी वस्तु मनुष्यका अधिकरूप और छिपा हुआ अंत-र्धन है और विद्याही भोग यश और सुखकी संपादन करनेवाली और गुरुओंकी गुरु है । परदेशमें विद्याही बन्धुजन है और विद्याही परमदेवता है और विद्याही राजालोगोंमे पूज्य है, कुछ धन नहीं पूजित है इसलिये विद्याविहीन नर पशु है ॥ २१ ॥

क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां ।
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ॥
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि ।
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् २२

अथ लोकहिताहितवर्णनप्रसङ्गात्तस्या एव प्रकृष्टैश्वर्यभावमाह—क्षान्तिरिति ॥ देहिनां प्राणिनां क्षान्तिः तितिक्षा परिभवादिप्रत्यनुमानेषु क्रोधप्रतिबन्धक इति

यावत्। अस्ति चेत् तर्हि कवचेन वर्मणा किं फलमिति सर्वत्रानुषज्यते । न किञ्चिदपीत्यर्थः। तस्या एवारुन्तुदानामनवकाशप्रदत्वादिति भावः। क्रोधश्चित्त-क्षोभोऽस्ति चेत् अरिभिः शत्रुभिः किम् । तस्यैवान्तःशत्रुत्वादुपद्रवहेतुत्वाच्चेति भावः । ज्ञातिर्दायादोऽस्ति चेदनलेनाग्निना किम्। तस्यैव सर्वार्थनिर्मूलनिदान-त्वादिति भावः । सुहृत् सन्मित्रमस्ति यदि । " सुहृद्दुर्हृदौ मित्रामित्रयोः " इति निपातनात्साधु. । दिव्यौषधै. सिद्धौषधैः किं फलम् । न किञ्चिदपि तस्यैवारोग्यकरत्वादिति भावः । दुर्जनाः खलाः सन्ति यदि सर्पैरहिभिः किं तेषामेव प्राणापहारित्वादिति भावः । अनवद्या निर्दुष्टा । [illegible]त्यादिना निपातनात्साधुः ततो नञ् समासः । " तस्मान्नुडचि " इति नुडागमः । विद्या चेद्वेदाद्याध्यात्मिका अस्ति यदि धनैः किम् । तस्या [illegible]भोगसाधनकरत्वादिति भावः । व्रीडा अकार्यप्रवृत्तौ मनःसङ्को-[illegible] भूषणैः किं हारनूपुराद्यलङ्करणैः किम् । तस्या एव [illegible]त्वादिति भावः । सुकविता सत्पाण्डित्यम् । " सत्यावाम् [illegible] कविः " इत्यमरः । यदा कवयति वर्णयति रसोल्लसितशब्दार्थ-[illegible] भावस्तत्ता यदि राज्येन भूमण्डलाधिपत्येन [illegible] । [illegible] सकलश्लोकवशीकरत्वादिति भावः । राज्ञो भावः कर्म वा [illegible] । पुरोहितादित्वाद्यक्प्रत्ययः ॥ २२ ॥

यदि क्षमा हो तो कवचका क्या काम है, और जिस मनुष्यमें क्रोध है तो उसे शत्रुकी क्या आवश्यकता है, यदि ज्ञाति है तो उसे अग्निका क्या प्रयोजन है और जो अपने इष्टमित्र समीप हैं तो दिव्य औषधियोंमें क्या फल है, जिसके दुर्जन विद्यमान हैं उसका सर्प और अधिक क्या करेंगे और जिसको निर्दोष विद्या है तो उसे धनसंचयसे क्या होगा और जिसमें लज्जा है तो उसके फिर और भूषण क्या हैं और जिसकी सुन्दर कविता है उसके आगे राज्य क्या है ॥ २२ ॥

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने ।
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ॥

शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता।
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः २३

अथ विदुषां गुणवर्णनपूर्वकं लोकव्यवस्थापकत्वमाह—दाक्षिण्यमिति ॥ स्वजने बन्धुजनेष्वित्यर्थः। जातावेकवचनम्। एवमुत्तरत्रापि। दाक्षिण्य छन्दानुवर्तनम्। अन्यथा त्वानन्दयेयुरिति भावः। 'दक्षिणः सरलो वामपरच्छन्दानुवर्तिषु' इति भावः। परिजने भृत्यजनेषु विषये दया दारिद्र्यादितदुःखप्रहाणेच्छा। अन्यथा विजह्युरिति भावः। दुर्जने खलजनेषु विषये सदा शाठ्यं विप्रियकारित्वम्। अन्यथा अविक्षिपेरन्निति भावः। साधुजने सज्जनेषु विषये प्रीतिः स्नेहः आदर इति यावत्। अन्यथानुतपेयुरिति भावः। नृपजने राजसु विषये नयो नीतिः। अनुवर्तनतात्पर्यमिति यावत्। अन्यथा दण्डयेरन्निति भावः। विद्वज्जने पण्डितजनेषु विषये आर्जवमवक्रता। अन्यथा निषिध्येरन्निति भावः। शत्रुजने शत्रुजनेषु विषये शौर्यं विक्रान्तत्वम्। अन्यथा निपातयेरन्निति भावः। गुरुजने पित्रादिषु विषये क्षमा सहिष्णुत्वम्। अन्यथा शपेरन्निति भावः। कान्ताजने नारीजनेषु विषये धृष्टता प्रागल्भ्यं च। अन्यथा वशीकुर्युरिति भावः। इत्येवमुक्तविधासु कलासु शिल्पेषु। "कला शिल्पे कालभेदे चन्द्रांशे कलना कला।" इति वैजयन्ती। ये च पुरुषाः ते कुशला निपुणाः तेषु पुरुषेष्वेव लोकस्थितिः लोकमर्यादा अस्तीति शेषः। त एव लोकव्यवस्थासंस्थापकाः न तूक्तगुणरहिता इत्यर्थः। एवंभूतास्तु विद्वांस एव न त्वन्य इति हृदयम् ॥ २३ ॥

अपने कुटुम्बके विषे उदारता, परजनपर दया, दुर्जनसे सदा शठता, साधुजनसे प्रीति, राजसभामें नीति, पण्डितोंसे नम्रता सुधाइ, शत्रुजनोंमें शूरता, बडे लोगोंमें क्षमा और स्त्रियोंमें धूर्तता जो पुरुष इस भांति इन सब कलाओंमें निपुण हैं तिन्हींमें लोकाचारकी स्थिति अर्थात् लोकमें वेही उत्तम होते हैं ॥ २३ ॥

---

१ नारीजने धूर्तता इति पाठान्तरम्।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं ।
मानोन्नतिं दिशति पापमपाकरोति ॥
चेतः प्रसादयति दिक्षु तनोति कीर्तिं ।
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥२४॥

इत्थं [illegible]जनाननुवर्ण्य सम्प्रति सत्सङ्गते श्रेयस्करत्वमाह—जाड्यमिति ॥ धियः बुद्धेर्जाड्यं मान्द्यं हरति निरस्यति । वाचि वचने सत्यं सूनृतभावं [illegible] । मानोन्नतिं बहुमानातिशयं दिशति प्रयच्छति । पापं [illegible]करोति नाशयति । धर्मोपदेशादिनेति भावः । तथा चेतः प्रसादयति [illegible] । [illegible]शादिनेति भावः । दिक्षु दशसु कीर्तिं तनोति विस्तार[illegible] । [illegible] सज्जनसमागमः पुंसां किं श्रेयो न करोति कथयेति [illegible] । सर्वमपि श्रेयः करोत्येवेत्यर्थः । अतस्तैरेव सङ्गति[illegible] तात्पर्यम् । अत्र क्रियाणां बहूनां समुच्चित[illegible] । "गुण[illegible]समुच्चय उदाहृतः ।" इति [illegible] । [illegible] नाम् ॥ २४ ॥

[illegible] जड़ताको हरती, वाणीमें सत्यको सींचती, मनको बढ़ाती, पापको दूर करती, चित्तको प्रसन्न करती और दिशाओंमें [illegible] फैलाती, यह सत्संगति कहो तो पुरुषके क्या नहीं करती है ॥ २४ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ॥
नास्ति तेषां यशःकाये जरामरणजं भयम् ॥ २५ ॥

भीमाः पण्डितोत्तमाः इति वा । जयन्ति सर्वोत्कर्षेण वर्तन्ते । अद्यापीति शेषः। यद्वा रससिद्धा सिद्धरसाः ब्रह्मसाक्षात्कारवन्त इत्यर्थः । " रसो वै सः " इति श्रुतेः । " शृङ्गारादौ विषे वीर्ये पारदे ब्रह्मवर्चसि । रेतस्यास्वादने हेम्नि निर्यासेऽमृतशब्दयोः ॥ रस. " इत्यभिधानाच्च । कवीश्वराः कवयः क्रान्तदर्शिनस्तेषामीश्वराः कालत्रयाभिज्ञा ब्रह्मविद्याविशारदा इत्यर्थः । जयन्ति । कुतस्तेषां कवीश्वराणां यशःकाये कीर्तिशरीरे जरामरणाभ्यां जात मिति तथोक्तं भयं नास्ति । रससिद्धानां भौतिकशरीर एव जरामरणभयं नास्ति यशःशरीरे तु किं वक्तव्यं तस्य कल्पान्तस्थायित्वादिति भावः । अत्र रससिद्धपदार्थस्य विशेषणगत्या भयाभावपदार्थं प्रति हेतुत्वात्काव्यलिङ्गभेदः। वृत्तमुक्तम् ॥ २५ ॥

ऐसे पुण्यवान् रससिद्ध सबसे उत्तम कवीश्वर हैं जिनकी यश-रूपी कायामें जरामरणका भय नहीं होता ॥ २५ ॥

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः ।
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ॥
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं ।
तुष्टे विष्टपहारिणीष्टदहरौ संप्राप्यते देहिना ॥ २६ ॥

सूनुरिति ॥ सूनुः पुत्रः सच्चरितः सद्वृत्तः सती प्रियतमा स्वामी प्रसादोन्मुखः स्निग्धं स्नेहयुक्तं मित्रम् अवञ्चकः परिजनः स्वकीयजनसमुदायः निःक्लेशलेशमाधिरहितं स्वस्थं मनः आकारो रुचिरः स्थिरश्च विभवसामर्थ्यं विद्ययावदातं शोभितं मुखमिति एते पदार्था विष्टपहारिणि स्वर्गवासिनीष्टदहरौ नारायणे तुष्टे प्रसन्ने सति देहिना पुण्येण प्राप्यन्ते ॥ २६ ॥

सदाचरणवाला पुत्र, पतिव्रता स्त्री, सर्वदा अनुग्रह करनेवाला स्वामी, प्रेमी मित्र, अवंचक कुटुंबके लोग, क्लेशके लेशसे रहित मन, सुंदर स्वरूप, स्थिर सम्पत्ति और विद्यासे शोभायमान मुख यह सब उस मनुष्यको प्राप्त होते हैं जिसपर स्वर्गपति मनोरथ दाता हरि प्रसन्न हों ॥ २६ ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा- ।
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ॥
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः ।
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥२७॥

शत्रुसंहरणसामर्थ्यं शौर्यमिति विवेकः । अत्र प्रायेणाप्रस्तुतप्रशंसालङ्कारोऽनुसन्धेयः । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ २७ ॥

भूंखके मारे दुर्बल, वृद्धावस्थासे क्लेशित, शक्तिहीन, कष्टकी दशाको प्राप्त, तेजहीन और प्राणभी नाश होनेपर हो तोभी मत्तगजराजके विदारे हुए मस्तकके मांसके ग्रासकी सर्वदा अभिलाषा करनेवाला सिंह जो मानसे बडा अग्रगण्य है वह क्या सूखी घास खायगा ? ॥ २७ ॥

स्वल्पस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः ।
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ॥
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं ।
सर्वः कृच्छ्रगतोऽपि वांछति जनः सत्वानुरूपं फलम् २८

क्षुद्रजन्तुस्तु नैवमिति उक्तमेवार्थं भङ्ग्यन्तरेणाह—स्वल्पेति ॥ श्वा शुनकः स्वल्पयोः लेशमात्रयोः स्नायुवसयोः । स्नायुर्वस्नसाख्यनाडीभेदः । वसा मेदः । तयोः रससेकेन मेलनेन मलिनं मलदूषितमपि । " वस्नसा स्नायुरस्त्रियाम् । हृन्मेदस्तु वपा वसा " इत्यमरः । निर्मांसं मांसलेशशून्यमपि गोः । " स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्योः स्त्रिया पुंसि गौः "-इत्यमरः । अस्थि कीकसं लब्ध्वा परितोषमेति सन्तुष्यति । तच्च गवास्थि तु तस्य शुनः क्षुधा । " आप चैव हलन्तानाम् " इति वचनाट्टाप् । तस्याः शान्तये क्षुन्निवारणाय न । पर्याप्तं न भवतीत्यर्थः । अस्तिर्भवन्तिपरः प्रयुज्यमानोऽप्यस्ति ' इति भाष्यकारवचनात् भवन्तीति लटः पूर्वाचार्याणां संज्ञा । नीचजन्तोरिति भावः । सिंहस्तु अङ्कं समीपमागतमपि समीपवर्तिनमपीत्यर्थः । " अङ्कः समीप उत्सङ्गे चिह्ने स्थानापवादयोः । " इति विश्वः । जम्बुकं क्रोष्टारं त्यक्त्वा अनादृत्यालक्षीकृत्येति यावत् । द्विपं गजमेव दूरस्थमपीति भावः । निहन्ति विदारयति । तथा हि कृच्छ्रगतोऽप्यतिसङ्कटस्थोऽपि सर्वोऽपि जनः सत्वानुरूपं स्वशक्त्यनुगुणं फलं लाभं

१ शेष इति पाठांतरम् । २ तु इति पाठान्तरम् ।

वाञ्छति । न तु दुर्बलः. प्रकृष्टफलाकाङ्क्षी प्रबलो निकृष्टफलाकाङ्क्षी च भवति । अतः श्वसिंहदृष्टान्तेन नीचानीचजन्तुपरिग्रहतारतम्येण भवितव्यमायु-ष्मतेति भावः । वृत्तं पूर्ववत् ॥ २८ ॥

छोटेसे बैलके हाडका टुकडा कुछ पित्त और चर्बी लगा हुआ मलिन और निर्मांस पाकर कुत्ता प्रसन्न हो जाता है यद्यपि उससे उसकी भूख नहीं जाती और सिंह गोदमें आये हुए स्यारको छोड़कर भी हाथीको जाकर मारता है इससे यह सिद्ध हुआ कि, समस्त जन कैसे भी दुःखी होवें परन्तु वे अपने अपने पुरुषार्थके अनुसार फलकी इच्छा करते हैं ॥ २८ ॥

लाङ्गूलचालनमधश्चरणावपातं ।
भूमौ निपत्य वदनोदरदर्शनं च ॥
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु ।
धीरं विलोकयति चाटुशतैश्च भुंक्ते ॥२९॥

पूंछ हिलाना, चरणोंपर झुककर शिर देना, पृथ्वीपर लोटके पेट और मुँह दिखलाना इत्यादि दीनता कुत्ता टुकडा देनेवालेके आगे करता है और गजराज अपने आहार देनेवालेकी ओर एकचेर गंभीरतासे देखता है और अनेक भाँतिकी प्रार्थनासे भोजन करता है ॥ २९ ॥

[1]परिवर्तिनि संसारे मृतः को वा न जायते ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ३० ॥

अथ मानशौर्यसम्पन्नतया वंशवर्धनस्यैव जनस्य सत्तालाभो न त्वन्यस्येत्याह—परिवर्तिनीति ॥ परिवर्तिनि धर्माधर्मवशात्पौनःपुन्येन विवर्तमाने संसारे जरामरणरूपे संसारचक्रे को वा पुमान् मृत प्रेतः न जायते न भवतीति उत्पन्नो वा न भवतीति शेष । यद्वा को वा न मृतः को वा न जायते नोत्पद्यते सर्वोऽप्युत्पन्नो मृतश्च भवत्येवेत्यर्थः । "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । " इति भगवद्वचनादिति भाव । ततः किमत आह । स पुमान् जात उत्पन्नो जन्मलाभवानिति यावत् । कोऽसावित्यत आह । येन जातेनोत्पन्नेन पुंसा वंशोऽन्वयः समुन्नतिं महोन्नत्यं याति प्राप्नोति । वंशोद्धारको यः पुमान् स एव जन्मलाभवानेवम्भूतत्व च मानशौर्यसम्पन्नस्यैव न त्वन्यस्यात' किमन्यैरजागलस्तनवदुत्पन्नैर्मशकवद्विनष्टैश्चेति भाव । आनुष्टुभ वृत्तम् ॥ ३० ॥

वही पुरुष जगत्मे जन्मा, जिसके जन्मसे वंशकी उन्नति हो, नही तो इस चक्रकी नाई घूमते भये संसारमें मरके कौन नहीं जन्म पाता है ॥ ३० ॥

[1]कुसुमस्तवकस्यैव द्वयी वृत्तिर्मनस्विनाम् ॥
मूर्ध्नि वा सर्वलोकस्य शीर्यते[2] वन एव वा ॥ ३१ ॥

इत्थम्भूतस्य पुरुषस्य व्यापारमाह—कुसुमेति ॥ कुसुमस्तवकस्येव पुष्पगुच्छस्येवेत्येक पदम् । मनस्विनो धीरस्य मानशौर्यशालिनः पुंस

१ द्वे गती स्तो इति पाठान्तरम् । २ विशीर्येत वनेऽथवा इति पाठान्तरम् ।

इत्यर्थ । द्वयी द्विविधा वृत्तिर्व्यापारः । द्वे गती हीति पाठे स्पष्टोऽर्थः । तृतीया तु न सभवतीत्यर्थः । किं तद्वृत्तिद्वयमित्यत आह । सर्वलोकस्य सर्वेषां जनानामित्यर्थः । मूर्ध्नि शिरस्युन्नतस्थाने च क्षायन्त एवेति शेषः । अथवा वन एवारण्ये शीर्यते वा जीर्यते वा । भावे लट् । एवमुभया वृत्तिः शीर्षादुन्नतस्थानस्थितिस्तदलाभे अरण्ये जीर्णता वेति विवेकः । इयमेव पुनः श्रेयस्करी वृत्तिरिति भावः । कुसुमस्तवकस्येवेत्यत्र समासः । श्रौती पूर्णोपमालङ्कारः इवशब्देन सह समासस्य सभवात् । तथा च वार्तिकम् । "इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिः परत्व न " इति । वृत्त पूर्ववत् ॥ ३१ ॥

फूलके गुच्छेके समान श्रेष्ठ जनोंकी रीति दो प्रकारकी है या तो सब लोगोंके मस्तकहीपर शोभित होंगे अथवा वनहीमें शुष्क होके नष्ट हो जायँगे ॥ ३१ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ॥
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ[1]।
भ्रातः[2] पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥३२॥

पुनरप्युक्तोभयगुणवैशिष्ट्यस्यैवोत्कृष्टतामाह—सन्तीति ॥ अन्ये वक्ष्यमाणसूर्यचन्द्रापेक्षया इतरे बृहस्पतिप्रभृतयः बृहस्पतिप्रमुखाः । प्रभृतिशब्देन बुधशुक्रादयोऽपि गृह्यते । पञ्च षड् वा पञ्चषाः । "सख्ययाव्यया०" इत्यादिना बहुव्रीहिः । "बहुव्रीहौ सख्येये डजबहुगणात्" इति समासान्तो डच्प्रत्ययः । संभाविताः प्राशस्त्येनोपस्थिता बहुमता वा । सन्ति वर्तन्ते । तान् प्रति बृहस्पतिप्रभृतीन् लक्ष्यीकृत्येत्यर्थः । विशेषेषु विशिष्टेषु तेजस्विष्विति यावत् । विक्रमे पराक्रमणे रुचिः प्रीतिर्यस्य स तथोक्तः । तेजिष्ठैः सहैव कलहाचरणतत्पर इत्यर्थः । एष उपरागकर्तृत्वेन प्रसिद्धो राहुः सैंहिकेयः न वैरायते वैरं न करोति । अल्पतेजस्त्वात्तत्कलहस्यानादरो ग

1 भासुरौ इति पाठान्तरम् । 2 हेमन्त इति पाठान्तरम् ।

भवतीत्यर्थः । " शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे " इति क्यङ् । " अकृत्सार्वधातुकयोर्दीर्घः " इति दीर्घः । विक्रमरुची राहुरित्यत्र " रो रि" इति रेफलोपे " ढ्रलोपे पूर्वस्य दीर्घोऽणः " इति दीर्घः । किंतु भास्वरौ तेजस्विनौ । " स्थेशभास० " इत्यादिना वरच्प्रत्ययः । द्वावमू दिवाकर-निशाप्राणेश्वरौ सूर्याचन्द्रमसावेव । अन्ययोगव्यवच्छेदार्थकोऽयमेवकारः । शीर्षमेवावशेषो यस्याः सा शीर्षावशेषा आकृतिर्यस्य । शिरोमात्रावशिष्टगात्र इत्यर्थः । शीर्षावशेषीकृत इति पाठेऽप्ययमेवार्थः परिणमयितव्यः । दान-वपतिर्दानवेश्वरः पूर्वोक्तराहुः पर्वणि दर्शपौर्णमासीप्रतिपत्सन्धौ ग्रसति गिलति । हे भ्रातरित्यादरेण पृथग्जनसंबोधनम् । पश्येत्यत्र वाक्यार्थः कर्म । यतः शिरोमात्रावशिष्ट एवायमीदृक्कर्माचरणतत्परोऽभूत् । सपूर्णाङ्गश्चेत् किं कारि-ष्यति न जानामीति भावः । एवं मानशौर्यशालिनो हि निजाङ्गवैकल्यं न परिगणयेयुरिति । किंतु महत्कार्यमेव कर्तुं व्यवस्यन्तीति तात्पर्यम् । पुरा किल देवानाममृतप्रदानसमये विष्णुचक्रेण छिन्नशीर्षत्वाच्छिरोमात्रावशिष्टगा-त्रोऽभूत् सैंहिकेय इति पौराणिकी कथात्रानुसन्धेया । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ ३२ ॥

बृहस्पति आदि और भी पांच छः ग्रह आकाशमें श्रेष्ठ हैं पर विशेष पराक्रमकी इच्छा करनेवाला राहु तिनके प्रति वैर नहीं करता है, हे भाइयो ! देखो कि, अमावस और पूर्णिमाको दान-वपति राहु जो केवल मस्तकही मात्र रहगया है तिसपरभी दोंही दिनेश्वर शोभाकर सूर्य और चन्द्रमा पूर्णतेजवालोंको जाकर ग्रसता है ॥ ३२ ॥

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां ।
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ॥
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा- ।
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ३३ ॥

---

१ विधार्यते इति पाठांतरम् ।

अथ महता माहात्म्यमाह—वहतीति ॥ शेषः फणाः सहस्रसंख्याकाः स्फटाः फलकानीव तेषु स्थितां भुवनश्रेणिं पातालादिचतुर्दशविष्टपपंक्तिं वहति धारयति । " स्फटायां तु फणा द्वयोः " इत्यमरः । स च शेषः कमठपतिना आदिकूर्मेण । " पतिः समास एव " इति घिसंज्ञाया, " आङो नास्त्रियाम् " इत्याङो नाभावः । पृष्ठस्य मध्ये मध्येपृष्ठं निजखर्परोपरिप्रदेश इत्यर्थः । " पारे मध्ये षष्ठ्या वा " इत्यव्ययीभावः । तत्सन्नियोगादेदन्तत्वं च मध्यशब्दस्य । सदा निरन्तरं धार्यते उह्यते । तमपि कमठपतिमपि पयोधिः प्रलयार्णवः अनादरात् अनायासात् क्रोडाधीनमादिवराहायत्तं कुरुते । प्रलयकाले पातालगतभूमण्डलस्यादिवराहावतारेण विष्णुना निजदंष्ट्रया समुद्धृतत्वादिति भावः । अतो महता मानशौर्यशालिना महानुभावानां सम्बन्धिन्यश्चारित्रविभूतयो माहात्म्यसम्पदो निःसीमानो निर्मर्यादा अवाङ्मानसगोचरा इति यावत् । अहहेत्याश्चर्ये । " अहहेत्यद्भुते खेदे " इत्यमरः । अत्र पूर्वपूर्वस्योत्तरोत्तरगुणोत्कर्षावहत्वान्मालादीपकाख्योऽलङ्कारः । तदुक्तं विद्यानाथेन । " यदा तु पूर्वपूर्वस्य सम्भवेदुत्तरोत्तरम् । प्रत्युत्कर्षावहत्वं तन्मालादीपकमुच्यते ॥ " इति । हरिणीवृत्तम् । लक्षणं तूक्तम् ॥ ३३ ॥

चौदह भुवनकी पंक्तिको शेषजी अपने फणपर धारण करते हैं और कच्छपजी अपनी पीठके मध्यमें तिन शेषजीकोभी धरते हैं और उस कच्छपकोभी समुद्रने अनादरसे सूकरके अधीन करदिया है इससे यह सिद्ध हुआ कि, महज्जनोंके चारित्रकी विभूतिकी सीमा नहीं है ॥ ३३ ॥

वरं प्राणोच्छेदः समदमघवन्मुक्तकुलिश-[1] ।
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ॥
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे ।
न चासौ संपातः पयसि पयसां पत्युरुचितः ॥ ३४ ॥

---

१ पक्षच्छेद इति पाठान्तरम् ।

मानशौर्यशालिन एवोक्तविधमहत्त्व न तु तद्विहीनस्येति मैनाक दृष्टान्तीकृत्याह—वरमिति ॥ तुषाराद्रेः सूनोः हिमवत्पुत्रस्य मैनाकस्य उद्गच्छन्नुज्जृम्भमाणो बहुलो भूयिष्ठश्च यो दहनः शिलासङ्घर्षणजनितवह्निस्तस्योद्गारैर्निःसरणैः गुरुभि दुस्सहैः समदेन सदर्पेण मघवता देवेन्द्रेण मुक्तस्य प्रयुक्तस्य कुलिशस्य वज्रायुधस्य प्रहारैर्विदारणैः प्राणोच्छेदो मरणमित्यर्थः । वर मनाक् प्रियम् । " देवाद्वृते वरः श्रेष्ठ त्रिषु क्लीव मनाक्प्रियम् । " इत्यमरः । कुतः अहहेति खेदातिशयद्योतनार्थानुकरणशब्दः । पितरि हिमवति क्लेशेन वज्रप्रहारजनितदुःखेन विवशे विह्वले सति अमावद्याप्युपलभ्यमानः पयसा पत्यु समुद्रस्य । अत्रासमासत्वेन विसञ्ज्ञाभावात् । " ख्यत्यात्परस्य " इति कृतयणादेशात्तिशब्दात्परस्य ङसोऽकारस्य उकारादेशः । प्रयसि सलिले सम्पातः प्रवेशः निजप्राणनरक्षणार्थं निमज्ज्यावस्थानमित्यर्थः । उचितो न्याय्यो न च न भवति हि अस्येवेति शेषः । यतो मानशौर्यसम्पन्नस्य पुनः स्वप्राणमात्रतत्परतया क्वचिन्निलीयावस्थानमेवात्यन्तायशस्कर किमुत पितरि क्लेशविवशे । अतः प्राणपरित्यागेनापि मानशौर्य एव प्रस्थापनीये । अन्यथा महानपवादः स्यादिति भावः । अत्रोद्गारशब्दस्य गौणत्वान्न ग्राम्यदोषः प्रत्युत सौन्दर्यातिशयमेवापादयति । तदुक्त दण्ड्याचार्यैः । " निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम । अतिसुन्दरमन्यत्र ग्राम्यकक्षां व्यगाहते ॥ ' इति । पुरा किल भूमण्डलोपद्रवकारिणा पर्वताना कोपवशात्पक्षच्छेदोद्यते शक्रे भयविह्वलो मैनाकः समुद्रमध्ये निमज्ज्यातिष्ठदिति पौराणिकी कथात्रानुसन्धेया । शिखरिणीवृत्तम् ॥ ३४ ॥

मदमें भरे हुए इन्द्रके चलाये वज्रके जो अत्यन्त प्रज्वलित अग्निकी ज्वालाके समान प्रहार (लगना) उनसे मरजाना अच्छा रहा परन्तु अपने पिता हिमाचलको क्लेशके विवश (पक्षहीन) छोडकर मैनाकको उचित न था कि, जलोंके राजा समुद्रमें भाग कूदकर अपने पक्ष बचावे ॥ ३४ ॥

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ॥
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ३५ ॥

---

१ रिव इति पाठान्तरम । २ विकृतिम इति पाठान्तरम ।

अथ [illegible] परतिरस्कारासहनं सदृष्टान्तमाह—यदिति ॥ यस्मात्कारणा-द्चेतनः चेतनरहितः । निर्जीवोऽपीति यावत् । पाषाणत्वादिति भावः । [illegible] सूर्यकान्तमणिः सवितुः सूर्यस्य पादैः रश्मिभिरङ्घ्रिभिश्च स्पृष्टः [illegible] मन्यते । प्रज्वलति जाज्वल्यमानो भवति । कोपो-[illegible] । तत् तस्मात्कारणात् तेजस्वी तेजःशाली मानशौर्यसम्पन्नः [illegible] इति शेषः । परैः शत्रुभिः कृतनिकृतिं विहितापकारं कथं [illegible] । न [illegible] । सैवाक्रम्य [illegible] भावः । " पादा [illegible] " [illegible] । आर्याछन्दः ॥ ३५ ॥

सूर्यकान्तमणि यद्यपि अचेतन है तोभी सूर्यके किरणरूपी पाद-[illegible] जल उठता है ऐसेही तेजस्वी पुरुष परकृत अना-[illegible] ॥ ३५ ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ॥
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ॥ ३६ ॥

**शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं।
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे॥ ३७॥**

मानशौर्ययोरप्यर्थमूलतत्वादेतन्निरूपणानन्तरमर्थपद्धतिं निरूपयति । तत्र प्रथममर्थैकतत्पराणां मतमभिसन्धायाह—जातिरिति ॥ जातिः ब्राह्मणत्वादिः रसातलं नामाधोलोकं यातु गच्छतु भ्रश्यत्वित्यर्थः । गुणगणो धैर्योदार्यगाम्भीर्यादिगुणसमूहः तत्रापि रसातलापेक्षयाऽप्यधः पाताललोकं गच्छता प्राप्नुयात् । शीलं सत्स्वभावः शैलतटात्पततु विशीर्णं भवत्वित्यर्थः । अभिजनो वंशः । "अभिजनान्वयौ वंश" इत्यमरः । वह्निना सन्दह्यतां भस्मीक्रियताम् । वैरिणि सक्षोभकारित्वाच्छत्रुभूते शौर्ये शूरत्वमूर्ध्नीत्यर्थः । आशु शीघ्रं वज्रमशनिर्निपततु । अशनिनिपातेन तदपि विध्वस्तं भवत्वित्यर्थः । एष पूर्वोक्तजातिकुलोचिताभिमानशौर्यादिनाशोऽप्यस्माकं न किंचिदपि छिन्नमिति भावः । तथापि किं युष्मदभिलषितमित्यत आहुः । नोऽस्माकमर्थः केवलं वित्तमेवास्तु सम्भवत्वयमेवास्माकं परमार्थ इति भावः । ननूत्कर्षावहत्वेन प्रसिद्धानामुक्तगुणानां विध्वंसमङ्गीकृत्यैकेन वित्तेन किं करिष्यथेति नाशङ्कनीयं यतस्तद्विना तेषामप्यत्यन्ताकिञ्चित्करत्वमेवेत्याहुः । एकेन केवलेन । "एके मुख्यान्यकेवलाः" इत्यमरः । येन अर्थेन विना । "पृथग्विना०" इत्यादिना विकल्पात्तृतीया । इमे पूर्वोक्ताः समस्ता अपि गुणा जातिकुलशीलाभिमानादयस्तृणलवप्रायाः तृणकणकल्पास्तद्वन्निःसारा इत्यर्थः । अतो गुणमहत्तयाप्येतन्मूलकत्वादयमेव सम्पादनीय इति भावः । "धनमार्जय काकुत्स्थ धनमूलमिदं जगत् । अन्तरं नाभिजानामि निर्धनस्य मृतस्य च ॥" इति लक्ष्मणवाक्यमेव सिद्धान्तीकुर्मः । "अर्थानामार्जने दुःखमार्जितानां च रक्षणे । रक्षितानां व्यये दुःखं धिगर्थं दुःखभाजनम् ॥" इति मनुस्मरणं त्वशक्तविषयं मन्यामहे इति तात्पर्यम् । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ ३७ ॥

जाति रसातलमें जाय और सर्व गुण उससेभी अधिक नीचे जायँ और शील पर्वतसे गिरके नाश हो जाय और शूरतारूपी शत्रुपर वज्र पडे परन्तु हमको केवल द्रव्यहीसे काम है कि जिसके बिना सब गुण तृण टुकडेके समान हैं ॥ ३७ ॥

तावदेवामृतमयी यावल्लोचनगोचरा ॥
चक्षुष्पथादतीता तु विषादप्यतिरिच्यते ॥ ४४ ॥

तावदिति ॥ तावदेव तावत्पर्यंतमेवामृतमयी अमृतोपमाना तद्वन्मधुरते-त्यर्थः । वधूरिति शेषः । " तत्प्रकृतिवचने मयट् " " टिड्ढाणञ्० " इत्यादिना ङीप् । कियत्पर्यंतमित्यत आह । यावत् यावत्पर्यंतं लोचनगोचरा चक्षुर्विषया भवति तावदिति सम्बन्धः । व्यतिरेके तु नैवमित्याह । चक्षुष्पथात् लोचनमार्गात् । " ऋक्पू० " इत्यादिना समासांतः । अतीता तु अतिक्रांता चेद्विषात्कालकूटादप्यतिरिच्यते अतिरिक्ता भवति । तद्वत्प्राणप्रयाणकारिणी भवतीत्यर्थः । अत्र वध्वा अमृतमयत्वविषातिरिच्यमा-नत्वासम्बन्धेऽपि तत्सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ४४ ॥

स्त्री तभीलों अमृतमय है जबलों नेत्रके सामने है । नेत्रसे जब दूर हुई तब विषसेभी अधिक हो जाती है अर्थात् विरहसे सन्ताप देती है ॥ ४४ ॥

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ॥
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ४५ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—नेति ॥ एकां नितम्बिनीं मुक्त्वा विहाय अमृत-ममृतशब्दवाच्यं किंचिद्वस्तु नास्ति विषं विषशब्दवाच्यमपि किंचिन्नास्ति । इय-मेवामृतप्राया चेत्यर्थः । कुत एतदित्याशङ्क्य तत् भावयति । रक्ता अनुरागवती चेत् सैव नितम्बिन्येव अमृतलता संजीवनी भवतीत्यर्थः । विरक्ता अनुराग-रहिता चेत् विषवल्लरी विषलतामञ्जरी । " वल्लरी मञ्जरी स्त्रियाम् " इत्य-मरः । प्राणापहारिणी भवतीत्यर्थः । अत्र नितम्बिनीव्यतिरेकेणामृतविषयो-रस्तित्वसम्बन्धेऽप्यसम्बन्धात्सम्बन्धेऽसम्बन्धरूपातिशयोक्तिः । तथान्यत्र तस्या मोहामृतलतात्वविषवल्लरीत्वरूपणाद्रूपकालङ्कारः । स च रक्तत्वविरक्त-पदार्थहेतुकत्वात्परिणामोऽन्यत्र तत् पूर्वातिशयोक्तिमुज्जीवयतीति सङ्करः । प्रायेणैकार्थसम्बन्धेन श्लोकनुचितविशेषणयोः साहित्यमिति काव्य॰ । यथा नैषधे

ईदृग्गुणसाकल्यसम्पन्नत्व कुत इत्याशङ्क्याह । सर्वे गुणाः पूर्वोक्तकुलीनत्वादयः काञ्चन वित्तमाश्रयन्ति अतोऽनेनैव सकलगुणसपत्तिसम्भवे किमन्यैः प्रत्येकप्रयासाधीरीति भाव. । अत्र वित्तस्यैतावद्गुणसम्पादकत्वासम्बन्धेऽपि तत्सम्बधाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्ति. । वृत्तमुपजाति ॥३९॥

जिसके पास द्रव्य है वही नर कुलीन, पण्डित, गुणज्ञ, वक्ता और दर्शनयोग्य है इससे यह सिद्ध हुआ कि, सब गुण सुवर्णके आश्रय रहते हैं ॥ ३९ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद् ।
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ॥
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया- ।
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥४०॥

अथ द्वाभ्यामर्थस्य विनाशप्रकारमाह—दौर्मन्त्र्यादिति ॥ नृपति' राजा । दुष्टो न सुलक्षणप्रयुक्तो मन्त्र. षाड्गुण्यचिन्तन यस्य तस्य दुर्मन्त्रस्य भावो दौर्मन्त्र्य तस्माद्धेतोर्नश्यति विनष्टो भवति । मन्त्रवैकल्ये परेषामवकाशसम्भवात् राज्याद्यपहरणादिति भाव । दुष्टा मन्त्रिण प्रधानानि यस्य तस्य भावस्तस्मान्नश्यति । अदण्ड्यदण्डनाद्युपदेशेन लक्ष्म्यादिराहितो भवतीत्यर्थ. । " सन्मन्त्रिणा वर्धयते नृपाणा लक्ष्मीर्मही धर्मयश समूह । दुर्मन्त्रिणा नाशयते तथैव लक्ष्मीर्मही धर्मयश समूह ॥ " इति वचनादिति भाव । यतिर्योगी सङ्गात् समागमान्नश्यति । सङ्गस्य कामक्रोधादिहेतुत्वात्तदुत्पत्तौ भ्रष्टयोगो भवतीत्यर्थ । ' सङ्गात्सजायते काम' कामात्क्रोधोऽभिजायते । क्रोधाद्भवति सम्मोह सम्मोहात्स्मृतिविभ्रम ॥ " इति गीतावचनादिति भाव । सुतो लालनान्नश्यति गुणहीनो भवतीत्यर्थ । " लालनाद्बहवो दोषास्ताडनाद्बहवो गुणा । तस्मात्पुत्र च शिष्य च ताडयेन्न तु लालयेत् ॥ " इति न्यायादिति । भाव । विप्रो ब्राह्मणोऽनध्ययनात् वेदशास्त्राध्ययनाभावान्नश्यति नीचो भवति । " वेदवेदाङ्गतत्त्वज्ञो विप्र. सर्वत्र पूज्यते । अनधीतश्रुतिर्विप्र. सभामध्ये न शोभते ॥ " इति । कुल वंशः

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ॥
यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति ॥४१॥

अथ वित्तस्योत्तमादिभेदेन त्रैविध्यमाह—दानमिति ॥ दान सत्पात्रत्यागः । भोग स्रक्चन्दनादिद्वारानुभव. । नाश दानधर्माद्यभावे चोरादिना विलयश्च । तदुक्तम् । " चत्वारो धनदायादा धर्माग्निनृपतस्कराः । तेषां ज्येष्ठावमानेन त्रय कुप्यन्ति सोदरा ॥ " इति । एवमुत्तममध्यमाधमभेदेन वित्तस्य तिस्रो गतयो गमनोपाया भवन्ति । तत्र य पुमान् न ददाति अर्थिभ्यो न प्रयच्छति वित्तमिति शेष । अथवा न भुंक्ते नानुभवति तस्य दानभोगाभ्या वित्तव्ययमकुर्वत पुरुषस्य सम्बन्धिनो वित्तस्येति शेषः । तृतीया गतिर्नाशावस्था भवति । सा त्वत्यन्तकष्टेत्यर्थ । अयमत्र निष्कृष्टोऽर्थ । वित्तस्य दानेन गतिरुत्तमा आत्मभोगेन मध्यमा चोरादिनाशगतिरधमेति । अतो दानशौण्डेनैव भवितव्य धनाढ्येनेति भाव । आर्याभेदः ४१

दान भोग और नाश येही तीन धनकी गति हैं जिसने नहीं दिया और जो अपने भोगमें न लाया उसके धनकी नाशरूप तीसरी गति होती है ॥ ४१ ॥

मणिः शाणोल्लीढः समरविजयी हेतिदलितो[1] ।
मदक्षीणो नागः शरदि सरिद[2]ाश्यानपुलिना ॥
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता[3] ।
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः[4] ॥ ४२ ॥

अथ दानशीलस्य वित्तव्ययजनिततनुत्वमपि शोभावहमेवेत्याह—मणिरिति ॥ शाण शस्त्रोत्तेजनसाधनोपलविशेषः तेनोल्लीढ संघृष्टो मणिश्च । हेतिदलित शस्त्रक्षत समरविजयी रणशूरश्च । " जिद्दृक्षि० " इत्यादिना इनि । " हेति शस्त्रे तु नृस्त्रियो " इति केशव । मदेन दानवर्षेण परिक्षीण कृशो नागश्च । " प्रहाश्राहिगजा नागा " इति वैज-

1 निदत इति पाठान्तरम् । २ सरित. श्यानपुलिना इति पाठान्तरम् । — ३ ललना इति पाठान्तरम् । ४ जना , नृपाः इति पाठान्तरम् ।

प्सितः " इति सम्प्रदानत्वाच्चतुर्थी । " शीतशूकयवौ समौ " इत्यमर. । स परिक्षीण' पुमान् पश्चादनन्तर कालान्तर इत्यर्थ । सम्पूर्णो दैववशाद्धनसम्पन्न. सन् धरित्री भुव तृणसमां तृणकल्पा तद्वल्लघ्वीमित्यर्थ. । कलयति मनुते धनमदेन तथालोकयतीत्यर्थ. । अतश्चात एव हेतोरर्थेषु यवधरित्र्यादिषु विषये गुरुलघुतया महत्त्वाल्पत्वभावेन अनेकान्ता सर्वथा गुरुणि गुरुत्वमेव लघुनि लघुत्वमेवेति नियमाभाववतीत्यर्थ । धनिना सम्बन्धिन्यवस्था व्यापार. वस्तूनि यवधरित्र्याद्यल्पमहत्तरवस्तूनि प्रथयति च । धनाभावदशाया नीचमपि वस्तु गुरूकरोतीत्यर्थ । तथा सङ्कोचयति च । तत्सद्भावदशाया महदपि वस्तु निराकरोतीत्यर्थ । निर्धनधनिकयोरित्थभूतावस्था प्रत्यक्षसिद्धा अतो विवेकिना नैव विपर्यस्तबुद्धिना भवितव्यमिति भावः । शिखरिणी वृत्तम् । लक्षण तूक्तम् ॥ ४३ ॥

जब कोई परिक्षीण अर्थात् निर्धन अवस्थामे होता है और तब एक पसौ यवकी इच्छा करता है और वही मनुष्य जब संपूर्ण संपन्न अर्थात् धनिक अवस्थामें हो जाता है तब पृथ्वीको तृणसमान गिनता है । इस कारण येही दोनों चंचल अवस्था पुरुषको गुरु और लघु बनाती हैं और वस्तुओंकोभी फैलाती और समेटती हैं ॥ ४३ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेनां ।
तेनाद्य वत्समिव लोकममुं पुषाण ॥
तस्मिंश्च सम्यगनिशं परिपुष्यमाणे[1] ।
नानाफलं[2] फलति कल्पलतेव भूमिः ॥ ४४ ॥

अथ राजान सम्बोधयस्तस्यार्थसाधनोपायमतिदिशति–राजन्निति ॥ हे राजन् त्वामिति शेषः । अन्यथा शेषे प्रथमपुरुष स्यात् । एनामेता त्वद्धस्तगतामित्यर्थः अत्रान्वादेशाभावादेनादेशश्चिन्त्य' । क्षितिर्धेनुरिवेत्युपामितिसमासः । न तु क्षितिरेव धेनुरिति रूपक वत्समिवेति स्पष्टोपमालिङ्गात् । ता

१ परिपोष्यमाणे इति पाठान्तरम् । २ फलैः इति पाठान्तरम् ।

"शरारुर्घातुको हिंस्र" इत्यमरः । "नमिकम्पि०" इत्यादिना रप्रत्ययः । दयालुरपि कारुणिका च । "स्याद्दयालुः कारुणिकः" इत्यमरः । "स्पृहिगृहि०" इत्यादिना आलुच्प्रत्ययः । तथा अर्थपरा धनलुब्धा वदान्या दानशौण्डा च कुत्रचिद्विषये इति सर्वत्राप्यध्याहार्यम् । "स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे ।" इत्यमरः । तथा नित्यं प्रतिदिनं व्ययो धनत्यागो यस्याः सा तथोक्ता । प्रचुरतरनित्यधनागमा प्रचुरं प्रभूतं यथा तथा नित्यं धनस्य आगमः प्राप्तिर्यस्याः सा तथोक्ता च । अतो वाराङ्गना वेश्येव । "वारस्त्री गणिका वेश्या" इत्यमरः । नृपनीतिः राजवृत्तिः अनेकरूपा बहुप्रकारा न त्वेकातिकीत्यर्थः । वाराङ्गनायामपि विशेषणानि समानानि । अत्र सत्यानृतेत्यादिपदश्रवणमात्रेण झटिति विरोधः स्फुरति तस्य स्वाभाव्येनाभासीकरणादलङ्कारः सन् वाराङ्गनेवेत्युपमाङ्गाङ्गीभावेन संकीर्यते ॥ ४९ ॥

कहीं सत्य कहीं असत्यवादिनी, कहीं कठोर कहीं प्रियभाषिणी, कहीं हिंसा करनेवाली कहीं दयालु, कहीं लोभी, कहीं उदार, कहीं नित्यप्रति वहुतसा द्रव्य उठानेवाली और कहीं वहुतही संचय करनेवाली यह राजनीति वेश्याकी नाईं अनेकरूपसे रहती है ॥४९॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां ।
दानं भोगो मित्रसंरक्षणं च ॥
येषामेते षड्गुणा न प्रवृत्ताः ।
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४६ ॥

सोऽपि गुणाढ्य एव बलाश्रयणीयो न तु निर्गुण इति राजानमेव सबोधयति—आज्ञेति ॥ आज्ञा मर्यादापरिपालनात्मकशासनम् । कीर्तिः दानक्षात्रोद्भवा सत्समाख्या । ब्राह्मणानां पालनं निरुपद्रवं ब्राह्मणसन्तर्पणम् । दानं सत्पात्रे त्यागः । भोगः स्रक्चन्दनादिजनितसुखानुभवः । मित्रसंरक्षणं सुहृत्समुद्धरणं चेत्येते षड्गुणा येषां राज्ञां न प्रवृत्ता न प्रवर्तन्ते । कर्तरि

१ विद्या इति पाठान्तरम् ।

कमत एतद्दृष्टान्तेन समाहितचित्तेन भवितव्य न तु कार्पण्यपर्याकुलेनेति त्तात्पर्यम् ॥ ४७ ॥

विधाताने जो अपने ललाटमें लिख दिया है किंचित् धन अथवा बहुत चाहे मारवाडकी भूमिमें भी जाय बैठे उसे वह निरंतर प्राप्त होगा उससे अधिक सुमेरुपरभी जानेसे न मिलेगा इस, लिये धैर्य धरो और धनवालोंके निकट वृथा याचना न करो-क्योंकि देखो कूप और समुद्रमें घडा समानही जल ग्रहण करता है ॥ ४७ ॥

त्वमेव चातकाधारोऽसीति केषां न गोचरः ॥
किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्ष्यसे ॥ ४८॥

मेघ प्रति, चातकोक्ति—त्वमेवेति ॥ हे अंभोदवर ! हे मेघश्रेष्ट ! त्व चातकानामाधार आश्रयोऽसीति केषा गोचर प्रत्यक्ष न अपि तु सर्वेषा गोचर । तस्मादस्माक चातकानां कार्पण्योक्तिं किं प्रतीक्षमे किमुपेक्षसे । अनुष्टुप् वृत्तम् ॥ ४८ ॥

तुमही मुझ पपीहाके आधार हो, हे श्रेष्ठ मेघ ! यह बात किसपर प्रसिद्ध नही है ? अब तुम हमारी दीनताका क्या पैंडा देखते हो ? ॥ ४८ ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-।
मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ॥
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा ।
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥४९।

चातकोक्तिरुत्तरमिदम् । रे रे चातकेति ॥ रे रे इति वीप्सा । हे चातक ! सावधानमनसा स्वस्थचेतसा क्षण क्षणमात्र श्रूयता मम वच इति शेषः । हि यस्माद्गगनेऽम्भोदा मेघा बहवो वसात किंतु सर्वे एतादृशाः करुणावतो न सन्त केचिद्वृष्टिभिर्वसुधा पृथ्वीमार्द्रयन्ति जलेन सिंचन्ति । केचिद्वृथा गर्जन्ति

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ॥
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ५१ ॥

आस्तां तावद्दुर्जनमात्रस्य परित्याज्यत्वकथनमशेषावगुणावमार्जकसम्पन्नोऽपि दुर्जनः परित्याज्य एवेति सदृष्टान्तमाह—दुर्जन इति ॥ दुर्जनो विद्यया वेदवेदाङ्गाध्यात्मिकयालङ्कृतो भूषितः सन्नपि सकलविद्यापारीणः सन्नपीत्यर्थः । परिहर्तव्यस्त्याज्यः । कुत इत्यत आह । सर्पः आशीविषः मणिना फणस्थमाणिक्येन भूषितोऽलङ्कृतः सन्नपि असौ सर्पो न भयकरः किं भयकर एवेत्यर्थः । अतो मणिभूषितसर्पप्रायो विद्यावानपि दुर्जनो दूरतस्त्याज्य एव । "दुर्जनं दूरतस्त्यजेत्" इति न्यायादिति भावः । "मेघर्तिभयेषु कृञः" इति कृञः । खस्य "अरुर्द्विषत्०" इत्यादिना मुमागमः । अत्र बिम्बप्रतिबिम्बन्यायेन धर्मधर्मिणोर्वाक्यद्वये पृथङ्निर्देशाद्दृष्टान्तालङ्कारः । "बिम्बानुबिम्बन्यायेन निर्देशो धर्मधर्मिणोः । दृष्टान्तालङ्कृतिर्ज्ञेया भिन्नवाक्यार्थसंश्रयात् ॥" इति लक्षणात् । वृत्तमानुष्टुभम् ॥५१॥

दुर्जन यद्यपि विद्यावान् भी हो तो भी परित्यागहीके योग्य होता है जैसे मणिसे भूषित सर्प क्या भयंकर नहीं होता? ॥५१॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं ।
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ॥
तेजस्विन्यवलिप्तता मुखरता वक्तव्यशक्तिः स्थिरे ।
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ५२

अथास्य सर्वदूषकत्वमाह—जाड्यमिति ॥ ह्रीमति लज्जावति पुंसि जाड्यं मान्द्यम् । "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ्प्रत्ययः । गण्यते सङ्ख्यायते दुर्जनैरिति शेषः । न तु जुगुप्सितकर्माचरणपराङ्मुखत्वम् । व्रतेस्तपश्चान्द्रायणादिनियमे रुचौ शुद्धे दम्भो धर्मध्वजत्वं गण्यते न त्वनुष्ठातृत्वम् । शुचौ स्वभावादेव बाह्यान्तरशुद्धे कैतवं कपटं गण्यते न

१ भूषित इति पाठान्तरम् । २ अलङ्कृत इति पाठान्तरम् । ३ रुचौ इति पाठान्तरम् । ४ वचार्यशक्ति इति पाठान्तरम् । ५ दुर्जनानां न इति पाठान्तरम् ।

[1]दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ॥
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ५१ ॥

आस्तां तावद्दुर्जनमात्रस्य परित्याज्यत्वकथनमशेषावगुणावमार्जकसम्पन्नोऽपि दुर्जन परित्याज्य एवेति सदृष्टान्तमाह—दुर्जन इति ॥ दुर्जनो विद्यया वेदवेदाङ्गाध्यात्मिकयालङ्कृतो भूषित. सन्नपि सकलविद्यापारीणः सन्नपीत्यर्थ. । परिहर्तव्यस्त्याज्य । कुत इत्यत आह । सर्प. आशीविषः मणिना फलकस्थमाणिक्येन भूषितोऽलङ्कृत. सन्नपि असौ सर्पो न भयकरः किं भयकर एवेत्यर्थ । अतो मणिभूषितसर्पप्रायो विद्यावानपि दुर्जनो दूरतस्त्याज्य एव । " दुर्जन दूरतस्त्यजेत् "[2] इति न्यायादिति भावः । " मेघर्तिभयेषु कृञ. " इति कृञः । खस्य " अरुर्द्विषत्० " इत्यादिना मुमागम । अत्र विम्बप्रतिविम्बन्यायेन धर्मधर्मिणोर्वाक्यद्वये पृथङ्निर्देशाद्दृष्टान्तालङ्कार. । " बिंबानुबिम्बन्यायेन निर्देशो धर्मधर्मिणो । दृष्टान्तालङ्कृतिर्ज्ञेया भिन्नवाक्यार्थसंश्रयात् ॥ " इति लक्षणात् । वृत्तमानुष्टुभम् ॥ ५१ ॥

[1]दुर्जन यद्यपि विद्यावान् भी हो तो भी परित्यागहीके योग्य होता है जैसे मणिसे भूषित सर्प क्या भयंकर नहीं होता? ॥५१॥

जाड्यं ह्रीमति गण्यते व्रतशुचौ[3] दम्भः शुचौ कैतवं ।
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ॥
तेजस्विन्यवलिप्तता मुखरता वक्तव्यशक्तिः[4]स्थिरे ।
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः[5] ५२

अथास्य सर्वदूषकत्वमाह—जाड्यमिति ॥ ह्रीमति लज्जावति पुंसि जाड्यं मान्द्यम् । " गुणवचनब्राह्मणादिभ्यः कर्मणि च " इति ष्यञ्प्रत्ययः । गण्यते सङ्ख्यायते दुर्जनैरिति शेषः । न तु जुगुप्सितकर्माचरणपराङ्मुखत्वम् । व्रतैस्तपश्चान्द्रायणादिनियमैः शुचौ शुद्धे दम्भो धर्मध्वजत्व गण्यते न त्वनुष्ठातृत्वम् । शुचौ स्वभावादेव बाह्यान्तरशुद्धे कैतव कपट गण्यते न

---

१ भूषित इति पाठान्तरम् । २ अलङ्कृत इति पाठान्तरम् । ३ रुचौ इति पाठान्तरम् । ४ वक्तृत्वशक्ति इति पाठान्तरम् । ५ दुर्जनानां मत इति पाठान्तरम् ।

क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ५६ ॥

कथं न समाश्रयणीय इत्याशक्य तत्सेवाया दुष्करत्वादित्याह—मौनादिति ॥ मौनात्तूष्णींभावान्मूको निर्वचो भवति सेवक इति शेष. । प्रवचनपटु प्रगल्भश्चातिवक्तेति वाचको बहुभाषी जल्पतीति जाल्पकोऽसंबद्धप्रलापी भवति । उभयत्रापि " ण्वुल्तृचौ " इति कर्तरि ण्वुल्प्रत्यय णित्त्वाद्वृद्धि । जल्पक इति पाठे जल्पतीति जल्पक । पचाद्यच् स्वार्थे कप्रत्यय । अन्यथा " जल्पभिक्ष० ' इत्यादिना कन्प्रत्यये जल्पाक इति स्यात् । यथाहामरसिंह । " स्याज्जल्पाकस्तु वाचालः " इति । पार्श्वे समीपे च वसन् धृष्टो निर्भीतो भवति । दूरतो विप्रकृष्टदेशे वसन् अप्रगल्भ अप्रौढो भवति । क्षान्त्या परिभवादिप्रत्यचमानेषु क्रोधप्रतिलम्भलक्षणयोपलक्षितश्चेद्भीरुर्भयशीलो भवति । ' भिय क्रुक्लुकनौ " इति क्रुप्रत्यय । यदि न सहते परिभवादिक न क्षमते यदि तर्हि प्रायशो बाहुल्येन अभिजात सत्कुलीनो न भवति । अत परमगहनोऽत्यन्तदुरवगाहः सेवाधर्मः परिचर्यात्मक कर्म योगिनामपि कालत्रयाभिज्ञानामप्यतीन्द्रियवस्तुपरिज्ञानवतामित्यर्थ । किमुतान्येषामिति भाव । अगम्यो ज्ञातुमशक्य । सर्वे गत्यर्था ज्ञानार्था । यत परब्रह्मापि ध्यानादिना साक्षात्क्रियते न त्वयमिति भावः । मौनादिव्यतिरिक्तधर्मस्य गगनारविंदप्रायत्वात्तस्य ब्रह्मणोऽपि दुर्विज्ञेयतयात्यंतदुष्करत्वमिति तात्पर्यम् । अत्र सेवाधर्मस्य योगिगम्यत्वेऽप्यगम्यत्वोक्तेः सबधे असबधरूपातिशयोक्ति । मन्दाक्रान्तावृत्तम् । " मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ' इति लक्षणात् ॥ ५६ ॥

मौन रहनेसे गूंगा, वक्ता होनेसे वाचाल और बकवादी, समीप होनेसे ढीठ, दूर रहनेसे मूर्ख, क्षमा करनेसे कादर और न सहनेसे कुलहीन कहलाता है । तात्पर्य यह है कि, सेवाधर्म परमकठिन है योगियोंको भी अगम्य है ॥ ५६ ॥

अथ दुर्जनसुजनमैत्रप्रिकारमाह—आरभेति ॥ पूर्वार्धपरार्धाभ्या पूर्वाह्णभेदेन भिन्ना पृथग्विधा छाया अनातप इव। “छाया त्वनातपे कांती प्रातीबवाक-जाययोः । ” इति वैजयती । आरंभे प्रारभसमये गुर्वी गरु वाघष्णुरि-त्यर्थ । “वोतो गुणवचनात्” इति विकल्पात् ङीष् । क्रमेण कालक्रमेण क्षयिणी क्षयिष्णुश्च । “जिद्दाक्ष०” इत्यादिना इनि । तथा पुरा प्रारभे लघ्वी लघु ह्रस्वेत्यर्थ । पूर्ववत् ङीप् । पश्चादनतर वृद्धिमुपैति प्राप्नोतीति भाव । अयमर्थ दुर्जनमैत्री पूर्वाह्णच्छायेव प्रारभगुर्वी क्रमेण क्षयिणी च भवति । सुजनमैत्री तावदपराह्णच्छायेवादौ लघ्वी तता वर्धिष्णुश्च भवतीति । अतोऽत्र यदुक्त तत्कर्तव्य कुशलेनेति भावः । अत्र यथासख्यासकीर्णोपमा-लकारः । उपजातिवृत्तमुक्तम् ॥ ५८ ॥

आरम्भमें वहुत लंवी चौडी फिर क्रमसे पूर्वार्द्ध दोपहरकी छायाके समान खलोंकी मैत्री क्षण क्षण घटती जाती है और सज्ज-नोंकी मैत्री पहिले वहुत किंचित् फिर क्रमही क्रम परार्द्ध दो पह-रकी छायाकी नाई प्रतिक्षण वढती जाती है ॥ ५८ ॥

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ॥
लुब्धकधीवरपिशुना निष्कारणमेव वैरिणो जगति ५९॥

यदुक्तमकरुणत्वमकारणविग्रह इति तदेव प्रकटयन्नुपसहरति—मृगेति ॥ सतोषो दैववशाल्लब्धेन मन सतुष्टि. । तृणजलसतोषैर्विहिता कल्पिता वृत्ति-र्जीवन येषा तेषा न तु परोपतापोपजीविनामित्यर्थ । “वृत्तिर्वर्तनजीवने” इत्यमर. । मृगाणा हरिणादीनां मीनाना मत्स्यानां सज्जनाना साधूना च लुब्धको व्याध धीवरो दाशः जालिक इत्यर्थ । पिशुन. सूचकश्च । “व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च स ।” “कैवर्ते दाशधीवरौ” इति चामर । एते जगति भुवि निष्कारण निर्हेतुकमेव वैरिणो विद्वेषिणः घातुका इत्यर्थ. । तृणेन विहितवृत्तीना मृगाणा लुब्धका निष्कारणवैरिण इत्यादि यथाक्रममन्वयात्क्रमापरनामा यथासंख्यालकारस्तदुक्त विद्यानाथेन । “उद्दिष्टाना पदार्थाना पूर्वं पश्चाद्यथाक्रमम् । अनुदेशो भवेद्यत्र तद्यथास-ख्यमुच्यते ॥” इति । आर्या वृत्तम् ॥ ५९ ॥

न तु निर्लज्जत्वम् । " लोकापवादो बलवानिति सत्यवती श्रुतिः । " इत्यादिवचनात्तस्य बलिष्ठत्वादिति भाव । शूलिनि परदेवताया शिवे भक्तिरनुरागः न तु क्षुद्रदेवतायाम् । " शिवे भक्तिः शिवे भक्तिः " इत्यादिवचनेऽभ्यावृत्त्या तस्या. प्राशस्त्यश्रवणादिति भावः । आत्मदमने स्वपरिभवे सति शक्तिः सामर्थ्यं पराक्रम इति यावत् । न तूपशमेनौदासीन्यम् । " अन्यदा भूषण पुसा शमो लज्जेव योषिताम् । पराक्रमः परिभवे वैयात्य सुरतेष्विव ॥ " इति वचनादिति भावः । खलैर्दुर्जनैः सह संसर्गमुक्ति सगत्याग' न तु तत्सहवासाभिलाषः । " दुर्जनं दूरतस्त्यजेत् " इति । ' दुर्जन परिहर्तव्य ' इत्याद्वचनादिति भावः । इत्येते निर्मलाः निष्कलङ्काः गुणा सज्जनसंगतिवांछादयो येषु पुरुषेषु सति तेभ्यो महद्भ्यो नमः । इत्थभूतगुणविशिष्टानामेव नमस्काराईत्वादिति भावः । " नम स्वस्ति० ' इत्यादिना चतुर्थी । तैरेव भूर्भूषितेति पाठे तैर्निर्मलगुणसंपन्नैरेव भूरलङ्कृता न त्वन्यैस्तेषामेव चारुत्वाद्यतिशयहेतुत्वादिति भाव । शार्दूलविक्रीडित वृत्तम् ॥ ६० ॥

सज्जनोंके संगकी वांछा, पराये गुणमें प्रीति, बडे लोगोंसे नम्रता, विद्यामें व्यसन, अपनीही स्त्रीसे रति, लोकनिंदासे भय, महेश्वरमें भक्ति, आत्माके दमनकी शक्ति और खलके संगका त्याग ये निर्मल गुण जिन पुरुषोंमें हैं तिन्हें हम नमस्कार करते हैं॥ ६०॥

विपदि धैर्यमथाभ्युदये क्षमा ।
सदसि वाक्पटुता युधि विक्रमः ॥
यशसि चाभिरतिर्व्यसनं श्रुतौ ।
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ६१ ॥

अथैषा निसर्गसिद्धगुण गणयति—विपदीति ॥ विपद्यापत्काले धैर्यं निर्विकारचित्तत्व न तु दैन्यम् । " मनसो निर्विकारत्व धैर्यं सत्स्वपि हेतुषु ।" इति । अथानन्तर वाक्यारंभे वा । अभ्युदये संपदि क्षमा सहिष्णुत्वं

१ अभिरुचिः इति पाठान्तरम् ।

विनापि। " पृथग्विना० " इत्यादिना विकल्पात्तृतीया। प्रकृत्या स्वभावेन महता महात्मनां सौजन्यसपन्नानामित्यर्थः। " प्रकृत्यादिभ्यस्तृतीया " इति तृतीयासमासः। मडन भूषण तस्यैव लोकोत्तररामणीयादिकहेतुत्वादिति भाव.। शिखरिणी वृत्तम्॥ ६२॥

हाथ दानसे, मस्तक बडे लोगोंके पैरमें पडनेसे, मुख सत्य बोलनेसे, दोनों भुजा अतुल पराक्रमसे, हृदय स्वच्छ वृत्तिसे, कान शास्त्रश्रवणसे बडाईके योग्य होते हैं और येही सत्पुरुषोंके विना ऐश्वर्यके भी भूषण हैं॥ ६२॥

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं।
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्॥
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा।
सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पंथाः॥६३॥

गुणाढ्यत्वे को लाभ इत्याशङ्क्य तेषां श्रेयोहेतुत्वमाह–प्राणेति॥ प्राणाघातात् प्राणहिंसायाः निवृत्तिर्निवर्तन च। " मा हिंस्यात् सर्वभूतानि, अहिंसा परमो धर्मस्त्वधर्म. प्राणिनां वध " इत्यादिनाग्नीषोमीयपश्वालभनवृत्त्यतिरिक्तहिंसाया निषेधश्रवणात्। परधनहरणे मयमो मनोरोधश्च। "परद्रव्याणि लोष्ठवत् " इति न्यायादिति भाव·। काले समये सत्यवाक्यं यथार्थभाषण च धर्मोपदेशश्रवणादिति भाव। अत्र " ब्राह्मणार्थे गवार्थे " इत्यादिष्वसत्यवचनस्यापि निषेधाभावश्रवणात् काल इत्युक्तम्। शक्त्या प्रदान वित्तानुसारेण त्यागश्च। " वित्तशाठ्य न कारयेत् " इति वचनादिति भाव। युवतिजनकथाया परस्त्रीवृत्तांतकथने मूकभावस्तूष्णींभावशीलत्व च।" स्वप्नेऽप्यन्यवधूकथाम् " इति वचनात्। परेषामन्येषां याचकानामित्यर्थः। तृष्णा धनलिप्सा तस्या एव स्रोतसः प्रवाहस्य विभगो निरोध अभीप्सितदानेन मनोरथपरिपूरण चेत्यर्थ। ' याचमानजनमानसवृत्तेः पूरणाय वत जन्म न यस्य। तेन भूमिरतिभारवतीय न द्रुमैर्न गिरिभिर्न समुद्रैः॥ " इति श्रवणादिति भावः। गुरुषु विनयेन नम्रत्व च। " गुरौ नम्रता " इत्युक्तत्वादिति भावः। सर्वभूतेष्वशेष-

प्राणिषु अनुकम्पया दयया सामान्यं समदर्शित्वं च । सर्वशास्त्रेषु वेदवेदान्तादिनिखिलागमेष्वनुपहतः अविच्छिन्नः विधिरध्ययनाभ्यासश्च । यद्वा सर्वभूतानुकम्पेति पृथक् पदम् । तथा सर्वशास्त्रेषु सामान्यमवैषम्येण तत्तत्सिद्धान्तानुवर्तित्वम् । अनुपहतविधिरलुप्तकर्मानुष्ठानं चेत्येष गुणसमुदायः । श्रेयसां पन्थाः ... प्राप्तिमार्गः । न ह्येतद्व्यतिरिक्तोऽन्योऽस्तीत्यर्थः । एतादृशगुणसम्पत्तिः सुजनानामेवेति कृत्वा त एव श्लाघ्या इति भावः । अथवा ... सुजनानां संबन्धी पन्थाः । तत्प्रवृत्तिमार्ग इत्यर्थः । ... प्रशस्यस्य श्रः '' इति श्रादेशः । अत्र चाक्षा सज्जन... प्रायेण दैवसम्पदमभिजातानामेव सम्भवन्ति न ... भगवद्गीतासु । '' अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ '' ... '' ... त्रिभुवनगिरि ... कीर्तितयम् ।'' ... ॥ ६३ ॥

जीवहिंसासे निवृत्त रहना, पराया धन हरण करनेसे संयम करना, सत्य बोलना, समयपर यथाशक्ति दान देना, परस्त्रियोंकी कथामें मौन रहना, तृष्णाके प्रवाहको तोडना, बडे लोगोंमें नम्र रहना, प्राणिमात्र पर दया रखना, सब शास्त्रोंमें प्रवृत्ति रखना, और नित्य नैमित्तिक कर्मोंको न छोडना यह सब मनुष्योंके कल्याणका पंथ है ॥ ६३ ॥

संपत्सु महतां चित्तं भवेदुत्पलकोमलम् ॥
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ६४ ॥

... ॥ संपत्सु धनधान्यसमृद्धिषु ... महताम् सज्जनानां ... कोमलं मृदुल

---

१ ... पाठान्तरम् ।

भवेत् । न तु कठिनामित्यर्थः । विपत्सु दारिद्र्याद्यनर्थसंकटेषु महाशैलशिला-संघातः पाषाणकूटः तद्वत् कर्कशं कठोरं च भवेत् न त्वधैर्यविश्लथमित्यर्थः । न कदाप्युक्तवैपरीत्यमन्यथा माहात्म्यभंगप्रसंगादिति भावः । विवेकिनामविवेकिनां चायमेव पन्थाः आदरणीय इति तात्पर्यम् । अत्र शैलस्य महत्त्वविशेषणं तच्छिलासंघातस्यात्यन्तदुर्भेद्यत्वद्योतनार्थमुक्तं चैतदन्यत्रापि । " सौजन्यामृत-सिंधवः परहितप्रारब्धवीरव्रता वाचालाः परवर्णने निजगुणालापे च मौन-व्रताः । आपत्स्वप्यविलुप्तधैर्यनिलयाः संपत्स्वनुत्सेकिनो मा भूवन् खलवक्त्र-निर्गतविषम्लानाननाः सज्जनाः ॥ " इत्युपमालङ्कारः ॥ ६४ ॥

संपत्तिमे महात्मालोगोंका चित्त कमलसेभी कोमल रहता और आपत्तिमें पर्वतकी बडी शिलाकी तुल्य कठिन हो जाता है ॥६४॥

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं ।
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः ॥
विपद्युच्चैः स्थैर्यं पदमनुविधेयं च महतां ।
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६५ ॥

अथ द्वाभ्यामेव तद्वृत्तस्यासाधारण्यमाह—प्रियेति ॥ न्यायादनपेता न्याय्या नीतिप्रवणा वृत्तिर्जीवनम् । " वृत्तिर्वर्तनजीवने " इत्यमरः । प्रीणातीति प्रिया इष्टा । न त्वन्याय्या तस्या एव श्रेयस्करत्वादिति भावः । "इगुपधज्ञा-प्रीकिरः कः " इति कप्रत्ययः । असुभंगे प्राणप्रयासे किमुतान्यदिति भावः । मलिनं दुष्कर्म असुकरमकर्तव्यं न त्वापत्काले नास्ति मर्यादेति न्यायत्सुकरं तस्यैवैहिकामुष्मिकफलदत्वादिति भावः । " ईषद्० " इत्या-दिना खल्प्रत्ययः ततो नञ्समासः । असन्तः कुहकास्तु नाभ्यर्थ्याः कस्मि-श्चिद्विषयेऽपि न प्रार्थनीयाः किंतु सन एव तेषामुपेक्ष्यत्वादिति भावः । यद्यपि " न पदादौ खल्वादयः " इत्याह वामनस्तथापि कविप्रौढ्या तुश-ब्दस्य पादादौ प्रयोगः । सुहृदपि प्राणप्रियबन्धुरपि किमुतान्यः इति भावः । " सुहृद्दुर्हृदौ मित्रामित्रयोः " इति निपातनात् साधुः । कृशधनः धनहीनधनः न याच्यः याचितुं न योग्यः । धनादिकमिति शेषः । किन्तु

घनपरिपूर्ण एव तथाविधयाच्ञाया अनुचितत्वादिति भावः । विपद्यनर्थस-
कटेऽप्युच्चै धैर्यं महाधैर्यं न तु भयविह्वलत्वम् । " आपत्स्वप्यविलुप्तधैर्य-
निचय , विपदि धैर्यमथाभ्युदये क्षमा " इति चोक्तत्वादिति भावः । महतां
वृद्धानामनुविधेयमनुकूल पद व्यवसित न त्वननुकूल तथाभूतस्यैव श्लाघ्य-
त्वादिति भावः । " पद व्यवसितनाणस्थानलक्ष्माघ्रिवस्तुषु । " इत्यभि-
धानात् । इतीदमेतत् विषममसाधारणतया दुष्करमसिधाराव्रतमस्याभिचारि-
तया सता सत्पुरुषाणां केनोद्दिष्टमुपदिष्ट न केनापीत्यर्थः । स्वतःसिद्धत्वा-
दिति भावः । अत्रासिधाराव्रतनिरूपितत्वादसिधाराव्रतसावधानेनैकाग्रतया
नि[illegible] असिधाराव्रतम् । यद्वा आसिधारया व्यवहारता व्रत वीरव्रत-
मित्यर्थः । यथा । " युवा युवत्या सार्धं यन्मुग्धभर्तृवदाचरेत् । अन्तर्नि-
[illegible] [illegible] असिधाराव्रतम् ॥" इत्यादेयम् । शिखरिणी वृत्तम् ॥६५॥

सत्पुरुष लोग असंतोंसे कुछ याचना नहीं करते और स्वल्प
[illegible] सज्जनसेभी नहीं मांगते, न्यायोक्त अपनी जीविका उन्हें
प्रिय है, प्राण जानेपरभी मलिन कर्म उनसे दुष्कर है, विपत्तिमें
[illegible] रहते हैं और श्रेष्ठलोगोंके आचरणको धारण किये रहते
हैं [illegible] धारके कठोर व्रतको उन्हें किसने उपदेश किया
[illegible] ने [illegible] किया है ॥ ६५ ॥

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः ।
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ॥
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः ।
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६६ ॥

कीर्तन, न दत्त्वा परिकीर्तयेत् " इति मनुस्मरणादिति भावः । सदसि सजविद्वत्सभायामुपकृतेः कथन परोपकारप्रख्यापन च न तु तत्र तूष्णीं-शीलत्वमन्यथा कृतघ्नत्वप्रसगादिति भावः । लक्ष्म्या सपत्त्यामनुत्सेको गर्व-राहित्य न तु मदावत्वम् । " सपत्स्वनुसेकिन " इत्युक्तत्वादिति भावः । निराभिभवसारा अनिंदापराः परकथाः पुरुषातरप्रसगाश्च न तु गर्हणपराः । " आत्मप्रशसा परगर्हामिति च वर्जयेत् " इत्यादिस्मरणात् । सतामि-त्यादि । वृत्त च पूर्ववत् ॥ ६६ ॥

दानको गुप्त रखना, अपने घर आये हुए पुरुषका सत्कार करना; पराया भला कर मौन रहना, दूसरेके किये हुए उपकारको सभामें वर्णन करना, धन पाकर गर्व न करना और पराई चर्चामें उसके निरादरकी बात बचाकर कहना, यह तरवारकी धाराके समान कठिन व्रत सत्पुरुषोंको किसने उपदेश किया है ॥ ६६ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते[1] ।
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते[2] ॥
अन्तःसागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते[3] ।
प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः[4] ॥ ६७ ॥

अथाधममध्यमोत्तमवृत्तिमाह—सतप्तायसीति ॥ सम्यगग्नितप्ताय.पिंडे संस्थि-तस्य निक्षिप्तस्येत्यर्थ. । पयसो जलस्य नामापि नामधेयमात्रमपि न श्रूयते । मूलतो ध्वस्तमेव भवतीत्यर्थ । स्वरूपदर्शन तु किमु वक्तव्यमिति भावः । तदेव पय. नलिनीपत्रस्थित पद्मपत्रगत सन् मुक्ताकारतया मौक्तिकरूपेण दृश्यते न तु मौक्तिकत्वेनेत्यर्थ. । तदेव पय अत सागरे सागरांतराले । अतरित्यव्ययम् । या शुक्ति. मुक्तास्फोट. तस्या. मध्ये उदरे पतित सन्मौ-क्तिक जायते । मौक्तिकत्वेन परिणमतीत्यर्थ. । " ज्ञाजनोर्जा " इति जादेश. । मुक्तैव मौक्तिकमिति विग्रह । विनयादित्वात्स्वार्थे ठक् । अतः

---

१ ज्ञायते इति पाठान्तरम् । २ राजते इति पाठान्तरम् । ३ स्वाती इति पाठान्तरम् । ४ गुणा ससर्गतो देहिनाम इति पाठान्तरम् ।

प्रवेश भूता अधममध्यमोत्तमगुणा निकृष्टसाधारणोत्कृष्टाश्रयाणा श्रितवता-मेवाविश. नानश्रवणादिरूपा वृत्तयो व्यापारा भवन्तीति यथाक्रममन्वयाव्ययास-द्व्याप्तकारः । अतः महदाश्रय एव कर्तव्यः । " कर्तव्यो महदाश्रयः " इति वचनात् । अत्रोत्तमनन्यमाधमा इति लोकप्रासिद्धोद्देशक्रम कविना न वर्णित इति ज्ञेयम् । शार्दूलविक्रीडित वृत्तम् ॥ ६७ ॥

तप्त लोहेपर जलकी बूंद पडनेसे उसका नाम भी नहीं रहता, वही बूंद कमलके पत्रपर पडनेसे मोतीके सदृश शोभित होता है, फिर वही बूंद स्वाती नक्षत्रमें समुद्रकी सीपमे पडनेसे साक्षात् मोती हो जाती है। इससे यह सिद्ध हुआ कि, प्रायः अधम मध्यम और उत्तम गुण संसर्ग (संग) हीसे होते हैं ॥ ६७ ॥

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो ।
यद्भर्तुरेव हितमिच्छति तत्कलत्रयम् ॥
तन्मित्रमापदि सुखे च समक्रियं य- ।
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

त्रयमुक्तसत्पुत्रादित्रितय जगाति भुवि पुण्यकृतो धन्या लभते प्राप्नुवति । न त्वकृतसुकृता इत्यर्थ. । एवंविधत्रितयलाभस्य महापुण्यफलत्वादिति भावः । वसततिलका वृत्तम् ॥ ६८ ॥

जो अपने चरित्रोंसे अपने पिताको प्रसन्न रक्खै ऐसा पुत्र, जो अपने पतिका निरंतर हित चाहै ऐसी स्त्री और जो आपत्ति और सुख दोनोंमें समान भाव रक्खै ऐसा मित्र, जगत्में यह तीनों पुण्यवान्हीको मिलते हैं ॥ ६८ ॥

एको देवः केशवो वा शिवो वा ।
एकं मित्रं भूपतिर्वा यतिर्वा ॥
एको वासः पत्तने वा वने वा ।
एका नारी सुन्दरी वा दरी वा ॥ ६९ ॥

-एक इति ॥ एको मुख्यो देवः प्रशस्ताः केशाः यस्य स केशवः । " केशाद्वोऽन्यतरस्याम् " इति वप्रत्ययः । विष्णुर्वा शिवः शंकरो वा । एक मुख्य मित्र भूपतिः राजा वा यति सन्यासी वा । एको मुख्यो वासो वसतिस्थान पत्तने नगरे वनेऽरण्ये वा । एका मुख्या नारी भार्या सुन्दरी सुरूपा वा दरी पर्वतगुहा वा । शालिनी वृत्तम् ॥ ६९ ॥

एक देवको ग्रहण करना चाहिये केशव हो वा शिव, एक मित्र करना चाहिये राजा हो वा तपस्वी, एक जगह वास चाहिये नगर हो वा वन और एक स्त्रीसे प्रीति हो सुंदरी हो वा कंदरा (गुहा) हो ॥ ६९ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः । स्वार्थान् सम्पादयन्तो[1] विततपृथुतरारम्भयत्नाः परार्थे ॥ क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् दुःखयन्तः[2] । सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ ७० ॥

१ प्रियतरा इति पाठान्तरम । २ दूषयन्त. इति पाठान्तरम् ।

अथ सतां तावदसाधारणगरिमास्पदत्वेनाशेषोपादेयत्वमाह—नम्रत्वेनेति ॥ नम्रत्वेन प्रह्वत्वेनैवोन्नमत औन्नत्यं प्राप्नुवतस्तथा भावस्यैवौन्नत्यहेतुत्वादिति भावः । परेषां गुणकथनैः संवर्णनैः स्वान् स्वकीयान् गुणान् सौजन्यादीन् ख्यापयतः प्रकटयतः न त्वात्मप्रशंसया । तादृग्भावस्यैव निजगुणप्रकटनहेतुत्वादिति भावः । परार्थे परप्रयोजननिर्वहणे वितती विस्तृतौ पृथुतरौ गुरुतरौ चारम्भयत्नौ प्रारम्भोत्साहौ येषां ते तथोक्ताः सत एव स्वार्थान् स्वप्रयोजनानि संपादयतो निष्पादयतः परकार्यसाधनपुरस्कारेणैवात्मीयकार्यसाधनतत्परा न त्वेकाकिन इत्यर्थः । तथाभूतत्वस्यैवात्मार्थकृत्वादिति भावः । [illegible] [illegible] निन्दया रूक्षाक्षराणि परुषाक्षराणि तेषां [illegible] मुखानि येषां तान् परुषभाषिण इत्यर्थः । दुर्जनान् खलान् [illegible] न दूषयतः तथाविधत्वस्यैव तेषां [illegible] । [illegible] सत्पुरुषाः जगति लोके बहुमता [illegible] न पूजनीया इति काकुः । [illegible] । [illegible] वृत्तम् । [illegible] वृत्तम् ॥ ७० ॥

नम्रतासे ऊँचे होते हैं और पर गुण कथन करनेसे अपना गुण [illegible] करते हैं और निरंतर विस्तारपूर्वक परकार्य करनेसे अपना कार्य [illegible] हैं और निन्दक दुष्टोंको अपनी क्षमाहीसे [illegible] करते हैं ऐसे आश्चर्य आचरणवाले बहुमाननीय संतलोग [illegible] पूजनीय नहीं हैं ॥ ७० ॥

भवन्ति नम्रास्तरवः फलोद्गमै- ।
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ॥
अनुद्धताः सत्पुरुषाः समृद्धिभिः ।
स्वभाव एवैष परोपकारिणाम् ॥ ७१ ॥

स्वनता भवति । घना मेघाः नवांबुभिर्नूतनोदकैरुपलक्षिताः सतः दूरविलंबिन सर्वत्र प्रवर्षणार्थमन्तारिक्षसचारिणो भवति । सत्पुरुषाः समृद्धिभिरुपलक्षिता अपि अनुद्धता अनुद्धता भवति । तीक्ष्णस्वभावा न भवतीत्यर्थः । अनर्थिता इति पाठे अयाचिता भवति याच्ञा विनैव परहितमाचरतीत्यर्थः । तथा एष उक्तनिजनम्रत्वादिव्यवहार परोपकारिणा परहिताचरणतत्पराणा स्वभावो निसर्गसिद्ध एव न त्वाहार्यक इत्यर्थ. । महातो हि परोपकारार्थक्लेश क्लेशत्वेन न गणयन्ति तेषा तस्य स्वाभाव्यादिति भावः । तदुक्तम् । " परोपकाराय फलन्ति वृक्षाः परोकाराय वहन्ति नद्य. । परोपकाराय चरन्ति गावः परोपकारार्थमिद शरीरम् ॥ " इति । अर्थांतरन्यासोऽलङ्कार. । वशस्थवृत्तम् । " जतौ तु वशस्थमुदीरित जरौ " इति लक्षणात् ॥ ७१ ॥

जैसे फल होनेसे वृक्ष नम्र होते है, जैसे नवीन जल भरनेसे मेघ भूमिपर झुकजाते हैं वैसेही सत्पुरुषभी सम्पत्ति पायके उद्धत नही होते किन्तु नमते हैं अर्थात् परोपकारी जीवोका यही स्वभाव है ॥ ७१ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ॥
विभाति कायः करुणाकुलानां परोपकारेण न चंदनेन ७२

अर्थपा मुख्यमण्डनसम्पत्तिमाह—श्रोत्रमिति ॥ करुणाकुलाना दयाळुना परोपकारिणामित्यर्थ. । श्रोत्र कर्ण । " कर्णशब्दग्रहौ श्रोत्रम् " इत्यमरः । श्रुतेन धर्मशास्त्रश्रवणेनैव विभाति प्रकाशते । कुण्डलेन सुवर्णमणिमयकर्णभूषणेन न तु विभाति । पाणिर्हस्त दानेन सत्पात्रत्यागेन विभाति । कङ्कणेन कनकवलयेन न तु विभाति । कायो देह परोपकारेण परेषा हिताचरेण विभाति । कस्तूरीघनसारमिश्रितपटीरपङ्कलेपेन तु न विभाति । महात्मना श्रवणादिकमेव स्वाभाविक मण्डन न त्वन्यत् । तस्य नश्वरत्वादिति भाव । वृत्तमुपजाति ॥ ७२ ॥

---

१ पर.णाम् इति पाठान्तरम् । २ परोपकारैर्न तु इति पाठान्तरम् ।

कानकी शोभा शास्त्रश्रवणसे है कुण्डल पहिरनेसे नहीं, हाथकी शोभा दान करनेसे है कंकण पहिरनेसे नहीं, करुणामय जनोंके देहकी शोभा परोपकार करनेसे है कुछ चंदन लगानेसे नहीं ॥७२॥

पद्माकरं दिनकरो विकचं करोति ।
चन्द्रो विकासयति कैरवचक्रवालम् ॥
नाभ्यर्थितो जलधरोऽपि जलं ददाति ।
सन्तःस्वयं परहिते विहिताभियोगाः ॥७३॥

यदुक्तमनर्थिता सत्पुरुषा इत्यादि तदेव प्रपञ्चयति—पद्माकरमिति ॥ दिनं दिवसं करोतीति दिनकरः सूर्यः । " कृञो हेतु० " इत्यादिना टप्रत्ययः । नाभ्यर्थितः न याचितः सन्नित्यर्थः । नशब्दस्य सुप्सुपेति समासः । पद्माकरं पद्मवनं विकचं विकासितं करोति । " प्रफुल्लोत्फुल्लसंफुल्लव्याकोचविकचस्फुटाः । फुल्लश्चैते विकासिते " इत्यमरः । तथा चन्द्रोऽपि कैरवचक्रवालं कुमुदमण्डलम् । " सिते कुमुदकैरवे " इत्यमरः । विकासयति व्याकोचयति । तथा जलधरो वारिवाहोऽपि । पयोदान् । नाभ्यर्थितः सन्नेव जलं ददाति प्रार्थितं । तथा हि सन्तः सत्पुरुषाः स्वयमयाचिता एवेत्यर्थः । परेषां हिते हिताचरणे विहिताभियोगाः कृताभिनिवेशाः न स्वार्थबोधिका इत्यर्थः । अतो गुणैः हिताचरणं तेषामिति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थांतरन्यासः । नात्र स्वार्थविशेषकार्यकारणभावाभ्यां न दृष्टप्रकृतिकार्यसमर्थनमर्थांतरन्यास इति सर्वस्वमतम् । वसन्ततिलका वृत्तम् ॥ ७३ ॥

सूर्य बिना याचे स्वतः कमलके समूहको विकासित करता है, चन्द्रमा बिना याचे कुमुदके समूहको प्रफुल्लित करता है और मेघ बिना याचना किये सृष्टिमें जल देता है ऐसेही सन्तजन बिना याचे ही पराये हितके हेतु आपसे आप उद्योग करते हैं ॥ ७३ ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये ।
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥

तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये ।
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥७४॥

अथ व्यापारतारतम्येन पुरुषाणामुत्तमादिभेदमाह—एत इति ॥ ये पुमांसः स्वार्थान् स्वप्रयोजनानि । "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।" इत्यभिधानात् । परित्यज्य त्यक्त्वा परार्थघटकाः परप्रयोजनसंघटनशालि एते सत्पुरुषा पुरुषोत्तमा सर्वस्य तेनैवाभिव्यक्तत्वादिति भाव । ये तु स्वार्थस्याविरोधेनावैषम्येण । स्वार्थनिर्वाहतत्परत्वेनेत्यर्थ । परार्थं परप्रयोजननिर्वाहार्थमुद्यमभृत उद्योगभाज ते सामान्या साधारणा मध्यमपुरुषा इत्यर्थः । ये तु स्वार्थाय स्वार्थनिष्पत्त्यर्थं परहित निघ्नति नाशयन्ति तेऽमी मानुषराक्षसाः मानुषशब्दवाच्यराक्षसा । तथा क्रूराचारतत्परत्वात्पुरुषाधमा इत्यर्थः । ये तु निरर्थकं निष्फल प्रयोजननिष्पत्तिराहित्येनापीति यावत् । परहित घ्नन्ति ते पुमांसः के वा कथम्भूता वा न जानीमहे । उक्तत्रिविधपुरुषविलक्षणत्वात्तान् ज्ञातु न शक्नुम इत्यर्थः । अत एव परमनीचा इत्यर्थः । उक्तपक्षेषु य. श्रेयान् तत्पक्षाश्रयण कर्तव्यमायुष्मतेति भावः । शार्दूलविक्रीडित वृत्तम् ॥७४॥

सत्पुरुष वे हैं जो अपना अर्थ छोड दूसरेके कार्यको साधते हैं, सामान्यपुरुष वे हैं जो अपने और पराये दोनो कार्योंको साधन करते हैं और मनुष्योंमें राक्षस वे पुरुष हैं जो अपने हितके अर्थ पराये कार्यको नष्ट करते हैं और जो व्यर्थ पराये कार्यकी हानि करते हैं वे कैसे पुरुष हैं उन्हे हम नहीं जानते ॥ ७४ ॥

पापान्निवारयति योजयते हिताय ।
गुह्यं निगूहति[1] गुणान् प्रकटीकरोति ॥
आपद्गतं च न जहाति ददाति काले ।
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ७५ ॥

---

१ निघ्नति इति पाठांतरम् । २ च गूहति इति पाठांतरम् ।

अथ सन्मित्रलक्षणमाह—पापादिति ॥ पापात् पापाचरणान्निवारयति निवर्तयति । धर्मोपदेशेन दुष्कर्मप्रवृत्ते विरमयतीत्यर्थः । “ जुगुप्साविराम० ” इत्यादिना पञ्चमी । हिताय योजयते सत्कर्माचरणाय प्रवर्तयत इत्यर्थः । यद्वा श्रेय सग्रहार्थं प्रोत्साहयतीत्यर्थ. गुह्य गोप्य निगूहत्याच्छादयति न कुत्रापि प्रकटयतीत्यर्थः । गुणान् सौशील्यादिसद्गुणान् प्रकटीकरोति प्रख्यापयति न तु निगूहयतीत्यर्थ । आपद्गतमतिसकटस्थमपि न जहाति न त्यजाति । तन्मित्रमापदि सुखे च समक्रिय यदित्युक्तत्वादिति भाव । काले व्यसनादिसमये ददाति वाञ्छित दिशाति तदिद पापनिवारणादिकम् सर्व मतः सत्पुरुषा सन्मित्रस्याकैतवसुहृद लक्षण स्वरूप प्रवदन्ति । वसन्ततिलका वृत्तम् ॥ ७९ ॥

मित्रको पाप करनेसे वर्जित करै और उसके हितकी बात उसे उपदेश करै, उसकी गुप्त बातको छिपावे, गुणोंको प्रगट करै, आपत्तिकालमें साथ न छोडे और समय पडेपर यथाशक्ति द्रव्य भी दे यह अच्छे मित्रोंका लक्षण सन्तोने कहा है ॥ ७९ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिला ।
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ॥
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं ।
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ७६

गन्तुमुन्मनः उद्युक्तमभवत् । " उत्क उन्मनाः " इति निपातनात् साधुः । जलसशोषणे क्षीराणा वहिर्निर्गमनसभवादिति भावः । तदनन्तर तेन जलेन युक्तमिति सशाम्याति प्रशात भवति । " शमामष्टानाम् " इति दर्विः । तथा हि सता मैत्री सौहार्दं मैत्री व्याख्याता ईदृशी पुनः परस्परव्यसनासहनशीला खलु अत एतद्युक्तमिति भाव । अत्र स्वभावसिद्धस्य क्षीरर्नीरव्यवहारस्य परस्परमन्तापदर्शनहेतुकत्वेनोत्प्रेक्षणात् क्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा । सा चोक्तार्थांतरन्यासनिर्व्यूढेत्यनयोर्विजातीयसङ्करः शादूलविक्रीडित वृत्तम् ॥ ७६ ॥

दूधमें जब जल मिला तो उस दूधने अपना सब गुण और रूप अपने जलरूपी मित्रको दे दिया, फिर दूधमे ताप देखकर जलने अपना शरीर अग्निमें होम दिया अर्थात् जलगया फिर दूधने भी मित्रकी इस आपत्तिको देखकर अग्निमें गिरना चाहा फिर जलके छींटे पाके अपने मित्रको आया जान ठंढा हो बैठगया सो उचितही है क्योंकि सत्पुरुषोंकी मैत्री ऐसीही होती है ॥ ७६ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा- ।
मितश्च शरणार्थिनं शिखरिणां गणाः शेरते ॥
इतोऽपि वडवानलः सह समस्तसंवर्तकै- ।
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ७७ ॥

अथैतन्माहात्म्यमाह—इत इति ॥ इतोऽस्मिन् देशे केशवो विष्णु कुक्षिस्थाखिलभुवन इति भाव । स्वपिति योगानुसधानेन निद्राति । " रुधादिभ्य सार्वधातुके " इतीडागम । इतोऽस्मिन् प्रदेशे तस्य केशवस्य इमे तदीया । त्यदादित्वात् " वृद्धाच्छ " । य द्विषो हिरण्याक्षरावणादयस्तेषा कुल समूहस्तिष्ठतीति शेषः । इतस्ततोऽन्यस्मिन् प्रदेशेऽपि शरणार्थिनो रक्षणार्थिनो रक्षणाभिलाषिण. । " शरण गृहरक्षित्रो " इत्यभिधानात् । शिखरिणा मैनाकादिपर्वताना गणाश्च शेरते स्वपने । " शीङो रुट् " इति रुडागम । इतस्तस्मादप्यन्यस्मिन् प्रदेशे

समस्ता ये संवर्तकाः प्रलयकालप्रवर्षिमेघविशेषा. अत एव पुष्कलावर्तकसंज्ञया च व्यवह्रियन्ते तै. सह वडवानलोऽपि वसति । तस्मात् सिंधोः समुद्रस्य वपुः शरीरं विततं केशवावतारत्वेन विस्तृतमूर्जितम् । वडवानलाश्रयत्वेऽप्यतिवर्धिष्णुमरसह पर्वतभरणेन भरोद्वहनक्षमं च । अहो अप्रमेयानुभावत्वेनात्यंताश्चर्यमित्यर्थः । अत्र लक्षयोजनपरिच्छिन्नस्य समुद्रस्यापरिच्छिन्नकेशवाद्यवतारत्वकथनादाधिकप्रभेदोऽलंकारः । " आधाराधेययोरानुरूप्याभावोऽधिको मत । " इति लक्षणात् । पृथ्वी वृत्तम् ॥ ७७ ॥

समुद्रमें एक ओर शेषशायी विष्णु सोते हैं, एक ओर विष्णुके शत्रु राक्षसोंका कुल रहता है, एकओर शरणार्थी पर्वतोंके समूह पडे हैं और एकओर वडवानल प्रलयकी अग्निसहित जलको औटाय रहा है परन्तु इन सबोंसे वह कुछ नहीं घबराता है इससे यह जान पडा कि समुद्रका शरीर बडा विशाल बलवान् और भारसहनेवाला है भाव यह कि, सत्पुरुष भी समुद्रवत् होते हैं ॥ ७७ ॥

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं ।
श्लाघ्यं जन्मध्रुवस्य भ्रमति नियमितं यत्र तेजस्वि चक्रम् ॥
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो ।
ब्रह्मांडोदुंबरांतर्मशकवदपरे जंतवो जातनष्टाः ॥ ७८ ॥

णिर्ध्रुव स्वायत्तत्वेन तेजस्विचक्र प्रवर्तयतीति श्रीविष्णुपुराणभागवतादिकथा-नुसन्धेया । तत' किमत आह । परहितकरणे परोपकाराचरणे विषये व्यर्थो निरर्थ' असमर्थ. अप्रयोजक इति यावत् । यः पक्षः सजातो येषा त सञ्जातव्यर्थपक्षाः न तु सजातपरहितकरणमर्थपक्षा इत्यर्थ. । सापेक्षत्वेऽपि गमकत्वात्समास । अपरे उक्तोभयादन्ये जन्तव प्राणिन' । नैच्योद्भावना-र्थकोऽय जन्तुशब्दप्रयोग । उपरिष्टान्न ध्रुववदुपरिभागेऽपि वर्तमाना न भवन्तीत्यर्थ । अधश्च न कूर्मवदधस्ताद्वा वर्तमाना न भवन्तीत्यर्थः । किंतु उदुंबर जन्तुफलाख्यवृक्षविशेष तस्य फलमुदुम्बरम् । " उदुम्बरो जन्तु-फलो यज्ञाङ्गो हेमदुग्धक । " इत्यमरः । ' फले लुक् " इति लुक् । ब्रह्माडमुदुम्बर तस्यात अन्तराले । अव्ययमेतत् । ये मशकास्तैस्तुल्य तद्वत् । " तेन तुल्य क्रिया चेद्वति ' इति वतिप्रत्यय । जाता उत्पन्नाश्च ते नष्टाश्च जातनष्टा भवन्तीति शेष । स्नातानुलिप्तवत्पूर्वकालसमास. । यतो न तै किमपि साधितमतो मशकवन्निष्फल जन्मभि किमन्यैरिति भावः । रूपकोपमेययो सकर । स्रग्धरा वृत्तम् ॥ ७८ ॥

एक तो उस कूर्मका जन्म लाभवान् हुआ कि जिसने अपनी पीठ चतुर्दश भुवनोंके भारके धारणके लिये अर्पण की है और एक औत्तानपादि ध्रुवका जन्म स्तुत्य हुआ कि जिसमे यह ग्रह-नक्षत्रादियोका शिशुमारख्य तेजस्वी चक्र नियुक्त हुआ घूमता है । इन दोनोंसे अतिरिक्त दूसरे जंतु जो कि पराहित करनेमें असमर्थ पक्षवाले और न ध्रुवके समान ऊपर न कूर्मके समान नीच किंतु बीचमेंही ब्रह्माडरूप उदुंबर फलके बीचमें रहनेवाले मशकोंके समान कितने जन्म लेकर नष्ट नहीं हुए हैं ॥ ७८ ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः ।
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ॥
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं[१] ।
कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितम्[२] ७९

---

१ स्वान् गुणान् इति पाठान्तरम् । २ लक्षणम् इति पाठान्तरम् ।

अथ विधेयल्लोकं संबोधयन् सदाचारं शिक्षयति—तृष्णामिति ॥ हे जने-त्यत्राध्याहार्यम् । सर्वत्रापि मध्यमपुरुषप्रयोगसंभवात् । अलभ्येषु परधनेषु लाभाभिलाषः तृष्णा तां छिंधि वैराग्यशस्त्रेण विदारय । अन्यथा अनेका-शापाशनिबद्धत्वेन क्लेशभागित्वं स्यादिति भावः । परिभवादिपूत्पद्यमानेषु क्रोध-प्रतिबन्धः क्षमा तां भज सेवस्व । अन्यथा उग्रभावेन कार्यहानिः स्यादिति भावः । मदं विद्याजनितदर्पं जहि विज्ञानेन विनाशय । अन्यथा विवेकशू-न्यतया अकार्यकरणप्रवृत्तौ अनर्थप्राप्तिः स्यादिति भावः । पापे पापकर्मा-चरणे रतिं प्रीतिं मा कृथाः अज्ञानेन मा कार्षीः । किंतु धर्मं चरेत्याद्युपदे-शवचनेन सत्कर्माचरण एव रतिं कुर्वित्यर्थः । अन्यथा निरयपातः स्यादिति भावः । करोतेर्लुङ् थास् । “ न माङ्योगे ” इत्यट्प्रतिषेधः । सत्यं सूनृतं श्रुतिः सत्यं वदेति वचनेन यथार्थमेव वचनं वदेत्यर्थः । अन्यथा ।

दुःखेषु भूतेष्वित्यर्थः । तारकादित्वादितच् । जातावेकवचनम् । दयां दुःखप्रहरणेच्छालक्षणा कुरु । दुःखिषु करुणेति शास्त्रानुरोधाद्विधेहि । अन्यथा चित्तशुद्ध्यसंभवादिति भावः । कुत एतत् सर्वं तृष्णाच्छेदादिकम् सतां सज्जनानां चेष्टितं व्यापारः यदि सौजन्ययशःकामी तदैव प्रवर्तस्व । अन्यथा पुरुषार्थलाभासम्भवादिति भावः ॥ ७९ ॥

तृष्णाका छेद, क्षमाका सेव,, मदको त्याग, पापमें प्रीति मत करो, सत्य बोलो, साधुजनोंकी मर्यादा (मार्ग) को प्राप्त हो, पण्डितोंका सेवन करो, मान्यजनोंको मानो, शत्रुओंको भी प्रसन्न रक्खो, अपने गुणोंको प्रसिद्ध करो, अपनी कीर्तिका पालन करो और दुःखियोंपर दया रक्खो यही सत्पुषोंका लक्षण है॥७९॥

मनसि वचसि काये पुण्यपीयूषपूर्णा- ।
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ॥
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ८० ॥

ईदृशा विरला एवेति निगमयति—मनसीति ॥ मनसि वचसि काये मनोवाक्कायेषु पुण्यमेव पीयूषममृतं तेन पूर्णा करणत्रितयेनापि सत्कर्माचरणतत्परा इत्यर्थः । " पीयूषममृतं सुधा " इत्यमरः । त्रयाणां भुवनानां समाहारस्त्रिभुवनम् । लक्षणया त्रिभुवनस्थजनानित्यर्थः । " तद्धितार्थ० " इत्यादिना समासः । पात्रादित्वान्न स्त्रीत्वम् । उपकारश्रेणिभिर्हिताचरणपरम्पराभिः प्रीणयन्तः सन्तोषयन्तः " प्रीञ् प्रीणने " इति धातोश्चुरादिकाण्णिचि शतृप्रत्ययः । " धूञ्प्रीञोर्नुग्वक्तव्यः " इति नुगागमः । परेषां गुणपरमाणूनत्यल्पगुणानपीत्यर्थः । यतोऽणुर्नास्ति स परमाणुरित्याहुः । पर्वतीकृत्य महत्तरान् कृत्वा अभूततद्भावे च्विः । " ऊर्यादिच्विडाचश्च " इति गतिसंज्ञायां " कुगतिप्रादयः " इति समासः । नित्यं ख्यापयन्तः निरन्तरं प्रशंसन्तः । तथा निजहृदि स्वान्तःकरण एव विकसन्तः सन्तुष्यन्तः सन्तः सत्पुरुषाः कियन्तः कतिपये विरला एवेत्यर्थः । सन्ति न तु मादृशाः ।

उक्तमेवार्थं नीचादिवृत्तिकथनद्वारा द्रढयति—प्रारभ्यत इति ॥ नीचैरधमैः विघ्नेभ्योऽन्तरायेभ्यो भयं तेन हेतुना न प्रारभ्यते खलु नोपक्रम्यते । कार्यमिति शेषः " विघ्नोऽन्तरायः । प्रत्यूहः " इत्यमरः । मध्या मध्यमास्तु कार्यं प्रारभ्योपक्रम्य विघ्नैर्निहता विहतीकृता सन्तः "विरमन्ति विरता भवन्ती-त्यर्थः । उत्तमा उत्कृष्टा गुणा धैर्यशीलादयो येषां ते तथोक्ताः पुरुषश्रेष्ठास्तु निर्विघ्नैर्मुहुर्मुहुः पुनः पुनः प्रतिहन्यमानाः बभज्यमाना अपि प्रारब्धमुत्तमजन्म कर्म न परित्यजन्ति न निसृजन्ति । अत कालकूटवडवानलादिभिः प्रतिबध्यमानतरेऽपि उक्तगुणसम्पन्नतया देवाना सुधोत्पत्तिपर्यंत मथन कृतमिति शेषः इत्यभिप्रायेण तात्पर्येण । अत्र प्रकरणे कुत्रचिद्धैर्यस्य । कुत्राचिद्वयस्यापि प्राधान्यविवक्षया इति द्रष्टव्यम् । मनसो निर्विकारत्व धैर्यं सत्स्वपि हेतुषु । " उक्तं धैर्यलक्षणं धैर्यम । शील तु नियतकुलोचितमत्स्वभाव इति शेषः । " शीलं स्वभावे सद्वृत्ते " इत्यभिधानात् । वसन्ततिलका वृत्तम् ॥ ८३ ॥

विघ्नके भयसे नीचजन कार्यका आरंभही नहीं करते और मध्यमजन आरंभ करके विघ्नको देख कार्यको छोड बैठते हैं और उत्तमजन वारंवार विघ्न होनेसेभी कार्यका आरंभ करके परित्याग नहीं करते। अर्थात उसको पूराही करके छोडते हैं ॥ ८३ ॥

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनः ।
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ॥
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो ।
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ८४ ॥

खट्वया समा । " " स्यान्निद्रा शयनं स्वापः " इत्युभयत्राप्यमरः । क्वचिच्छाक एवाहारो यस्य नीरसाहारोऽपीत्यर्थः । क्वचिच्च शाल्योदने शाल्यन्ने रुचिः स्वादो यस्य स तथोक्तः षड्रसोपेतमृष्टान्नभोजनसंतुष्टोऽपीत्यर्थः । क्वचित् कथा जीर्णवस्त्रशकलनिर्मिताच्छादनं धारयतीति कथाधार्यपि । क्वचिच्च दिव्याम्बरधरः कनत्कनकपीताम्बरधरोऽपि कार्यार्थी कार्यनिष्पत्त्यभिलाषी । अर्थ अभिलाषः तद्वानर्थीति विग्रहः । " कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसी " इति महाभाष्ये । मनस्वी महामनाः धीरः । " प्रशसायामिनिः " । पृथ्वीशय्यादिना दुःखं न गणयति । पर्यंकशयनादिना सुखं च न गणयति । किंतु सुखदुःखयोः समानावस्थयैव कार्यसाधनतत्परो भवतीत्यर्थः ॥ ८४ ॥

कभी खाली भूमिपर सो रहते, कभी अच्छे पलंगपर शयन करते, कभी साग पात खाके रह जाते, कभी अच्छे चावलादि पदार्थोंको भोजन करते, कभी गुदडी ओढके दिन विताते और कभी दिव्यवस्त्र धारण करते हैं । मनस्वी और कार्यार्थी पुरुष सुखदुःख दोनोंको नहीं गिनते ॥ ८४ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु ।
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥
अद्यैव वा मरणमस्तु युगान्तरे वा ।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥८५ ॥

अथ धीराः लोकनिंदास्तुतिप्राप्ता अपि न्यायमार्गान्न भ्रश्यन्तीत्याह—निंदन्त्विति ॥ नीतिनिपुणा नयविशारदा निंदन्तु कथञ्चिद्दूषयन्तु वा । यदि अथवा स्तुवन्तु भूषयन्तु वा । लक्ष्मीः सम्पत् समाविशतु प्राप्नोतु वा । उत यथेष्टम् निरर्गलम् गच्छतु वा । अद्यैवेदानीमेव मरणं निधनमस्तु वा उत युगांतरे कल्पांतरे वास्तु तथापि धीरा धैर्यशालिनः न्याय्यान्न्यायादनपेतात् पथो मार्गात् पदमेकपादविन्यासमात्रमपि न प्रविचलन्ति न भ्रश्यन्ति । तेषां न्याय्यमार्गाश्रयणमेव परमार्थो न निंदास्तुत्यादिरिति भावः ॥ ८५ ॥

रमयेद्यः स कांत इतीरितः ॥ " इत्युक्तलक्षणः कांत इवाचरति । उक्तविशेषणैः कातसादृश्यलाभात्स इव वर्तते इत्यर्थः । " उपमानादाचारे " इति क्यङ् । " अकृत्सार्वधातुकयोर्दीर्घः " इति दीर्घः । अत एवोपमा सा च प्रायःशब्दाभिव्यजितोत्प्रेक्षया सङ्कीर्यते । तदुक्तमाचार्यदंडिना । " मन्ये शंके ध्रुव नून प्राय इत्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥ " इति ॥ १०२ ॥

बालोंको बिखेरता, आखोंको किञ्चित् २ मूंदता, साडी बलात्कारसे उडाता, देहमें रोमाञ्चित करता, चलनेमें उद्वेग और कम्प प्रकट करता बेरबेर सीसी करनेमें ओठोंको पीडित करता इस प्रकारका शिशिरऋतुका वायुँ स्त्रियोंके विषयमें पतिकासा आचरण करता है ॥ १०२ ॥

वैराग्ये सञ्चरत्येको नीतौ भ्रमति चापरः ॥
शृङ्गारे रमते कश्चिद्भुवि भेदाः परस्परम् ॥ १०३ ॥

वैराग्य इति ॥ एकः पुरुषो वैराग्ये सञ्चरति । चापरोऽन्यो नीतौ भ्रमति भ्रमणं करोति कश्चित् पुरुषः शृङ्गारे रमते भुवि पृथिव्यां पुरुषः परस्पर भेदाविशिष्टाः सन्तीत्यर्थः ॥ १०३ ॥

कोई पुरुष वैराग्यमें सञ्चार करता, कोई नीतिमें प्रवृत्त रहता और कोई शृंगारमें रमता है यों परस्पर मनुष्योंमें इच्छाका भेद है इसलिये भर्तृहरिजीका तात्पर्य यह है कि तीन प्रकारके मनुष्योंके हेतु तीन शतक निर्माण किये हैं ॥ १०३ ॥

यद्यस्य नास्ति रुचिरं तस्मिंस्तस्य स्पृहा मनोज्ञेऽपि ॥
रमणीयेऽपि सुधांशौ न मनः कामः सरोजिन्याः ॥ १०४ ॥

इति भर्तृहरिकृतं शृंगारशतकं सम्पूर्णम् ॥ २ ॥

यदिति ॥ यस्य यत् रुचिरं नास्ति तत्र मनोज्ञेऽपि सुन्दरेऽप्यस्य स्पृहा न भवति । अत्र दृष्टान्तः । चन्द्रस्तु सर्वेषां प्रियकर रमणीयः तस्मिन् सूर्य-

कदर्थितस्यापि हि धैर्यवृत्ते।
न शक्यते धैर्यगुणः प्रमार्ष्टुम् ॥
अधोमुखस्यापि कृतस्य वह्ने-।
र्नाधः शिखा यांति कदाचिदेव ॥ ८७ ॥

धैर्यगुणस्याकार कथञ्चिदपि न युज्यते इति सदृष्टांतमाह—कदर्थितस्येति॥ कुत्सितोऽर्थः कदर्थः। "को कत्तत्पुरुषेऽचि" इति कुशब्दस्य कदादेशः। कदर्थीकृतः कदर्थितः। तस्य नीचैः कृतस्यापि सतः धैर्येण वृत्तिर्वर्तनं यस्य तस्य सम्बन्धि धैर्यमेव गुणः प्रमार्ष्टुमपि कर्तुं न शक्यते। तत्र दृष्टान्तः। अधोमुखस्य कृतस्य अवाङ्मुखीकृतस्यापि सतो वह्नेः शिखा ज्वाला कदाचिदेव कदाचिदप्यधो न यांति। किं तर्ह्यूर्ध्वमेव प्रसरन्तीत्यर्थः। तद्वद्धीरस्यापि धैर्यगुण इति विवेकः॥ ८७॥

क्लेशित जन यदि धैर्यवृत्तिवाला होय तो उसकी धैर्यवृत्तिको नहीं मिटा सक्ता। जैसे प्रज्वलित अग्निको उलट दे तोभी ज्वाला ऊपरहीको रहती है नीचे नही जाती॥ ८७॥

एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ॥
क्रियते भास्करेणेव परिस्फुरिततेजसा ॥ ८८ ॥

एक एव शूरः सम्पूर्णं जगत् वशीकरोतीति सदृष्टान्तं प्रतिपादयति—एके-नेति॥ यथा परितः आसमन्तात् स्फुरत् दीप्तिमत्तेजो यस्य तेन भास्करेण दिवाकरेणैव महीतलं पृथ्वीतलं पादैः किरणैराक्रान्तं व्याप्तं क्रियते। तथा एकेनापि हि शूरेण महीतलं भूतलं पादाभ्यामाक्रान्तं व्याप्तं क्रियते। अनुष्टुब् वृत्तम्॥ ८८॥

एकही अकेला शूर ... दबाकर वश कर लेता है। जैसे सूर्य ... को प्रकाशित करता है

वरं शृंगोत्संगाद्गुरुशिखरिणः क्वापि विषमे ।
पतितश्चायं कायः कठिनदृषदंते विगलितः ॥
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने ।
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ८९॥

तद्वच्छीतलो भवतीत्यर्थः । " कर्तुः क्यङ् सलोपश्च " इति क्यङ् । " अकृत्सार्वधातुकयो० " इति दीर्घः । एवं सर्वत्र प्रयोज्यम् । जलधिर्दुस्तरोऽपीति भावः । कुल्यायते अल्पनदीवाचरति । तस्येति सर्वत्रान्वयोऽवगंतव्यः । तत्क्षणात्तस्मिन्नेव क्षणे न तु विलम्बेनेत्यर्थः । मेरुः स्वल्पशिलायते स्वल्पदृषदिवाचरति । मृगपतिः सिंहः हिंस्रोऽपीति भावः । सद्यः कुरंगायते हरिण इवाचरति । व्यालः सर्पः विपरोपमभीषणोऽपीति भावः । माल्यगुणायते पुष्पस्रगिवाचरति । विषमेव रसो द्रव. प्राणप्रयामहेतुरिति भावः । पीयूषवर्षायते अमृतवृष्टिरिवाचरति । कस्येत्याकाङ्क्षायामाह । यस्य पुंसोऽगे खिललोकानामशेषजनानां वल्लभतरमत्यन्तमनोहरं शीलं सत्स्वभावः समुन्मीलति समुल्लसति तस्येति सम्बन्धः । शीलसम्पन्नस्य दुःखहेतवोऽपि सुखहेतवोऽपि सुखहेतव एव भवति । अयमेव परमलाभ इति भावः । अत्र क्रमर्थादौपम्यप्रतीतेरसमासभेदः । " इवादिलोपे द्विविधे णमुलि क्यचि चिण्वपि । तथा वाक्ये समासे च लुप्तषैषा प्रकीर्तिता ॥ " एषा उपमेत्यर्थः. ॥ ९० ॥

अग्नि उस पुरुषको जलके समान जान पडता है, समुद्र स्वल्प नदीसा उसको तत्काल दीख पडता है, मेरुपर्वत स्वल्प शिलाके तुल्य सूझ पडता है, सिंह शीघ्रही उसके आगे हिरन बन जाता है, सर्प उसके हेतु फूलकी मालासा बन जाता है और विषरस उस पुरुषको अमृतकी वृष्टिके समान हो जाता है। जिस पुरुषके अंगमें समस्त जगत्का मोहनेवाला शील प्रकाशमान है ॥ ९० ॥

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ॥
इति विमृशन्तः सन्तः सन्तप्यन्ते न विप्लुतेषु लोकेषु[१] ९१ ॥

अथ न कदापि सन्तापो न प्रवर्तत इत्याह—छिन्न इति ॥ तरुः छिन्नः सन्नपि पुनः रोहत्युद्गच्छति । चन्द्रः क्षीणः कृष्णपक्षे दिनक्रमेण कृशः सन्नपि पुनरुपचीयते प्रवर्धते । इत्येव विमृशतो मनसि अनुसन्दधानाः सन्तः शीलसम्पन्ना लोकेषु विप्लुतेषु विह्वलेषु सत्स्वपि न सन्तप्यते । किंतु तरुचन्द्रदृष्टान्तेनाभिवृद्धिम् आशासन्त एव सन्तीत्यर्थः ॥ ९१ ॥

१ विधुरा लोके इति पाठान्तरम् ।

छोटा हुआ वृक्ष फिर बढकर फैल जाता है, चंद्रमा क्षीण होकर फिर बढकर पूर्ण हो जाता है, इससे विचार करनेवाले संत विपत्तिसे संतापको प्राप्त नहीं होते ॥ ९१ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमः ।
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ॥
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता ।
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥९२॥

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः।
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वारणः॥
इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे।
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम्॥९३॥

अथ धैर्यशौर्ययोरपि दैवायत्तत्वात्तन्निरूपणानन्तरं दैवपद्धतिं निरूपयति—नेतेति॥ यस्य वलभिद नेता शिक्षक हिताहितोपदेशकर्ता बृहतां वाचां पतिर्बृहस्पति न तु य.कश्चित्। "तद्बृहतो: करपत्योश्चोरदेवतयो: सुट् तलोपश्च" इति सुडागमतलोपौ। प्रहरणमायुध प्रहारसाधनं तु वज्रं वज्रायुध पर्वतपक्षच्छेदनेऽप्यकुठितमिति भाव। न तु यत्किञ्चिदयोमयम्। सैनिका सुरा न तु दुर्बललौकिका। दुर्गं गुप्तिस्थान स्वर्ग स्वर्गलोक न तु मृत्पाषाणादिनिर्मितम्। अनुग्रह परिपालनतात्पर्यं हरे खलु सकललोकाधीश्वरस्य विष्णो। ननु तस्यावरजभावेनावतीर्णत्वादिति भाव। न तु क्षुद्रदेवताना। वारणो गज ऐरावण न तु य कश्चित्कलभ। इत्यनेन प्रकारेण स वलभिदिंद्र आश्चर्यबलान्वितोऽसाधारणत्वादद्भुतकरशक्तिसहितोऽपि सङ्गरे रणे परैर्दानवैर्भग्नो विदारित। तत्तस्मात्कारणात् व्यक्त स्फुट यथा तथा दैवमेव शरण रक्षक न तु पुरुषस्य कर्म पौरुषम्। "हायनान्तयुवादिभ्योऽण" इति युवादित्वादण। "पौरुष पुरुषस्योक्ते भावे कर्मणि तेजसि।" इति विश्व। पौरुष पुरुषकार धिग धिक पौन·पुन्येन निन्द्यमित्यर्थ। वृथा व्यर्थमप्रयोजकत्वादिति भाव। धिग्धिगिति "नित्यवीप्सयो" इत्याभीक्ष्ण्ये द्विरुक्तिः। तद्योगात्पौरुषमिति द्वितीया। अत पौरुषस्याकिञ्चित्करत्वेनाश्रयणीयमिति भाव। "उद्योगिन पुरुषसिंहमुपैति लक्ष्मीर्दैव प्रधानमिति कापुरुषा वदन्ति। दैव निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोष॥" इत्यादिवचनस्य अयमेव दत्तजलाञ्जलिरिति

१ दुर्गमनिग्रह इति पाठान्तरम्। २ किल इति पाठान्तरम्। ३ ऐरावत. इति पाठान्तरम्। ४ ऐश्वर्य॰ इति पाठान्तरम्। ५ बलिभिर्भग्न इति पाठान्तरम्। ६ स्फुट धरमे। दैवशरण इति पाठान्तरम्।

चोदितत्वम्। अत्र साभिप्रायविशेषणत्वात्परिकरालङ्कारः तदुक्तम्। "साभि-प्रायविशेषणैः परिकरः" इति॥ ९२॥

बृहस्पति ऐसे मंत्री, वज्र ऐसा शस्त्र, देवताओंकी सेना ऐसी सेना, स्वर्ग ऐसा गढ, ऐरावतसा चढनेको हाथी और तिसपर विष्णुका पूर्ण अनुग्रह तोभी ऐसी आश्चर्यकी सामग्रीवाला इन्द्र शत्रुओंसे संग्राममें हारताही रहा। इससे यह सिद्ध भया कि दैवही मुख्य शरण योग्य है, पुरुषार्थ वृथा है और उसको धिक्कार है॥ ९३॥

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा।
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः॥
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा।
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणम्॥९४॥

करके आपसे उस सर्पके मुखमें गिरा वह उस मूसेके मांससे तृप्त होकर उसी छेदके रस्ते निकल गया, सो हे लोगो ! स्वस्थ रहो ऐसेही मनुष्योंके क्षय और वृद्धिमें दैवही कारण है ॥ ९४ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ॥
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ९५ ॥

साधुवृत्तीना विपत्तयः अस्थायिन्यो भवतीति कन्दुकदृष्टांतेन दर्शयति—पातित इति ॥ यथा करस्य हस्तस्याघातैस्ताडनैः कदुकः पातितोऽपि पुनरूर्ध्वमुत्पतत्येव । तथा प्रायो वाहुल्येनं साधुवृत्ताना सज्जनाना विपत्तयोऽ अस्थायिन्यो भवाति । अनुष्टुव् वृत्तम् ॥ ९५ ॥

हाथोंकी ताडनासे गिरायाभी गेंद ऊपरकोही उछलता है इससे यह प्रगट हुआ कि साधु आचरणवालोंकी विपत्ति प्रायः स्थिर नहीं होती ॥ ९५ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ॥
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ॥ ९६ ॥

इदानीमुद्यमप्राधान्य वर्णयति—आलस्यमिति ॥ आलस्यमुद्योगराहित्य मनुष्याणा शरीरे तिष्ठति शरीरस्थो महान् रिपुः शत्रुः हि इति निश्चये-नास्ति । उद्यमेनोद्योगेन समो बन्धुर्न । यमुद्यम कृत्वा मनुष्यो नावसीदति दारिद्र्यादिदुःख न प्राप्नोति । उद्यमोऽवश्य कर्तव्यमिति भाव ॥ ९६ ॥

आलस्य मनुष्योंके शरीरमे महाशत्रु है, उद्योग समान दूसरा बंधु नहीं कि जिसके करनेसे दुःख नहीं आता ॥ ९६ ॥

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ॥
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ९७ ॥

बुद्धिमता सुविचारपूर्वक्रमेण कार्य कर्तव्यमित्याह—कर्मेति ॥ यद्यपि पुंसां फल सुखदुःखादिक कर्मायत्त कर्माधीनमस्ति । तथा बुद्धिः कर्मानुसारिणी कर्मानुगामिनी अस्ति तथापि सुधिया बुद्धिमता सुविचार्यैव कर्म कुर्वता भाव्यम् ॥ ९७ ॥

यद्यपि पुरुषोंको फल कर्मके अनुसार होता है और बुद्धिभी कर्मके अनुसार हो जाती है तौभी पण्डितोंको विचारहीके काम करना चाहिये ॥ ९७ ॥

यथा कंदुकपातेनोत्पतत्यार्यः पतन्नपि ॥
तथा त्वनार्यः पतति मृत्पिंडपतनं यथा ॥ ९८ ॥

अथ दैवायतिकतदन्ययोरवस्थामाह—यथेति ॥ आर्यो दैवायतिकः पतन्नपि कुतश्चित्कारणान्नीचैर्भवन्नपि कन्दुकपातेन दृष्टान्तेन यथोत्पतत्युच्छ्रय प्राप्नोति तथा तद्वदेव अनार्य मृत्पिंडपतन यथा सार्द्रमृत्कपालमिव. " इव-वत्तयथाशब्दौ " इति दण्ड्याचार्यानुशासनात् । पतति निलीनो भवतीत्यर्थः ॥ ९८ ॥

आर्य लोग तो गेंदके समान गिरनेपरभी फिर उन्नतिको प्राप्त होते हैं, परंतु अनार्य लोग एक वार मृत्पिंडके समान गिर जानेपर फिर उन्नतिको प्राप्त नहीं होते ॥ ९८ ॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापिते मस्तके ।
गच्छन् देशमनातपं द्रुतगतिस्तालस्य मूलं गतः ॥
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः ।
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ९९

इत्यर्थः । यत्र यस्मिन् देशे गच्छति य देशमुद्दिश्य गच्छति तत्र तमुद्दिश्यै-चापद उपद्रवा अपि प्रायो भूम्ना याति । तदेतन्मशकभयाद्ग्रामं विहाय गच्छतोऽरण्ये व्याघ्रग्रहणमभूदित्यर्थ. ॥ ९९ ॥

खल्वाट अर्थात् गंजा मस्तकका पुरुप सूर्यकी किरणसे जलने लगा तव वह छायाकी वाछा करता हुआ दैवसंयोगसे तालके वृक्षके नीचे जा खडा हुआ तहां जाते ही शीघ्र वडा फल ऊपरसे गिरा उसका शिर फूटा तिसका वडा शब्द हुआ इससे यह सिद्ध हुआ कि, अभागा पुरुष जहां जाता है वह विपत्ति भी उसके साथ जाती है ॥ ९९ ॥

गजभुजङ्गविहंगमबन्धनं ।
शशिदिवाकरयोर्ग्रहपीडनम् ॥
मतिमतां च विलोक्य दरिद्रतां ।
विधिरहो वलवानिति मे मतिः ॥ १०० ॥

अतो दैवमेव वलीय इति मम मति प्रवर्तत इत्याह—गजेति ॥ अयं स्पष्टार्थ । तनोऽत्यन्तदुर्ग्रहाणा गजादीना वन्धन जगत्प्रकाशको सूर्याचन्द्रमसो. राहुग्रहपीडन मतिमतां प्राज्ञाना दरिद्रतामकिंचनत्व च विलोक्य दृष्ट्वा अहो आश्चर्यम् । अत सर्वस्यापि दैववलीयस्त्व मन्ये दैवमेव मूलमिति तात्पर्यम् ॥ १०० ॥

चन्द्रमा और सूर्यको भी राहुग्रहसे पीडित देखते हैं, हाथी और सर्प इन दोनोंको वन्धनमें देखते हैं और बुद्धिमानोको दरिद्री देखते हैं इससे हमारे मतमें विधाता ही वलवान् दीख पडता है ॥१००॥

सृजति तावदशेषगुणाकरं ।
पुरुषरत्नमलङ्करणं भुवः ॥
तदपि तत्क्षणभाङ्गि करोति चे- ।
दहह कष्टमपण्डितता विधेः ॥ १०१ ॥

१ भुजङ्गमयोरपि इति पाठांतरम् ।

एव चेद्विधेरप्यज्ञता स्यादित्याशयेनाह—सृजतीति ॥ विधिरशेषगुणाकर सकलसद्गुणाश्रय भुवोऽलकरण मडन पुरुषरत्नं पुरुषश्रेष्ठ सृजति ताननिर्माति खलु । तत किमत आह । तदपि तथापि सृजत्नपीत्यर्थ. । तत्पुरुषरत्न क्षणभगि क्षणमात्रेण भगुर नश्वरमित्यर्थ । करोति चेत् विधेरपडितता मौढ्यमहह कष्टमतिकृच्छ्रमिति विषादातिशयाभियोनकमहहेति । करोति चेत्तन्पाडित्यमेवेत्यर्थ । तथा तादृशपुरुषरत्नस्य क्षणभगित्वेनैव निर्माणात् अपण्डित एव विधिरिति परमरहस्यम् ॥ १०१ ॥

पहिले विधाता पुरुषरत्नको सब गुणोकी खानि और पृथ्वीका भूषण रचता है परन्तु उसका शरीर क्षणभंगुर करता है यह बडे कष्टकी बात है और इसमे विधाताकी मूर्खता जान पडती है ॥ १०१ ॥

अयममृतनिधानं नायकोऽप्योषधीनां ।
शतभिषगनुयातः शंभुमूर्ध्नोऽवतंसः ॥
विरहयति न चैनं राजयक्ष्मा शशांकं ।
हतविधिपरिपाकः केन वा लंघनीयः ॥ १०२ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं ।
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ॥
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम् ।
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः १०३

विधिलिखित मार्जितु क. समर्थ इति करीरवृक्षादिदृष्टान्तेन वर्णयति—पत्र-मिति ॥ करीरविटपे करीरवृक्षे यदा पत्र न भवति तदा वसन्तस्य दोषः किम् । यद्युलूको दिवाभीतो दिवापि दिवसेऽपि नावलोकते तर्हि सूर्यस्य दूषण किम् । यदि चातकमुखे धारा जलधारा नैव पतति तर्हि मेघस्य दूषणं किम् । यत् यस्मात् विधिना ब्रह्मणा जन्मकाले ललाटे लिखितं तन्मार्जितुं क. क्षम समर्थ. न कोऽपि । प्रारब्धमेव बलीय इति भावः । शार्दूलविक्रीडित वृत्तम् ॥ १०३ ॥

करीरवृक्षमें पत्ते नहीं लगते तो इसमें वसंतऋतुका क्या दोष है, घूघूपक्षी दिनमें नहीं देखता तो सूर्यका इसमें क्या दोष है, और जलकी धारा जो चातकपक्षीके मुखमें नहीं पडती तो इसमें मेघका क्या दोष है, इससे यह जाना जाता है कि विधाताने जो प्रथम ललाटमें लिख दिया है उसे मिटानेको किसका सामर्थ्य है १०३

प्रियसख विपद्दंडाघातप्रवातपरंपरा- ।
परिचयबले चिंताचक्रे निधाय विधिः खलः ॥
मृदमिव बलात्पिंडीकृत्य प्रगल्भकुलालवत् ।
भ्रमयति मनो नो जानीमः किमत्र विधास्यति १०४॥

मनोनियताप्ययमेवेति सखाय सबोधयति—प्रियेति ॥ प्रियश्चासौ सखा च प्रियसखस्तस्य सबुद्धि हे प्रियसख । "राजाहःसखिभ्यष्टच्" इति टच्प्रत्ययः । खल शठोऽयं विधि प्रगल्भकुलालेन तुल्य प्रगल्भकुलालवत् प्रौढकुम्भकार इवेत्यर्थ । " तेन तुल्य क्रिया चेद्वति " इति वति. । मनो मदीय चित्त मृदं मृत्तिकामिव बलात्सामर्थ्यात् पिंडीकृत्य कपालीकृत्य विपदः आपद॰

दण्डाघाता मुद्गरघट्टनानीव तेषां प्रपातानां च या परपराः पीनःपुन्येनावृत्तिस्तत्रा यः परिचय सम्तरो निबिडावयवपरस्परसन्निवेशश्च स एव बलं धाष्टर्यं यस्य तस्मिन् चिताचक्रमिव तस्मिन्निधाय भ्रमयाति । अत्र भ्रमणे किं विधास्यति किं करिष्यति वा नो जानीम । कुलालस्तु घट करिष्यत्ययं तु किं विधास्यति न जानीम इत्यर्थ ॥ १०४ ॥

हे प्रियसख ! यह दैव धृष्ट कुम्हारकी तरह हमारे मनको मृत्पिण्डकी तरह पिडित करके विपत्तिरूप दंडाघातके प्रपातकी परंपराका परिचय है बल जिसमें ऐसे चिंतारूपी चक्रमे हठसे धरकर घुमाता है सो हम नहीं जानते हैं कि इस दशाको पहुँचाकरभी यह आगे क्या करेगा ॥ १०४ ॥

विरम विरमायासादस्माद्दुरध्यवसायतो ।
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ॥
अयि जड विधे कल्पापायेऽप्यपेतनिजक्रमाः ।
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥१०५॥

दायास एवावशिष्टो न तु फललाभ इति भाव । " महेंद्रो मलयः सह्यः सानुमान् ऋक्षपर्वत । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वता ॥ " " लवणेक्षुसुरासर्पिर्दधिक्षीरजलार्णवा । " इति ॥ १०५ ॥

हे जड विधे ! यदि तू विपत्कालमे महात्माओंके धैर्यके ध्वंसको देखनेकी इच्छा करता होगा तौ ऐसा हठ न कर मत कर क्योंकि ये महात्मा कल्पातमेंभी अपनी मर्यादाको न छोडनेवाले कुलाचलोंके समान हैं, कुछ क्षुद्र समुद्रोंके समान नहीं हैं ॥१०५॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं ।
तत्तस्योपनमेन्मनागपि महान्नैवाश्रयः कारणम् ॥
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं ।
सूक्ष्मा एव पतंति चातकमुखे द्वित्राः पयोबिंदवः १०६

तथापि दैवमेव शरणमित्याह—दैवेनेति ॥ प्रभुणा समर्थेन दैवेन जगति लोके यस्य पुंसो यद्वस्तु प्रमाणीकृत निर्दिष्ट तद्वस्तु तस्योपनमेत्मगच्छेत् । महानाश्रयो मनागीषदपि नैव कारण न साधन हि । बहुफलप्राप्ताविति शेष । तत्र दृष्टांत । सर्वाशापरिपूरके सकललोकमनोरथपरिपूरके सकलदिगंतव्यातफलके वा जलधरेऽम्बुवाहे । पचाद्यच । अहन्यहनि प्रत्यहम् । "अव्ययं विभक्ति०" इत्यादिना यथार्थेऽव्ययीभाव अतश्च " नपुंसकवदन्यतरस्याम् " इति समासात । वर्षति सत्यपि चातकस्य स्तोककपक्षिणो मुखे चञ्चुपुटे सूक्ष्मा अणव एव तथापि द्वौ वा त्रयो वा द्वित्रा एव । " संख्ययाव्ययासन्न० " इत्यादिना बहुव्रीहि. । " बहुव्रीहौ संख्येये डजबहुगणात् " इति डच्प्रत्यय । पयोबिंदवो जलकणा पतंति न त्वाश्रयमहत्तया बहुफललाभस्तत्रापि दैवस्यैव नियतृत्वादिति भावः । तस्मात्सर्वथा दैवमेव शरणमिति तात्पर्यम् । "स्तोककश्चातक समाः" इत्यमर ॥१०६॥

स्वयं इस समर्थ दैवने इस जगत्में जिस पुरुषके लिये जो निर्दिष्ट किया है सो उसको अवश्य प्राप्त होगा, उसके लिये कुछ आश्रय साधन नहीं है । देखो, सबकी आशा पूर्ण करनेवाला यह

मेघ सब जगह प्रतिदिन जल बरसाता है परंतु चातकके मुँहमें उस जलकी दो तीन बूंदेंही गिरती हैं ॥ १०६ ॥

येनैवांबरखंडेन संवृतो निशि चंद्रमाः ॥
तेनैव च दिवा भानुरहो दौर्गत्यमेतयोः ॥ १०७ ॥

येनेति ॥ निशि रात्रौ चन्द्रमा येनैव यावता चाम्बरखण्डेन नभःशकलेन [illegible] आच्छादितो भवतीति शेषः । दिवाहनि तेनैव तावता चाम्बरखण्डेन भानुः सूर्यः संवृतो भवति । अत एतयोश्चन्द्रसूर्ययोर्दौर्गत्यं दुर्गतित्वं [illegible] । अहो इत्याश्चर्ये । एत-[illegible] ॥ १०७ ॥

जिस अंबर (आकाश वा वस्त्र) के एक खंडको ओढकर चंद्रमा रात्रिको व्यतीत करता है, उसीको ओढकर सूर्य दिनको व्यतीत करता है, जब इनकी ऐसी दुर्गति है तो हम क्षुद्रजनोंका क्या कहना है ॥ १०७ ॥

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा ।
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ॥
फलं कर्मायत्तं यदि किममरैः किंच विधिना ।
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति १०८॥

फल कर्मायत्त यदि कर्माधीन चेदमरे देवै किं विधिना च किम्। न किंचिदपीत्यर्थः। तस्यैव फलदानस्वाम्यादिति भाव। तत्तस्मात् कर्मभ्यो ज्योतिष्टोमनगोदानादिरूपेभ्यो नम। यत विधिरपि येभ्य कर्मभ्यो न प्रभवति न समर्थो भवति। स्वातन्त्र्येण प्रवृत्तेरभावादिति भाव। अत्र पूर्वपूर्वस्योत्तरोत्तर प्रत्युत्कर्षाविहत्वान्मालादीपकाख्योऽलङ्कार.। लक्षण तूक्तम्॥ १०८॥

देवताओंको हम नमस्कार करते हैं परन्तु उनको विधाताके वशमें देखते हैं, इसलिये विधाताको नमस्कार करते हैं, पर विधाताभी हमारे पूर्वनिश्चितकर्मके अनुसार फल देता है, फिर जब फल और विधाता दोनों कर्मके अधीन हैं तो देवता और विधातासे क्या काम है ? इस कारणसे कर्महीको नमस्कार है क्योंकि, विधाताका भी सामर्थ्य जिसपर नही चलता ॥ १०८ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे ।
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते ।
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे॥१०९॥

तदुक्त विधिरपि न येभ्य प्रभवतीति तत् प्रपञ्चयति—ब्रह्मेति॥ येन कर्मणा कर्त्रा ब्रह्मा चतुर्मुखो ब्रह्माण्डमेव भाण्ड तस्योदरे कुलालेन कुम्भकारेण तुल्य कुलालवन्नियमित। विविधवस्तुनिर्माणकर्मत्वेन नियोजित। येन विष्णु कुक्षिस्थाखिलभुवनोऽपि महासङ्कटेऽतिकृच्छ्रतरे दशावतारा एव गहनमरण्यानि तत्र क्षिप्तो निर्दिष्ट। येन कर्मणा रुद्रो मृत्युंजयोऽपीति भाव। कपाल ब्रह्मशिर पाणिपुटके करतलस्थाभिक्षाहरणोचितभाजन तत्र भिक्षाटन सेवते सदा तथाभिक्षान्न भुङ्क्त इत्यर्थः। किं च येन सूर्योऽपि सकललोकप्रकाशकोऽपीति भाव। नियमित इति शेष। गगनेऽन्तरिक्षे नित्यमेव न तु क्षणमात्रमपि विश्रमावकाशं इति भाव। भ्राम्यति परिवर्तते। "वा भ्राश०" इत्यादिना विकल्पात् श्यन्प्रत्ययः। तस्मै नक्रादिनियन्त्रे कर्मणे नमः। तथाभूतस्यैतानिवादनौचित्यादिति भाव॥ १०९॥

---

१ कारिन इति पाठान्तरम्

जिस कर्मने ब्रह्माको कुम्हारके समान निरंतर ब्रह्मांडरचनाके हेतु बनाया और विष्णुको वारंवार दश अवतार ग्रहण करनेके संकटमें डाला और रुद्रको कपाल हाथमें लेकर भिक्षा मांगनेके कष्टमें रक्खा और सूर्यको आकाशमें नित्यभ्रमणचक्रमें डाला उस कर्मको प्रणाम है ॥ १०९ ॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः ।
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ॥
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं ।
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथा ११०

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला ।
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि ॥
विच्छिन्ने नितरामनंगकलहक्रीडात्रुटत्तंतुकं ।
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम् ११९

वृद्धिहान्योरप्येतन्मूलकत्वमेवेत्याह—शुभ्रमिति ॥ चिर चिरकालमारभ्यानुस्यूतेऽनुवर्तमानेऽपि । " सिवु ततुसन्ताने " इति धातो· कर्तरि क्त । " छ्वोः शूडनुनासिके च " इति ऊठि यणादेश । शुभे कर्मणि पुराकृतविशेषे सभवति सतीत्यर्थ. । शुभ्र सद्म सौधादिक सविभ्रमा सविलासा युवतयस्तरुण्य. श्वेतातपत्रेणैकश्वेतछत्रेणोज्ज्वला लक्ष्मी राज्यश्रीरित्येतदखिलमित्यर्थ । अनुभूयतेऽनुभुज्यते । जन्मातरीयफलहेतुत्वात्तस्येति भाव. । विच्छिन्ने शुभकर्मणि विनष्टे सति नितरामतिशयेन अनगकलहो रतिरण स एव क्रीडा केलिस्तया हेतुना त्रुटन् भिदुरस्ततुर्यस्य तत्तथोक्तम् । शेषे कप्प्रत्ययः । मुक्ताजालमिव भ्रश्यत् सत् सद्मादिकमिति शेष । झटिति द्राग्दिशो याति । " यत्र यत्र स्थित गेहे तत्र तत्र विनश्यति । " इति न्यायादिति भाव· । दृश्यता विलोक्यतामित्यर्थः । अन्वयव्यतिरेकाभ्या वृद्धिहान्योरस्यैव कारणत्व द्रष्टव्यामिति भाव. ॥ १११ ॥

स्वच्छ गृह, उत्तम हावभावयुक्त युवती, श्वेतछत्रसहित शोभायमान लक्ष्मी तबही स्थिरतासे भोगी जाती है जब कि पुण्यकी वृद्धि होती है । परंतु पुण्यके क्षीण होनेपर संपूर्ण भोगविलास कामदेवकी क्रीडाके कलहसे टूटे हुए हारके मोतियोंके समान भ्रष्ट होकर देशांतरोंमें लुप्त हो जाते हैं ॥ १११ ॥

गुणवदगुणवद्वा कुर्वता कार्यजातं ।
परिणतिरवधार्या यत्नतः पण्डितेन ॥

१ कार्यमादौ इति पाठान्तरम् ।

अर्थात् भेद न रहा, दरिद्री वह होता है जिसे बडी तृष्णा है, जब मन संतोषसे पूर्ण हुआ तो फिर कौन दरिद्री और कौन धनवान् है ? ॥ ५३ ॥

फलमलमशनाय स्वादु पानाय तोयं ।
क्षितिरपि शयनार्थं वाससे वल्कलं च ॥
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणा- ।
मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥

तथापि शरीरयात्राया अन्यथा समाव्यमानत्वान्न दुर्जनाविनयं सोढुं शक्नोमीत्याह—फलमिति ॥ फलमशनाय भोजनाय क्षुन्निवारणार्थमित्यर्थः अलं पर्याप्तम् । अलमिति पर्याप्त्यर्थग्रहणात् " नमस्वस्ति० " इत्यादिना चतुर्थी । एवमुत्तरत्रापि द्रष्टव्यम् । तथा स्वादु मधुरम् । " त्रिष्विष्टे स्वादु मधुरम् " इत्यमरः । तोयमुदकं पानाय तृष्णोपशांत्यर्थमलम् । क्षितिरपि शयनार्थं संवेशनायालम् । तथा वल्कलं च वाससे आच्छादनार्थमलम् । अतः नवं सद्यःसम्भावितं यद्धनं तदेव मधुपानं मद्यपानं तेन भ्रातान्यन्यमार्गवर्तीनि सर्वाणींद्रियाणि येषां तेषाम् । धनमधुपानस्य चित्तविकाराविवेकादिकारित्वेन यथाकथञ्चिद्विवेकलेशसम्भवे तन्निवृत्तिर्धनविशेषणमत्तस्य । दुर्जनानां दुर्मार्गशालिनामविनयं दुर्विनयमनादरमिति यावत् । अनुमंतुमंगीकर्तुं नोत्सहे न मृष्यामि । सति गत्यंतरे किमर्थं सोढव्यमिति भावः ॥ ५४ ॥

बहुतसे फल भोजनके लिये, मधुर जल पीनेको, पृथ्वी सोनेको और वृक्षके बकले पहिरनेके निमित्त हैं, फिर थोडासा धनरूपी मदिरापानवाले, जिनकी सब इन्द्रियां घूमती हैं ऐसे दुर्जनोंका निरादर हम क्यों सहें ॥ ५४ ॥

अशीमहि वयं भिक्षामाशावासो वसीमहि ॥
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥

---

१ विन० इति पाठान्तरम् । २ शयनमवनिपृष्ठे वल्कले वाससी च इति पाठांतरम् ।

"विदूराञ्ज्यः" इति ञ्यप्रत्ययः । अत्र विदूरशब्दो वालवायस्यादेशः पर्यायो वा तत्रोपचरितो वा तेन वालवायाद्रिरसौ प्रभवति स विदूरान्नगरात् तत्र सकृत इत्याक्षेप प्रत्युक्तः । "वालवायो विदूरं च प्रदेशातरमेव वा । न चेत्तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् ॥" वैदूर्यमय्या वैदूर्यमणिविकारायाम् । विकारार्थे मयट् । स्थाल्या पात्रे चादनैश्चदनतरुसबधिभिरिंधनैर्घ. काष्टभारैस्तिलखल तिलपिष्ट पचति । तथा सौवर्ण. सुवर्णविकारैर्लांगलैर्हलमुखैरर्कतूलस्य हेतोरर्कारव्यवृक्षतूलार्थमित्यर्थः । "षष्ठी हेतुप्रयोगे" इति षष्ठी । वसुधा भुव विलिखति कर्षति । तथा कर्पूरखटान् कर्पूरखडलीकाडाच्छित्त्वा कोद्रवाणा कोरदूषकाख्यसस्यविशेषाणाम् । "कोरदूषस्तु कोद्रव" इत्यमर. । समतात्सर्वतोऽधिकमित्यर्थ. । वृतिमावरण कुरुते । कोऽसावीदृशो दुर्भग इत्याशकायामाह । इमा कर्मभूमिं कर्माचरणयोग्यभूमिं प्राप्य मदभाग्यो निर्भाग्यो मनुजस्तपश्चाद्रायणादि कर्म न भजति न सेवते स इति सबधः । वैदूर्यपात्रे तिलपिष्टपचनादिप्राय कर्मभुवस्या तपोऽननुष्ठानमित्यर्थ । अत: सर्वथा सत्कर्मानुष्ठेय श्रेयस्कामेनेति तात्पर्यम् । अत्र यस्तपो न भजति स तिलखल पचतीत्यादिविशिष्टभजनपचनाद्योर्वाक्यार्थयोर्निर्दिष्टकत्वात्नभवात्साद्दृश्यलक्षणायामसभवद्वस्तुसबधवाक्यार्थवृत्तिनिदर्शनाभेद इत्येतत्सर्व मूर्खसद्धतौ व्याख्यातमितीहोपरम्यते ॥ ११३ ॥

वह पुरुष मानो मरकतमणिके वरतनमें तिलखलको चंदनके ईंधनसे पकाता है और खेतमें सोनेका हल चलाकर आकवृक्षकी तूलको जलानेके हेतु निकालता है और कपूरके टुकडे टोके काटकर कोदोंके चारों ओर दंडवार बनाता है जो मंदभागी मनुष्य इस कर्मभूमिमें आके तप नहीं करता ॥ ११३ ॥

नैवाकृतिः फलति नैव कुलं न शीलं ।
विद्याऽपि नैव न च यत्नकृताऽपि सेवा ॥
भाग्यानि पूर्वतपसा खलु सञ्चितानि ।
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ११४ ॥

उन्नतिर्नैव एव फलं न त्वन्यदित्याह—नेति ॥ आकृतिराकारस्तदतिशयेन फलति । फलकारणं न भवतीत्यर्थः । कुलं सद्वंशो वा नैव फलति । शीलं सच्चरित्रं वा न फलति । विद्यापि वेदशास्त्राभ्यासादिका नैव फलति । यत्नकृता प्रयत्नानुष्ठिता सेवा राजादिपरिचर्या च न फलति । किन्तु दैववशात् पुराकृततपसा संचितानि [illegible] पुरुषस्य भाग्यानि [illegible] इत्यर्थः । " [illegible] " इति [illegible] । [illegible] एव फलति [illegible] । तपोजनितभाग्य- [illegible] ॥ ११४ ॥

[illegible] नहीं देती और उत्तम कुल, शील, विद्या और [illegible] की हुई सेवाभी फल नहीं देती एक [illegible] भाग्यही मनुष्योंको [illegible] फल देते हैं ॥ ११४ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुञ्जयत्वाहवे ।
वाणिज्यं कृषिसेवनादिसकला विद्याः कलाः शिक्षतु ॥
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं ।
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ११५

फलस्य नाशः कुतः । तस्य ब्रह्मणापि निवारयितुमशक्यत्वात् । " यद्भावि तद्भवत्येव यदभावि न तद्भवेत् " इति न्यायादिति भावः । अत्राम्भोमज्जनादीनां चतुःषष्टिकलास्वेवान्तर्भूतत्वमवगन्तव्यम् । ताश्च कला मदीयशृंगारशृंगाटके सख्यातास्तत्रैव द्रष्टव्या इतीहोपरम्यते ॥ ११५ ॥

चाहे समुद्रमें डूबो, चाहे सुमेरुके शिरपर चढ जाओ, चाहे घोरसंग्राममें शत्रुओंको जीतो, चाहे और वाणिज खेती सेवा आदि विद्या और नाना कला करो और आकाशमें पक्षीके समान बडे यत्नसे उडो फिरो पर अनहोनी नहीं होती और जो कर्मवश होनी है सो नही टलती ॥ ११५ ॥

वने रणे शत्रुजलाग्निमध्ये ।
महार्णवे पर्वतमस्तके वा ॥
सुप्तं प्रमत्तं विषमास्थितं वा ।
रक्षन्ति पुण्यानि पुराकृतानि ॥ ११६ ॥

अतिसंकटस्थस्यापि प्राचीनपुण्यसद्भावे तु न क्षतिरित्याह वन इति ॥ अर्थ तु स्पष्टोऽर्थे ॥ ११६ ॥

वन, रण, शत्रु, जल और अग्निमें, समुद्रमें, पर्वतके संकटमें, सोते हुए, असावधान और विषम अवस्थामे पुरुषकी पूर्वजन्मके पुण्यही रक्षा करते है ॥ ११६ ॥

भीमं वनं भवति तस्य पुरं प्रधानं ।
सर्वो जनः स्वजनतामुपयाति तस्य ॥
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा ।
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ११७ ॥

किं बहुना सुकृतिनस्तावत्सर्वमप्यनुकूलमेव प्रयातीति निगमयति—भीममिति ॥ यस्य पुंसः भीमं हिंस्रादिप्राचुर्येण भयकरं वनमरण्यानि कर्तृप्रधान

उन्नतां० इति पाठान्तरम् ।

मालतीकुसुमस्येव द्वे गतीह मनस्विनः ॥
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ११९ ॥

मनस्विनो द्वे गती भवत इति मालतीकुसुमदृष्टान्तेन वर्णयति—मालतीति ॥ मालत्याः कुसुमं पुष्पं तस्येव मनस्विनो विवेकिनः पुरुषस्येह द्वे गती दशे स्तः । यथा कुसुमेन सर्वलोकस्य मूर्ध्नि मस्तके स्थीयतेऽथवा वन एव शीर्यते शीर्णीभूयते तद्वन्मनस्विन पुरुषा लोकमान्या गृहे वा वनेऽरण्यवासिनो भवतीत्यर्थः ॥ ११९

मालतीके फूलोंके समान मनस्वी (धीर) पुरुषकी दो वृत्ति होती हैं या तो सब लोगोंके मस्तकपर रहे अथवा वनमेंही नष्ट हो जाय ॥ ११९ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ॥
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ १२० ॥

अप्रियेति ॥ अप्रियवचनदरिद्रैः अप्रियवचनेषु दरिद्रास्तैः प्रियवचनेषु आढ्या. सपन्नास्तैः स्वदारेषु परितुष्टैः परापवादात्परनिंदाया निवृत्ता एवमादिभिर्गुणैर्युक्त. पुरुषैः क्वचित्क्वचित्स्थले वसुधा मंडिता शोभायमाना ॥ १२० ॥

अप्रियवचनके दरिद्री, प्रियवचनोंसे संपन्न, अपनीही स्त्रीसे संतुष्ट और पराई निंदासे रहित जो पुरुष हैं उनसे कहीं कहीं ही पृथ्वी शोभायमान है अर्थात् ऐसे पुरुष सब ठौर नहीं होते १२०

लज्जागुणौघजननीं जननीमिव स्वा-।
मत्यन्तशुद्धहृदयामनुवर्तमानाम् ॥
तेजस्विनः सुखमसूनपि संत्यजन्ति ।
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् १२१ ॥

इति भर्तृहरिकृतं नीतिशतकं सम्पूर्णम् ॥ १ ॥

लज्जेति ॥ सत्यमेव व्रतं तदेव व्यसनं येषां ते प्रतिज्ञां न त्यजन्ति पुनरन्यां न कुर्वन्ति । कथंभूतां प्रतिज्ञां लज्जाया ये गुणास्तेषामोघः समुदाय-

॥ श्रीः ॥

अथ भर्तृहरिविरचितं

शृंगारशतकम् ।

शम्भुस्वयंभुहरयो हरिणेक्षणानां ।
येनाक्रियन्त सततं गृहकुंभदासाः ॥
वाचामगोचरचरित्रविचित्रिताय ।
तस्मै नमो भगवते मकरध्वजाय ॥ १ ॥

शम्भ्विति ॥ अत्र स्वयंभुशब्दस्य शम्भुशब्दवदौणादिकडुप्रत्ययान्तत्वमवगन्तव्यम् न तु " भुवः संज्ञान्तरयोः क्विप् " इति क्विप्प्रत्ययान्तत्वम् । अन्यथा स्वयम्भूर्देवोऽसावयमित्येव दीर्घप्रसंगात् । तथा च येन मकरध्वजेन शंभुस्वयंभुहरयो हरविरिंचिमुरारयः संहारसृष्टिस्थितिकर्तृत्वेन सकलभुवनाधीश्वरा अपीति भावः । हरिणेक्षणानां हरिणवन्मनोहरलोचनानां पार्वतीसरस्वतीश्रीदेवीनां सततम् । " समो वा हिततयोः " इति वचनात् समो मकारस्य लोपः । गृहे कुम्भदासाः जलकुम्भभारवाहकभृत्या अक्रियन्त तासु नादृङ् मोहमुत्पाद्य तथाविधीकृता इत्यर्थः । किमुतान्ये इति भावः । कृञः कर्मणि क्यङ् लङ् । अर्धनारीश्वरत्वाच्छम्भोः स्वयमुवश्च सरस्वतीनिकेतनीकृतमुखत्वात् हरेर्वक्षःस्थलस्थापितलक्ष्मीकत्वाच्चैवमुक्तमित्यवगन्तव्यम् । अत एव वाचामगोचरमवाङ्मानसगोचरं यच्चरित्रं माहात्म्यं तेन विचित्रवत्कृतो विचित्रितः तस्मै अत्यन्ताश्चर्यकारकायेत्यर्थः । " विस्मयोऽद्भुतमाश्चर्यं चित्रम् " इत्यमरः । विचित्रशब्दात् " तत्करोति० " इति ण्यन्तात्कर्मणि क्तः । णाविष्टवद्भावे विन्मतोर्लुक् । भगवते सकललोकाराध्याय यद्वा चतुर्व्यूहमध्यप्रविष्टत्वात्प्रद्युम्नरूपेण भगवत्पुत्रत्वाद्वा तद्रूपायेत्यर्थः । " आत्मा वै पुत्रनामासि । पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥ " इत्यादिश्रुतेः । तस्मै मकरध्वजाय मकरके-

---

१ घन इति पाठांतरम् । २ कुसुमायुधाय इति पाठांतरम् ।

तनाय कामदेवसार्वभौमाय नमः । " नमःस्वस्ति० " इत्यादिना चतुर्थी । वसततिलका वृत्तम् ॥ १ ॥

जिसने शिव ब्रह्मा और विष्णुकोभी स्त्रियोके कार्य करनेके लिये दास बना रक्खा है और विचित्र चतुर जिसका वर्णन नहीं हो सकता ऐसे पुष्पायुध कामदेवको नमस्कार है ॥ १ ॥

स्मितेन भावेन च लज्जया भिया ।
पराङ्मुखैरर्द्धकटाक्षवीक्षणैः ॥
वचोभिरीर्ष्याकलहेन लीलया ।
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥

तत्रालम्बनविभावयो. स्त्रीपुरुषयोर्मध्ये स्त्रीणां प्रशस्तत्वाद्विंशतिश्लोकै' प्रथमं स्त्रीप्रशसा चिकीर्षुस्तत्रादौ तावत्तासा बन्धनहेतुत्वमाह—स्मितेनेति ॥ स्मितेन यौवनादिमदविकारजनिताकस्मिकमन्दहासेन । " आकस्मिक तु हसित यौवनादिविकारजम् । " इति वचनात् । बाल्ययौवनसधावुत्पन्न शृगारविषयः प्रथमातःकरणविकारो भावस्तेन च । तदुक्तम् । चित्तस्य विकृते कारणे सति । " ततोऽर्वाङ्विकृतिर्भावो बीजस्यादि विकारवत् । " इति । हावेनेति पाठे " ईषद्दृष्टविकार. स्याद्भावो हाव' प्रकीर्तितः । " इत्युक्तलक्षणेन चेष्टाविशेषेण च । लज्जया कुचकुभदोर्मूलाच्छादनवदनविनमनदरानिमीलितनयनत्वानुभावकमन'सकोचनरूपव्रीडया च । " चेत सकोचन व्रीडा-संगरागस्तनादिभि । " इति लक्षणात् । भिया आकस्मिकभयजनितत्रासेनेत्यर्थः । तदुक्तम् । "आकस्मिकभयाच्चित्तक्षोभस्त्राम प्रकीर्तित. । " इति । लज्जया गुणैरिति पाठे आसामेवालंबनभूतरूपयौवनादिगुणैरित्यर्थ । "आलंबनगुणो रूपयौवनादिरुदाहृतः । " इत्युक्तत्वात् । पराङ्मुखैः ह्रियेवास्फुटप्रसारिभिरित्यर्थ । अर्धकटाक्षवीक्षणैरसमग्रापागावलोकनैश्च । कटाक्षलक्षण तु संगीतरत्नाकरे । " यद्गतागतविश्रान्तवैचित्र्येण विवर्तनम् । तारकायाः कलाभिज्ञास्तत् कटाक्ष प्रचक्षते ॥ " इति । वचोभि' शुककोकिलमधुरतर-

१ हावेन इति पाठान्तरम् । २ गुणै इति पाठान्तरम् ।

मृदुलालापैश्च। ईर्ष्यया परोत्कर्षासहनरूपासूयया च मन्युमेन च।
" परोत्कर्षासहिष्णुत्वमीर्ष्यां प्राहुर्मनीषिणः " इति लक्षणात्।
यद्वा ईर्ष्यया कलहेन प्रणयकलहेन चेति द्वन्द्वैकवद्भाव। मना द्वंद्वो विभाषयै-
कवद्भवतीत्यनुशासनात्। लीलया वागादिभिः प्रियानुकरणरूपविलासविशे-
षेण च। " लीलाप्रियानुकरणं वाग्भिर्गत्याथ चेष्टया। " इति लक्षणात्।
किं बहुना समस्तभावैः स्तम्भरोमाञ्चस्वेदादिसात्त्विकभावैः हर्षौत्सुक्यावहित्था-
दिसंचारिभावैश्चेत्यर्थः। स्त्रियः बन्धनं खलु पुंसां समाकर्षणहेतुत्वं वक्तिरूपं।
लिंगवचनव्यत्ययो नित्यनपुंसकत्वेन जात्यभिप्रायेण च वेदाः प्रमाणमितिवद्-
द्रष्टव्यः। अत्र स्मितकटाक्षालापा अनुभावाः। " कार्यभूतोऽनुभावः स्यात्क-
टाक्षादि शरीरजः। " इत्युक्तत्वात्। लज्जाभयेर्ष्या सञ्चारिभावा।
भावलीले शृंगारचेष्टाविशेषाविति द्रष्टव्यम्। तदुक्तम्। " भावो हा-
वश्च हेला च माधुर्यं धैर्यमित्यपि। लीला विलासो विच्छित्तिर्विभ्रमः किल-
किंचितम्। मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा। कुतूहलं च चकितं
विहृतं हासं इत्यपि॥ एवं शृंगारचेष्टाः स्युरष्टादशविधा मताः। " इति।
ईदृक्साधनसंपन्नानां स्त्रीणां बन्धनहेतुत्वं किं वक्तव्यमिति भावः। तथा
चैतासां शृंगारनायिकानां मध्ये भावलज्जाभयवत्त्वो मुग्धा। स्मितार्धकटाक्षम-
धुरालापवती मध्यमा। ईर्ष्याकलहलीलावती प्रौढाश्चेति विवेकस्तदुक्तम्।
" उदययौवना मुग्धा लज्जाविजितमन्मथा। लज्जामन्मथमध्यस्था मध्यमो-
दितयौवना॥ स्मरमदांकुरा प्रौढा सम्पूर्णयौवना। " इति।
वंशस्थवृत्तम्॥ २॥

मंद मुसकाना, लज्जित होना, मुख फेर लेना, अर्धकटाक्षसे देखना, मधुरवचनसे बोलना, ईर्ष्यासे कलह करना और अनेक चरित्र दिखाना इन सब प्रकारोंसे स्त्री बंधनरूपही है॥ २॥

भ्रूचातुर्यात्कुंचिताक्षाः कटाक्षाः।
स्निग्धा वाचो लज्जितान्ताश्च हासाः॥

---

१ भ्रूचातुर्यकुंचि० इति पाठान्तरम्। २ लज्जितार्धश्च इति पाठांतरम्।

लीलामन्दं च प्रस्थितं स्थितं च ।
स्त्रीणामेतद्भूषणं चायुधं च ॥ ३ ॥

उक्तमर्थं प्रकारांतरेणाह—भ्रूचातुर्यादिति ॥ भ्रुवोश्चातुर्याल्ललिताक्षेपवैचित्र्यात् कुंचितानि कुणीकृतान्यक्षीणि येषां ते तथोक्ताः । " बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् " इति षच् । कटाक्षा अपांगेक्षणानि च एतेन रेचितभ्रुकुट्याख्यौ व्यापारविशेषावुक्तौ । तदुक्तम् । " स्याद्भ्रुवोर्ललिताक्षेप एकस्या एकरेचितम् । द्वयोर्मूलसमक्षेपकौटिल्याद्भ्रुकुटिं विदुः ॥ " इति स्निग्धाः स्नेहनिर्भरा वाचश्च । स्नेहलक्षणं तु ' विस्रम्भे परमां काष्ठामारूढे दर्शनादिभिः । येनांतरंगं द्रवति स स्नेह इति कथ्यते ॥ " इति । लज्जितमन्त येषां ते लज्जितांता लज्जावसाना हासाश्च । तथाभूतहासानामेव मोहनत्वात् । अन्यथा हास्यरसपर्यवसानादिति भावः । लीलामन्दं लीलामधुरं प्रस्थितं प्रस्थानं गमनमिति यावत् । स्थितमवस्थानं च । इत्युभयत्रापि भावे क्तः । इत्येतत्सर्वं स्त्रीणां भूषणं च चातुर्यातिशयहेतुत्वादायुधं शस्त्रं च । युवजनविषयसाधनत्वादिति भावः । अत्र कटाक्षादीनां लक्षणानि प्रागेवोक्तानि । लज्जितसंचारिलीलाशृंगारचेष्टाभ्रुकुट्यादयोऽन्येऽनुभावा इति ज्ञेयम् । तथा लीलामन्थरगमनस्य पद्मिनीनियतलक्षणात् प्रायेणैतासां लज्जातिशयत्वं सूच्यते । तदुक्तं रतिरहस्ये । " व्रजति मृदु सलीलं राजहंसीव तन्वी त्रिवलिललितमध्या हंसवाणी सुवेषा । मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा धवलकुसुमवासोवल्लभा पद्मिनी स्यात् ॥ " अत्र भ्रुकुट्यादिसमुदाये भूषणत्वायुधत्वरूपणाद्रूपकालङ्कारः । शालिनी वृत्तम् ॥ ३ ॥

भौंह फेरनेकी चतुराई, अर्द्धनेत्रसे कटाक्ष चलाना, मीठी बातें बोलना, लज्जित हो हसना, लीलासे मंद मंद चलना और घूमते खडे हो जाना स्त्रियोंके ये सहज गुण और शस्त्र अर्थात् इन्हीं भावोंमे पुरुषोंको मारती हैं ॥ ३ ॥

क्वचित्सभ्रूभङ्गैः क्वचिदपि च लज्जापरिगतैः ।
क्वचिद्भूरित्रस्तैः क्वचिदपि च लीलाविलसितैः ॥

---

१ पारगत इति पाठान्तरम् । २ भीतित्रस्तै इति पाठान्तरम् ।

कुमारीणामेतैर्मदनसुभगैर्नेत्रवलितैः ।
स्फुरन्नीलाब्जानां प्रकरपरिकीर्णा इव दिशः ॥४॥

अथ शृंगारानुभावदृग्विलासान् सपरिकरं वर्णयति—क्वचिदिति ॥ क्वचित् कुत्रचित् सभ्रूभगैः भ्रुकुटिरेचिताख्यभ्रूव्यापारसहितैः । क्वचिदपि च लज्जया परिगतैः प्रत्यावृत्तैश्च स्वानुकूल्यप्रकाशकैरित्यर्थः । तदुक्तम् । "सव्रीडालोकनेनैव स्वानुकूल्यप्रकाशनम्" इति । क्वचिद्भूरित्रस्तैः बहुलभयसम्भ्रान्तैः । क्वचिदपि च लीलाभिर्गतप्रत्यागतविलासविशेषैर्हेतुना विलसितैः कमनीयैः उज्ज्वलैर्वा । तथा मदनेन सुभगैर्मनोहरैः विरक्तस्यापि चित्तक्षोभकैरित्यर्थः । "यद्दर्शनाद्विरक्तोऽपि क्षुभ्यत्येतत्समन्मथम् ।" इति लक्षणात् । एतैरुक्तप्रकारैः कुमारीणां तरुणीनामुत्पलाक्षीणामिति भावः । "वयसि प्रथमे" इति ङीप् । नेत्रवलितैर्नयनविलासैर्दिशः स्फुरतां विकसितानां नीलाब्जानां नीलोत्पलानां प्रकरैर्निकुरुम्बैः परिकीर्णा इव व्याक्षिप्ता इव लक्ष्यन्त इति शेषः । प्रसिद्धक्रियाध्याहारदोषः इत्याह वामनः लिंगाध्याहार इत्यत्र । अत्र नयनविलासानां प्रियजनादिरम्यवस्तुदर्शनचापलं विना असंभवात् कुतूहलं नाम शृङ्गारचेष्टितं सूच्यते । "कुतूहलं रम्यदृष्टौ चापलं परिकीर्तितम् ।" इति लक्षणात् । भ्रुकुट्यादीनां लक्षणं प्रागेवोक्तम् । तथा नयनवलनक्रियया विकीर्णत्वोत्प्रेक्षणाद्गुणक्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा । "यत्रान्यदपि सम्बन्धादन्यत्वेनोपकीर्तितम् । प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ॥" इति लक्षणात् । तत्र च नयनानां नीलोत्पलसाम्यं गम्यते तेन चोपमा व्यज्यत इत्यलंकारेणालंकारध्वनिः । शिखरिणी वृत्तम् ॥ ४ ॥

किसी समय सुन्दर भौंहसे कटाक्ष करता, कभी लज्जासे शोभायमान दिखाई पडता, कभी भयसे भीत होता और कभी लीलाहीसे विलासोंको धारण करता है इसभांति नेत्रोंसे शोभित नवीन स्त्रियोंका जो मुखकमल है उससे दृष्टि ऐसी व्याप्त हो रही है जैसे नीलकमलके समूहसे ॥ ४ ॥

---

१ नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः इति पाठान्तरम् । २ परिपूर्णा इति पाठान्तरम् । ३ दश इति पाठान्तरम् ।

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने ।
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ॥
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली ।
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥८॥

अथ यदुक्तमुद्दीपनविभावश्चतुर्विध इति तत्र प्रथमोद्दिष्टालम्बनगुणकथनमुत्तरत्र करिष्य इत्युत्प्रेक्ष्य स्मितेनेत्यादिश्लोकत्रयेण काश्चिच्छृङ्गारचेष्टाः केचिदनुभावाः सञ्चारिणश्च वर्णिताः. इदानीं तु तदलङ्करणं विवक्षुस्तस्य नैसर्गिकाहार्यभेदेन द्वैविध्यादाहार्यकमनुपदमेव लक्ष्यत इति मनसि कृत्वा सम्प्रति नैसर्गिकं मण्डनमाह—वक्त्रमिति ॥ चन्द्रवद्विकसति ताच्छील्येन इति चन्द्रविकासि सुन्दरमित्यर्थः । ताच्छील्ये णिनिः । वक्त्रं वदनं च । पङ्कजानां पद्मानां परिहासक्षमे अवहेलनसमर्थे तत्सदृशे इति यावत् । लोचने नयने । परीहासेऽत्र “ उपसर्गस्य घञ्यमनुष्ये बहुलम् ” इति दीर्घः । स्वर्णमपाकरिष्णुः स्वर्णम् । “ पुष्पमूलेषु बहुलम् ” इति लुक् । तदपाकरिष्णु तत्सदृश इत्यर्थः । एतेन पद्मिनीत्वं सूच्यते । “ कान्ति चापयर्गौरी ” इति लक्षणात् । वर्णो देहकान्तिश्च । तथा अलिनीनां भृङ्गाङ्गनानां जिष्णुर्जयशीलस्तत्सदृश इत्यर्थः । “ ग्लाजिस्थश्च ग्स्नुः ” इति ग्स्नुप्रत्ययः । कचानां चयः केशराशिश्च । इभकुम्भयोर्विभ्रमहरौ विलासहारिणौ करिवरशिरःपिण्डसदृशावित्यर्थः । “ कुम्भौ तु शिरसः पिण्डौ ” इत्यमरः । वक्षोजौ कुचकुम्भौ च । गुर्वी दुर्भरा । “ वोतो गुणवचनात् ” इति ङीप् । नितम्बस्थली कटिश्च स्थूलाश्च । “ पश्चान्नितम्बः स्त्रीकट्याः ” इत्यमरः । “ जानपद० ” इत्यादिना आकृतिमात्रे ङीष् । हरतीति हारि मनोहरम् । ताच्छील्ये णिनिः । वाचां मार्दवं मृदुत्वं माधुर्यं मधुरकोमलालापत्वमित्यर्थः । एतत्सर्वं युवतिषु तरुणीषु स्वाभाविकं स्वभावसिद्धम् । “ तत आगतः ” इति ठक् । मण्डनं [illegible] नैसर्गिकालङ्कारमित्यर्थः । अत्र चन्द्रविकासीत्यादि-[illegible] । तदुक्तमाचार्यद-

१ [illegible]० इति पाठान्तरम् ।

ण्हिना । " स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति । निरुणद्धि हसत्युपहसति न्यक्करोति प्रतिमात्यसूयति । तदन्वेत्यनुबध्नाति तच्छीलति निषेधति । तच्च वानुकरोतीति शब्दाः सादृश्यवाचकाः ॥ " इति । शार्दूलविक्रीडित वृत्तम् ॥ ५ ॥

चन्द्रमाको फीका करनेवाला मुख, कमलको हंसनेवाले नेत्र, सुवर्णकी दमकको मन्द करनेवाली देहकी कांति, भौंरोंके पुंजको जीतनेवाले केश, गजमस्तककी शोभा हरनेवाले स्तन और विशाल भारी दोनों नितंब और मन हरनेवाली कोमलवाणी ये सब स्त्रियोंमें स्वाभाविक भूषण हैं ॥ ५ ॥

स्मितं किञ्चिन्मुग्धं सरलतरलो दृष्टिविभवः ।
परिस्पंदो वाचामभिनवविलासोक्तिसरसः ॥
गतानामारम्भः किसलयितलीलापरिकरः ।
स्पृशन्त्यास्तारुण्यं किमिव न हि रम्यं मृगदृशः ॥ ६ ॥

अथालङ्कनगुणयौवनमाह—स्मितमिति ॥ स्मितं मन्दहासं किंचिदीषन्मुग्धं सुन्दरं भवतीति यथायोग्यमध्याहार्यम् । " मुग्धः सुन्दरमूढयोः " इत्यमरः । बाल्ययौवनमध्यस्थत्वेन तरुण्याः प्रागल्भ्याभावात् स्मितस्येषन्मुग्धत्वमुक्तमित्यवगन्तव्यम् । दृष्टिविभवः विलोकनसम्पत्तिः सरलमकुटिलं यथा तथा तरलश्चञ्चलो भवति । वाचां परिस्पन्दो वाग्व्यापारोऽपि । अभिनवा नूतना विलासा यासां ता या उक्तयः वचनानि ताभिः सरसो रसयुक्तः

शेषणयोगादुदात्तता नाम गुणः । " श्लाघ्यैर्विशेषणैर्योगो यस्यास्थ स्यादुदात्तता ॥ " इति लक्षणात् । शिखरिणी वृत्तम् ॥ ६ ॥

मन्द मुसुकुराता हुआ मुख, सीधे और चंचल दृष्टिपात करना, नये नये विलास उक्तिसे सरस बात करना, लीलासे कमलके समान मन्द मन्द गतिसे गमनका आरम्भ करना, युवा अवस्था चढतेही क्या क्या सुन्दर हावभाव स्त्रियोंमे नहीं उत्पन्न होते॥६॥

द्रष्टव्येषु किमुत्तमं मृगदृशः प्रेमप्रसन्नं मुखं ।
घ्रातव्येष्वपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ॥
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तद्वपु- ।
र्ध्येयं किं नवयौवनं सहृदयैः सर्वत्र तद्विभ्रमाः ॥७॥

अथ चक्षुःप्रभृतिषडिन्द्रियाणामत्रैव लोकोत्तरप्रतिनियतविषयान् वर्णयति—द्रष्टव्येष्विति । अत्र प्रश्नोत्तरमालिकयान्वयः कार्यः । द्रष्टुं योग्यानि द्रष्टव्यानि तेषु दर्शनीयेषु वस्तुषु । योग्यार्थे तव्यप्रत्ययः । श्रेष्ठं वस्तु किमिति प्रश्नः । प्रेमप्रसन्नमनुरागाविष्कमित प्रेमदागीत्यर्थः । ' द्रवीभूतं मनो यत्र दर्शने प्रेमदागीति । '' इति लक्षणात् । मृगदृशस्तरुण्या मुखं वदनमित्यर्थः । एवमुत्तरत्रापि चक्षुःप्रीतिकरत्वादिति भावः । घ्रातव्येषु आघ्रातव्येषु किमुत्तममिति प्रश्नः । तदास्यपवनः तस्यास्तरुण्या आस्यपवनो मुखमारुतः । तस्यैव घ्राणतर्पणत्वादिति भावः । यद्यपि घ्राणेन्द्रियविषयो गन्धः न तु पवनस्तथापि तस्याः पद्मिनीजातित्वात्तदास्यगन्धस्य तस्य सङ्क्रमणाद्दीणा श्रूयते भेर्यं श्रूयते पुष्पाण्याघ्रायन्त इत्यादिवद्धस्तवचिति पवने तत्सम्योगचरितत्वान्न विरोधः । श्रव्येषु श्रोतव्येषु । अत्र योग्यार्थे यत्प्रत्ययः । एवमुत्तरत्रापि । उत्तमं किं तद्वचः तस्यास्तरुण्या वचः मृदु मधुरभाषणम् । तस्यैव श्रवणानन्दकरत्वादिति भावः । स्वाद्येष्वनुभवयोग्येषु उत्तमं किं तस्या ओष्ठः पल्लव इव तस्य रसः । अधरामृतमित्यर्थः । तस्यैव रसनेन्द्रियतृप्तिहेतुत्वादिति भावः । स्पृश्येषु स्पर्शनयोग्येषु वस्तुषु उत्तमं किं तस्या वपुः

1 [illegible] । 2 [illegible] पाठान्तरम् ।

कुसुमसुकुमारशरीरमित्यर्थः । तस्यैव निरुपमत्वांगिन्द्रियसौख्यावहत्वादिति भावः । उत्तमं ध्येयं ध्यानार्हं किं ध्यातव्येष्विति शेषः । नवयौवनं तरुणीनवतारुण्यमेव तस्यैवात्यंतमनोरंजकत्वादिति भावः । अथ सर्वदा सुरत ध्येयमाह सहृदयैः हृदयालुभिः रसिकजनैरित्यर्थः । सर्वत्र सर्वदेशेषु सकलकालेषु च तस्यास्तरुण्या विभ्रमा विलासा ध्येया इति शेषः । अत्र तत्तत्प्रसिद्धविषयाणामेकत्र समष्टिवर्णनान्महान् शृङ्गारपरितोषातिशय उक्तः। एतेनास्या लोकोत्तरमाभिरूप्यं सूच्यते। तथा चोत्तमविषयाकांक्षिभिर्वैशिष्टतरुणीसंभोग एव कर्तव्य इति फलितार्थः । अत्र प्रश्नोत्तरयोश्चातुर्यातिशयार्थमसकृन्निबंधनादुत्तरालंकारभेदः । " उत्तरात्प्रश्न उन्नेयो यत्र प्रश्नोत्तरे तथा । बहुधा च निबध्येते तदुत्तरमुदीर्यते ॥ " इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

रसिकोंके देखने योग्य वस्तुओंमें उत्तम वस्तु क्या है ? मृगनयनी नायिकोंका प्रेमसे प्रसन्नवदन, सूंघनेकी वस्तुमें उनके मुखकी भाफ, सुननेमें मधुरवाणी, स्वादिक वस्तुमें उनके अधरपल्लवका रस, स्पर्शकी वस्तुमें उनका शरीर और ध्यान करनेके योग्य उनका यौवन और विलास है ॥ ७ ॥

एताश्चलद्वलयसंहतिमेखलोत्थ-
झङ्कारनूपुरपराजितराजहंस्यः ॥
कुर्वन्ति कस्य न मनो विवशं तरुण्यो ।
वित्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ ८ ॥

अथासां मुखाद्यलंकरणवर्णनद्वारा सकललोकसंमोहकत्वमाह द्वाभ्याम्—एता इति ॥ चलन्त्यौ गतिवैचित्र्याद्दलमाने ये वलयसंहतिमेखले वलयसंहतिः कंकणश्रेणिः । मेखलाशब्देन काचीवाचिना तन्निबद्धाः किंकिण्यो लक्ष्यंते । तदुत्थस्तदुत्पन्नो यो झंकारः झणझणशब्दस्तेन नूपुराभ्यां मंजुलनिनादमंजीराभ्यां च पराजितास्तिरस्कृता राजहंस्यः कलहंसांगना याभिस्ताः कलनादसुन्दरमन्दगमनराजहंसरमणीया इत्यर्थः । " राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोः । "

---

१ एताः स्खलत् इति पाठांतरम् । स्वाहन० इति पाठांतरम् ।

इति विश्व । " जातेरस्त्रीविषयादयोपधात् " इति ङीप् । शैषिकस्य कपो वैभाषिकत्वान्न प्रयोग । एता पूर्वोक्तास्तरुण्य किंचिदनविंशतिवार्षिकाः स्त्रिय इत्यर्थ. । वित्रस्ता चकिता मुग्धा प्रौढा च या हरिणी कुरंगी तत्स-दृशैस्तद्विलोकननिभैरित्यर्थ । कटाक्षैरपांगवीक्षणैः । एतेनैतासां पद्मिनीत्व सूच्यते । " चकितमृगदृगाभे प्रांतरक्ते च नेत्रे " इति लक्षणात् । कस्य मनो विवश समोहित न कुर्वंति कुर्वंत्येवेत्यर्थः । तरुणीलक्षणमुक्त रति-रहस्ये । " बाला स्यात् षोडशाब्दा तदुपरि तरुणी त्रिंशतेर्यावदूर्ध्वं प्रौढा स्यात् पञ्चपचाशदवधि परतो वृद्धतामेति नारी । " वयोलक्षणमुक्तम् । "निदाघशरदोर्बाला पथ्या विषयिणो भवेत् । हेमंते तरुणी योग्या प्रौढा वर्षावसंतयो. । सतत सेव्यमानापि बाला प्रथयते बलम् ॥ " इति । अत्र राजहंसीपराजयस्य सादृश्यपर्यवसानादेका • उपमा । हरिणीसदृशैरित्यत्र चान्या । अनयोः परस्परनिरपेक्ष्यात्सजातीयससृष्टिः । एताश्च मध्यमना-यिकाः । " लज्जामन्मथमध्यस्था मध्यमोदितयौवना । " इति लक्षणात् । वसंततिलका वृत्तम् ॥ ८ ॥

ऐसी स्त्रिया जिनके चंचल कंकणोंके शब्द क्षुद्रघंटिका (कौंधनी) की ध्वनि और नूपुरके झनकारने राजहंसिनियोंकी चाल जीत ली है वे तरुणी भयकी हरिणोके समान नेत्रपात कर किनके मनको विवश नहीं करती ॥ ८ ॥

कुंकुमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा ॥
नूपुरहंसरणत्पदपद्मा कं न वशीकुरुते भुवि रामा ॥ ९ ॥

सिंदूरादिरञ्जकद्रव्यशृङ्गारिताकारेत्यर्थ. । अत एव गौरयोररुणयोर्वा पद्मिनी-त्यात् श्रीफलसच्छाययोः । "स्तनयुगलमनिंच श्रीफलश्रीविडम्बि" इति लक्षणात् । पयोधरयोः कुचकुम्भयो. कम्पिताश्चालिता हारा मुक्तावल्यो यस्या सा तथोक्ता । नूपुरौ मञ्जीरा एव हंसौ हंसाविव नूपुरौ वा ताभ्या रणती शब्दायमाने पदे एव पद्मे पद्मे इव पदे वा यस्या सा अत एव रूप-कोपमयो साधकबाधकप्रमाणाभावात्सन्देहसङ्करः । रामा सुन्दरी भुवि क पुरुष न वशीकुरुते न स्वायत्तीं कुरुते । जितेंद्रियमपि स्वायत्तीकुरुत एवे-त्यर्थः । "वश आयत्ततायां च" इति विश्व । अभूततद्भावे च्वि. । ऊर्यादिच्विडाचश्च" इति गतिसज्ञाया "कुगतिप्रादय" इति समासः । अत्र सुप्सुपेत्यननुवृत्ते. । अत्र हाराणा कम्पितत्वविशेषणेन पयोधरयोरत्यन्तपटुत्व सूच्यते । अन्यथा कम्पनायोगात् । तेन चात्युत्कटयौवनसम्पत्तिश्च गम्यते । पयोधरयोश्च गौरत्वविशेषणेन रूपसमृद्धिर्व्यज्यते । एतेनालम्बनगुणलाभ उक्त । एव कुङ्कुमपङ्केत्यनेन तटस्थोद्दीपनभाव कथित । तथा हारनूपु-रात्मकालम्बनालङ्करणमप्युट्टङ्कितम् । रणत्पदपद्मेत्यनेन सूचिता लीलागति-विशेषरूपानुभावश्च । तथा चैवंविध नामग्रीमुल्लासितेन "आभिरूप्यमका-ठिन्यमङ्गाना चातिमार्दवम् । एवमादिगुणावस्था प्रथमे यौवने भवेत् ॥" इत्युक्त्या "कृताधरागसंस्कारा सखीकेलिषु लालसा ।" इत्युक्तचेष्टाविशि-ष्टयौवनपरिपूर्णेन रमयतीति रामेति व्युत्पत्त्या लोकोत्तरलावण्यसम्पन्नेन आल-म्बनाविभावेनोदित शृङ्गाररसार्णवे को वा न निमज्जतीति भाव. । अत्र मध्यविशेषणयोगादुदात्तता नाम गुण । लक्षण तूक्तम् । तथात्यन्तसुकुमा-रार्थसन्दर्भतत्वात्कैशिकी वृत्ति । "अत्यन्तसुकुमार्थसन्दर्भा कैशिकी मता ।" इति लक्षणात् । दोधकवृत्तम् । "दोधकवृत्तमिद भभभा गौ" इति लक्षणात् ॥ ९ ॥

केशर और चन्दनसे जिसका देह शोभित है गोरे स्तनोंपर हार झूमता है और चरणकमलमें हंससे नूपुर बोलते हैं ऐसी सुन्दर स्त्री इस पृथ्वीपर किस पुरुषका मन नहीं मोह लेती ॥ ९ ॥

नूनं हि ते कविवरा विपरीतवाचो ।
ये नित्यमाहुरबला इति कामिनीस्ताः ॥
याभिर्विलोलतरतारकदृष्टिपातैः ।
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः॥१०॥

अथैतासां प्रागल्भ्यं वर्णयति—नूनमिति ॥ ते कविवराः कवीश्वरा विपरीतवाचो व्यत्यस्तवचनाः नूनं सत्यं हि । ते क इत्याशङ्कायामाह । ये कविवरास्ताः प्रसिद्धाः कामिनीरबला दुर्बला इति नित्यमाहुः । ब्रुवते वर्णयन्तीत्यर्थः । न इति सम्बन्धः । "ब्रुवः पञ्चानामादित आहो ब्रुवः" इति इत्यादेशः, ब्रुव आहादेशश्च । कथं विपरीतवाक्यमित्याशङ्क्य तासां प्रागल्भ्यं साधयति । याभिः कामिनीभिः विलोलतरा अतितरलास्तारकाः कनीनिका येषु ते तथोक्ता ये दृष्टिपाताः लोचनप्रसारास्तैः दृक्प्रेरणैः । "कर्तृकरणयोस्तृतीया" इति तृतीया । "तारकाक्ष्णः कनीनिका" इत्यमरः । [illegible] शक्रादयोऽपि [illegible] इति भावः । विजिताः निर्जिताः [illegible] इत्यर्थः । [illegible] कामिन्यः कथमबलाः कुतो वा दुर्बलाः किंतु प्रबला [illegible] । [illegible] इति भावः । [illegible] काव्यलिङ्गमलङ्कारः । "[illegible]" इति लक्षणात् । वसन्ततिलका वृत्तम् ॥ १० ॥

वे श्रेष्ठ कवि निश्चित उलटी समझवाले हैं जिन्होंने स्त्रियोंका नाम अबला रक्खा है। जिनकी चंचल पुतलियोंके कटाक्षसे इन्द्रादिकभी हार मानते हैं भला कहो तो वे अबला कैसे हैं ॥१०॥

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ॥
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥ ११ ॥

चनम् । सुभ्रुवामित्यर्थ । आज्ञा करोतीत्याज्ञाकरः किंकरः । " कृञो हेतु० " इत्यादिना टप्रत्यय । नूनमित्युत्प्रेक्षायाम् । कुत. यतः कारणात्तस्या. सुभ्रुवो नेत्रसचारेण दृष्टिप्रसारेण सूचितेषु सज्ञापितेषु प्रवर्तते । यथा लोके स्वामिदृष्टिसूचिते भृत्यः प्रवर्तते तद्वदित्यर्थः । अतः कामिनीनां नूनमय किंकर इति भाव । कामिनीकटाक्षमात्रेणैव जनस्य मन्मथावेशसभवादियमुत्प्रेक्षा सा च नूनमिति व्यजकसद्भावाद्वाच्या । तदुक्तम् । " मन्ये शके ध्रुव नून प्राय इत्येवमादिभि । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश ॥ " इति । एतेनैतासामप्रतिहतजगद्वशीकरणसामर्थ्यरूपं व्यज्यते । अनुष्टुप् ॥ ११ ॥

कामदेव निश्चय करके स्त्रियोंका आज्ञाकारी सेवक है, क्योंकि जिसे वह आंखोंसे सैन कर देती हैं उसी पुरुषको वह दबा लेता है ॥ ११ ॥

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने ।
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः॥
मुक्तानां सतताधिवासरुचिरौ[1] वक्षोजकुम्भाविमा-[2] ।
वित्थं तन्वि वपुः प्रशांतमपि ते रागं[3] करोत्येव नः १२॥

अथ रागिण स्वप्रवैचित्र्यात् कामिनीप्रशसापर वचन सव्रोचनमभिधायाह द्वाभ्याम्—केशा इति ॥ केशा. शिरोरुहा सयमिन सयता सम्यक् नियमवतश्च । लोचने अपि श्रुते. पर पार कर्णांतविश्रांतत्व वेदांतपरिशीलनतात्पर्यं गम्यते । अन्तर्वक्त्र वक्त्राभ्यतरमपि स्वभावतो निसर्गाच्छुचिभिः शुभ्रै पवित्रैश्च द्विजाना विप्राणा च । "दन्तविप्राडजा द्विजाः " इत्यमर । गणै कीर्णं व्याप्तम् । इमावेताविति हस्तनिर्देश । वक्षोजकुभौ कुचकुभौ च मुक्ताना मौक्तिकहाराणा जीवन्मुक्ताना च सतताधिवासेन निरन्तरावस्थानेन सततनिवासेन च रुचिरौ । "मुक्ता तु मौक्तिके मुक्त , प्राप्तमुक्तौ तु मोचितः।"

---

१ रुचिर इति पाठान्तरम् । २ कुम्भद्वयमित्थ इति पाठान्तरम् ।
३ क्षोभ इति पाठान्तरम् ।

इत्युभयत्रापि विश्व । अत हे तन्वि, इत्थमुक्तप्रकारेण ते वपुः शरीरं प्रशान्तं प्रसन्नं वैराग्यसाधनसंपत्तिमदपीति यावत् । " वा दान्त० " इत्यादिना निपातः । नोऽस्माकं रागमनुरक्तिं संभोगाभिलाषमेवेति यावत् । करोत्युत्पादयति न तु वैराग्यमिति विरोध । स नोक्तरीत्या आभासितत्वाद्विरोधाभासोऽलङ्कार । " आभासत्वे विरोधस्य विरोधाभास इष्यते । " इति लक्षणात् । स च श्लेषप्रतिभोत्थापितयोरङ्गाङ्गिभावेन सङ्कर । लोचने अन्तर्गतमित्यत्र प्रगृह्यत्वात्प्रकृतिभाव. । " ईदूदेद्द्विवचनं प्रगृह्यम् " इति प्रगृह्यसंज्ञा । वृत्तमुक्तम् ॥ १२ ॥

केश संयमी हैं अर्थात् सुगंधित तेलयुत कंघीसे संवारे हैं, नेत्र दोनो श्रुतिके पार हो गये हैं अर्थात् कानोतक अत्यन्त विशाल हैं, मुख अन्तरमे सहजही शुचि अर्थात् विमल द्विजोके समूहसे भरा अर्थात दाँतोकी पंक्तिके किरणसे चमकता और दोनों स्तनकलश मुक्तारा नाम निरंतर अर्थात् मोतियोंकी मालासे शोभित सो सुक्ष्मांगि ! तेरा शरीर शांतस्वरूपभी है अर्थात् संयमी नियमी श्रुति वेदका पारगामी शुचि पवित्र द्विज ब्राह्मण और मुक्त विरक्त पुरुष इनसे युक्त है, पर मुझे तो अनुरागही उत्पन्न करता है ॥१२॥

मुग्धे धानुष्कता केयमपूर्वा त्वयि दृश्यते ॥
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥ १३ ॥

विध्यसि । यतो लोके धानुष्काः प्रौढा एव सुलक्ष्याण्येव लक्ष्याणि बाणैरेव विध्यति । त्वं तु मुग्धापि दुर्लक्ष्याण्यपि लक्ष्याणि मौर्वीभिरेव विध्यसीति कृत्वा त्वदीयधानुष्कताया अपूर्वत्वादज्ञेयत्त्वमिति भावः । स्त्रीणां रूपयौवनगुणसंपत्तिरेव प्रहरणसाधनमिति फलितार्थः । अत्र पूर्ववाक्यार्थस्योत्तरवाक्यार्थसमर्थितत्वाद्वाक्यार्थहेतुक काव्यलिंग तच्च गुणयोः श्लेषभित्तिकाभेदाध्यवसायमालातिशयोक्तिर्निर्व्यूढामित्यनयोरंगांगिभावेन संकर । तेन च प्रसिद्धाद्धानुष्कादुपमानादुपमेयीभूतमुग्धायामाधिक्यप्रतीतिर्व्यतिरेको व्यज्यत इत्यलंकारध्वनिः ॥ १३ ॥

हे सुंदरि ! तेरी यह धनुषविद्यामें कुशलता विचित्र देख पडती है जो चित्तको गुण अर्थात् प्रत्यंचा वा चतुराईहीसे बाँधती है बाणसे नहीं ॥ १३ ॥

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ॥
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ १४ ॥

अथाविंशतिसमाप्ति कामिन्युद्देशेनोक्तान्यत्यतानुरागिणां प्रशंसावचनान्याह—सतीति ॥ प्रदीपे अर्थप्रकाशे दीपार्चिषि सति विद्यमानेऽपि । अग्नौ तथाभूते वह्नौ च सत्यपि । सत्यर्क इति पाठे त्रिलोकप्रकाशके सूर्ये सत्यपि । तथा तारामणींदुषु तिमिरनिरासकत्वेन प्रसिद्धेषु नक्षत्रपद्मरागादिमाणिक्यचंद्रेषु सत्स्वपि । तया प्रसिद्धया पूर्वानुभूतया वा मृगशावस्य बालहरिणस्येवाक्षिणी यस्यास्तया प्रियतमया विना । " बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् षिद्गौरादिभ्यश्च " इति ङीप् । इदं जगत् तमोभूतमन्धकारमयं लक्ष्यत इति शेषः । तस्या एव मम नयनज्योतिष्ट्वादिति भावः । अत्रांधकारनिराकरणसमर्थत्वेन प्रसिद्धे प्रदीपादिकारणसमुदाये सत्यपि तन्निरासरूपकार्यानुत्थानाद्विशेषोक्तिरलंकारः । " तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते । " इति लक्षणात् । तथा प्रदीपादिसद्भावेऽपि तमोभूतत्वमिति विरोधश्च व्यज्यते । तेन चास्य महामोहांधत्वं वस्तु गम्यते इत्यलङ्कारेण वस्तुध्वनिः ॥ १४ ॥

---

१ तारारवींदुषु इति पाठांतरम् ।

दीपक अग्नि तारे सूर्य और चंद्रमा ये सब हैं परन्तु एक मृगनयनी स्त्री विना मुझे सब जग अंधेरा है ॥ १४ ॥

उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलते ।
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ॥
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं ।
मध्यस्थापि करोति तापमधिकं रोमावलिः केन वा १५

उन्नत स्तनके भार चंचल नेत्र और भ्रूलता और राग भरे नवीन पत्तोंसे दोनों अधरपल्लव ये रागसे अंधे रसिकोंके शरीरमें पीडा करें तो करें क्योंकि कामदेवके हाथकी लिखी तेरे मस्तकमें सौभाग्यके अक्षरोंकी पंक्ति है परन्तु मध्यस्थ रोमावली क्यों अधिक ताप देती है तात्पर्य यह कि, उन्नत, चंचल, रागवान् प्राय. पीडा देता ही है परन्तु मध्यस्थ जिसका काम छुडा देनेका है वह रोमावली क्यों अधिक पीडा देती है अर्थात् विपरीत करती है ॥ १५ ॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ॥
कराभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ १६ ॥

मुखेनेति ॥ चद्रकातेनेंदुसुदरेण चद्रकातमणिरूपेण चेति गम्यते । मुखेन च । महानीलैरतिमेचकै सिंहलद्वीपसभवेद्रनीलैश्च शिरोरुहैः कुतलैश्च । " सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृता. । " इति भगवानगस्त्य । तथा पद्मस्य राग इव रागो ययोस्तौ ताभ्यां पद्मरागरूपाभ्या च कराभ्या च सा सुदरी रत्नमयी रत्नरूपेव रेजे । " तत्प्रकृतवचने मयट् " " टिड्ढाणञ्० " इत्यादिना ङीप । अनुष्टुप् ॥ १६ ॥

चंद्रकांत मुख, महानील केश और दोनों पद्मराग हाथोंसे ऐसी रत्नमय वह स्त्री शोभा देती है अर्थात् चंद्रकान्त, महानील, पद्मराग तीन प्रकारकी मणिरूप स्त्री शोभित होती है ॥ १६ ॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ॥
शनैश्चराभ्यां पादाभ्यां[1] रेजे ग्रहमयीव सा ॥ १७ ॥

गुरुणेति ॥ गुरुणा दुर्भरेण गीष्पतिरूपेण च । " गुरुस्तु गीष्पती श्रेष्ठे गुरौ पितरि दुर्भरे । " इत्युभयत्रापि शब्दार्णव । स्तनभारेण च । भास्वता प्रकाशवता भास्करेण च । " भास्वान् भास्वरसूर्ययोः " इति विश्व । मुखमेव चंद्रस्तेन च । शनैश्चराभ्या मदगमनाभ्या शनैश्चराख्यग्र-

---

[1] पाणिभ्या इति पाठान्तरम् ।

हाम्या च सा ग्रहमयीव रेजे । प्रक्रिया पूर्ववत् । अत्र श्लोकद्वयेऽपि श्लेषमहिम्ना रत्नग्रहमयत्वोत्प्रेक्षणात् श्लेषसङ्कीर्णेयमुत्प्रेक्षा तया चास्या लोकोत्तराकाररूपलावण्यसौन्दर्यकान्तिविशेषभाग्यसौभाग्यादिसकलकल्याणगुणाभिरामता गम्यते । एतच्च मदीयशृङ्गारशृङ्गाटके रुक्मिणीस्तम्भरत्नाख्याने निर्मितग्रहमयीन्यत्र विस्तरेण प्रपञ्चितमितीहोपरम्यते ॥ १७ ॥

स्तनोंके भारसे गुरु, प्रकाशमान मुखसे चन्द्र और दोनो चरणसे मन्दगामी ग्रहमयसी वह स्त्री शोभा देती है अर्थात् गुरु बृहस्पति मन्दगामी शनि चंद्र प्रसिद्धही हैं इन ग्रहोंका नामभी प्रकाशित है १७॥

तस्याः स्तनौ यदि घनौ जघनं च हारि ।
वक्त्रं च चारु तव चित्त किमाकुलत्वम् ॥
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा ।
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १८ ॥

इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरत- ।
प्रतापप्रारंभः स्मरविजयदानप्रतिभुवः ॥
चिरं चेतश्चोरा अभिनवविकारैकगुरवो ।
विलासव्यापाराः किमपि विजयंते मृगदृशाम् १९.

अथ विलासवर्णन निगमयाति—इम इति॥ तारुण्यश्रियो यौवनसम्पद नव-परिमला. । नूतनपरिमलप्राया । तद्वदभिव्यञ्जका इत्यर्थ । यद्वा तारुण्य-श्रिया नव' अपूर्व' परिमल सौभाग्यविशेषो येपा ते तथोक्ता' । प्रौढसुरत प्रचण्ड-रति. तत्र य प्रताप सामर्थ्यं तस्य प्रारम्भा. । उपक्रमा । स्मरस्य जगज्जि-त्वरस्य मन्मथस्य विजयदाने प्रतिभुवो लग्नका । " स्युर्लग्नका प्रतिभुव " इत्यमर' । यथा प्रतिभुव अधमर्णाद्धनमुद्धृत्य उत्तमर्णाय दातु समर्था इत्यर्थ. । चिर चिरकालमारभ्य चेतश्चोराश्चित्ताकर्षका मनोहरा इति यावत् । अभिनव-विकारैराकस्मिकभयकम्पानुसरणादिप्रत्यग्रयौवनविकारैरेकगुरवोऽन्तन्तभूयिष्ठा मृगदृशा तरुणीना सम्बन्धिन इमे पूर्वोपवर्णिता विलासव्यापारा शृङ्गारचेष्टा-विशेषा किमप्यनिर्वाच्यतया विजयन्ते सर्वोत्कर्षेण वर्तते । " विपराभ्या ज. " इत्यात्मनेपदम् । शिखरिणी वृत्तम् ॥ १९ ॥

यौवनश्रीके अपूर्व परिमलप्राय, प्रचंड रतिसंबधी सामर्थ्येक आरंभ, मन्मथको विजय देनेमें प्रतिभू (जामिन), चिरकालसे चित्तके चोर, आकस्मिक भयकंपादि नूतन यौवनविकारोसे युक्त ऐसे ये तरुण स्त्रियोंके विलास (शृङ्गारचेष्टा) उत्कर्षतासेही वर्तते हैं॥ १९॥

प्रणयमधुराः प्रेमोदारा रसाश्रयतां गताः ।
फणितिमधुरा मुग्धप्रायाः प्रकाशितसंमदाः ॥
प्रकृतिसुभगा विस्रंभार्द्रा स्मरोदयदायिनो ।
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥२०॥

१ प्रेमोद्गाटा इति पाठान्तरम् । २ रमाद्रत्माश्रतया इति पाठान्तरम् । ३ भणिति०-इति पाठान्तरम् । ४ विश्रभार्द्रा इति पाठातरम् ।

प्रणयेति ॥ "विस्रम्भे परमां काष्ठामारूढे दर्शनादिभिः । येनान्तरं द्रवति स स्नेह इति कथ्यते ॥" इत्युक्तलक्षणः स्नेहः प्रणयशब्देन विवक्षितस्तेन प्रणयेन मधुराः सन्तापहराः । "शीतलीक्रियते तापो येन तन्मधुरं स्मृतम् ।" इति लक्षणात् । प्रेम्णानुरागविशेषेणोदारा रम्या मनोहरा इति यावत् । रसाश्रयतां शृङ्गारास्पदत्वं गताः । शृङ्गाररसप्रसरोद्गमिता इत्यर्थः । फणित्या सदर्थविशेषेण मधुरा माधुर्यगुणयुक्ता । अमृतप्राया इत्यर्थः । मुग्धप्रायाः सौकुमार्यभरिता श्रुतिरञ्जका इत्यर्थः । प्रकाशितोऽभिव्यञ्जितः समदः सम्भोगौत्सुक्यं यैस्ते तथोक्ताः । प्रकृतिसुभगाः स्वभावरुचिरा विस्रम्भार्द्रा विश्वासपरिप्लुता अत एव स्मरोदयदायिनो जितेन्द्रियस्यापि मन्मथोद्रेकावहाः मृगीदृशां सम्बन्धिनः स्वैरालापा नर्मोक्तय इति यावत् । किमपि हरन्ति । यद्वा रहसि स्वैरालापा इत्यन्वयः । किमपि हरन्ति । यद्वा अनिर्वाच्यतया मनोहरा भवन्तीत्यर्थः अत्र श्लोकद्वयेऽपि समर्थसहिष्णोः शृङ्गाररसपाठसमयेऽप्यास्वाद्यमानत्वादन्तर्बहिःस्फुरणेन । "द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः ।" इति लक्षणात् । तथा श्लेषप्रसादादयो दण्डाचार्योक्ता दश प्राणाश्च प्रायेणात्र सन्ति निपुणैर्ज्ञेया इति संक्षेपः । प्रकरणेऽस्मिन् प्रायशो नायका अनुकूला दक्षिणाश्चानुसन्धेयाः । "एकायत्तोऽनुकूलः स्यादन्योऽनेकत्र दक्षिणः ।" इति लक्षणात् । हरिणी वृत्तम् ॥ २० ॥

सुशीलतासे मीठे, प्रेमरसकी पूर्णतासे ढीले, रससे सुखदाई, सुननेमें सुंदर, आनन्द प्रकाश करनेवाले, सहजही सुडौल, विश्वासके योग्य अर्थात् कामदेवके उदय करनेवाले ऐसे एकांतमें स्त्रियोंके स्वच्छन्द सुभाषण मनको हरण करलेते हैं ॥ २० ॥

विश्रम्य विश्रम्य वनद्रुमाणां ।
छायासु तन्वी विचचार काचित् ॥
स्तनोत्तरीयेण करोद्धृतेन ।
निवारयन्ती शशिनो मयूखान् ॥ २१ ॥

अथ संभोगविप्रलम्भभेदविभिन्नयोः शृंगारयोर्मध्ये संभोगशृंगारं सप्रपञ्चमुत्तरत्र वर्णयिष्यन्नादौ विप्रलम्भशृंगारमेकेनाह—विश्रम्येति ॥ काचित्तन्वी कृशांगी वनद्रुमाणां छायासु चन्द्रातपरहिताधःप्रदेशेषु विश्रम्य विश्रम्य पुनः पुनः श्रममपनीय । वीप्सायां द्विर्भावः । 'छाया त्वनातपे कान्तौ'' इति विश्वः । विचचार संचचार । केलिवनसंचारस्य विरहिजनविनोदोपायत्वादिति भावः । कथंभूता सती करोद्धृतेन हस्तोत्क्षिप्तेन स्तनोत्तरीयेण कुचकुम्भाच्छादनपटाञ्चलेन शशिनश्चन्द्रस्य मयूखान् किरणान् आतपानिति यावत् । निवारयन्ती निराकुर्वती ग्रीष्मोष्मणो व्यजनेनेवेति भावः । चन्द्रकिरणानां विरहिणीजनसंतापकरत्वात्तन्निवारणोक्तिः । एतेन दशावस्थापक्षे षष्ठी मन्मथावस्था तथा च चतुर्थी जागरावस्था । तथोत्तरीयेण शशिमयूखानामनिवारणीयत्वविवेकाभावाच्चित्तविभ्रमप्रतीतेः । कामशास्त्रोक्तद्वादशावस्थापक्षे दशमी उन्मादावस्था सूच्यते । तन्वीत्यनेन कार्श्यावस्था च कथिता । तदुक्तम् । "दृङ्मनःसङ्गसंकल्पो जागरः कृशतारतिः ॥ ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश ॥'' इति । कामशास्त्रोक्तास्तु । " चक्षुःप्रीतिर्मनःसङ्गः संकल्पोऽथ प्रलापिता । जागरः कार्श्यमरतिर्लज्जात्यागोऽथ संज्वरः ॥ उन्मादो मूर्छनं चैव मरणं चरमं विदुः ॥ '' इति । इयं च विरहोत्कण्ठिता । " चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मना । '' इति लक्षणात् । उपजातिवृत्तम् ॥ २१ ॥

वनके वृक्षोंकी छायामें विश्राम लेती। २ कोई एक स्त्री हाथसे अपने स्तनोंके आँचलोंको उठाये चंद्रमाकी किरणोंको रोकती हुई जाती है। यहां कृष्णाभिसारिका नायिका जानो ॥ २१ ॥

अदर्शने दर्शनमात्रकामा ।
दृष्ट्वा परिष्वङ्गसुखैकलोला ॥
आलिङ्गितायां पुनरायताक्ष्या-।
माशास्महे विग्रहयोरभेदम् ॥ २२ ॥

---

१ कामाः इति पाठान्तरम् । २ रसैकलोला इति पाठान्तरम् ।

अथ सम्भोगशृङ्गारः स च बाह्याभ्यन्तरभेदेन द्विविधः । वात्स्यायनेनाप्यस्य द्विविधस्यापि प्रकारान्तरेण द्विविधत्वमुक्तम् । “ बाह्यमाभ्यन्तरं चेति सुरतं द्विविधं स्मृतम् । तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम् । द्वितीयं सुरतं साक्षान्नानाकरणकल्पितम् ॥ ” इति । तत्र प्रथमालिङ्गनरूपं सोपस्कारमाह द्वाभ्याम्—अदर्शन इति ॥ अत्र यत्तच्छब्दाध्याहारेणान्वयः कार्यः । अदर्शने प्रियतमविषयकदर्शनाभावे सति । क्वचित्प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते । यथा अदर्शनमश्रवणमभाषणमनुच्चारणमित्याद्यभियुक्तोक्तेः । दर्शनमात्र एव कामोऽभिलाषो यस्याः सा तथोक्ता तावन्मात्राभिलाषिणीत्यर्थः । ततो दृष्ट्वा प्रियतममिति शेषः । परिष्वङ्गसुखे आलिङ्गनजनितसुखे एक मुख्य यथा तथा लोला सतृष्णा । “ लोलश्चलसतृष्णयोः ” इत्यमरः । या आयताक्षीति शेषः । तस्यामायताक्ष्यां कर्णान्तविश्रान्तलोचनायां प्रियतमायां सपरिष्वक्तायां सत्यां विग्रहयोः शरीरयोः । “ शरीरं वर्ष्म विग्रहः ” इत्यमरः । अभेदमेकरूपताम् आसाद्य गाढालिङ्गनसुखमनुभवितुमभिलाषाम्महे इत्यर्थः । तद्यथा । “ प्रियया विरहात्परिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमयं पुरुषः ” इत्यादिश्रुतेः । प्रियतमगाढालिङ्गनपरिष्वङ्गे विगलितवेद्यान्तरत्वेन ब्रह्मानन्दसब्रह्मचारिसुखविशेषसमवाप्त्याविर्भावाऽऽलिङ्गनाशमन सुखमेवेति भावः । तदुक्तं रतिरहस्ये । “ तल्पोत्तमेऽपि परतरमेदनमहानन्दोपमं महाः सा न विदति ... जन. । ” इति । अन्यत्राप्युक्तम् । “ प्रौढालिङ्गनचुम्बनादिजनितं प्रच्छन्नवैयानगम् । इति । इत पूर्ववत् ॥ २२ ॥

जबतक हम स्त्रीको नहीं देखते तबतक तो देखनेहीकी इच्छा रहती है, देखते हैं तब उससे आलिङ्गनरसका सुख चाहते हैं और लिपटनेपर यह अभिलाषा रखते हैं कि, यह मृगनयनी हमारे शरीरमें विलग न हो ॥ २२ ॥

मालती शिरसि जृम्भणं मुखे ।
चंदनं वपुषि कुंकुमाविलम् ॥

वक्षसि प्रियतमा मदालसा ।
स्वर्ग एष परिशिष्ट आगमः ॥ २३ ॥

एव परमानन्दानुसधायकत्वेन परिष्वगस्यापवर्गरूपत्वमुक्त्वा सप्रति स्वर्गरूपत्वमाह—मालतीति ॥ शिरसि मालती जातिकुसुममालिकेत्यर्थः । " सुमना मालती जाति " " पुष्पे जातिप्रभृतय: " इत्युभयत्राप्यमरः । " पुष्पमूलेषु बहुलम् " इति लुक् । मुखे जृंभण मदनमदजनितजृमश्च । " जृमस्तु त्रिषु जृंभणम् " इत्यमर. । यद्वा सभोगौत्सुक्यसूचकरागविलासस्फूर्तिश्च । वपुषि कुकुमाविल काश्मीरजमिश्रित घुसृणरसमसृणित वा । चन्दन पाटीरपङ्क च । वक्षसि मदालसा मदेन मन्थरा प्रियतमा गाढालिंगितमत्तकाशिनी चेत्येषोऽय समुदाय स्वर्ग स्वर्गशब्दवाच्य आगम एतद्व्यतिरिक्तस्वर्गाभिधायकशास्त्र तु परिशिष्टः सारानभिज्ञत्वादमुख्यः स्वर्गपदवाच्यमुख्यार्थबोधशून्य इत्यर्थः । अन्यथैतत्परत्वेनैव वदेदिति भावः । स्वर्गसमानसौख्यप्रदोऽयमेवेति परमार्थ. । रथोद्धतावृत्तम् । " रान्नराविह रथोद्धता लगौ " इति लक्षणात् ॥ २३ ॥

शीघ्र खिलनेवाली मालतीकी कलियोंकी माला माथेमे पहिने हों, केशरयुक्त चन्दन अंगमें लगाये हों और सुन्दर प्यारी स्त्रियोंको छातीसे लिपटाये हों तो यह जानो कि, शेप स्वर्गका भोग यहां प्राप्त हुआ है ॥ २३ ॥

प्राङ्मामेति मनागनागतरसं जाताभिलाषं ततः ।
सव्रीडं तदनु श्लथोद्यममथ प्रध्वस्तधैर्यं पुनः ॥
प्रेमार्द्रं स्पृहणीयनिर्भररहःक्रीडाप्रगल्भं ततो ।
निःसंगांगविकर्षणाधिकसुखं रम्यं कुलस्त्रीरतम् ॥ २४ ॥

---

१ मनोहर इति पाठांतरम् । २ आगत इति पाठान्तरम् । ३ मनागमानितगुण इति पाठांतरम् । ४ ...ोद्यतमनुप्रत्यस्त० इति पाठांतरम् । ५ प्रेमार्द्रस्पृ० इति पाठांतरम् । ६ प्रगल्भा इति पाठान्तरम् । ७ नि सगांगविनर्षणादिक इति पाठांतरम् ।

अथाभ्यन्तरसंभोग वर्णयितुमुपक्रमते—प्रागिति ॥ प्राक्प्रारम्भे मनागस्य मा मेति मास्तु मास्त्विति निषेधवचनेन अनागतोऽनुत्पन्नो रसोऽनुरागविशेषो यस्मिन् तत् । मौग्ध्यादिति भाव. । ततो निषेधानन्तरं जातोऽङ्कुरितोऽभिलाषो वाञ्छा यस्मिन् तत्तथोक्तम् । तदन्वभिलाषानन्तरम् । " अनुर्लक्षणे " इति कर्मप्रवचनीयत्वाद्द्वितीया । नीवीविसंसनादिषु मन्दोपमनभावो व्रीडा तया सह सव्रीडम् । " तेन सहेति तुल्ययोगे " इति बहुव्रीहि । " वोपसर्जनस्य " इति सहभावस्य सत्वम् । अथ व्रीडानन्तरं प्रयोगस्य निराकरणे शिथिलप्रयत्नम् । पुनरुद्यमनाभावानन्तरम् । पुन' शब्दोऽनानन्तरार्थक । प्रध्वस्त विगलित धैर्य प्रातिलोम्यलक्षण यस्मिन् तत्तथोक्तम् । अंगीकाराभिमुख्यमित्यर्थः । ततः प्रेमार्द्रं प्रणयरसपरिप्लुत ततः स्पृहणीया अन्योन्यमभिलाषणीया निर्भरा उद्वेलाश्च या रहःक्रीडा एकान्तकेलय । विगमशिखरा इति यावत् । ताभिः प्रगल्भ प्रौढ ततो निमङ्गेनाप्रतिबन्धेन अङ्गीकरणेन कुचाद्यवयवमर्दनेनाधिक सुख परमानन्दो यस्मिन् तत्तथोक्त कुलस्त्रीणां सम्भोग' रम्य सुन्दरमत्यन्तमनोहरमिति यावत् । एतच्च प्रथमसमागमपरत्वेन द्रष्टव्यमन्यथोक्तव्यवहारासम्भवादिति भाव । कुलस्त्रीत्वादिसम्भोगस्यादित आरभ्य प्रागल्भ्यघटितत्वेनोक्तविलक्षणत्वादन्यादृशो द्रष्टव्य । नायिका त मुग्धा नायकस्तूत्तमोऽनुकूल कामतन्त्रेषु निपुणोऽन्यथोक्तसम्भोगासम्भवादिति मन्तव्यम् । सम्भोगलक्षणमुक्त रसिकैः । " अनुकूलौ निषेवेते यत्रान्योन्य विलासिनौ । दर्शनस्पर्शनादीनि स सम्भोग उदाहृत ॥ " इति । अत्र मामेति वागारम्भानुचितेरनुभावैर्जाताभिलाषमित्युक्तेन रत्याख्य स्थायिभावेन सव्रीडमित्यनेनोपलक्षितैः सञ्चारिभावैर्धैर्यविगमणैर्भावाय मानैर्मुखादिविशेषै कुर्वन्तीं इत्युक्तेनालम्बनविभावेन प्रतीयमानो रसभावैः कृता नि सङ्गमनिरूपणाधिक सुखमित्यनेन सम्भोगातिशय प्रतीयते । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

पहिले तो नहीं नहीं कहना यह मनोहर सुख उसमें है फिर अभिलाषा उत्पन्न होना और लज्जासे अंगको ढील देना धैर्य छोडना प्रेमरसमें मी विशेष सगड़ने योग्य एकान्तक्रीडाका चातुर्य विस्तार

करना, फिर निडर हो अङ्ग खैंचनेका अधिक सुख लाभ करना इससे निश्चय जानो कि, कुलस्त्रीकीही रति अच्छी होती है ॥२४॥

उरसि निपतितानां स्रस्तधम्मिल्लकानां ।
मुकुलितनयनानां किंचिदुन्मीलितानाम् ॥
उपरिसुरतखेदस्विन्नगण्डस्थलाना- ।
मधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ २५ ॥

अथ यदुक्त नानाकरणकल्पितमिति तत्र नानाकरणानि धेनुकादिबन्धविशेषास्तेषां मध्ये एक बन्धविशेष विवक्षुस्तदनुकूलमुपरिसुरतमाह—उरसीति ॥ उरसि निपतिताना पुरुषायितबन्धवशाद्वक्षःस्थलमधिष्ठितानामत एव स्रस्तधम्मिल्लकाना रतिरभसविश्लथकचप्रचयानाम् । " धम्मिल्लः सयताः कचा " इत्यमर । मुकुलितनयनाना सुखपारवश्याल्लज्जानुभावानुकरणाद्वा निमीलितलोचनानामपि तथापि किंचिदुन्मीलितानामीषन्मुकुलितलोचनानाम् अन्यथाऽनौचित्यादिति भाव । अत एव उपरिसुरते य. खेद. श्रमस्तेन खिन्नानि स्वेदार्द्राणि गण्डस्थलानि यासा तासाम् । " श्रम खेदो हि रत्यादेर्जात. स्वेदादिभूमिकृत् । " इति लक्षणात् । वधूना प्रियतमाना सबन्धि अधरमधु अधरामृत भाग्यशालिन पिबति । पुम स्त्रीमुखस्य निजमुखसामुख्यादेशेनाधर चुबतीत्यर्थ । एतच्च पुण्यकृतामेव सभवति न त्वन्येषामत एव भाग्यवन्त इत्युक्तम् । तथा वाह्यसुरतविशेषरूपमपि चुबनमारभ्याभ्यन्तरागतया कथितमित्यवगतव्यम् । पुरुषायितलक्षणमुक्त रतिरहस्ये । " स्वेच्छया श्रमिणि वल्लभे तथा योषिदाचरति पूरुषायितम् ।" इति । नायिकास्तु प्रगल्भा । " स्मरमदीकृतव्रीडा प्रौढा सपूर्णयौवना । " इति लक्षणात् । नायिका. कामतन्त्रकुशला अनुकूलाश्च । स्वभावोक्तिरलङ्कार । " स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् । " इति लक्षणात् । मालिनी वृत्तम् ॥ २५ ॥

---

१ सुरतजनितखेदस्वि० इति पाठा तरम् ।

छातीपर लेटी हुई हैं और सुगंधित केश उनके बिखरे हुए हैं, आधे नेत्र मूंदे हुए हैं, कुछ कुछ हिल रही हैं, मैथुनके श्रमसे उनके गालोंपर पसीने झलक रहे हैं ऐसी स्त्रियोंके अधरमधुको भाग्यवान् ही पुरुष पान करते हैं ॥ २५ ॥

आमीलितनयनानां यः सुरतरसोऽनुसंविदं भाति ॥
मिथुनैर्मिथोऽवधारितमवितथमिदमेव कामनिर्वहणम् २६

अथ ज्ञानपूर्वक एव सुरतानुभवः सार्थको न त्वन्य इत्याह—आमीलितेति ॥ आमीलितनयनानां सुखभारवशादर्धमुकुलितनयनानां यूनां यः सुरतरसः सुरतास्वादः संविदमनुज्ञातमनुसृत्य भाति । अयमेतादृश इति ज्ञानगोचरतया प्रतिभातीत्यर्थः । इदमेव ज्ञानपूर्वकसुरतानुभवप्रतिभानमेवावितथमव्यर्थं सार्थकमित्यर्थः । कामस्य मन्मथस्य कामपुरुषार्थस्य वा निर्वहणं परित्राणमनुज्जीवनमिति यावत् । न त्वन्यदाभासत्वादिति भावः । मिथुनैः दम्पतीभिः स्त्रीपुरुषैः । "स्त्रीपुंसौ मिथुनं द्वयम्" इत्यमरः । मिथोऽन्योन्यमवधारितं निश्चितम् । अनुभवेनैवार्थनिश्चयसंभवादिति भावः । ज्ञानपूर्वकसुरतानुभव एव कामपुरुषार्थ इति फलितार्थः । अत इत्थमज्ञानसुरतयोः फलं न त्वन्यादृश तस्य क्लेशमात्रफलत्वादिति तात्पर्यम् । आर्यावृत्तमेतत् ॥ २६ ॥

आलस्य भरे नेत्रवाली स्त्रियोंका कामसे तृप्त होना यही स्त्री पुरुष दोनोंका परस्पर कामपूजन है ॥ २६ ॥

इदमनुचितमक्रमश्च पुंसां ।
यदिह जरास्वपि मान्मथा विकाराः ॥
तदपि च न कृतं नितम्बिनीनां ।
स्तनपतनावधि जीवितं रतं वा ॥ २७ ॥

-इदमिति सम्बन्धः । किं तु यौवनावधिकसुरतमेव न्याय्यं मर्यादागोचरं चेत्यर्थः । तदुपरिवर्तनसुरतस्याभासत्वादिति भावः । तथा नितम्बिनीनां स्त्रीणां च तदनुचितम् । किं तदित्यत आह । स्तनपतनमवधिर्मर्यादा यस्य तत्तथोक्तं जीवितं जीवनं वा रतं सुरतं वा न कृतमिति यत् ब्रह्मणेति शेषः । तदिति सम्बन्धः । स्त्रीणां तावत् स्तनपतनावधिकमेव जीवनं कर्तव्यं सुरतमपि तदवधिकमेवान्यथा । " तारुण्यं पञ्चपञ्चाशदवधिपरतो वृद्धतामेति नारी ' इति कामशास्त्रोक्तेर्वृद्धानां संभोगानर्हत्वात् । " त्यजेदत्यकुलोद्भूता वृद्धस्त्री कन्यका त्यजेत् । " इति निषेधस्मरणात् । " आलिंगनं लम्बपयोधराणां स्त्रीणां च दुःखत्रयमेव भूमौ । " इति लम्बस्तननितम्बिनीसंभोगस्य दुःखरूपत्वाच्चेति भावः । यथाह माघः । " अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः । सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति ॥ " इति । अत्र स्त्रीणां पुरुषाणां च यौवनकृतसुरतमेव रमणीयमिति तात्पर्यम् । पुष्पिताग्रावृत्तम् । " अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा । " इति लक्षणात् ॥ २७ ॥

यह विधाताने पुरुषोंमें बडी अनुचित और उलटी बात उत्पन्न की है कि, बुढापेमेंभी कामका विकार प्रगट होता है ऐसाही स्त्रियोंकाभी नहीं किया कि, जबलों स्तन न गिरें तभीलों जिये और कामचेष्टा रक्खें ॥ २७ ॥

एतत्कामफलं लोके यद्द्वयोरेकचित्तता ॥
अन्यचित्तकृते कामे शवयोरिव संगमः ॥ २८ ॥

लोके स्त्रीपुरुषयोरेकचित्तता एव कामफलमित्याह—एतदिति ॥ लोके यत् द्वयोः स्त्रीपुरुषयोरेकचित्तता एकचित्तत्वमेतदेव कामस्य फलमस्ति । अन्यस्मिन् पुरुषे अन्यस्मिन् दोषिति यच्चित्तं तेन कृते कामे सति शवयोः मृतयोः संगम इव भवतीति शेषः ॥ २८ ॥

स्त्री और पुरुषके समागममें एकचित्त हो जाना कामदेवका यही मुख्य फल है । यदि काममें दोनोंका चित्त और ठौर रहा तो मृतकोंकासा संगम होता है ॥ २८ ॥

राजंस्तृष्णांबुराशेर्न हि जगति गतः कश्चिदेवाव-
सानं । को वार्थोऽर्थैः प्रभूतैः स्ववपुषि गलिते
यौवने सानुरागे ॥ गच्छामः सद्म तावद्विकासित-
कुमुदेंदीवरालोकिनीनामाक्रम्याक्रम्य रूपं झटिति
न जरया लुप्यते प्रेयसीनाम् ॥ २९ ॥

हे महाराज ! इस तृष्णारूपी समुद्रके कोई पार न गया और जब हमारी अनुरागभरी युवा अवस्था देहहीमें जीर्ण हो गई तब अधिक द्रव्यही प्राप्त करके हमको क्या करना है तो शीघ्रही अपने घर चले जाय ऐसा न हो कि विकासित कुमुद और कमल ऐसे नेत्रवाली हमारी प्यारियोंका रूप वृद्धावस्था घुला २ विगाड न डाले, यहा कुमुद रात्रिविकासी और कमल दिनाविकासीसे अभिप्राय है इससे येह सूचना होती है कि, वे रातदिन हमारा मार्ग देखती होंगी ॥ २९ ॥

रागस्यागारमेकं नरकशतमहादुःखसंप्राप्तिहेतु- ।
मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ॥
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं ।
लोकेऽस्मिन्नह्यनर्थव्रजकुलभवनं यौवनादन्यदस्ति ३०

अथान्यानर्थमूलत्वमाह—रागस्येति ॥ रागस्य मात्सर्यस्यैकमगारं मुख्यायतनमनुरागस्य स्थानमिति वा । तथा नरकशतेषु निरयपरम्परासु यानि महादुःखानि तीव्रयातनारूपेण प्राप्तिहेतु प्राप्तिसाधनम् । अगम्यागमनादिदुष्कर्मप्रवर्तकत्वादिति भावः । मोहस्य वञ्चनाशक्तिरूपस्य जन्मोत्पत्तिबीजं जन्मकारणम् । "हेतुर्ना कारणं बीजम्" इत्यमरः । ज्ञानताराधिपस्य प्रबोधचन्द्रस्य जलधरपटलमभ्रवृन्दम् । ज्ञानप्रकाशप्रतिबन्धकमित्यर्थः । कन्दर्पस्य कामदेवस्य एकं मित्रं पुरुषकं तदुद्रेककमित्यर्थः । प्रकटितः प्रकृष्टो विविधो नानाविधः स्पष्टः प्रकाशश्च दोषप्रबन्धः पातकसम्बन्धो यस्य तत्तथोक्तं यौवनमिति शेषः । अतोऽस्मिन् लोके तस्माद्यौवनादन्यदितरत् अनर्थानामुक्तविधानां व्रजस्य समूहस्य कुलभवनमुत्पत्तिनिकेतनं नास्ति हि । इदमेवात्यन्तानर्थमूलमित्यर्थः । तदुक्तम् । "यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥" वृत्तं पूर्ववत् ॥ ३० ॥

---

१ सर्वं विकृद्रलहरं इति पाठः ।

अनुरागका घर, सैकडो नरकोके दुःख प्राप्त होनेका हेतु, मोहकी उत्पत्तिका बीज, ज्ञानरूपी चंद्रमाके ढाकनेका मेघ, कामदेवका एकही मित्र, अनेक दोषोंका प्रगट करनेवाला और वैराग्य और नीतिका हरण करनेवाला इस लोकमें युवा अवस्थाके व्यतिरिक्त भिन्न दूसरा कोई अनर्थ नहीं है ॥ ३० ॥

शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि ।
प्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ॥
तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ ।
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ३१

इत्थंभूते यौवने कश्चिदेव निर्विक्रिय इत्याह—शृगारेति ॥ शृंगारः संभोगविप्रलंभरूपशृंगाररस एव द्रुमो वृक्षस्तस्य नीरदे अम्बुवाहे अङ्कुरितकन्दलितपल्लवितपुष्पितफलितत्वापादनसामर्थ्यात् परिपोषक इत्यर्थः । प्रसृमरो व्यापनशीलो यः क्रीडारसः [illegible] स्रोतसि प्रवाहे [illegible] प्रवर्तक इत्यर्थः । अथवा प्रसृमरक्रीडानां रसस्रोतसि रसप्रवाहे यथेच्छाविहारान्वित इत्यर्थः । प्रसृमरेत्यत्र " सृघस्यदः क्मरच् " । प्रद्युम्नस्य कन्दर्पस्य प्रियबान्धवे आप्तबन्धौ [illegible] स्वार्थेऽण्प्रत्ययः । " प्रद्युम्नो मीनकेतनः । कन्दर्पो दर्पकोऽनङ्गः " इत्यमरः । चतुराणां निपुणानां वाचो मुक्ताफलानि मौक्तिकानि [illegible] समुद्रे [illegible] इत्यर्थः । " उदन्वानुदधौ च " इति निपातनात्साधुः । समुद्रस्य मुक्ताकरत्वमुक्तं रत्नशास्त्रे । " करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि ॥ " इति । तन्वीनां [illegible] नेत्राण्येव चकोराः [illegible] पार्वणविधौ पूर्णचन्द्रे [illegible] इत्यर्थः । पर्वणि भवः [illegible] । " विधुः [illegible] चन्द्रमाः " इत्यमरः । सौभाग्यलक्ष्म्याः [illegible]

निधौ निधाने कदाचिदपि स्वावस्थानन्ददशायां सौदर्यलक्ष्मीर्न क्षीयते इत्यर्थः। नवयौवने नूतनवयसि प्राप्ते सति कोऽपि धन्यः कश्चिदेव सुकृती विक्रिया मन्मथविकार न कलयति न प्राप्नोति। ईदृशास्तु विरल इति भावः। श्लोकद्वयेऽपि निरवयवरूपकालंकारः। शार्दूलविक्रीडित वृत्तम्॥ ३१॥

शृङ्गाररूपी वृक्षोंका सींचनेहारा मेघ, विस्तारित क्रीडारसका सोता, कामदेवका प्यारा भ्राता, चतुरतारूपी मोतियोंका समुद्र, स्त्रियोंके नेत्ररूपी चकोरका पूर्ण चन्द्र और सौभाग्यलक्ष्मीका एक पात्र ऐसी युवा अवस्था पाकर जो पुरुष विकारको नहीं प्राप्त होता सो धन्य है॥ ३१॥

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलंक-।
व्यासंगव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः॥
यद्येताः प्रोद्यदिंदुद्युतिसिंचयभृतो न स्युरम्भोजनेत्राः।
प्रेंखत्कांचीकलापाः स्तनभरविनमन्मध्यभाजस्तरुण्यः ३२

यदुक्त यौवनस्यानर्थमूलत्व तत् कामिनीपरित्यागेऽत्यन्तदुरापास्तमित्याशङ्क्य तासामपरित्याज्यता त्रिभिर्वर्णयति—ससार इति॥ अमलधियो निर्मलमतयो महात: मानस निज मन असारे नि.सारे अस्मिन् परिवर्तमाने ससारे कलत्रादिपोषणव्यासङ्गरूपे कुनृपतिभवनद्वारस्य कुत्सितराजमन्दिरस्य प्रतीहारस्य सेवा अनुवर्तनमेव कलङ्कोऽपवादस्तत्र यो व्यासङ्गोऽत्यासक्तिस्तेन व्यस्त धैर्यं धीरत्व यस्य तत्तथोक्तम्। ईदृक्कष्टकर्मासक्तिमलिनमित्यर्थ। कथं संविदध्यु. कुर्यु. न कथञ्चिदपीत्यर्थः। किं न स्याचेदित्यत आह। प्रोद्यन्नुदिततरो य इदुस्तस्य द्युतिरिव द्युतिर्येषा तानि चन्द्रधवलानि माञ्जिष्ठानि वा। उपादिरोपणसामर्थ्यात् तानि सिचयान्यशुकानि बिभ्रतीति तथोक्ता। अम्भोजे इव नेत्रे यासा ता पद्मपलाशविशाललोचना इत्यर्थ। प्रेंखत्काञ्च. क्वणद्रशना एव कलापा भूषणानि यासा ता। यद्वा काञ्चो भूषणानि यासा

---

१ सेवादल्ग० इति पाठांतरम्। २ निचय इति पाठांतरम्।
३ भागास्त० इति पाठांतरम्।

न्ताः । " कलापो भूषणे बर्हे " इत्यमरः । स्तनभरेण कुचकुम्भगौरवेण विनमन्ति अवनतानि मध्यान्यवलग्नानि भजन्तीति तथोक्ताः । पीवरकुचाः कृशोदर्यश्चेत्यर्थः । एतेन सौंदर्यातिशय उक्तः । एताः प्रसिद्धास्तरुण्यो युवतयो न स्युर्यदि न भवेयुर्यदि तर्हि कथं सविदध्युरिति सम्बन्धः । अतः विशिष्टतरुणीनां विद्यमानत्वादेव सुधियोऽप्येवंभूता भवन्तीत्यर्थः । तस्मात्तरुण्यो दुष्परिहरा इति भावः । तदुक्तम् । " असाधानिह संसारे दुर्वारे मकरध्वजे । कुले च कामिनीमूले का वा स्याज्जारिकल्पना ॥ " इति । अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थसमर्थकहेतुत्वात्काव्यलिङ्गभेदः । स्रग्धरा वृत्तम् ॥ ३२ ॥

उदित चन्द्रमाकीसी कांतिधारी, कमलनेत्रवाली, झुलती हुई करधनीकी लरियोंवाली और स्तनभारसे झुकी कटिवाली युवती स्त्री यदि न हो अर्थात् इनसे स्नेह न होय तो इस असारसंसारमें निर्मल बुद्धिवाले मनुष्य खोटे राजोंके द्वारकी सेवा नानाभांतिके कलंकमें अधीरचित्त होकर क्यों करें ॥ ३२ ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमे ।
गङ्गाधौताशिलातले हिमवतः स्थाने स्थिते श्रेयसि ॥
कः कुर्वीत शिरःप्रणाममलिनं म्लानं मनस्वी जनो ।
यद्वित्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः॥ ३३ ॥

सम्बन्धिनि स्थाने प्रदेशे स्थिते सति को वा मनस्वी सुमेधा धीरो जनः। अशमाया विनि.। शिरो निजोत्तमांग प्रणामेन कुनृपतिपादवन्दनेन मलिनं कलंकितमत एव म्लानमुत्कर्षहीनं कुर्वीत। मलिनं मानमिति पाठे मानं निजाभिमानं कर्म शिरःप्रणामेन निजोत्तमांगविनमनेन मलिनं प्रतिष्ठाहीनं कुर्वीत। न कोऽपीत्यर्थः। कुतः यद्यस्मात्कारणात् वित्रस्तकुरंगशावनयना. पद्मिनीजातित्वाचकितबालहरिणेक्षणाः। अत एव स्मरास्त्रं महावीरस्य जगद्विजयसाधनभूतबाण इत्यर्थः।। लिंगवचनव्यत्ययो नित्यनपुंसकत्वेन जात्यभिप्रायेण वा। वेदाः प्रमाणं तन्तवः पटस्य समवायिकारणमित्यादिवद्द्रष्टव्य इत्युक्तम्। प्राक् स्त्रियो न स्युश्चेत्। अतः अमोघमदनशस्त्रभूतस्त्रीणामपरित्यज्यातया विद्यमानत्वादेव मनस्विनामपदिग्दूरवस्थापत्तिरिति भावः। वृत्तमुक्तम्॥ ३३॥

सिद्ध लोग जिस कंदरामे बैठे हैं और महादेवजीका बैल जहां वृक्षोंमें कंधा रगडता फिरता है और गंगाजलसे जहांके पाषाण धोये जाते हैं ऐसा हिमालयका स्थान कल्याणदायक छोडकर कौन मनुष्य स्त्रीपुरुषलोगोंके समीप जाकर माथा झुकाय प्रणाम कर अपने मानको मलीन करता। यदि भीतियुक्त हरिणशावकनयना कामास्त्रस्वरूप कामिनी वरमें न होती॥ ३३॥

संसार तव पर्यंतपदवी न दवीयसी॥
अन्तरा दुस्तरा न स्युर्यदि ते मदिरेक्षणाः॥ ३४॥

संसारेति॥ हे संसार, तव पर्यंतपदवी अवसानसीमा न दवीयसी न दविष्ठा भवति न दूरतरेति यावत्। किं तु नेदीयस्येवेत्यर्थः। दूरशब्दादीयसुनि "उगितश्च" इति ङीप्। "स्थूलदूर०" इत्यादिना पूर्वयणादिपरलोपः। कुतः ते तव अन्तरा मध्ये दुस्तरा महानद्य इव तरितुमशक्याः। "ईषद्दुः०" इत्यादिना खल्प्रत्ययः। मदिरेक्षणाः स्त्रियः न स्युर्यदि न संभाविताश्चेत् न दवीयसीति संबन्धः। संभावितत्वादेव दवीयसीत्यर्थः।

---

१ निस्सार इति पाठान्तरम्। २ रे इति पाठान्तरम्।

ता । "कलापो भूषणे बर्हे" इत्यमरः । स्तनभरेण कुचकुम्भगौरवेण विनमन्ति अवनतानि मध्यान्यवलग्नानि भजन्तीति तथोक्ताः । पीवरकुचाः कृशोदर्यश्चेत्यर्थः । एतेन सौन्दर्यातिशय उक्तः । एताः प्रसिद्धास्तरुण्यो युवतयो न स्युर्यदि न भवेयुर्यदि तर्हि कथं सन्निदध्युरिति सम्बन्धः । अतः [illegible] [illegible] । [illegible] इति भावः । तदुक्तम् । "असारभूतेऽपि संसारे दुर्वारे मकरध्वजे । कुचे न कामिनीमूले का वा स्यादुपकारिता ॥" इति । [illegible] । [illegible] ॥ २२ ॥

उदित चन्द्रमाकीसी कान्तिधारी, कमलनेत्रवाली, झुकती हुई त्रिवलीकी लहरियोंवाली और स्तनभारसे झुकी कटिवाली युवती स्त्री यदि न हों अथवा इनसे स्नेह न होय तो इस असारसंसारमें निर्मल बुद्धिवाले मनुष्य कोई राजोंके द्वारकी सेवा नानाभांतिके नर्तनमें चकित होकर क्यों करें ॥ २२ ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमे ।
गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ॥
कः कुर्वीत शिरःप्रणाममलिनं म्लानं मनस्वी जनो ।
यद्वित्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ २३ ॥

सम्बन्धिनि स्थाने प्रदेशे स्थिते सति को वा मनस्वी सुमेधा. धीरो जनः । प्रशमाया विनि । शिरो निजोत्तमांग प्रणामेन कुनृपतिपादवन्दनेन मलिन कलंकितमत एव म्लानमुत्कर्षहीन कुर्वीत । मलिन मानमिति पाठे मान निजाभिमान कर्म शिर प्रणामेन निजोत्तमागविनमनेन मलिन प्रतिष्टाहीन कुर्वीत । न कोऽपीत्यर्थः । कुतः यद्यस्मात्कारणात् वित्रस्तकुरगशावनयनाः पद्मिनीजातिस्त्रीचकितबालहरिणेक्षणाः । अत एव स्मरास्त्र महावीरस्य जगद्विजयसाधनभूतबाण इत्यर्थः । लिंगवचनव्यत्ययो नित्यनपुसकत्वेन जात्यभिप्रायेण वा । वेदा प्रमाण तन्तव पटस्य समवायिकारणमित्यादिवद्बोध्य इत्युक्तम् । प्राक् स्त्रियो न स्युश्चेत् । अतः अमोघमदनशास्त्रभूतस्त्रीणामनारित्यत्र्याततया विद्यमानत्वादेव मनस्विनामपदिग्दूरत्वस्यापत्तिरिति भावः । वृत्तमुक्तम् ॥ ३२ ॥

सिद्ध लोग जिस कंदरामे बैठे हैं और महादेवजीका बैल जहा वृक्षोंमें कंधा रगडता फिरता है और गंगाजलसे जहांके पाषाण धोये जाते हैं ऐसा हिमालयका स्थान कल्याणदायक छोडकर कौन मनुष्य स्त्रीपुरुषलोगोंके समीप जाकर माथा झुकाय प्रणाम कर अपने मानको मलीन करता । यदि भीतियुक्त हरिणशावकनयना कामास्त्रस्वरूप कामिनी घरमें न होती ॥ ३३ ॥

संसार तव पर्यंतपदवी न दवीयसी ॥
अन्तरा दुस्तरा न स्युर्यदि ते मदिरेक्षणाः ॥ ३४ ॥

ससारेति ॥ हे ससार, तव पर्यंतपदवी अवमानसीमा न दवीयसी न अतिदूरा भवति न दूरतरेति यावत् । किं तु नेदीयस्येवेत्यर्थः । दूरशब्दादीयसुनि " उगितश्च " इति ङीप् । " स्थूलदूर० " इत्यादिना पूर्वयणादिपरलोप । कुतस्ते तव अन्तरा मध्ये दुस्तरा महानद्य इव तरितुमशक्याः । ' ईषद्दु० ' इत्यादिना खल्प्रत्ययः । मदिरेक्षणाः स्त्रिय न स्युर्यदि न सभाविताश्चेत् न दवीयसीति सबन्ध । सभावितत्वादेव दवीयसीत्यर्थः ।

---

१ निस्तार इति पाठान्तरम् । २ रे इति पाठान्तरम् ।

एतेन संसारपारगमनप्रतिबन्धिन्यः स्त्रिय इत्युक्तम् । तत्परित्यागे तु मोक्षः संभव इति भावः । पूर्वश्लोकेऽप्यत्रापि च पूर्वतरश्लोकार्थमनुसन्धेयम् ॥ ३४ ॥

हे संसार ! तुझसे पार होना कुछ दुस्तर न था यदि अन्है नेत्रवाली कठिन स्त्रियां बीचमें बाधक न होती ॥ ३४ ॥

दिश वनहरिणीभ्यो वंशकांडच्छवीनां ।
कवलमुपलकोटिच्छिन्नमूलं कुशानाम् ॥
शकयुवतिकपोलापांडुतांबूलवल्ली- ।
दलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ ३५ ॥

हे मनुष्यो ! तुम या तो वनमृगियोंके लिये बांसके दंडके समान छविवाले पत्थरके अग्रभागसे कटे हुए दर्भोंके ग्रास दो अथवा उत्तम स्त्रियोंके लिये अरुण नखोंसे तोडे हुए शकदेशीय-युवतीके कपोलके समान किंचित् पांडुवर्णवाले तांबूल दो ॥ ३५ ॥

असाराः सर्वे ते विरतिविरसाः पापविषया।
जुगुप्स्यन्तां यद्वा ननु सकलदोषास्पदमिति ॥
तथाप्येतद्भूमौ न हि परहितात्पुण्यमधिकं।
न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ ३६॥

असारा इति ॥ ननु हे जनेति ते प्रसिद्धाः सर्वे पापहेतुत्वात्पापाः विषया. शब्दादयः स्रक्चदनवनितादयो वा असारा अस्थिरा निःसारा इति वा। " सारो बले स्थिरांशे च " इत्यभिधानात्। तथा विरतौ पारिणातिसमये विरसा अनर्थकरा इति वा। यद्वा सकलदोषास्पद रागद्वेषमोहाद्यशेषदोषा इति वा। " आस्पद प्रतिष्ठायाम् " इति निपातनात्सुडागम । लिंगवचनव्यत्ययस्तु पूर्ववद्द्रष्टव्यः। जुगुप्स्यता परित्यज्यताम्। परित्यागे परमसुखलाभादिति भाव.। तथा च वक्ष्यति। " स्वय त्यक्ता ह्येते शमसुखमनन्त विदधति " इति। " गुपेर्निन्दायाम् " इति सन्नतात्कर्मणि यकि विधौ लोटि तङ्। तथाप्युक्तप्रकारेण विषयाणा जुगुप्स्यत्वेऽप्येतद्भूमौ अस्या भुवि परहितात्परोपकारकरणादधिकमतिरिक्त पुण्य न हि नास्ति खलु। " श्लोकार्धेन प्रवक्ष्यामि यदुक्त ग्रथकोटिभि। परोपकार पुण्याय पापाय परपीडनम् ॥ " इति वचनादिदमेवात्यतपुण्यमित्यर्थ.। अथास्मिन् ससारे च कुवलयदृश उत्पलाक्ष्या। " अन्यारादितरर्ते० " इत्यादिना पचमी। अपरमन्यद्रम्य वस्तु नास्ति। इयमेवात्यतमनोहरेत्यर्थ.। अत दोषदृष्ट्या विषयान् परित्यज्य शमसुखानुभवतात्पर्येण वा स्थातव्यमन्यथा परहिताच-

---

१ एतद्वेत इति पाठांतरम्। २ विरसायासविषया इति पाठांतरम्। ३ जुगुप्सता इति पाठान्तरम्। ४ तथाप्यन्तरतत्त्वे प्रणिहितधियामप्यतिबलस्तदीयोऽनाख्येय स्फुरति हृदये कोऽपि महिमा इति पाठान्तरम्।

रूपत्वेन सांसारिकतया वा वर्तितव्यम् । न तु मध्यमावस्थेनो भाव्यम् । निर्वाहिणी वृत्तम् ॥ ३६ ॥

यह सब भोगविषय असार और वैराग्यमें निरत करनेवाले हों और इन्हें सब दोषोंका गृह समझकर यदि लोग निरागी करें तथापि हम यह ठीक निवेदन करते हैं कि इस संसारमें पराया हित करनेसे अधिक दूसरा पुण्य नहीं और कमलनयनी स्त्रियोंसे अधिक सुंदर वस्तु नहीं ॥ ३६ ॥

मात्सर्यमुत्सार्य विचार्य कार्य-
आर्याः समर्यादमिदं वदन्तु ॥
सेव्या नितम्बाः किमु भूधराणा-
मुत स्मरस्मेरविलासिनीनाम् ॥ ३७ ॥

धिनुण्प्रत्ययः । नितम्बाः कटिप्रदेशाः आश्रयणीया वा इद वदन्त्विति सम्बन्धः । यदि वैराग्य स्यात्तर्हि गिरिनितम्बाः सेव्याः । अन्यथा विलासिनीनितम्बा इति त्वदीयप्रश्नस्येदमुत्तरं न त्वन्यदस्तीति भावः । "कटकोऽस्त्री नितम्बोऽद्रेः" "पश्चान्नितम्बः स्त्रीकट्याः" इति चोभयत्राप्यमरः । अत्र पूर्वार्धे एकवर्णस्य पुनःपुनरावृत्तेः वृत्त्यनुप्रासः शब्दालङ्कारभेदः । "एकद्विप्रभृतीनां तु व्यञ्जनानां यथा भवेत् । पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥" इति लक्षणात् । अयं च नितम्बा इत्यत्र द्वयानामपि नितम्बानां प्रकृतत्वात्केवलप्रकृतत्वगोचरेण एकनालालम्बिफलद्वयवदेकशब्दादर्थद्वयप्रतीतेः केवलार्थप्रवणेन विजातीयेनोत्तरवाक्यस्थेन श्लेषेण तिलतण्डुलवत्परस्परनैरपेक्ष्यात्संसृष्टिः कञ्चिच्चमत्कारातिशयमावहतीति काव्यस्य महानुत्कर्षः प्रतिपादित इति रहस्यम् । वृत्तमुपजातिः ॥ ३७ ॥

हे पण्डितो ! मत्सरता त्याग और मर्यादासहित विचार कर कहो कै तो पर्वतहीके नितम्ब सेवने योग्य हैं कि कामदेवकी उमंगसे मुसुकाती विलासिनी स्त्रियोंके नितम्बही सेवने योग्य हैं । नितंब पर्वतके मध्यभाग और स्त्रियोंकी कटीके पश्चाद्भागको कहते हैं ॥ ३७ ॥

संसारे स्वप्नसारे परिणतितरले द्वे गती पण्डितानां ।
तत्त्वज्ञानामृताम्भःप्लवललितधियां यातु कालः कथंचित् ॥
नो चेन्मुग्धाङ्गनानां स्तनघनजघनाभोगसंभोगिनीनां ।
स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलीलोद्यमानाम् ॥

संसार इति ॥ स्वप्नस्य सार इव सारो यस्मिन् स मिथ्याभूत इत्यर्थः । "सप्तम्युपमाने" इत्यादिना बहुव्रीहिः । तथा परिणामावस्थायां तरले अस्थिरे अशाश्वत इत्यर्थः । संसारे समूर्ते पण्डितानां परिज्ञानवतां द्वे गती अवश्ये विद्येते इति शेषः । के द्वे इत्याकाङ्क्षायामाह । तत्त्वज्ञानमेव अमृ-

---

१ संसारेऽस्मिन्नसारे इति पाठान्तरम् । २ द्रुत इति पाठान्तरम् । ३ वदा इति पाठान्तरम् । ४ स्तनजघनगत इति पाठान्तरम् । ५ लोले ध्यानानाम् इति पाठान्तरम् ।

-रणत्वेन सासारिकतया वा वर्तितव्यम् । न तु प्रकारांतरेणेति भाव' । शिखरिणी वृत्तम् ॥ ३६ ॥

यह सब भोगविषय असार और वैराग्यमे विरस करनेवाले हों और इन्हें सब दोषोंका गृह समझकर यदि लोग निंदाभी करें तथापि हम यह ठीक निवेदन करते हैं कि इस संसारमें परया हित करनेसे अधिक दूसरा पुण्य नहीं और कमलनयनी स्त्रियोंसे अधिक सुंदर वस्तु नहीं ॥ ३६ ॥

मात्सर्यमुत्सार्य विचार्यकार्य- ।
मार्याः समर्यादमिदं वदन्तु ॥
सेव्या नितम्बाः किमु भूधराणा- ।
मुत स्मरस्मेरविलासिनीनाम् ॥ ३७ ॥

मात्सर्यमिति ॥ आर्या पंडिता मात्सर्यमसूया पक्षपातमिति - यावत् । उत्सार्य निराकृत्य तस्य यथार्थकथनप्रतिबंधकत्वादिति भाव' । कार्यं कर्तुं योग्य विधेयमित्यर्थः । विचार्य ऊहापोहाभ्या सम्यगालोच्य तत मर्यादया सन्मार्गानतिक्रमणेन सहित यथा भवति तथा इदमेतत् वदतु कथयतु । किमिदमित्यत आह । धरतीति धरा. । पचाद्यच् । भुवो धरा भूधरास्तेषां भूधराणां नितंबा कटिप्रदेशा सेव्या. किमु । आश्रयणीया वा । उत अथवा स्मरस्मेरा स्मरोल्लसिता मदनमदोत्कटा इत्यर्थः । यद्वा स्मरेण मन्मथावेशेन हेतुना स्मेरा. सम्भोगोत्सुक्यसूचकमन्दस्मितसुन्दरवदनारविंदा इत्यर्थः । " ष्मिङ् ईषद्धसने " इति धातोः " नमिकम्पि० " इत्यादिना रप्रत्यय. । अथवा विषयमात्रविश्रांतिविरहेण विशृंखलवृत्तित्वमदमन्दादिगुण-विशिष्टकटाक्षवीक्षणानि स्मेरशब्दविवक्षितानि । तदुक्त भावप्रकाशे । " अपरिच्छिन्नविषय मदमन्थरमीलितम् । स्फुरद्भ्रूपक्षतायुक्त तत्स्मेरमिति कथ्यते ॥ " इति । तानि च स्मरप्रधानानि यासा ता स्मरस्मेराणा विलासिनीना विलसनशीलाना तरुणीनाम् । " वौ कषलस० " इत्यादिना

१ किल इति पाठान्तरम् ।

घिनुण्प्रत्ययः । नितम्बाः कटिप्रदेशा आश्रयणीया वा इद वदन्त्विति सम्बन्ध । यदि वैराग्य स्यात्तर्हि गिरिनितम्बाः सेव्याः । अन्यथा विलासिनीनितम्बा इति त्वदीयप्रश्नस्येदमुत्तर न त्वन्यदस्तीति भावः ।- " कटकोऽस्त्री नितम्बोऽद्रेः " " पश्चान्नितम्ब स्त्रीकट्याः " इति चोभयत्राप्यमर । अत्र पूर्वार्धे एकवर्णस्य पुनःपुनरावृत्ते वृत्त्यनुप्रास शब्दालङ्कारभेद । " एकद्विप्रभृतीना तु व्यञ्जनाना यथा भवेत् । पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥ " इति लक्षणात् । अय च नितम्बा इत्यत्र द्वयानामपि नितम्बानां प्रकृतत्वात्केवलप्रकृतत्वगोचरेण एकनालालम्बिफलद्वयवदेकशब्दादर्थद्वयप्रतीतेः केवलार्थप्रवणेन विजातीयेनोत्तरवाक्यस्थेन श्लेषेण तिलतण्डुलवत्परस्परनैरपेक्ष्यात्मसृष्टि कञ्चिच्चमत्कारातिशयमावहतीति काव्यस्य महानुत्कर्षः प्रतिपादित इति रहस्यम् । वृत्तमुपजातिः ॥ ३७ ॥

हे पण्डितो ! मत्सरता त्याग और मर्यादासहित विचार कर कहो कै तो पर्वतहीके नितम्ब सेवने योग्य हैं कि कामदेवकी उमंगसे मुसुकाती विलासिनी स्त्रियोंके नितम्बही सेवने योग्य हैं ।- नितंब पर्वतके मध्यभाग और स्त्रियोंकी कटीके पश्चाद्भागको कहते हैं ॥ ३७ ॥

संसारे स्वप्नसारे परिणतितरले द्वे गती पण्डितानां ।
तत्त्वज्ञानामृतांभःप्लवललितधियां यातु कालः कथंचित् ॥
नो चेन्मुग्धाङ्गनानां स्तनघनजघनाभोगसंभोगिनीनां ।
स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलीलोद्यमानाम् ॥

संसार इति ॥ स्वप्नस्य सार इव सारो यस्मिन् स मिथ्याभूत इत्यर्थः । " सप्तम्युपमाने " इत्यादिना बहुव्रीहिः । तथा परिणामावस्थायां तरले अस्थिरे अनाश्वत इत्यर्थः । संसारे संभूतौ पण्डितानां परिज्ञातॄणां द्वे गती आश्रये विद्येते गति शेष । के ते इत्याकाङ्क्षायामाह । तत्त्वज्ञानमेव अमृ-

---

१ संसारेऽस्मिन्नसारे इति पाठान्तरम् । २ हृत इति पाठान्तरम् । ३ कदा इति पाठान्तरम् । ४ स्तनजघनभरा इति पाठान्तरम् । ५ लोले यमानाम् इति पाठान्तरम् ।

स्ताम: अमृतप्रायजल तत्र प्लव इव ललिता रुचिरा । यद्वा तत्त्वज्ञानामृताम्भसि प्लवः प्लवनम् । क्रीडेति यावत् । तत्र ललिता उल्लासवती धीर्येषा तत्त्वज्ञानोल्लसितबुद्धीना सतामित्यर्थः । कथञ्चिदतिप्रयत्नेन कालः यातु गच्छतु अतिक्रामत्वित्यर्थः । " कथमादि तथाप्यन्तर्यत्नगौरववाढयोः । " इत्यमरः । काल. कदाचिदित्यपि पाठ । इयमेकावस्था नो चोदेव न स्याच्चेत्तर्हि स्तनयोर्घनजघने विपुलकटिपुरोभागे च । आभोगसम्भोगिनीना विस्तृतसम्भोगेच्छावतीनाम् । यद्वा स्तनयोर्घनजवनस्य निबिडतरजघनस्य च य आभोगो विस्तारस्तत्र सम्भोगिनीना कुचमर्दननिधुवनरूपबाह्याभ्यन्तरसम्भोगाकाङ्क्षिणीनामित्यर्थः । एतेन समानुरागित्वमुक्तम् । अन्यथा आभासप्रसगात् । तदुक्तम् । " एकत्रैवानुरागश्चेत्तिर्यङ्म्लेच्छगतोऽपि वा । योषितो बहुसक्तिश्च रसाभासस्त्रिधा मतः ॥ " इति । मुग्धाङ्गनाना सुन्दरस्त्रीणा नवयौवनाना वा । "उदययौवना मुग्धा " इति लक्षणात् । स्थूलोपस्थस्थलीषु वर्तुलोच्छूनमदनसदनप्रदेशेषु । "जानपद०"इत्यादिना अकृत्रिमार्थे ङीप् । स्थगितमाच्छादित यत्करतल तस्य स्पर्शः सम्पर्क. स एव लीला तत्र उद्यम उद्योगो येषां तेषा सताम् । कामिनीमोहनोपस्थस्पर्शसुखमनुभवता सतामित्यर्थः । कालो यातु । इय चैकावस्था । इमे द्वे एवोत्तमे गती न त्वेतद्व्यतिरिक्त गत्यतरमस्तीत्यर्थः । सर्वदा ज्ञाननिष्ठया वा कामगोष्ठ्या वा पण्डितानां कालो यापयितव्य. । न त्वन्यथेति भावः । स्थूलोपस्थेत्यनेन आसां चित्रिणीजातित्व सूचितम् । तदुक्त रतिरहस्ये । " मदनसदनमस्या वर्तुलोच्छूनमतर्मृदु मदनजलाढ्य रोमभिर्नातिसान्द्रैः । प्रकृतिचपलदृष्टिर्बाह्यसम्भोगरक्ता रमयति मधुराल्प चित्रिणी चित्ररक्ता ॥ " इति । एतज्जात्यनुकूलसुरतनियतयामोऽपि तत्रैवोक्तः । " व्रजति रतिसुखार्थं चित्रिणीमग्रयामे भजति दिनरजन्योर्हस्तिनीं च द्वितीये । रमयति च तृतीये शङ्खिनीमार्द्रभावा रमयति रमणीयां पद्मिनीं तुर्ययामे ॥ " इति । मतातरं तु द्वितीययाम इत्युक्तम् । " घनकुचनखभेदैर्मुष्टिघातैश्च मध्ये रतिनियतकरैश्च प्रीतियुक्तैर्यचोभिः । अनृतनरकथाभिस्तत्र यामे द्वितीये सुगुणसहितमनश्चित्रिणी सल्भेत ॥ " इति । स्रग्धरा वृत्तम् ॥ ३८ ॥

यह असार संसार जिसकी अंत अवस्था अति चंचल है उसमें पंडितोंके हेतु दोही सुलभ गति हैं एक तो तत्त्वज्ञानरूपी अमृत-रसमें स्नान करनेवाली जिनकी निर्मल बुद्धि है उनका काल अच्छा व्यतीत होता है अथवा सुंदर कामिनीके पुष्टस्तन और जघनसे भोगमें सुख पाई जो स्त्री उनके शरीरपर हाथ दिये लीलासे उद्योगमें जो तत्पर हैं उनका काल भलीभाँति व्यतीत होता है ॥ ३८ ॥

आवासः क्रियतां गाङ्गे पापहारिणि वारिणि ॥
स्तनद्वये तरुण्या वा मनोहारिणि हारिणि ॥ ३९ ॥

आवास इति ॥ पापानि हरत्यभीक्ष्णमिति पापहारि । "गाग वारि मनोहारि मुरारिचरणच्युतम् । त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥ णपापहारि दुरितारि तरगवारि दूरप्रचारि गिरिराजगुहाविहारि । झकारकारि हरिपादरजोविहारि गाग पुनातु सतत शुभकारि वारि ॥ " इत्यादिना समस्तपापक्षयकर इत्यर्थ । " बहुलमाभीक्ष्ण्ये " णिनि. । गागे गगासवन्धिनि । "तस्येदम् " इत्यण्प्रत्ययः । वारिणि आवास क्रियता स्नानपानादिना बाह्याभ्यतरशुद्धिसपादनद्वारा स्वर्गापवर्गप्राप्त्यर्थं तत्र निवासो विधीयतामित्यर्थः । तथा च श्रुति । " सितासिते सरिते यत्र सगते तत्राप्लुतासो दिवमुत्पतन्ति । ये वै तन्व १ विसृजन्ति धीरास्ते जनासोऽमृतत्व भजंते ॥" इति । स्मृतिश्च । " गगा तुगतरगिणी भवभयक्लेशापहा सर्वदा मर्त्यानामवगाहनात्सकृदपि स्वर्गेऽपि सस्थापिनी । " इत्यादि । अथवा मनोहारिणि अत्यतमनोहरे । पूर्ववण्णिनि । कुत्र हारिणि मुक्ताहारवति । अत्र मत्वर्थीय इनिप्रत्यय । तरुण्या नवयौवनाया स्तनद्वये आवासः परिशीलनतात्पर्य क्रियताम् । तरुणीस्तनाश्रयस्यैव निरतिशयसुखावहत्वादिति भाव । अत्र तरुणीग्रहण स्तनद्वयस्य पतनाभावेन पाटवातिशयद्योतनार्थम-प्रधानप्रसगात् । एतेन मणिहिरण्मयकरूणयोरिव स्तनद्वयहारयोरप्यन्यो-न्यगगर्गीयकप्रकाशसपोषावहत्वेन विशिष्टस्तनद्वयस्याश्रयणयोग्यत्व सूचि-

१ पापपहारिणि इति पाठान्तरम् । २ मध्ये इति पाठान्तरम् ।

तामित्यवगतव्यम् । यथाह श्रीहर्ष । "तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ।" इति । अत्र पूर्वोत्तरवाक्यस्थयोरनुप्रासयमकयोः शब्दालंकारयोः ससृष्टि स्पष्टा ॥ ३९ ॥

पाप हरनेवाला है जल जिसका ऐसी श्रीगंगाजीके तटपर वसे अथवा युवा स्त्रीके उन स्तनोंके मध्यमें वसे जो मनको वशमें कर लेते हैं और जिनपर हार पडा हुआ है ॥ ३९ ॥

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै- ।
र्द्वयमिह पुरुषाणां सर्वदा सेवनीयम् ॥
अभिनवमदलीलालालसं सुन्दरीणां ।
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ४० ॥

अथ द्वाभ्या निगमयति—किमिति ॥ इहास्मिन्नर्थे बहुभिरपरिमितैर्युक्तिशून्यैर्नि.सारैरुक्तैरुदितै प्रलापैरनर्थकवचनै किं फलमिति शेष. । वाचो विज्ञापन विना न किंचित्फलमस्तीत्यर्थ । "प्रलापोऽनर्थक वच." इत्यमर । किं त्विहास्मिन् लोके पुरुषाणा द्वय सर्वदा निरतरम् । सर्वथेति पाठ । सेवनीयम् । कि तद्द्वयमत आह । अभिनवा नूतना या मदलीला मन्मथावेशजनितविलासास्तासु लालस लोलुपमत्यासक्तमित्यर्थः । स्तनभरेण कुचकलशभारेण परिखिन्न परिश्रान्तमुभयत्रापि यौवनवतीधर्मो यौवन उपचर्यते । सुंदरीणा यौवन वा । न त्वसुदरीणामिति भावः । उत वन पुण्यारण्य वा सेवनीयमिति सम्बन्धः । एतयोरेव परमसुखनिदानत्वादिति भावः । मालिनी वृत्तम् ॥ ४० ॥

युक्तिशून्य प्रलाप अर्थात् बकवादसे क्या प्रयोजन है ? पुरुषोंको दोही वस्तु सर्वदा सेवने योग्य हैं, नवीन मदांधलीलाके अभिलाषी और स्तनभारसे खिन्न ऐसे सुंदरियोंका यौवन अथवा वन ॥ ४० ॥

---

१ सर्वथा इति पाठान्तरम् ।

सत्यं जना वच्मि न पक्षपाता-।
लोकेषु सप्तस्वपि तथ्यमेतत् ॥
नान्यन्मनोहारि नितम्बिनीभ्यो।
दुःखैकहेतुर्न च काश्चिदन्यः ॥ ४१ ॥

इदानीं निष्कृष्टमर्थमाह—सत्यामीति ॥ किं बहुना हे जनाः । सत्यं वच्मि यथार्थं ब्रवीमि पक्षपाताद्वैषम्यान्न वच्मि । सप्तसु लोकेष्वप्येतदेव सत्यमित्यर्थः । किमेतदित्यत आह । नितम्बिनीभ्यस्तरुणीभ्यो मनोहारि मनोहरं वस्तु नास्ति । तथा ताभ्योऽन्य इतर दुःखानामेकहेतुर्मुख्यकारणं च नास्ति । "को भोगो रमणीं विना" इत्यादिना भोगैकभावकत्वात् । 'वद्धमूलस्य मूलं हि महद्वैरतरो स्त्रियः ।" इत्यनर्थकमूलत्वाच्च नितम्बिनीनामेव परमसुखदुः-खैकनिदानत्वादिति भावः । अत्र सप्तश्लोक्या पक्षद्वयनिरूपणस्यायमभिप्रायः । अखण्डनिरतिशयानन्दावाप्तिलक्षणत्वेनाभ्यर्हितत्वान्मुख्यो मोक्षः पुरुषार्थ इति सकलमतसिद्धान्तः । प्रकृतिभाजो विश्वस्य स्त्रीपुंसाभ्यामेव निष्पन्नत्वात्कामस्य पितृऋणविमोचनहेतुभूततया सततं महापुण्यपरिग्रहात्पुरुषार्थत्वमिति नन्दि-केश्वरश्वेतकेतुपाञ्चालवात्स्यायनादिपूर्वसिद्धान्तः । एवं च सति "पूर्वालाभे परः-परः" इति न्यायान्मुख्यकल्पालाभेऽनुकल्पस्यापि विहितत्वान्मोक्षपुरुषार्थ-साधनप्रवृत्त्यलाभे कामपुरुषार्थसाधनेषु वा अवश्यं प्रवृत्तिः कर्तव्येत्यनुमधा-र्यैवमुपन्यस्तामिति । तत्र नितम्बिन्यतिरिक्तरम्यवस्त्वनर्थहेत्वोः सत्यपि सम्बन्धेऽ-प्यसम्बन्धोक्तेरतिशयोक्तिभेदः । इन्द्रवज्रा वृत्तम् ॥ ४१ ॥

हे लोगो ! यह हम सत्य कहते हैं इसमें कुछभी पक्षपात नहीं करते । संसारमें यह विदित है कि, स्त्रियोंसे अन्य मन हरण करने-वाली और दुःखदाई कोईभी वस्तु नहीं है ॥ ४१ ॥

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नम-।
त्पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ॥

---

१ सर्वेषु च इति पाठान्तरम् । २ त्युत्सुकः इति पाठांतरम् ।

**दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि ।
प्रत्यक्षाशुचिभस्त्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितम् ४२**

यदुक्तं "दुःखैकहेतुर्न च कश्चिदन्यः" इति तदेव प्रपञ्चयितुमिदानीं कामिनीगर्हणमारभते । अथ कामिनीगर्हणम् । अथ संभोगनिरूपणानंतरं कामिनीगर्हणं कामिनीनिंदा आविंशतिसमाप्ति क्रियत इति शेषः । ननु शृंगारालम्बनत्वेन प्रसिद्धानां कामिनीनां गर्हणे शृंगारवर्णनप्रतिज्ञाभङ्गः प्रसज्येतेति चेन्न शिशुपालादिकृतभगवद्गर्हणस्य पुरुषार्थपर्यवसानवत्कामिनीगर्हणस्यापि यथाकथंचिच्छृङ्गारवर्णन एव पर्यवसानान्न कोऽपि विरोध इति मंतव्यं तत्प्रकारमेव विवृणोति–कांतेति ॥ वेत्तीति विद्वान् सारासारविचारचतुरः ज्ञानवानपीत्यर्थः । किमुतान्य इति भावः । "विदेः शतुर्वसुः" इति वस्वादेशः । प्रत्यक्षेणाशुचिभस्त्रिकामपवित्रचर्मपुटम् । स्वार्थे कः । "प्रत्ययस्थात्कात्पूर्वस्य॰" इत्यादिना इकारादेशः "भस्त्रैषाजाज्ञा॰" इत्यादिना वैकल्पिकः । पुत्रिकामिति पाठे अशुचिपाञ्चालिकाम् । अत्यन्तजुगुप्सितस्वरूपामित्यर्थः । तदुक्तम् । "हासोऽस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं तत्कलुषावसाया । स्तनौ च पीनौ पिशिताम्रपिंडौ स्थानांतरे किं नरके न योषित् ॥" इति । इत्थंभूतां स्त्रियम् । "वाम्शसोः" इति विकल्पादियङादेशः । दृष्ट्वा कांता कमनीयेति । "कांतं मनोहरं रम्यम्" इत्यमरः । उत्पले इन्दीवरे इव लोचने यस्याः सा तथोक्तेति । विपुलश्रोणीभरा पृथुनितम्बबिम्बेति । उन्नमन्तावूर्ध्वमुत्पतन्ताविव स्थितौ कुतः पीनौ पीवरौ उत्तुंगौ उन्नतौ च पयोधरौ स्तनौ यस्याः सा तथोक्तेति । "स्त्रीस्तनाब्दौ पयोधरौ" इत्यमरः । सुमुखांभोजा सुन्दरवदनारविंदेति । शोभने मदनकार्मुकरुचिरे भ्रुवौ यस्याः सा तथोक्तेति च । माद्यति मत्तो भवति, मोदते हृष्यति, अभिरमते क्रीडते । अभिपूर्वाद्रमतेर्लटि तङ् । व्याङ्परिभ्यो रम इति परस्मैपदित्वानियमात् । प्रस्तौति उक्तप्रकारेण प्रकारांतरेण वा अभिष्टौति । अहो मोहस्याविचाराया दुश्चेष्टितं दुर्विलसितम् । अहो निर्गममपीगतसभापन्न

१ मुह्यति इति पाठान्तरम् । २ भातिरमते इति पाठान्तरम् । ३ आनमति इति पाठांतरम् । ४ पुत्रिका इति पाठान्तरम् ।

करोतीत्याश्चर्यमित्यर्थः । एतत्सर्वं व्यामोहमूलमेव तस्य दुरवच्छेदत्वादिति भावः । यद्यपि "अमेध्यपूर्णं कृमिजन्तुसंकुलं स्वभावदुर्गंधमशौचमध्रुवम् । कलेवरं मूत्रपुरीषभाजनं रमेत मूढो न रमेत पण्डितः ॥" इति वचनात्पण्डितस्येत्थं जुगुप्सितकामिनीकलेवरे रमणमेव नास्ति तथापि मोहस्यात्यतप्राबल्यप्रकटनार्थमित्थमुक्तमित्यवगतव्यम् । अत्र क्रियाणां बह्वीनां समुच्चितत्वात् क्रियासमुच्चयालङ्कारः एकविषयः । "गुणक्रियायौगपद्यमलङ्कारः समुच्चयः ।" इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम् ॥ ४२ ॥

कान्ता, कमलनयनी, बडे नितम्बवाली, पुष्ट और उत्तुंग (ऊंचे) स्तनवाली, सुन्दर कमलमुखी और सुन्दर भौंहवाली यों कह कह पण्डितलोगभी स्तुति करते हैं और देखके मोहित होते हैं, आनन्द पाते, रमण करते और उत्कण्ठित होते हैं, प्रत्यक्षही अपवित्रताकी पुतलीरूप स्त्री है उसपर देखो यह मोहकी क्या खोटी चेष्टा है ॥ ४२ ॥

स्मृता भवति तापाय दृष्टा चोन्मादकारिणी[1] ॥
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ४३ ॥

अथ त्रिभिरानुष्टुभैः स्वरूपं दूषयति—स्मृतेति ॥ या स्मृता मदशादृष्टार्चितादिस्मृतिबीजोद्बोधकसद्भाववशात्प्रवासे कदाचित्स्मरणविषयीकृता सती तापाय भवतीत्यर्थः । ततो दृष्टा सती उन्मादकारिणी चित्तविभ्रमकारी भवति । स्पृष्टा आलिंगिता सती मोहाय भवति । वहि प्रपंचविस्मरणकारिणी भवति । अतः सा वधूः कथं नाम कुतो वा दयिता प्रियतमा न कथंचिदपीत्यर्थः । किंतु उक्तानर्थैकहेतुभूतत्वादप्रियतमैवेति भावः । अत्र "स्मृता भवति तापाय" इति पदार्थानां विशेषणगत्या तुरीयपादस्थपदार्थं प्रति हेतुत्वात्काव्यलिङ्गभेदः ॥ ४३ ॥

जो स्मरणसे सन्ताप देती है, देखनेसे उन्माद बढाती अर्थात् मदवाला कर देती है और स्पर्शसे मोहित कर लेती है ऐसी स्त्रियांको प्रिया क्यों कहते हैं ॥ ४३ ॥

---

1 वर्धिनी इति पाठांतरम् ।

तावदेवामृतमयी यावल्लोचनगोचरा ॥
चक्षुष्पथादतीता तु विषादप्यतिरिच्यते ॥ ४४ ॥

तावदिति ॥ तावदेव तावत्पर्यंतमेवामृतमयी अमृतोपमाना तद्वन्मधुरत-रेत्यर्थः । वधूरिति शेषः । " तत्प्रकृतिवचने मयट् " " टिड्ढाणञ्० " इत्यादिना ङीप् । कियत्पर्यंतमित्यत आह । यावत् यावत्पर्यंत लोचनगोचरा चक्षुर्विषया भवति तावदिति सम्बन्धः । व्यतिरेके तु नैवमित्याह । चक्षुष्पथात् लोचनमार्गात् । " ऋक्पू० " इत्यादिना समासांतः । अतीता तु अतिक्रांता चेद्विषात्कालकूटादप्यतिरिच्यते अतिरिक्ता भवति । तद्वत्प्राणप्रयाणकारिणी भवतीत्यर्थः । अत्र वध्वा अमृतमयत्वविषातिरिच्यमा-नत्वासम्बन्धेऽपि तत्सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ४४ ॥

स्त्री तभीलों अमृतमय है जबलों नेत्रके सामने है । नेत्रसे जब दूर हुई तब विषसेभी अधिक हो जाती है अर्थात् विरहसे सन्ताप देती है ॥ ४४ ॥

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ॥
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ४५ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—नेति ॥ एकां नितम्बिनीं मुक्त्वा विहाय अमृत-ममृतशब्दवाच्यं किंचिद्वस्तु नास्ति विषं विषशब्दवाच्यमपि किंचिन्नास्ति । इय-मेवामृतप्राया चेत्यर्थः । कुत एतदित्याशङ्क्य तत् भावयति । रक्ता अनुरागवती चेत् सैव नितम्बिन्येव अमृतलता सञ्जीवनी भवतीत्यर्थः । विरक्ता अनुराग-रहिता चेत् विषवल्लरी विषलतामञ्जरी । " वल्लरी मञ्जरी स्त्रियाम् " इत्य-मरः । प्राणापहारिणी भवतीत्यर्थः । अत्र नितम्बिनीव्यतिरेकेणामृतविषयो-रस्तित्वसम्बन्धेऽप्यसम्बन्धात्सम्बन्धेऽसम्बन्धरूपातिशयोक्तिः । तथोनार्यां तस्या मोहामृतलतात्वविषवल्लरीत्वरूपणाद्रूपकालङ्कारः । स च रक्तत्वविरक्त-पदार्थहेतुकत्वात्काव्यलिङ्गेनोत्थित ननु पूर्वातिशयोक्तिमुज्जीवयतीति सङ्करः । प्रायेणैकार्थसम्बन्धेनैक श्लोकनुक्तिविशेषत्वोमाहित्यमिति कश्चन । यथा नैव

१ पयन्तरमत, इति पाठान्तरम् ।

" आद्यावेव, निपीय " श्लोकद्वय यथा च " मुखे, प्रसाधितरय " इत्यादिश्लोकद्वयमित्यादि ॥ ४५ ॥

स्त्रियोंसे परे न कोई अमृत है न विष, यदि वह प्रीति करे तो अमृतकी लता है और प्रीति तोड बैठे तो विषकी मञ्जरी है॥४५॥

आवर्तः संशयानामविनयभुवनं पत्तनं साहसानां ।
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ॥
स्वर्गद्वारस्य विघ्नो नरकपुरमुखं सर्वमायाकरण्डं ।
स्त्रीयंत्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशम्॥४६

अथ स्त्रीयन्त्रस्रष्टार दूषयति—आवर्त इति ॥ संशयानां सन्देहानामावर्तः परिपाक सकलसन्देहास्पदीभूतमित्यर्थ । अविनयानां भुवन लोक । साहसानां पत्तन नगरम । दोषाणां रागद्वेषादीनां सन्निधानमक्षयनिधि । कदाचिदप्यत्र तेषां न क्षीयन्त इति भावः । कपटशतमनेककैतवप्रचुरम् ।-बहुविधकैतवान्यत्रैव प्राचुर्येण वतत इति भावः । प्राचुर्ये मयट् । अप्रत्ययानामविश्वासानाम् । " प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु । " इत्यमरः । क्षेत्रमुत्पत्तिभूमि । अनेकाप्रत्ययोत्पादकमित्यर्थ । स्वर्गद्वारस्य स्वर्गलोकप्राप्तिसाधनस्य विघ्नः प्रतिबन्ध. । नरकपुरमुख यमलोकद्वार तत्प्रापकमित्यर्थः । " मुख तु वदने मुख्ये तात्रे द्वाराभ्युपाययो. । " इति यादव. । सर्वमायाकरण्डमशेषशांबरीविद्येन्द्रजालमहेन्द्रजालपेटिकेत्यर्थ । अमृतमय सुधारूप विषम । वस्तुतस्तत्स्वरूपानुसन्धाने विचार्यमाणे विषप्रायमित्यर्थ । प्राणिलोकस्य जनसमुदायस्य पाशो बन्धनसाधन स्त्रीयन्त्र स्त्रीरूपयन्त्रक केन सृष्ट निर्मितम । ईदृगनर्थाशययन्त्रनिर्माणत्वेन अस्य कुत्सितत्वमेवेत्यर्थ । अत एव केनेत्युक्तम् । यद्वा यद्यपि ब्रह्मणैव सृष्ट तथापि ईदृग्दुष्टवस्तुनिर्मातृत्वेन तस्य नामोच्चारणमपि कर्तुं न युज्यत इति केनेत्युक्तम् । अत्र स्त्रीयन्त्रे पत्तनादिरूपणान्निरवयवरूपकालङ्कारस्तदुक्तम् । "आरोपविषयस्य स्यादतिरोहितरूपिण. । उपरञ्जकमारोप्यमाण तद्रूपक मतम् ॥ " इति । स्रग्धरा वृत्तम ॥ ४६ ॥

---

१ नरक इति पाठान्तरम् । २ प्राणिना मोहपाश इति पाठान्तरम् ।

संशयोका भँवर, अविनयका घर, साहसका नगर, दोषोंका पात्र, अविश्वास और सैकडों कपटका खेत, स्वर्गद्वारका विघ्नकारक, नरकनगरका द्वार, मायोंका पेटारा, अमृतलपेटा विष और प्राणियोंके फँसानेका फंदा ऐसा स्त्रीरूपी यंत्र किसने वा ब्रह्माने सृजा है ॥४६॥

नो सत्येन मृगांक एष वदनीभूतो न चेन्दीवर-
द्वन्द्वं लोचनतां गतं न कनकैरप्यङ्गयष्टिः कृता ॥
किंत्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि ।
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मंदो जनः सेवते ॥ ४७ ॥

इत्थमनर्थैकतन्त्रमपि स्त्रीयन्त्रं कविवाक्प्रपञ्चवञ्चितो मूढोऽनुवर्तत इत्याह—नो इति ॥ एष परिदृश्यमानो मृगाङ्कश्चन्द्रः सत्येन यथार्थेन अवदनं वदनं सम्पद्यमानो वदनीभूतः वदनत्वेन परिणत इत्यर्थः । नो न भवतीति शेषः । अभूततद्भावे च्विः "ऊर्यादिच्विडाचश्च" इति गतिसंज्ञायां "कुगतिप्रादयः" इति समासः । तथा इन्दीवरद्वन्द्वं नीलोत्पलयुगुलम् । "द्वन्द्वं रहस्य०" इत्यादिना निपातः । लोचनतां लोचनभावं च न गतम् । "तस्य भावस्त्वतलौ" इति तल्प्रत्ययः । तथा कनकैः सुवर्णैरपि यद्वा चाम्पेयप्रसूनैरित्यर्थः । "कापि चाम्पेयगौरी" इति पद्मिनीस्वरूपनिरूपणात् । "अथ चाम्पेयश्चम्पको हेमपुष्पकः" इत्यमरः । "पुष्पमूलेषु बहुलम्" इति लुक् । अङ्गयष्टिर्गात्रयष्टिरपि न कृता न निर्मिता । किं त्वेवमुक्तप्रकारेण वदनं चन्द्र इत्याद्याकारेणेत्यर्थः कविभिः प्रगल्भवचनैः कवीन्द्रैः प्रतारितमना वञ्चितचित्तः विमोहित इति यावत् । मन्दो मूढो जनस्तत्त्वं जानन्नपि न किञ्च चन्द्रः किन्तु तत्सादृश्येन तथा व्यपदिश्यत इति विजानन्नपीत्यर्थः । त्वङ्मांसास्थिमयमत्यन्तजुगुप्सितमपीत्यर्थः । मृगदृशां स्त्रीणां वपुः शरीरं सेवते सम्भोगार्थमाश्रयते । विद्वांस्तु नैवमिति भावः । अत्र प्रतारितमनःपदार्थस्य विशेषणगत्या जुगुप्सितवपुःश्रयणादार्थं प्रति हेतुत्वात् काव्यलिङ्गभेदः । शार्दूलविक्रीडितं वृत्तम् ॥ ४७ ॥

---

१ [illegible] इति पाठान्तरम् । २ [illegible] ।

देखो तौ सच चन्द्रमाही मुख नहीं बन गया, कमलही दोनों नेत्र नहीं हुए, स्वर्णहीसे देह नही बना है यह स्त्रियोंका शरीर चाम, मांस और हाडमय है परन्तु यह बात जानकरभी कवियोंके बहकानेसे अन्धे अर्थात् विवेकरहित मनुष्य उसे सेवन करते हैं ॥ ४७ ॥

लीलावतीनां सहजा विलासा- ।
स्त एव मूढस्य हृदि स्फुरन्ति ॥
रागो नलिन्या हि निसर्गसिद्ध- ।
स्तत्र भ्रमत्येव वृथा षडंघ्रिः ॥ ४८ ॥

अथ पुरुषाणां भ्रांति मदृष्टानमाह—लीलावतीनामिति ॥ लीलावतीनां विलासिनीनामन. विलासा विभ्रमा. सहजा नैसर्गिका अत एव ते विलासा मूढस्याज्ञस्य हृदि स्फुरन्ति । आत्मगोचरा इमे विलासा इति बुद्ध्वा सर्वदा हृदये विस्फुरिता भवतीत्यर्थ । एतच्च वृथैवेति भाव: । तथा हि नलिन्या: रागो रक्तिमा अनुरागश्च निसर्गसिद्ध: किंतु षडंघ्रि: षट्पद: विटश्च व्यन्यते । वृथा व्यर्थमेव तत्र नलिन्या भ्रमति रागोऽय मद्गोचर इति भ्रांत्या पर्यटति । वस्तुतस्तु न तथा अतो व्यर्थमस्य भ्रमणमिति भाव । अत्र वाक्यद्वयेऽपि बिंबप्रतिबिंबभावेन साम्यनिर्देशाद्दृष्टांतालङ्कार: । " यत्र वाक्यद्वये बिंबप्रतिबिंबतयोच्यते । सामान्यधर्मो वाक्यज्ञै स दृष्टांतो निगद्यते ॥ " इति लक्षणात् । अय च रागयोर्द्वयोर्भेदेऽपि शेषभित्तिकाभेदाध्यवसायमूलातिशयोक्तिनिर्व्यूढभ्रांतिमदुज्जीवितया प्रस्तुतनलिनीषट्पदविशेषणसाम्यादप्रस्तुतकामिनी-विटप्रतीतिगोचरत्नमासोक्त्यांगेन सकीर्यते । वृत्तमुपजाति ॥ ४८ ॥

लीलावती स्त्रियोंका लीला करना सहजस्वभाव है सोई मूढोंके हृदयमें वशीकरण हो लगता है । जैसे कमलिनीमें ललाई स्वाभाविक होती है भ्रमर उसपर व्यर्थही आसक्त होकर घूमता है अर्थात् वह समझता है कि मेरेही लिये ललाई चमकाय रही है ॥ ४८ ॥

---

१ मुदा इति पाठांतरम् ।

संमोहयन्ति मदयन्ति विडम्बयन्ति ।
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ॥
एताः प्रविश्य सदयं हृदयं नराणां ।
किं नाम वामनयना न समाचारन्ति ॥ ४९ ॥

समोहयंतीति ॥ एता वामानि सुन्दराणि नयनानि यासा ताः वामनयनाः नराणां पुरुषाणा सदय दयायुक्त हृदय प्रविश्य समोहयन्ति मोहमुत्पादयन्ति, मदयान्ति, विडवयन्ति, निर्भर्त्सयान्ति, पर च रमयान्ति विषादयन्ति विषादमुत्पादयन्ति तस्मात् एताः स्त्रियः किं नाम न समाचरन्ति अपि तु सर्वमेव आचरान्ति ॥ ४९ ॥

मोह लेती, मत्त कर देती, विडंबना करती, डांट झिडकन देती, रमण कराती और विरहका विषाद देती है। ऐसी स्त्रियां मनुष्यके सदय हृदयमें प्रवेश करके क्या नहीं करती हैं ॥ ४९ ॥

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृतिपरं ।
मुखाब्जं तन्वंग्याः किल वसति यत्राधरमधु ॥
इदं तत्किंपाकद्रुमफलमिदानीमतिरसं ।
व्यतीतेऽस्मिन्काले विषमिव भविष्यत्यसुखदम् ॥ ५० ॥

अथापातरमणीयरमणीमुखावलोकनेन न विमोहितव्यमित्याह—यदिति ॥ यदेतद्वर्णनीयं तन्वंग्यास्तरुण्याः मुखमब्जमिव मुखाब्ज वक्रपद्म कर्तृ पूर्णेन्दोः पूर्णचन्द्रस्य द्युतिहर कांतिचोरक तत्कल्पमित्यर्थः । अब्जस्य पूर्णेन्दुद्युतिहरत्वं विरुद्धमिति ध्वनिः । तथा परमत्यन्तमुदारा रम्या आकृतिराकारो यस्य तत्तथोक्तम् । किं च यत्र मुखाब्जे अधरमधरोष्ठमवच्छिन्न मधु मकरन्द, अमृत वा वसति अस्ति किल । किलेति वार्तायाम् । न तु कदाप्यनुभूतमित्यर्थः । प्रसिद्धाब्जे तु मकरन्दो वर्तते मुखाब्जे तु वार्तामात्रमेव न तु वस्तुतस्तु तद-

---

१ दर, वरम् इति च पाठान्तरम् । २ तत्र इति पाठान्तरम् । ३ [illegible] इति पाठान्तरम् । ४ निवर्तते [illegible] इति पाठान्तरम् ।

स्तीति भावः । तदिद वक्त्रपद्ममिदानीमस्मिन् समये प्रारंभकाल इत्यर्थः । अतिरसमातिशयितमाधुर्यगुणयुक्त रुचिरतरामिति यावत् । किमप्यानिर्वाच्यमित्यर्थ. । पाकद्रुमस्य बालरसालादिवृक्षस्य फलमातिरसत्वालवृक्षफल नैवेस्येतान्निर्देश । "पोत पाकोऽर्भको डिम " इत्यमर । यद्वा पाकद्रुमफल पचेलिमवृक्षविशेषफलमित्यर्थ. । तथाभूतस्यैवात्यन्तरसवत्त्वादिति भावः । यद्वा किंपाकमपिपक्क द्रुमफल तथाभूतस्यैव रुचिविशेषास्पदत्यादिति भाव । अथवा किंपाकाख्यो द्रुमः यस्य फलमापातमधुर पारिणामविषम च तस्य किंपाकद्रुमस्य फल तत्कल्पमित्यर्थः । किंपाकशब्दो निघण्टुतरेषु मृग्य । तस्य रसालादिवृक्षविशेषवाचकत्व तु कविरेव प्रमाणम् । अस्मिन् प्रवर्तमाने काले व्यतीते अतिक्रान्ते सति विषमिव गरलमिव असुखद स्वलावण्यदर्शनजनितसमोहेन विवेकभ्रंशे विहिताकरणात्प्रत्यवाये वात्यन्तदु खप्रदमित्यर्थ । भविष्यति । तथा च कालान्तरेऽवश्य दुःखजनकत्वात्तात्कालिकसुखलोभेन तरुणीवदनपद्म न विश्वसनीयमिति भाव । किंपाकशब्दस्य "किंपमुष्टी निरर्थके च" इति शब्दरत्नकोशे वर्तते तस्मात् रसालादिवृक्षान पातित्व न सम्भवतीति मन्तव्यम् । शिखरिणी वृत्तम् ॥ ५० ॥

पूर्णमासीके चन्द्रमाकी छवि हरनहार सुन्दर आकारवाली स्त्रियोंका मुखकमल जिसमें अधरामृत रहता है वह अज्ञात वा युवा अवस्थामें अच्छा लगता है फिर वह काल व्यतीत होनेपर ज्ञात वा वृद्धापन प्राप्त होनेसे मदारके फलके समान विषसा बुरा लगेगा ॥ ५० ॥

उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन-।
द्वन्द्वेनोद्गतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ॥
कान्ताकारधरा नदीयमभितः क्रूरात्र नापेक्षते ।
संसारार्णवमज्जनं यदि तदा दूरेण संत्यज्यताम् ॥ ५१ ॥

---

१ नीयत इति पाठान्तरम् । २ मिथुना इति पाठान्तरम् । ३ क्रूराशरा नेष्यते इति पाठांतरम् । ४ ततो इति पाठान्तरम् ।

अथास्या अनर्थहेतुभूतनदीत्वनिरूपणेन परित्याज्यतामाह—उन्मीलदिति ॥ तिस्रश्च ताः वल्यश्च त्रिवल्य इति द्विगुसमास. । यथाह वामनः । त्रिवलीशब्दसज्ञा च इति सूत्रेण सप्तर्षय इतिवत् “ दिक्सख्ये सज्ञायाम् ” इति सज्ञाया द्विगु इति । उन्मीलन्त्य उत्पद्यमानास्त्रिवल्यो वलित्रयमेव तरगाः । यद्वा त्रित्वसख्या वल्यास्त्रिवल्यः । उत्तरपदलोपिसमासः । ता एव तरगा ऊर्मयस्तेषा निलया । प्रोत्तुगावत्युन्नतौ पीनौ पीवरौ च यौ स्तनौ तयोर्द्वंद्वेन युगलेन हेतुना उद्गतमुद्यलचक्रवाकयुगल चक्रवाकाख्यपक्षिविशेषयुग्म यस्याः । स्तनरूपचक्रवाकयुगलेत्यर्थः । वक्त्रमेवाबुज तेनोद्भासते अभीक्ष्णमिति तदुद्भासिनी । “ बहुलमाभीक्ष्ण्ये ” इति णिनि· । अभितः समतात् क्रूरा कुटिलहृदया । नदीपक्षे क्रूरा वक्रगतिप्रवाहा अथवा अभित. सर्वत प्रवर्तमाना· क्रूरा नक्रादिक्रूरजन्तवो यस्याः सा । कांताकारधरा कातारूपधारिणी इय परिदृश्यमाना नदी कर्म । अत्रास्मिन् लोके रागार एवार्णवः तत्र मज्जन नापेक्षते नाभिलष्यते यदि तदा अनपेक्षापक्षे दूरेण सत्यज्यता दूरतर एव विमृज्यताम् । “ दूरान्तिकार्थेभ्यो द्वितीया च ” इति विकल्पात्तृतीया । अन्यथा तत्समाश्रयेण अर्णवमज्जनमेव सिद्ध स्यादिति भाव. । अत्र समस्तवस्तुवर्तिसावयवरूपकालङ्कार· । शार्दूलविक्रीडितं वृत्तम् ॥ ९१ ॥

शोभितपेटकी त्रिवलीही तरंगका समूह है, उत्तुंग और पुष्ट दोनों स्तनही उसमें चक्रवाकके जोडे है, जिसका गंभीर आशय मुखरूपी कमलसे शोभित है ऐसी स्त्रीका आकार धारण किये नदी है सो हे पुरुषो ! जो तुम संसारसमुद्रमें न मग्न हुआ चाहो तो इसे दूरहीसे परित्याग करो । इसका यह तात्पर्य है कि नदीमें गिरी वस्तु घूम फिरके समुद्रमें जा पडती है ॥ ९१ ॥

जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ॥
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ ९२ ॥

इतोऽपि न विश्वासार्हा स्त्रिय इत्याह द्वाभ्याम्—जल्पन्तीति ॥ अन्येन सार्धमेकेन पुंसा सह जल्पन्ति संल्पन्ति । सविभ्रमाः सविलासाः सन्तः

अन्यं पुरुषं पश्यति । हृद्गतं हृदयस्थमन्यं चिंतयति अतो योषितां स्त्रीणां प्रियतमः नियत इति शेषः । को नाम न कोऽपीत्यर्थः ॥ ९२ ॥

बातें तो किसी अन्य पुरुषसे करती हैं और विलाससहित औरहीकी ओर देखती हैं और हृदयमें औरहीसे मिलनेकी चाह रखती हैं, फिर कहो तो इनमेंसे कौन स्त्रियोंको प्यारा है सो नहीं जान पडता ॥ ९२ ॥

अपसर सखे दूरादस्मात्कटाक्षविषानला- ।
त्प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ॥
इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधै- ।
श्चतुरवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥९३॥

अथ योषितः सर्पस्वरूपेण सखायं भणयन् दूरादपसर्पणमुपदिशति—अपसरेति ॥ हे सखे बन्धो कटाक्षा अपाङ्गवीक्षणान्येव विषानलो विषाग्निज्वाला यस्य तस्मात् । प्रकृत्या स्वभावत एव कुटिलात् । " प्रकृत्यादिभ्यस्तृतीया च " इति तृतीयासमासः । विलासा विभ्रमा एव फणाः स्फटास्ता बिभर्तीति तथोक्तात् । " स्फटायां तु फणा द्वयोः " इत्यमरः । तस्मात् योषित्सर्पात् कामिनीरूपव्यालाद्दूरादपसर दूरं गच्छ । योषित्सर्पसमागमं मा कुर्वित्यर्थः । अन्यथा तत्समागमेन दंशनप्रसङ्गे चिकित्सायां दुष्करत्वादिति भावः । " दूरान्तिकार्थेभ्यो द्वितीया च " इति चकारात्पञ्चमी । तदेव प्रकटयति । इतरेति । इतरफणिना प्रसिद्धसर्पेण दष्टः पुमान् औषधैः मूलिकामणिमन्त्रादिभिरित्यर्थः । चिकित्सितुं विषापसारणेनोज्जीवयितुं शक्यः । चतुरवनिताभोगिना निपुणतरुणीसर्पेण ग्रस्तं दष्टं समाक्रान्तं च पुरुषं तु मन्त्रिणो मान्त्रिका विषवैद्यास्त्यजन्ति हि । तद्ग्रासजनितोन्मादस्य दुरवरोपणत्वादिति भावः । अत्रापि समस्तवस्तुवर्तिसावयवरूपकालङ्कारः । तेन चोपमानात्प्रसिद्धसर्पादुपमेयस्य योषित्सर्पस्याधिक्यप्रतीतेर्व्यतिरेको व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः । हरिणी वृत्तम् ॥ ९३ ॥

---

१ त्रिया० इति पाठान्तरम् ।

हे मित्र ! सहजही क्रूर और विलासरूपी विषाग्निसे दूर भाग क्यौंकि अन्य सर्पोंका डसा हुआ औषधीसे अच्छा हो सक्ता है पर चतुरस्त्रीरूपी सर्पके डसे हुएको मन्त्रतन्त्रवालेभी छोड भागते हैं ॥ ५३ ॥

विस्तारितं मकरकेतनधीवरेण ।
स्त्रीसंज्ञितं बडिशमत्र भवाम्बुराशौ ॥
येनाचिरात्तदधरामिषलोलमर्त्य- ।
मत्स्यान् विकृष्य विपचत्यनुरागवह्नौ ॥५४॥

पुनः प्रकारान्तरेण भीषयति—विस्तारितमिति ॥ मकरकेतनो मदन एव धीवरः कैवर्तस्तेन कर्त्रा । "कैवर्ते दाशधीवरौ" इत्यमरः । अत्रास्मिन् भवाम्बुराशौ संसारसागरे स्त्रीसंज्ञास्य संजाता स्त्रीसंज्ञं योषिद्रूपमित्यर्थः । तारकादित्वादितच् । बडिशं मत्स्यवेधनं मत्स्यग्राहकसामिषवक्रायोयन्त्रमि-त्यर्थः । "बडिशं मत्स्यवेधनम्" इत्यमरः । विस्तारितं प्रसारितम् । येन स्त्रीबडिशेन तस्य स्त्रीबडिशस्याधरमेवामिषं मांसखण्डं तत्र लोलाः सतृष्णा ये मर्त्या मनुजास्त एव मत्स्या मीनास्तानचिराद्विकृष्याकृष्यानुराग एव वह्निस्तत्र विपचति विशेषेण पक्वान् करोति अत्यन्तं सन्तापयतीत्यर्थः । मन्मथधीवर इवेति भावः । योऽयमेनद्वारेव मनुजान् परिपीडयतीति भावः । अत्रापि पूर्ववद्रूपकालंकारः । वसन्ततिलका वृत्तम् ॥ ५४ ॥

इस संसाररूपी समुद्रमें कामदेवरूपी केवटने स्त्रीरूपी जालको इसलिये फैलाया है कि वह कामदेव मनुष्यरूपी मच्छ उसके अधरमांसके जो लोभी हैं उन्हें वशमें कर अनुरागरूपी अग्निमें पकाता है ॥ ५४ ॥

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ॥
मा संचर मनःपान्थ तत्रास्ते स्मरतस्करः ॥ ५५ ॥

---

१ कामिनी कुच० इति पाठान्तरम् ।

अथ मानस भंषियति—कामिनीति ॥ पन्थान गच्छतीति नित्यमिति पाथो नित्यपथिक । "पन्थो ण नित्यम्" इति णप्रत्ययः, पन्थादेशश्च । मन एव पाथस्तस्य सम्बुद्धिः हे मन.पाथ । कुचावेव पर्वतौ ताभ्यां दुर्गमे गन्तुमशक्ये कामिन्याः कायो देह स एव कातारमरण्य तत्र मा सचर सचार मा कुरु । न प्रवर्तस्वेत्यर्थः । कुतस्तत्र कातारे स्मर एव तस्कर. चोरः आस्ते वर्तते । स च मानसर्वस्वमपहरिष्यतीति भाव । "चौरैकागारिकस्तेनदस्युतस्करमोषकाः ।" इत्यमर. । "तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्च" इति सुडागमतलोपौ । अलकारस्तु पूर्ववत् ॥ ९९ ॥

स्त्रियोंका शरीररूपी वन जो कुचरूपी पर्वतोंसे अतिदुर्गम हो रहा है उसमें हे बटोही मन ! तू मत जा, तहां कामदेवरूपी चोर रहता है ॥ ९९ ॥

व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना ।
नीलाब्जद्युतिनाहिना परमहं दृष्टो न तच्चक्षुषा ॥
दष्टे संति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो ।
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ९६

अथ त्रिभि कस्याचिदनुभवमालक्ष्याह—व्यादीर्घेणेति ॥ व्यादीर्घेण अत्यायतेन अन्यत्र कर्णांतविश्रांतेन । चलेन चञ्चलप्रकृतिना वक्रगतिना निसर्गकुटिलसञ्चारेण । समानमेतद्विशेषणद्वयम् । तेजस्विना बलवता अत्युज्ज्वलेन च । प्रागल्भ्यगामिनि । भोगिना फणवता । "भोग' सुखे स्त्र्यादिभृतावहेश्च फणकाययो' ।" इत्यमर । अन्यत्राभोगिनेति च्छेदः । विशालेनेत्यर्थ । नीलाब्जस्य नीलोत्पलस्य द्युतिरिव द्युतिर्यस्य तेन एकत्र तद्वर्णेन अन्यत्र तत्सदृशेनेत्यर्थ. । अहिना सर्पेण परमत्यन्तमह दष्ट' । किंतु तच्चक्षुषा तस्याः कामिन्या चक्षुषा उक्तविशेषणेन न दष्ट इत्यर्थ । चिकित्सका वैद्या धर्मार्थिन परोपकार एव प्रयोजनमेषामस्ति तथाभूता सन्त' दिशि दिशि प्रतिदिशम् । नित्यवीप्सयो द्विर्भाव । प्रायेण भूम्ना सन्ति सर्वत्र सन्तीत्यर्थः ।

---

१ दष्टो इति पाठान्तरम् । २ दष्टे इति पाठान्तरम् । ३ वीक्षितस्य इति पाठान्तरम् ।

किंतु मुग्धायाः मुग्धाङ्गनायाः यदक्षि यद्वा मुग्धाक्षि सुन्दरावलोकनं तेन सर्परूपेण क्षणं क्षणमात्रं वाक्षितस्य दष्टस्य ग्रस्तस्येत्यर्थः । विक्षतस्येति पाठे दष्टस्येत्यर्थः । मे मम तु वैद्यो न हि चिकित्सको नास्ति हि । औषधं विषहरभेषजमपि च नास्तीत्यर्थः । अतो महामोहार्णवनिमज्जनमेव न तु तत्पारगमनमिति भावः । अत्र प्रसिद्धाह्यपेक्षया चक्षूरूपाहेराधिक्यकथनाद्व्यतिरेकालङ्कारः । " उपमानाद्यदन्यस्य व्यतिरेकः स एव सः । " इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम् ॥ ९६ ॥

बडा लम्बा चञ्चल टेढी चालवाला और तेजवाला फनधारी नीलकमलसा काला सर्प जो मनुष्यको काट ले तो अच्छा परन्तु स्त्रीके कटाक्षका काटा अच्छा नहीं क्योंकि सांपके डसेको बचानेवाले सब देशमें वसते हैं प्रायः धर्मार्थी भी होते हैं पर अच्छे नेत्रवाली स्त्रीकी दृष्टिसे काटे हुएको न कोई मन्त्र न औषधी है ९६॥

इह हि मधुरगीतं नृत्यमेतद्रसोऽयं ।
स्फुरति परिमलोऽसौ स्पर्श एषः स्तनानाम् ॥
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाणः ।
स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥ ९७ ॥

इहेति ॥ इह हि तारुण्येऽपीत्यर्थः । हिरत्रावधारणार्थकः । " हि हेताववधारणे " इत्यमरः । मधुरं सन्तापहरं श्रोत्रसुखावहमित्यर्थः । " शीतलीक्रियते तापो येन तन्मधुरं स्मृतम् । " इति वचनात् । तद्गीतं गानं स्फुरति एतन्नयनानन्दकरं नृत्तं नाट्यं स्फुरति, अयं रसनेन्द्रियग्राह्यानि-[illegible] अधरामृतं स्फुरति, असौ घ्राणतर्पणः परिमलः पद्मिनीजातिनिमित्तगन्धविशेषः वनमालागन्धसमागतदिव्यमनःसुखामोदविशेषो वा स्फुरति एष त्वगिन्द्रियसंतर्पकः स्तनानां स्पर्शः स्फुरति । ' स्तनादीनां [illegible] ' इति वामनः । [illegible] । [illegible]

१ [illegible] इति पाठान्तरम् ।

परतंत्रैरित्यर्थः । अत एव स्वहितकरणे धूर्तैः कितवैः आत्महिताचरणतत्परैरिव स्थितैरित्यर्थः । पञ्चभिरिन्द्रियैः श्रोत्रादिभिर्भ्राम्यमाणस्तत्तद्विषयेष्वासज्यमानः सन् वञ्चितः प्रतारितोऽस्मि । न चैतत्कैतवं प्रागेवाज्ञासिषमित्यर्थः । मालिनी वृत्तम् ॥ ९७ ॥

यह कैसा सुन्दर मधुर गीत है, रूप देखो कैसा अच्छा है, इस वस्तुका रस कैसा स्वादिष्ठ है, इस वस्तुकी कैसी अच्छी सुगंध है, स्त्रीके स्तनोंका स्पर्श क्या अच्छा सुख देता है इस भांति परलोकको नष्ट करनेवाली और अपने प्रयोजन साधनेमें अति धूर्त्त है उन पांचों ज्ञानेंद्रियोंसे हे नर! तु हेर फेर कर ठगा गया ॥ ९७ ॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो ।
न चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः ॥
भ्रमावेशादङ्गे कमपि विदधद्भंगमसकृ-
त्स्मरापस्मारोऽयं भ्रमयति दृशं घूर्णयति च ॥९८॥

अथाङ्गनाव्यामोहजनकं मन्मथं दूषयति—नेति ॥ मन्त्राणां गम्यो मन्त्रसाध्यो न भवति । भैषज्यविषयः औषधाद्यपनेयश्च न भवति । भेषजमेव भैषज्यमिति विग्रहः । स्वार्थे ष्यञ्प्रत्ययः । "भेषजौषधभैषज्यानि" इत्यमरः । तथा विविधैर्नानाप्रकारैः शान्तिकशतैरनेकशान्तिकर्मभिः प्रध्वंसं विनाशं चापि न व्रजति न गच्छति । "पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते । तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥" इति स्मरणात् । प्रसिद्धस्तु जपादिभिः शाम्यति न त्वयमिति भावः । किं तु भ्रमावेशान्मोहोन्मादनात् अङ्गे शरीरे कमप्यनिर्वाच्यं भङ्गं जाड्यम् । यद्वा भ्रमावेशान्मतिभ्रंशापादनात् अङ्गे करचरणाद्यवयवेष्वित्यर्थः । कमपि भङ्गं विक्षेपादिविकारमनल्पप्रकारं विदधत्कुर्वन् । दधातेर्विपूर्वाच्छतृप्रत्ययः । "नाभ्यस्ताच्छतुः" इति नुमभावः । स्मरापस्मारः स्मरप्रयुक्ताङ्गनाव्यामोहरूपापस्माररोगो दृशं मदीयदृष्टिं भ्रमयति व्यत्यासयति । अतस्मिन् तज्ज्ञानं करो-

१ किमपि इति पाठान्तरम् । २ भ्रमयतम इति पाठान्तरम् ।

त्तीत्यर्थः । तथा घूर्णयति चक्रवत् भ्रामयति च । किमत्र करोमि कथमय चिकित्स्य इति भावः । यथाहुर्वैदानिकाः “ क्रुद्धैर्धातुभिराहते च मनसि प्राणी तमः संविशन् दन्तान् खादति फेनमुद्वमति दोःपादौ क्षिपन् मूढधीः । पश्यन् रूपमसत्क्षितौ निपतति प्राय. करोति क्रिया बीभत्स्याः स्वयमो शाम्यति गते वेगे त्वपस्माररुक् ॥ ” अत एव व्यतिरेकालङ्कारः लक्षण तूक्तम् । शिखरिणी वृत्तम् ॥ ९८ ॥

यह कामदेवरूपी अपस्मार (मृगी) रोग भ्रमके आवेशसे वडा दुःखदाई शरीरको तोडता और मनको भ्रमाता नेत्रोंको घुमाता है और इस रोगमें मंत्रोंकी गति नहीं, ओषधीभी नहीं काम करती, अनेक प्रकारकी शांति अर्थात् पाठ पूजादिसेभी नाश नहीं होता ॥ ९८ ॥

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च ।
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ॥
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया ।
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ९९॥

अथ त्रिभिः पण्याङ्गनागर्हेण कुर्वन्निगमयति—जात्यन्धायेति ॥ जात्य [illegible] जन्मप्रभृत्यन्धसदृशे पुरुषाय च दुष्कुलाय च दुर्मुखाय मुखरोग [illegible]-[illegible]दूषितवदनायेत्यर्थः । “ दुर्मुखे मुखरोगवक्रमुखी ” इत्यमरः । [illegible] व्याध्यादिना जुगुप्सित दुर्गंधयुक्त वा मुख यस्य तस्मै । जरया [illegible] जीर्णानि शिथिलानि कृशानि विश्लथसन्धिबन्धानि च अखिलाङ्गानि [illegible]-णाद्यवयवा यस्य तस्मै च ग्रामीणाय ग्रामनिवासिने [illegible] चेत्यर्थः । किं बहुना गलत् [illegible] कुष्ठ [illegible] नेनाभिभूताय गर्हिताय च लक्ष्मीलवश्रद्धया [illegible]-सुन्दरं निजवपु [illegible] यच्छन्तीष्वर्पयन्तीषु [illegible] [illegible] । [illegible] “ [illegible] ” [illegible] [illegible] ” [illegible] । “ [illegible] ” [illegible]

देश. । तथा विवेक· कर्तव्याकर्तव्यविचारः स एव कल्पलतिका तस्या-शस्त्रीषु छुरिकासु विवेकविच्छेदकरीष्वित्यर्थः । विवेकस्याप्यखिलार्थसघटकः-स्यात्कल्पलतिकारूपणमवगन्तव्यम् । " स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका । " इत्यमरः । " वह्वादिभ्यश्च" इति ङीप् । पण्यस्त्रीषु । वेश्यांगनासु कः· पुमान् विवेकरहितोऽपीत्यर्थः । रज्येतानुरक्तो भवेन्न कोऽपी-त्यर्थ । " वारस्त्री गणिका वेश्या सुलावण्यागनापि च ।" इति वैजयन्ती । शार्दूलविक्रीडित वृत्तम् ॥ ५९ ॥

जन्मांध, कुरूप, वृद्धापनसे शिथिलांग, गँवार नीचजाति और टपकते कोढसे भरे पुरुषोंकोभी अपना सुंदर देह थोडे धनकी आशासे समर्पण करती है ऐसी वेश्या विवेकरूपी कल्पलताकी छुरीसी है उसमे कौन बुद्धिमान् रमे ॥ ५९ ॥

वेश्यासौ मदनज्वाला रूपेन्धनविवर्धिता ॥
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ६० ॥

वेश्येति ॥ असौ वेश्या रूप सौदर्यमेवेंधनानि तैः समिद्भिर्विवर्धिता प्रवर्धिता मन्मथज्वाला मन्मथाग्निज्वाला । " इन्धन त्वेध इध्ममेधः समि-त्स्त्रियाम् । " इत्यमरः । यत्र मदनज्वालारूपवेश्यायां कामिभिः कामुकैः यौवनानि नूतनवयांसि । युवादित्वादण्प्रत्ययः । धनानि च हूयते हव्यरूपेण तत्सात्क्रियन्ते विलुप्यन्त इत्यर्थ । स्वर्गादिफलकांक्षिभिराहवनीयाग्निज्वालायां हवींषि यथेति भाव । अत्र वेश्यायामारोप्यमाणस्य ज्वालात्वस्य प्रकृतहवनोपयो-गित्वात्परिणामालङ्कार· " आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम. " इति लक्षणात् । स च रूपेंधनेति रूपकेण संकीर्यते । रूपकत्वारोपणस्योपर-ञ्जकमात्रमेवेति विवेक ॥ ६० ॥

वेश्या तो कामाग्निकी ज्वाला है, रूपरूपी इन्धनसे प्रचण्ड है कामी पुरुष उसीमें अपना धन और यौवन होम करते हैं ॥६०॥

कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ॥
चारभटचोरचटकविटनटनिष्ठीवनशरावम् ॥ ६१ ॥

---

१ समेधिना इति पाठान्तरम् ।

क इति ॥ मनोज्ञ सुन्दरमपि वेश्याया अधरः पल्लवमिवेत्युपमितसमासो न त्वधरः पल्लवमिति रूपकम् । रूपके तूत्तरपदप्राधान्येन तत्र चुम्बनायोगात् । कः कुलपुरुषः सत्कुलसम्भवः पुमान् जातिनीतिकुलाचारधर्मज्ञ इत्यर्थः । चुम्बति न कोऽपीत्यर्थः । कुत एतदित्याशङ्कायामचुम्बनहेतुभूत विशेषणमाह । चारा गूढपुरुषाः, भटा योधाः, चोरास्तस्कराः, चेटका स्त्रीपुरुषसन्धानकुशलाः दौत्यकर्मनिरताः, विटा जाराः, नटा भूमिकाभागास्तेषां पुरुषापसदाना निष्ठीवनशरावमुच्छिष्टपात्र परमापवित्रमित्यर्थः । चुम्बनसमये तदुच्छिष्टस्य तत्र सङ्क्रमणादिति भावः । अत्र यद्यपि "रतिकाले मुख स्त्रीणा शुद्धमाखेटके शुनाम् ।" इति स्मरणात्सुरतसमये परिगेण स्त्रीमुख तथाप्युक्तरीत्या कश्मलसपर्कात् हेयतया चुम्बनानर्हत्वात्र चुम्बनीयमिति तात्पर्यम् । "शरावो वर्धमानकः" इत्यमरः । अत्र रूपकोपमानुप्रासाना ससृष्टिः ॥ ६१ ॥

वेश्याका अधरपल्लव यदि सुन्दर है तौभी उसे कौन कुलीन पुरुष चुंबे क्योंकि ठग, ठाकुर, चोर, नीच, नट इत्यादि और जारोंके थूकनेका ठीकरा है ॥ ६१ ॥

मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम् ॥
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ६२॥

स्त्रियोंके अधरमें अमृत और छातियोंमे विष रहता है इसीहेतु लोग अधरपान करते हैं और छातीमे मुष्टिका प्रहार करते हैं ॥ ६२ ॥

धन्यास्त एव धवलायतलोचनानां।
तारुण्यदर्प[1]घनपीनपयोधराणाम् ॥
क्षामोदरोपरि लसत्त्रिवलीलतानां।
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ६३ ॥

एवं तावत्कामिनीगर्हणं किं विरक्ताः सन्ति वा न वेत्याशङ्कायां सन्त्येवेति मनसि निधाय तत्रापि सुविरक्तदुर्विरक्तभेदेन द्वैविध्यं प्रतिपादयिष्यन्नादौ सुविरक्तपद्धतिं वर्णयितुमुपक्रमते धन्या इत्यादिभिस्त्रिभिः—धन्या इति ॥ त एव पुरुषा धन्याः सुकृतशालिनः सुविरक्ता इति यावत्। "सुकृती पुण्यवान् धन्यः" इत्यमरः। ते के इत्याकाङ्क्षायामाह। धवले पुण्डरीकदलसदृशे आयते कर्णान्तविश्रान्ते च लोचने यासां तासाम्। तारुण्यदर्पेण यौवनमदोद्रेकेण घनौ पीवरौ पयोधरौ स्तनौ यासां तासाम्। क्षामोदरस्यातिकृशमध्यस्योपरि उपरिष्टाल्लसन्त्यः प्रकाशमानाः याः त्रिवल्यः तिस्रश्च ताः वल्यश्च त्रिवल्यः "दिक्सङ्ख्ये सञ्ज्ञायाम्" इति समासः। सङ्ख्यापूर्वत्वेऽपि सप्तर्षय इत्यादिवत् ज्ञेयमित्युक्तं प्राक्। ता लता इव यासां तासाम्। तेनैतासां पद्मिनीत्वं सूच्यते। तदुक्तं रतिरहस्ये। "त्रिवलिललितमध्या हंसवाणी सुवेषा" इति। क्षामेत्यत्र "क्षायो मः" इति मत्वम्। तथा चेत्थंभूतलक्षणलक्षितानां कामिनीनामाकृतिमाकारविशेषं दृष्ट्वा। "इङ्गितं हृद्गतो भाव आकारस्त्वाकृतिः" इति सज्जनः। येषां पुरुषाणां मनो विकृतिं विकारं [illegible] न यमिति यावत्। नैति न प्राप्नोति अत एव धन्या इति सम्बन्धः। [illegible] निर्विकारचित्तत्वं शमसम्पन्नानामेव न त्वन्येषामिति भावः। तदुक्तम्। "[illegible] निर्विकारचित्तत्वम्" इति। वसन्ततिलका वृत्तम् ॥ ६३ ॥

---

१ [illegible] इति पाठान्तरम्। २ रूप इति पाठान्तरम्।

चञ्चल बडे नेत्रवाली, यौवनके अभिमानसे भरी, दृढ और पुष्टस्तनवाली, जिनके कृशोदरपर त्रिवलीलता शोभती है ऐसी स्त्रियोंकी आकृति देखकर जिन पुरुषोके मनमे विकार नहीं उत्पन्न होता वे धन्य हैं ॥ ६३ ॥

बाले लीलामुकुलितममी मन्थरा दृष्टिपाताः ।
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते ॥
सम्प्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते ।
क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ ६४ ॥

अथ पूर्वोपभुक्तकामिनीसम्बोधनव्याजेन स्वविरक्ततां प्रकटयति—बाले लीला-मुकुलितमिति ॥ हे बाले मुग्धे, लीलया विलासयोगेन मुकुलिता-न्यर्धनिमीलितानि यस्मिन् कर्मणि तद्यथा तथा मन्थरा अलसप्राया अमी दृष्टिपाता [illegible] किमर्थं क्षिप्यन्ते । न [illegible] इत्यर्थः । किन्तु विरम विरम अस्मादृशात् विरम । दृष्टिविक्षेपादिति शेषः । [illegible] । ' [illegible] रम '' इति परस्मैपदम् । कुत एवाऽयं ते श्रमः कटाक्षादिविक्षेपजनितायासो व्यर्थो निष्फल [illegible] [illegible] भावः । [illegible] [illegible] । सम्प्रतीदानीं वयमन्ये परे [illegible] इत्यर्थः । कुतो [illegible] नष्टम् । [illegible] । [illegible] यौवनम् [illegible] । [illegible] । [illegible] इति शेषः । न तु [illegible] ।

हे वाले ! लीलासे किंचित् विकासित और मन्थर कटाक्ष हमपर क्या फेंकती है विश्राम ले २ । हमारे प्रति तेरा यह श्रम व्यर्थ है क्योंकि अव हम कुछ औरही हो गये । लडकपन हमारा छूट गया, वनमें रहते हैं, मोहभी क्षीण हो गया और इस जगत्के जालको तृणसमान देखते हैं ॥ ६४ ॥

इयं बाला मां प्रत्यनवरतमिन्दीवरदल- ।
प्रभाचोरं चक्षुः क्षिपति किमभिप्रेतमनया ॥
गतो मोहोऽस्माकं स्मरशबरबाणव्यतिकर- ।
ज्वलज्ज्वाला शान्ता तदपि न वराकी विरमति ६५॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—इयमिति ॥ इयमेषा वाला मुग्धा मां प्रति मामुद्दिश्यानवरतमविच्छिन्नं यथा तथा इन्दीवरदलप्रभाचोरमिन्दीवरकान्तिमोषकं तस्करमित्यर्थः । चक्षुः क्षिपति प्रसारयति । अनया वालया किमभिप्रेतमपेक्षितं तन्न जानामीत्यर्थः । ननु तया त्वत्सङ्ग एवापेक्षितस्तत्कुतो न जानामीत्याशङ्कायामाह । अस्माकं मोहो गतः उपरतः । इदानीमिति शेषः । ननु पूर्वं मामित्येकवचनं प्रयुज्यास्माकमितीदानीं बहुवचनप्रयोगात्कथं सामानाधिकरण्यमुपपद्यत इति चेत्तथापि निवृत्तिमार्गोत्सुकित्वप्रयुक्तात्मसंभावनया बहूकरणं न दोषायेति समाधेयम् । यद्वा मामिति समुदायनिर्देशेन वा न दोषः । तथा स्मर एव शबरः किरातस्तस्य बाणव्यतिकरेण शरसम्पर्केण यो ज्वरः संतापस्तस्य ज्वाला शांता विरतेत्यर्थः । तदपि तथापि वराकी न विरमति विरतिं न प्राप्नोति । पूर्वं प्राणप्रियतया गरीयस्या बालया वराकीशब्दप्रयोगेणास्यात्यन्तवैराग्यं सूच्यते । "जल्पभिक्षकुट्टलुण्ट्" इत्यादिना षाकन्निति षाकन्प्रत्यये षित्वान् ङीष्प्रत्यये च वराकीति सिद्धम् । शिखरिणी वृत्तम् ॥ ६५ ॥

इस बाला स्त्रीका क्या अभिप्राय है जो यह कमलदलोंकी प्रभाके तिरस्कार करनेवाले नेत्रोंको मेरी तरफ चलाती है, अब हमारा अज्ञान गया और कामदेवरूपी भीलके वाणोंसे उठी हुइ

अग्नि शांत हो गई तोभी यह मूर्खिणी बाला विरामको प्राप्त नहीं होती अर्थात् नेत्रोंका फेंकना नहीं छोडती ॥ ६५ ॥

किं कन्दर्प शरं कदर्थयसि रे कोदंडटङ्कारितं ।
रे रे कोकिल कोमलं कलरवं किं वा वृथा जल्पसि ॥
मुग्धे स्निग्धविदग्धचारुमधुरैर्लोलैः कटाक्षैरलं ।
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृतं वर्तते ॥ ६६ ॥

सम्प्रति साटोपपरिवारकदर्पनिराकरणवचनमाह—किमिति ॥ रे कन्दर्प हे मदन ! रे इति नीचसम्बोधने । "नीचसम्बोधने तु रे" इत्यमरः । एवमुत्तरत्रापि । कोदण्डटङ्कारितं कोदण्डटङ्कारवत् कृतं धनुर्गुणटङ्कारयुक्त-मित्यर्थः । "तत्करोति०" इति णिचि [illegible] "[illegible]" । शरं त्वदीयबाणं किं किमर्थम् कुत्सितोऽर्थः कदर्थः । "कोः कत्तत्पुरुषेऽचि" इति कुशब्दस्य कदादेशः । कदर्थं करोषि कदर्थयसि । कदर्थनीयं करोषीत्यर्थः । धात्वर्थे णिचि णिच् । तथा रे रे कोकिल हे [illegible], अत्र "असूयासम्मतिकोपकुत्सनभर्त्सनेषु" इत्यामेडिते [illegible] । "[illegible] तमामेडितम्" इत्यादिना प्राप्तस्य [illegible] "[illegible]" इति पाक्षिकः प्रतिषेधः । "[illegible]" इति [illegible] । कोमलं [illegible] [illegible] । "[illegible] तु [illegible] ध्वनौ तु मधुरास्फुटे । [illegible]" इत्यमरः । किं किमर्थं वा वृथा [illegible] जल्पसि [illegible] । न [illegible] । [illegible] । तथा रे मुग्धे हे सुन्दरि, [illegible] । "[illegible]" इत्यमरः ।

येनातरग द्रवति स स्नेह इति कथ्यते ॥ " इत्युक्तलक्षणस्नेहपरिष्कृतैस्तथा विदग्धै विरक्तस्यापि मन्मथविकारोद्दीपनचतुरैरित्यर्थः । " यद्दर्शने विरक्तोऽपि क्षुभ्यत्येतत्समन्मथम् । " इति लक्षणात् । तथा चारुभिः विषयमात्रविश्रांतिविरहिणीविशृंखलवृत्तित्वमदमथरत्वादिगुणशीलत्वस्य विवक्षितत्वात् स्मिताकारैरित्यर्थ । तदुक्त भावप्रकाशे । " अपरिच्छिन्नविपयमदन्मथरमीलितम् । स्फुरद्भ्रूपक्षतायुक्त तत्स्मेरमिति कथ्यते ॥ " इति । तथा मधुरैः सन्तापहरै । " शीतलीक्रियते तापो येन तन्मधुर स्मृतम् । " इति लक्षणात् । तथा लोलै सतृष्णै. समोगौत्सुक्यभावनातत्परैरित्यर्थः। तदुक्तम्। "कटाक्षैर्हासगर्भैस्तु सभोगौत्सुक्यभावना । " इति । कटाक्षैः । " यद्गतागतविश्रातिवैचित्र्येण प्रवर्तनम् । तारकायाः कलाभिज्ञास्त कटाक्ष प्रचक्षते ॥ " इत्युक्तलक्षणैरलम् । इत्थभूतकटाक्षा न प्रवर्तनीया इत्यर्थः । अत्र वारणार्थयोगात् पक्षे तृतीया । ननु कुत एव निराक्रियते इति चेत्तत्राह । चेतो मदीयाचित्त कर्तृ चुवितमास्वाद्यमान चद्रचूडस्य चन्द्रशेखरस्य चरणध्यानमेवामृत येन तत्तथोक्त सत् वर्तते तिष्ठति । स्मरहरचरणध्यानावधानसत्वरसञ्जातपरमवैराग्योल्लसिताचित्त मामेते क्षुद्रा किं करिष्यतीत्येको भावः । अमृतपानपरितृप्तस्य किमारनालेनेत्यपरो भावः । ब्रह्मानन्दभरितस्य किं वैषयिकक्षुद्रानन्देनेत्यपरतरो भाव । नाहमिदानीं पूर्ववद्युष्मत्किंकर किंतु शङ्करकिंकर अतोऽसाध्य सिसाधयिषता युष्माक कोऽयमपस्मार इत्यपरतमो भाव । सर्वथा नास्माक कामिन्यपेक्षास्तीति परमो भाव । शार्दूलविक्रीडित वृत्तम् ॥ ६६ ॥

अरे क्षुद्र कामदेव ! अपने धनुषके टंकारशब्दसे हमको क्या त्रास देता है। अरे कोकिल ! कोमल मधुर शब्दसे क्या वृथा बोलता है और हे सुंदरी ! प्रेम और चतुराईसे भरे सुंदर मधुर चंचल कटाक्ष अब तू मत चलाव । मेरा मन आस्वादित चंद्रचूड शिवजीके चरणध्यानरूपी अमृतमें मग्न हो रहा है ॥ ६६ ॥

विरहेऽपि संगमः खलु परस्परसंगतं मनो येषाम् ॥
हृदयमपि विघट्टितं चेत् संगो विरहं विशेषयति॥ ६७॥

अथ पञ्चविषयविरक्तिप्रकारमाह—विरह इति ॥ येषां स्त्रीपुरुषाणां परस्परमन्योन्य संगतमन्योन्यानुरागबद्धमित्यर्थः । तेषां विरहेऽपि वियोगावस्थायामपि संगमः खलु समागम एव खलु । "हृदयसंगम एव सुसंगमो न तनुसंगम एव सुसंगमः ।" इति वचनात् अन्तरङ्गबहिरङ्गस्त्वन्यायाच्चेति भावः । मनोनियमने तु संगो विरहहेतुक एव भातीत्याह । हृदयमपि मनोऽपि विघट्टितं सम्यक् क्षतं वैराग्यव्रणीकृतं नेत्यर्थः । संग समागमोऽपि विरहं वियोगमेव विशेषयति विशिष्टं करोति । तमेवापेक्षणीयं करोतीत्यर्थः । तदानीं तस्यैवाक्षतत्वादिति भावः । अतः सर्वथा मनोनियमनमावश्यकं तेन चेन्द्रियप्रवृत्त्युपरमे विषयाणामेकातः परावृत्तिरिति कृत्वा पञ्चविषयविरक्तिर्नामेयमेवेति निगूढा सन्धिः । परस्परेणान "कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः" इति वक्तव्यात्परशब्दस्य द्विर्भावः "समासवच्च बहुलम्" यथा न समासवत्प्रथमैकवचनं तथा पूर्वपदस्येति वक्तव्यं प्रथमैकवचनं द्वितीयाद्येकवचनातरामपरपदस्येति । आर्याभेदः ॥ ९७ ॥

जिन स्त्रीपुरुषोंका मन परस्परके विषयमें अनुरागबद्ध हो उनका उनकी वियोगावस्थामेंभी संगमही है, और जिनका मन विघट्टित (अच्छी तरहसे क्षत) है उनका संगमभी विरहहेतुक है तात्पर्य हृदयसंगमही संगम है, कुछ शरीरका संगम संगम नहीं है ॥ ९७ ॥

किं गतेन यदि सा न जीवति ।
प्राणिति प्रियतमा तथापि किम् ॥
इत्युदीक्ष्य नवमेघमालिकां ।
न प्रयाति पथिकः स्वमन्दिरम् ॥ ९८ ॥

सेवेत्यर्थः। इति विचार्येति शेषः। इहैव गम्यमानार्थत्वादप्रयोगः। प्रयोगे -वा पौनरुक्त्यमित्यलङ्कारिकाः। पन्थानं गच्छतीति पथिकः कश्चित्पान्थः। " पथः कन् " इति कन्प्रत्ययः। नवमेघमालिका नवीनकादम्बिनीं विरहिनिवहसंहारकारिणीमिति भावः। उदीक्ष्य स्वमंदिरं निजगृहं न प्रयाति। वैराग्यनिश्चलचित्तत्वादिति भावः। तदुक्तम्। " यद्भावि तद्भवत्येव यदभावि न तद्भवेत्। इति निश्चितबुद्धीनां न चिंता बाधते क्वचित्॥ " इति। रथोद्धता वृत्तम्॥ ६८॥

यदि प्रियतमा जीती न हो तौ घर जानेसे क्या? और किसी प्रकारसे कदाचित् जीतीभी रही हो तौभी क्या? इस प्रकार कोई पथिक नवीन मेघमालाको देखके विचार करके अपने मन्दिरको नहीं गया॥ ६८॥

विरमत बुधा योषित्संगात्सुखात् क्षणभङ्गुरा-
त्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम्॥
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं।
शरणमथवा श्रोणीबिम्बं रणन्मणिमेखलम्॥ ६९॥

अथ बुधानां तत्र वैराग्यमुपदिशति—विरमतेति॥ हे बुधाः विद्वांसः, योषित्संगात्कर्तिमभागमायत्सुखं तस्मात्। कीदृग्विधात् क्षणभंगुरात् क्षणिकात् क्षणिकसुखप्रदयोषित्संगादित्यर्थः। " भजभासमिदो घुरच् " इति घुरच्प्रत्ययः। " जुगुप्साविराम० " इत्यादिना पञ्चमी। विरमत उपरता भवत। तुच्छसुखदं योषित्समागमं त्यजतेत्यर्थः। " व्याङ्परिभ्यो रमः " इति परस्मैपदम्। किन्तु करुणा दुःखिष्वनुकंपा मैत्री पुण्यकृत्सु मित्रता प्रज्ञा बुद्धिविशेषः सुखिष्वनुमोदितेति यावत्। एतेन पापिषूपेक्षा लक्ष्यते। एता एतान् करणमलशोधकत्वाच्चित्तपरिकर्माणीति वदति सांख्याः। ता एव वधूजनस्तस्य संगमं परिशीलनतात्पर्यमिति यावत्। कुरुत एतेनात्यूर्जसुखं संभवति किं क्षणिकसुखावलंबनेनेति भावः। विपक्षे बाधकमाह। नरके निरये हाराक्रान्तं मुक्ताहारोपशोभितं घनस्तनमंडलं पटुतरकुचकलशभारो

वा । अथेति वाक्यारम्भे । रणन्ती मणिमेखला मणिरचितरशना यस्य तत्तथोक्तम् । काञ्चीकलापरमणीयमित्यर्थ । श्रोणिबिम्ब नितम्बमण्डल वा शरण रक्षण न खलु न भवति हि । करुणादिसमागमस्तु नैव भवत्यतः स एवावश्यं स्वीकर्तव्य इति भाव । हरिणी वृत्तम् ॥ ६९ ॥

हे पण्डितो ! स्त्रियोंके संगसे पैदा हुए क्षणिक नश्वर सुखसे विश्राम लो (हटो) और मैत्री करुणा और प्रज्ञारूपी वधूमे संगम करो । नरकमें जब ताडना होगी उस समय हारोंसे भूषित स्त्रियोंके स्तनमण्डल और क्षुद्रघंटिकासे शोभित कटि रक्षागता न करेगी ॥ ६९ ॥

यदा योगाभ्यासव्यसनकृशयोरात्ममनसो-।
रविच्छिन्ना मैत्री स्फुरति कृतिनस्तस्य किमु तैः ॥
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः ।
सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ ७० ॥

कत्वेऽपि मुखत्वाहुल्याद्बहुलत्वसिद्धिः । तथा सकुचकलशाश्लेषाणि कुचकुम्भालिंगनसहितानि यानि सुरतानि त्वगुपस्थेंद्रियामन्दानन्दकरबाह्याभ्यतरसभोगविशेषास्तैश्च एवमशेषेंद्रियग्रामसतर्पणैरपि तैः किमिति सबन्धः । आत्मानन्दानुभववेलाया तेषामतितुच्छतया प्रतीयमानत्वादिति भावः । शिखरिणी वृत्तम् ॥ ७० ॥

जिनके आत्मा और मनकी सदा योगाभ्यासहीके व्यसनसे निरंतर मित्रता फुरती फिर उन्हें प्रियस्त्रियोंके सम्भाषण, अधरामृत, श्वासोंकी सुगन्धसहित, मुखचन्द्र और कुचकलशोको हृदयसे लगाकर सुरतिसे क्या प्रयोजन है ॥ ७० ॥

यदासीदज्ञानं स्मरतिमिरसंचारजनितं ।
तदा दृष्टं नारीमयमिदमशेषं जगदिति ॥
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां ।
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ७१ ॥

अथ वेदान्तसिद्धान्तरीत्या वैराग्यवर्णन निगमयति—यदेति ॥ यदा यस्मिन् काले स्मरः काम एव तिमिर तिमिराख्यनेत्ररोग अन्धकारश्च गम्यते । "तिमिर नेत्ररोग स्यादन्धकारेऽपि च स्मृतम् ।" इत्यभिधानात् । तस्य सचारेण व्याप्त्या जनितमुत्पादितमज्ञानमविवेक आसीत् तदा तस्मिन् काले अशेष सर्वमिद जगत् नारीमय योषिद्रूपमिति दृष्टमाकलितम् । अज्ञानवशात्तदावबुद्धमित्यर्थः । इदानीमस्मिन् काले तु पटुतर अज्ञाननिरसनदक्षः अन्यत्र नेत्ररोगनिराकरणसमर्थश्च यो विवेकस्तत्त्वज्ञानमेवाजन नेत्रकल्याणार्थमिद्धाजन तज्जुषा प्राप्तवतामस्माक सम्बन्धिनी दृष्टिर्मति दृक्च । असमा समा सपद्यमाना समीभूता । अभूततद्भावे च्विः । निजप्रकृतिमापन्नेत्यर्थः । त्रयाणा भुवनाना समाहारस्त्रिभुवनम् । "तद्धितार्थ०" इत्यादिना समास । पात्राद्यदन्तत्वान्न स्त्रीत्वम् । ब्रह्म ब्रह्ममय मनुते ज्ञानेनावबोधात्प्रपञ्चस्य ब्रह्मरूपमनुभूयते । यथाञ्जनेन नेत्ररोगनिवृत्तौ घटाद्यर्थ-

१ तम इति पाठान्तरम् । २ जायभूत इति पाठान्तरम् । ३ दृशा इति पाठान्तरम् ।

तत्वज्ञानेन कामान्धकारप्रयुक्ताज्ञानावरणापाये परवस्तुनाऽऽत्मकारो भाति ततः सम्यग्दृष्ट्या सर्वमिदं ब्रह्माकारतया पश्यति अयमेव वेदांतसिद्धांत इति भावः। अतो विवेकस्य परश्रेयोहेतुत्वात्तदधिगमार्थमेव यत्न कर्तव्य इति तात्पर्यं। रूपकालंकारः । वृत्त पूर्ववत् ॥ ७१ ॥

कामदेवरूपी तिमिररोगसे उत्पन्न अज्ञान जबतक मुझमें था तबतक समस्त जगत् स्त्रीमय दृष्टि पडता रहा अब हमने सुन्दर विवेकरूपी अञ्जन लगाया है तो समदृष्टि हो गई त्रैलोक्य ब्रह्ममय दीख पडता है ॥ ७१ ॥

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ॥
यावदेव न कुरङ्गचक्षुषां ताड्यते चटुललोचनाञ्चलैः ७२॥

वचसि भवति संगत्यागमुद्दिश्य वार्ता।
श्रुतिमुखरमुखानां केवलं पण्डितानाम्॥
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं।
कुवलयनयनानां को विहातुं समर्थः॥ ७३॥

अथैतेषां दुर्विरक्तत्वाभिद्योतकानीदृशान्येव वचनान्याह—वचसीति॥ श्रुतिमुखराण्यश्रान्तश्रुतिपाठतत्पराणि मुखानि येषां तेषां निरन्तरवेदाभ्यसनव्यसनरसनानां वेदांतपारगाणामपीत्यर्थः। पण्डितानां विवेकिनां वचसि केवलं वाङ्मात्र एव संगत्यागं वस्तुसंसर्गत्यागमुद्दिश्य वार्ता गाढा भवति न स्वतःकरणं इति भावः। कुतः अरुणरत्नग्रंथिः पद्मरागमणिखचितः काञ्च्येव कलापो भूषणं यस्य तत्तथोक्तम्। "शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम्। कलापो भूषणे बर्हे" इति चोभयत्राप्यमरः। कुवलयनयनानामिंदीवराक्षीणां जघनं कटिपुरोभागं विहातुं त्यक्तुं कः समर्थः। प्रायश ईदृशान्येव दुर्विरक्तानां वचनानीति भावः। मालिनी वृत्तम्॥७३॥

संग त्याग करनेकी कथा शास्त्रवक्ता पंडितोंके मुखसे केवल कथनमात्रही है नही तो लालरत्नजडित करधनीवाली कमलनयनी स्त्रियोंके जघनस्थल छोडनेमें कौन समर्थ है॥ ७३॥

स परप्रतारकोऽसौ निन्दति योऽलीकपण्डितो युवतीः॥
यस्मात्तपसोऽपि फलं स्वर्गः [१]स्वर्गेऽपि चाप्सरसः॥७४॥

स इति॥ सोऽसावलीकपंडितः अनृतभाषी। "अलीकं त्वप्रियेऽनृते" इत्यमरः। परप्रतारको लोकवञ्चकः। कोऽसावित्यत आह। यः अलीकपण्डितो युवतीः तरुणीः। "यूनस्तिः" इति तिप्रत्ययः। निंदति गर्हयति स इति सम्बन्धः। ननु निःसंगत्वाद्युवतीनिंदाकरणे कथं प्रतारकत्वमत आह। यस्मात्कारणात् तपसश्चान्द्रायणादेः व्रतोपवासादिरूपस्य वा फलं स्वर्गस्तत्र स्वर्गेऽपि चाप्सरसः उर्वशीप्रभृतयस्तत्रापि तत्संगम एवेत्यर्थः। अतः परप्रतारक इति भावः। "स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशी-

१ स्वर्गेऽपीति पाठान्तरम्। २ तस्यापि फलं तथाप्सरसः इति पाठांतरम्।

सुखाः । " इत्यमरः । स्वपरप्रतारक इति पाठेऽप्ययमर्थः । योऽलीकपण्डितः पण्डितमानी रहस्यानभिज्ञ इत्यर्थः । युवतीर्निंदति असौ स्वस्य परेषां च प्रतारक' आत्मवञ्चकश्चेत्यर्थः । कुतो यस्मादित्यादि शेष समानम् । स्वपरफलवेदनबोधनयोः परिज्ञानाभावादुभयवञ्चक इत्यर्थः । आर्याभेदः॥७४॥

जो स्त्रियोंकी निंदा करता है वह झूठा पंडित है । आप तो ठगाही गया पर औरोंकोभी ठगाता है क्योंकि तपस्याका फल स्वर्ग और स्वर्गका फल अप्सराभोग है सो यहां प्राप्त है ॥ ७४ ॥

मत्तेभकुम्भदलने भुवि सन्ति धीराः ।
केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ॥
किं तु ब्रवीमि बलिनां पुरतः प्रसह्य ।
कन्दर्पदर्पदलने विरला मनुष्याः ॥ ७५ ॥

अथ मन्मथस्यात्यन्तदुर्जयत्वमाह—मत्तेभेति ॥ भुवि भूलोके मत्तेभानां मत्तमातंगानां कुम्भदलने कुम्भस्थलविदारणे समर्था इति शेषः । धीरा. शूराः सन्ति । तथा केचित् पुरुषाः प्रचंडोऽत्यन्तकोपनो यो मृगराजः सिंहस्तस्य वधे हिंसायां दक्षा. समर्थाः सन्ति गजघातिभ्योऽप्युत्तमा. शूरा सम्भवन्तीत्यर्थः । किंतु बलिनां बलाढ्यानां शूराणां ज्ञानबलशालिनामिति च गम्यते । पुरतोऽग्रे ब्रवीमि नि शङ्कं करमुद्धृत्य साडिंडिमघोषमुद्घोषयामीत्यर्थः । किमुद्घोषयसीत्यत आह । प्रसह्य बलात् भुजबलाद्बुद्धिबलाच्चेत्यर्थः । कन्दर्पदर्पदलने मदनमदविदारणे समर्था. मनुष्याः विरलाः मृग्याः प्रायशो न सन्तीत्यर्थ । शंभु तद्भक्ताश्च विना मदनविजयिनो न सन्त्येवेति शिवभक्ताग्रेसरस्य कवेर्निगूढतराभिसन्धिः । अत्र कन्दर्पदर्पेति सकृद्व्यञ्जनद्वयावृत्तेः वृत्त्यनुप्रासाख्यः शब्दालङ्कार. । लक्षण तूक्तम् । वसन्ततिलका वृत्तम् ॥ ७५ ॥

उन्मत्त हाथीके मस्तक विदारनेवाले शूर[1] इस पृथ्वीपर अनेक हैं और प्रचंड सिंहके मारनेमें दक्ष योधाभी कितनेही हैं परन्तु बलवानोंके आगे हम हठकर यह कहते हैं कि कामदेवके मदका दलनेवाला कोई विरलाही पुरुष होगा ॥ ७५ ॥

१ शूराः इति पाठांतरम् ।

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां ।
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ॥
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते ।
यावल्लीलावतीनां हृदि न धृतिमुषो दृष्टिबाणाः पतंति ७६

अथ च पुनर्वचनवैचित्र्यमेवाह—सादिति ॥ नरो विद्वानपीति भावः । सन्मार्गे श्रुतिस्मृतिबोधिताचारे तावत्तावत्पर्यंतमेवास्ते वर्तते । इंद्रियाणां चक्षुरादीनां च तावदेव प्रभवति समर्थो भवति । नियमन इति शेषः । लज्जा जुगुप्सितकर्माचरणाच्चेतःसंकोचलक्षणा व्रीडा च तावदेव विधत्ते अनुवर्तते । विनयं नम्रत्वं च तावदेव समालंबते स्वीकुरुते । कियत्पर्यंतमित्याशङ्कायामाह । भ्रूरेव चापं कार्मुकं तेनाकृष्टाश्च ते मुक्ताश्चेति विशेषणसमासः । एकत्र भ्रूभङ्गपूर्वकमपरत्र चापपूर्वकं च प्रयुक्ता इत्यर्थः । श्रवणपथगताः श्रोत्रमार्गगताः एकत्र कर्णांतविश्रांतत्वादपरत्र तावत्पर्यंतमाकर्षणाच्चेति भावः । नीलानि पक्ष्माणि लोमान्यन्यत्र गरुतश्च येषां ते तथोक्ताः । धृतिं मुष्णतीति धृतिमुषो धैर्यभेदिन एते प्रसिद्धा लीलावतीनां विलासिनीनां दृष्टय एव बाणाः यावद्यावत्पर्यंतं हृदि मानसे वक्षसि न पतंति न प्रविशंति तावदिति सम्बन्धः । तदनन्तरं सन्मार्गप्रवर्तनादिकं निवाढुं कः समर्थ इति भावः । उक्तं च प्रबोधचन्द्रोदये । " तावद्विवेकविभवस्तावत्सन्मार्गवर्तनं पुंसाम् । निपतति दृष्टिविशिखा यावन्नेंदीवराक्षीणाम् ॥ " इति अत्र द्वितीयार्थे समस्तवस्तुवर्तिसावयवरूपकालंकारः । स्रग्धरा वृत्तम् ॥ ७६ ॥

पुरुष सन्मार्गमें तभीतक रहता है, इंद्रियोंको उसी समयतक वशमें रख सकता है और लज्जा विनयभी उसी कालतक रहते हैं जबतक श्यामवर्णोंकी पलकरूपी पंख धारण किये, भौंहरूपी धनुषने छोडे, कानोंतक फैले धैर्य छुडानेवाले लीलावती सुंदर स्त्रियोंके नयनरूपी बाण छुटकर हृदयमें नहीं लगते ॥ ७६ ॥

---

१ स इति पाठांतरम् ।

उन्मत्तप्रेमसंरम्भादारभन्ते यदंगनाः ॥
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ७७ ॥

किं बहुना ब्रह्माप्यगनोद्योगप्रत्यूहाचरणे न धीरो भवतीत्याह—उन्मत्तेति ॥ अंगनाः स्त्रियः उन्मत्तोऽत्युत्कटो यः प्रेमा अनुरागस्तस्य सरम्भात्सभ्रमात् । " सरम्भः सभ्रमे कोपे " विश्वः । यत्कर्मारमते विहितमाविहित वा कर्तु-मुद्युञ्जत इत्यर्थः । तत्र कर्मणि प्रत्यूहं विघ्नम् । " विघ्नोऽन्तराय. प्रत्यूहः" इत्यमरः । आधातु कर्तुं ब्रह्मापि किमुतान्य इति भावः । कातर· सभयः असमर्थ खल्वित्यर्थः । अनिवारानिश्चयानामनावृतानामङ्गनाना को वा निवारयितोति भाव' ॥ ७७ ॥

अतिप्रेमके उमंगसे उन्मत्त होकर स्त्रीलोग जिस कामका आरम्भ कर देती हैं उस कामके रोकनेकी ब्रह्माकीभी शक्ति नहीं ॥ ७७ ॥

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ॥
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ ७८ ॥

तावदिति ॥ महत्त्व महानुभावत्व पाण्डित्य प्राज्ञत्व कुलीनत्वं महाकुल-प्रसूतत्वम् । " कुलात्खः " इति खप्रत्ययः । विवेकिता कर्तव्याकर्तव्य-विचारचतुरत्वं च तावत्तावत्पर्यंतमेव भवतीति शेषः । यावत् हतो नीचः अश्लाघ्यतापादकत्वान्निकृष्टः । पञ्चारविंदादय. इषवो बाणा यस्य स पञ्चेषुः मदनः स एव पावकोऽग्निरङ्गेषु न ज्वलति नाविर्भवति न सन्तापयतीत्यर्थ । तावदिति सवन्धः । तदनन्तर को वा महत्त्वादिगुणविशिष्ट इति भाव. । " अरविन्दमशोकं च चूत च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥" इत्यमरः । अत्र मदने अग्निरूपणादेकदेशवर्तिरूपकम् ॥ ७८ ॥

बडाई, पंडिताई, विवेक और कुलीनता ये सब मनुष्यकी देहमें तभीतक रहते हैं जबतक शरीरमें कामाग्नि नहीं प्रज्वलित होती ॥ ७८ ॥

शास्त्रज्ञोऽपि प्रगुणितनयोऽप्यात्तबोधोऽपि बाढं ।
संसारेऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ॥
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती ।
वामाक्षीणां भवति कुटिलभ्रूलताकुञ्चिकेव ॥ ७९ ॥

अथ सासारिकस्य सद्गतिर्दुर्लभेति सहेतुकमाह—शास्त्रज्ञ इति ॥ शास्त्रज्ञः सकलशास्त्ररहस्याभिज्ञोऽपि । " आतोऽनुपसर्गे कः " इति कप्रत्यय । तत्रापि प्रगुणित. प्रकर्षेणावृत्तिविषयीकृतो नयो नीतिशास्त्र येन स तथोक्तोऽपि फलवदर्थाववोधनपर्यंत सम्यक्परिशीलितनीतिशास्त्रोऽपीत्यर्थः । गुणशब्दात् " तत्करोति० " इति ण्यताल्कर्मणि क्त । णाविष्ठवद्भावे " विन्मतोर्लुक् " इति लुक् । " गुणस्त्वावृत्तिशब्दाल्ये ज्येन्द्रिये मुख्यततुषु । " इति वैजयन्ती । तथा वाढ दृढमात्तबोध उत्पन्नज्ञानोऽपि पुमानस्मिन् परिवर्तमाने ससारे सद्गतीना भाजन पात्र योग्य इति यावत् । विरलो मृग्यो भवति स्वर्गादिसद्गतिगामी य: कश्चिदेव भवति न तु बहुल इत्यर्थ । कुत येन कारणेन एतस्मिन् ससारे वामाक्षीणा मनोहरनयनानाम् । "बहुव्रीहौ" इत्यादिना षाचे षित्वात् ङीप् । कुटिला वक्रा भ्रूर्लतेव भ्रूलता भ्रूवल्ली कुञ्चिकेव विष्कम्भविघट्टनसाधनवक्राग्रायोमयशलाकेव निरयनगरस्य यमपुरस्य द्वार लक्षणया द्वारपिधानकवाटविष्कम्भमित्यर्थः । द्वारशब्देन कवाटस्य तेन च तद्विष्कम्भस्य च लक्षितत्वादुद्घाटयती विघट्टयन्ती व्यामोहोत्पादनेन दुर्गतौ प्रवेशयतीत्यर्थ । भवाति खलु अतो विरल इति सम्बन्ध । स्त्रीसंगिना कुत सद्गतिरिति भावः । उपमालकार: । मदाक्रान्ता वृत्तम् ॥ ७९ ॥

शास्त्रज्ञ और नय जाननेवाला और ज्ञानी[1] भी हो परन्तु इस संसारमें दृढतासे सद्गतिका पात्र कोई विरलाही पुरुष होता है इस हेतु कि यहां नरकनगरके द्वारके तालेको सुंदर नेत्रवाली स्त्रियोंकी टेढी भौंह लता घूमती कुंजीके समान खोलती है ॥ ७९ ॥

---

१ प्रभिन्नविनयोऽप्यात्त० इति पाठांतरम् ।

कृशः काणः खंजः श्रवणरहितः पुच्छविकलो ।
व्रणी पूयाक्लिन्नः कृमिकुलशतैरावृततनुः ॥
क्षुधाक्षामो जीर्णः[1] पिठरककपालार्पितगलः ।
शुनीमन्वेति श्वा हतमपि च[2] हन्त्येव मदनः ॥ ८० ॥

अथ द्वाभ्यां मन्मथस्य चरित्रवैचित्र्यमाह—कृश इति ॥ कृशः पिंडालाभादस्थिचर्मावशिष्टदेहः । काणोऽधक. यद्वा एकाक्षः । खजः पादविकलः । अकार्यकरणेन लगुडप्रहाराद्भग्नपाद इत्यर्थः तथा श्रवणरहितः समूल छिन्नः कर्णः । पुच्छेन विकलः छिन्नलांगूलः । " येनागविकारः " इति समासः । व्रणी सर्वांगक्षतिमान् । पूयेन क्लिन्न आर्द्रः । कृमीणा व्रणोत्पन्नापादतुच्छजतूनां कुलशतैरनेककृमिपरपराभिरित्यर्थः । आवृता व्याप्ता तनुर्यस्य स तथोक्तः । क्षुधा बुभुक्षया क्षाम इति मन्तव्यम् । जीर्ण जरया शिथिलावयवः पिठरककपालेन घटमुखवलयेनार्पितगल आसञ्जितकण्ठनालः । शुनको हि घटमुखे स्वशिरो निक्षिप्य अन्न भक्षयति ततस्तावतैव परिपुष्टत्वेनाकृष्टुमशक्यत्वाद्भुवि विघट्टनेनाधःकपालापाये तन्मुखकपालेनासंजितकण्ठो भवतीति प्रसिद्धिः । अत एवभूत इत्यर्थः । यद्वा चौर्येणान्नादिभक्षणे तद्दडनार्थं भ्राष्ट्र मध्ये छिद्र कृत्वा गले आसजयति तस्मादित्थभूत इत्यर्थः । एव जुगुप्सितोऽपि श्वा शुनकः शुनीं सारमेयीम् । नातत्वात् ङीप् । अन्वेत्यनुसरति निधुवनार्थमिति भावः । तथा हि हत विनष्टमपि च मदनो हन्त्येव मनोविकारोत्पादनेन पीडयत्येव । न तु हतहननमन्याय्यमिति विचारयतीत्यर्थ. । शठोऽय मदनः क वा कन्थभूतावस्थापन्न न करोतीति भावः । अत्र एवकारोऽत्यतायोग्यव्यवच्छेदार्थ । पार्थो धनुर्धरो भवत्येवेत्युदाहृत्य क्रियागतैवकारस्य तथाभूतार्थकत्वानुशासनात् । शिखरिणी वृत्तम् ॥ ८० ॥

दुर्बल, काना, लंगडा, बहिरा, पूंछसे हीन, जिसके घावोंमें राध भरी हो और शरीरपर कीडे फिरते हों, भूंखसे थका, वृद्ध, मिट्टीके घडेका कण्ठ जिसके गलेमें हो ऐसाभी श्वान कुत्तीके पीछे

---

१ जीर्णोऽपि करक० इति पाठान्तरम् । २ निहन्त्येव इति पाठान्तरम् ।

भोगके लिये जाता है, इससे यह सिद्ध हुआ कि कामदेव मरे-को भी मारता है ॥ ८० ॥

स्त्रीमुद्रां कुसुमायुधस्य जयिनीं सर्वार्थसम्पत्करीं।
ये मूढाः प्रविहाय यांति कुधियो मिथ्याफलान्वेषिणः॥
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः।
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ९१॥

स्त्रीमुद्रामिति ॥ सर्वार्थानां सम्पद करोतीति सर्वार्थसंपत्करीम्। धर्मार्थ-कामपुरुषार्थसमृद्धिहेतुभूतामित्यर्थः। "कृञो हेतुताच्छील्यानुलोम्येषु" इति टप्रत्ययः। टित्वात् ङीप्। कुसुमायुधस्य जगज्जैत्रस्य मन्मथस्य जयनीं जगद्वशामित्यर्थः। "जिदृक्षि०" इत्यादिना इनिप्रत्ययः। स्त्रीमुद्रां स्त्रीरूपचिह्नं विहाय त्यक्त्वा कुधियो दुर्बुद्धयः अत एव मूढाः कर्तव्याकर्तव्यविचारशून्याः मिथ्याफलान्वेषिणः अभूतचरत्वादसत्यप्रायमोक्षफलाकांक्षिणः सन्तः यान्ति प्रव्रजन्तीत्यर्थः। ते मूढास्तेन निजमुद्राहासजनितकोपेन कुसुमे-षुणैव निर्दयतरं दयाहीनं यथा तथा निहत्य नीचैः कृत्वा केचिन्नग्नीकृताः। "नग्नोऽवासा दिगम्बरः" इत्यमरः। अभूततद्भावे च्विः। "अस्य च्वौ" इति दीर्घः। "ऊर्यादिच्विडाचश्च" इति गतिसंज्ञायां "कुगतिप्रादयः" इति समासः। केचिन्मुण्डिताः परमहंसीकृताः न तु सौभाग्यसम्पन्नीकृता इत्यर्थः। अतः कुसुमेषुमुद्रारूपाः स्त्रियो न परिहर्तव्या इति भावः। यथा लोके राजानस्तीक्ष्णदण्डा निजाज्ञोल्लंघनापराधिजनान् कांश्चित्सर्वांगापहारेण वस्त्रहीनान् कुर्वंति। कांश्चित् सर्वतो मुण्डितशिरस्कान् कांश्चिदर्धमुण्डितमुण्डान् कांश्चिज्जटाधारिणः कांश्चित्कपालभिक्षुकान्कुर्वंति तद्वद-त्रापि ज्ञेयम्। अत्र वैराग्यकारणत्वादेः कुसुमेषुकृतत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः। सा च नूनमित्यादिव्यञ्जका प्रयोगाद्गम्या। शार्दूलविक्रीडित वृत्तम् ॥ ८१ ॥

स्त्रियां कामदेवकी मुद्रा सब अर्थ और सम्पत्की करनेवाली हैं जो मूढ कुबुद्धि उन्हें छोड स्वर्गादिकी इच्छासे निकल भागते

१ तदवेतनम्य इति पाठान्तरम्। २ जननीं इति पाठान्तरम्।

हैं उन्हें विरक्तके वेषमें न समझो किन्तु कामदेवने दया त्याग दण्ड देकर उन्हे नङ्गा किया, किसीका शिर मुंडवाया, किसीके पांच चोटी रखीं, किसीके जटा रखवाई, किसीके हाथमें ठीकरा दे भीख मङ्गवायी ॥ ८१ ॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशना-।
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ॥
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवा-।
स्तेषामिंद्रियनिग्रहो यदि भवेद्विंध्यः प्लवेत्सागरे ८२॥

किं बहुना महर्षयोऽपींद्रियनिग्रहसमर्था न जाता इत्युपसंहरति—विश्वामित्रेति ॥ वाताम्बुपर्णान्येवाशनं येषां ते तथोक्ताः शरीरयात्रामात्रोपयोगिवायूदकपरिणतपर्णाहारा एव न त्विंद्रियतुष्टिकरमृष्टान्नभोजना इत्यर्थः । विश्वामित्रपराशरप्रभृतयः । विश्वस्य मित्रं विश्वामित्रो गाधिनन्दनः । " मित्रे चर्षौ " इति दीर्घत्वम् । पराशरो व्यासपिता तौ प्रभृति येषां ते तथोक्ताः। प्रभृतिशब्देन शाण्डिल्यादयोऽपि संगृह्यन्ते । ये महर्षयः सन्तीति शेषः । तेऽपि सुललितमतिसुन्दरम् । " ललितं त्रिषु सुन्दरम् " इति शब्दार्णवे । स्त्रीणां मेनकारम्भासत्यवतीवान्यमालिन्यादिर्योषिता मुखपङ्कजं दृष्ट्वैवालोक्यैव मोहं गताः तत्परतन्त्राः जाताः न त्विंद्रियनिग्रहसमर्था इत्यर्थः । किंतु ये मानवाः साधारणमर्त्याः सघृतमाज्यप्लुतं तदपि पयसा क्षीरेण दध्ना च युतं मिश्रितं शाल्यन्नं कलमाख्यव्रीह्यन्नमत्यन्तवीर्यवृद्धिकरं मृष्टान्नमित्यर्थः । भुञ्जते अभ्यवहरन्ति । " भुजोऽनवने " इत्यात्मनेपदम् । तेषां मानवानामिंद्रियनिग्रहः इन्द्रियदमनं भवेद्यदि तदा विंध्यः पर्वतः सागरे प्लवेत् उन्मज्जेत् । न तु कदाचिदपि विंध्यः प्लवति ग्राव्णःप्लवनस्याश्रुतचरत्वात्तथा च विंध्यप्लवनस्य यथा असम्भावितत्वं तथेंद्रियनिग्रहस्यापीत्यर्थः । वाताद्यशनानामृषीणामेवैतादृशावस्थापन्नत्वं किमुत मृष्टान्नभोजनानां मानवानामिति भावः ।

---

१ तरेत्सागरम् इति पाठान्तरम् ।

अत्रेंद्रियाणां निग्रहसम्बन्धेऽपि विंध्यप्लवनदृष्टांतेनासम्बन्धोक्तेः सम्बन्धे सम्बन्धरूपातिशयोक्तिः। वृत्तं पूर्ववत् ॥ ८२ ॥

विश्वामित्र, पराशर इत्यादि बडे ऋषि जो वायु जल और पत्ते खाय पीके रह जाते थे वेभी स्त्रीसुखकमलको देखके मोहको प्राप्त हुए अब जो मनुष्य घी दूध दही इत्यादि अच्छे व्यञ्जन भोजन करते हैं उनकी इन्द्रियां जो वशमें हो जांय तौ समुद्रपर विंध्याचलके तैरनेमे क्या आश्चर्य है अर्थात् इन्द्रियोंको वशमें नहीं कर सकते ॥ ८२ ॥

परिमलभृतो वाताः शाखा नवांकुरकोटयो ।
मधुरविधुरोत्कण्ठाभाजः प्रियाः पिकपक्षिणाम् ॥
विरलविरलस्वेदोद्गारा वधूवदनेन्दवः ।
प्रसरति मधौ धात्र्यां जातो न कस्य गुणोदयः ८३ ॥

प्रासंगिकं परिसमाप्य प्रस्तुतशृंगारोपयोगितया ऋतुवर्णनं प्रारिप्सुस्तदादौ लोकवेदयोः प्राथम्येन व्यवहाराद्वसंतं वर्णयति परिमलेत्यादिपङ्क्तिः—परिमलेति ॥ वाता उपवनपवनाः परिमलं बिभ्रतीति परिमलभृतः। विविधकुसुमसमर्दजनितगन्धविशेषबधुरा जाता इति शेषः। "विमर्दोत्थे परिमलो गन्धे जनमनोहरे।" इत्यमरः। शाखा रसालादितरुकक्षाः नवांकुराणि-नूतननिर्मलयानि कोटिष्वग्रेषु यासां तास्तथोक्ताः पल्लविता जाता इत्यर्थः। पिकपक्षिणां पिकाख्यपक्षिविशेषाणां प्रियाः कोकिलांगना इत्यर्थः। "कोकिलः पिक इत्यपि" इत्यमरः। मधुरा सहकारांकुरकषायास्वादलाभादनुगुणा विधुरा कान्ताकृतोपद्रववशाद्विगुणा च कष्टेति यावत्। या उत्कंठा कूजितौत्सुक्यं तां भजन्तीति तथोक्ता जाताः। "भजो ण्विः" इति ण्विप्रत्ययः। "विधुरः स्यात्कष्टविश्लिष्टयोरपि" इति विश्वः। वधूनां वद-

---

१ विरलोत्कटा शाचा इति पाठांतरम्। २ विरलसुरत० इति पाठान्तरम्।
३ राध्यां इति पाठांतरम्।

नेदवो वक्त्रचद्राः विरलविरलो ग्रीष्मातिरेकाभावान्मदप्रकारः । " प्रकारे गुणवचनस्य " इति सादृश्यार्थे द्विर्भावः । स्वेदोद्गारः श्रमजलनिष्यदो येषा ते तथोक्ता जाता. । अत्रोद्गारशब्दस्य गौणवृत्तिसमाश्रयणाल्ल ग्राम्यकक्षामव्यपतितत्वमित्युक्त प्राक् । तया हि धात्र्या भुवि मधौ वसते प्रसरति व्याप्रियमाणे सति कस्य वस्तुनो गुणोदयो गुणोत्कर्षो न जात. सर्वस्यापि जायते एवेत्यर्थः । " गत्यर्थाकर्मक० " इत्यादिना वर्तमाने कर्तरि क्तप्रत्यय । " मतिबुद्धिपूजार्थेभ्यश्च " इति चकारात् वर्तमानता । " अथ पुष्परसे मधु, दैत्ये वसते चैत्रे च " इति विश्वप्रकाशः ॥ ८३ ॥

सुगंधित पवन चल रही है, वृक्षोकी शाखाओंमें नये पत्रोंके अंकुर निकले हैं, कोकिलादि पक्षियोंकी वाणी मधुर सुंदर उत्कंठा भरी प्यारी लगती है और स्त्रियोंके मुखचंद्रपर रतिश्रमके विलग प्रस्वेद बूंदके कण शोभित हैं ऐसी वसंतऋतुमे इस भूपर किस किस वस्तुमे गुणकी ज्योति नहीं प्रकाश होती ॥ ८३ ॥

मधुरयं मधुरैरपि कोकिला- ।
कलरवैर्मलयस्य च वायुभिः ॥
विरहिणः प्रहिणस्ति शरीरिणो ।
विपदि हन्त सुधाऽपि विषायते ॥ ८५ ॥

अय पूर्वोक्तो मधुर्वसन्तः सकलचराचरोल्लासकर इति भाव. । मधुरैः श्राव्यैः सन्तापहरैर्वा । " शीतलीक्रियते तापो येन तन्मधुर स्मृतम् । " इति लक्षणात् । कोकिलाना पिकसुन्दरीणा कलरवैरव्यक्तमनोहरस्वरविशेषै । " काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे । कल. " इत्यमर । कोकिलेत्यत्र जातिग्रहणे कोकिलाजातावपीति न ङीप् । तया मलयस्य वायुभिः श्रीखण्डशैलानिलैश्च अत्यतसुखावहैरपीति भाव । विरहिण शरीरिणो वियोगिजनान् प्रहिणस्ति विनाशयति । तथा हि विपद्यापत्काले सुधा अमृतमपि विषायते विषमिवाचरति । तद्वत्प्राणप्रयामकरी भवतीत्यर्थ । " उपमानादाचारे " इति क्यच् । " अकृत्सार्वधातुकयोर्दीर्घ "

इति दीर्घः । हतांत विषादे । "हंत हर्षेऽनुकंपायां वाक्यारंभविषादयोः ।" इत्यमरः । सामान्यविशेषणसमर्थनरूपोऽर्थांतरन्यास । स च विषाद इत्यत्र उपमाया अंगेन संकीर्यते । अनुप्रासः शाब्दः । द्रुतविलंवितं वृत्तम् ॥ ८४ ॥

मधुर मधुर कोकिलोंके शब्द और मलयाचलके पवनसे यह चैत्रमास विरहियोंका वध करता है इससे यह जान पडता है कि विपत्तिमें अमृतभी विष हो जाता है ॥ ८४ ॥

आवासः किलकिंचितस्य दयिताः पार्श्वे विलासालसाः ।
कर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः ॥
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सितांशोः कराः ।
केषांचित्सुखयन्ति चात्र हृदयं चैत्रे विचित्राः स्रजः ॥ ८५ ॥

विरहिणामेवातिकृच्छ्रं न त्वन्येषामित्याह—आवास इति ॥ पार्श्वे परिसरे किलकिंचितस्य । "रोषाश्रुहर्षभीत्यादेः सङ्कर किलकिंचितम् ।" इत्युक्तलक्षणशृंगारचेष्टाविशेषस्यावासो निवासभूताः । अत्राधारमात्रविवक्षयैकवचनग्रहणमिति विवेकः । तथा विलासालसा. लीलामन्थरा कटाक्षभुजाक्षेपादिविविधविभ्रमाचरणतत्परा इत्यर्थ । एतेनैतासा स्मरमन्दीकृतव्रीडाचारप्रागल्भ्य सूच्यते । दयिताः प्रियतमाश्च । कर्णे कर्णयोरित्यर्थः । "स्तनादीना द्वित्वविशिष्टा जाति प्रायेण" इति वामनसूत्रे प्रायग्रहणादेकवचनप्रयोग । कोकिलकामिनाना कलकण्ठाङ्गनाना कलरवोऽव्यक्तमधुरस्वरश्च । स्मेर ईषद्विकासितकुसुम इत्यर्थ. । अत्र कुसुमधर्मे कुसुमिते उपचर्यते । "ष्मिङ् ईषद्धसने" इति धातो "नमिकम्पि०" इत्यादिना रप्रत्ययः । लतामडपो लतागृहं च । कतिपयै कैश्चिदेव । अन्यथा रसाभासात् सत्कविभिः सरसविचित्रचारुप्रवन्धप्रणयनचतुरतरकवीश्वरैः समं गोष्ठीः प्रसंगश्च । मुग्धा मनोहरा' सितांशो' कराश्च । विचित्रा नानाविधा' स्रजः पुष्पमालि—

१ प्र [illegible] इति पाठान्तरम् । २ नव्या. इति पाठांतरम् । ३ नेत्रहृदये इति पाठान्तरम् । ४ धारा इति पाठांतरम् ।

चाश्च । अत्र अस्मिन् चैत्रे वसते केषांचिदन्येषामेवेत्यर्थः । हृदयं सुखयति रञ्जयति । न तु सर्वेषामित्यर्थः । ईदृग्सौभाग्यसंपन्नानां विरलत्वादिति भावः । अत्र खले कपोतन्यायाद्दयितादिबहुकारणानां हृदयरञ्जनरूपैककार्यसाधनसमुद्योगकथनाद्द्वितीयः समुच्चयालंकारः । तदुक्तं विद्यानाथेन । "खले कपोतन्यायेन बहूनां कार्यसाधने । कारणानां समुद्योगः स द्वितीयः समुच्चयः ॥" इति । शार्दूलविक्रीडितं वृत्तम् ॥ ८५ ॥

किलकिंचित विलाससे शिथिल हो प्यारीके संग रहना, कानसे कोकिलाके शब्दकी कलकलाहट सुनना और चांदनीका सुख उठाना और विचित्र माला ऐसी सामग्री चैत्रमासमें किसी पुण्यवानहीके हृदयको सुख देती हैं ॥ ८५ ॥

पान्थस्त्रीविरहानलाहुतिकलामातन्वती मञ्जरी ।
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ॥
अल्पास्ते[१] नवपाटलापरिमलप्राग्भारपाटच्चराः[२] ।
वान्ति क्लान्तिवितानतानवकृतः श्रीखण्डशैलानिलाः ॥ ८६ ॥

पान्थस्त्रीति ॥ अधुनेदानीं वसन्तसमय इत्यर्थः । पान्थस्त्रीणां प्रोषितभर्तृकाणां विरहानलस्य वियोगाग्नेराहुतिकलामाहुतिकलनां तत्साम्यमित्यर्थः । "कला शिल्पे कालभेदे चन्द्रांशे कलना कला ।" इति वैजयन्ती । आतन्वती आदधाना तद्वदुद्दीपकेत्यर्थः । तनोतेः शतरि "उगितश्च" इति ङीप् । माकन्देषु रसालविशेषेषु विद्यमानेति शेषः । मञ्जरी पुष्पमञ्जरी पिकाङ्गनाभिः कोकिलाभिः सोत्कण्ठमालोक्यते सानन्दमुद्वीक्ष्यते इष्टत्वादिति भावः । तथा पाटला फलेरुहाख्यवृक्षविशेषः । "पाटलिः पाटला मोघा काचस्थाली फलेरुहा ।" इत्यमरः "पुष्पमूलेषु बहुलम्" इति लुपि युक्तवद्व्यक्तिवचने भवतः । नवपाटलापरिमलप्राग्भारस्य नूतनपाटलीकुसुमगन्धसंपत्तेः पाटच्चरा मलिम्लुचाः तद्गन्धापहारिण इत्यर्थः । तथा क्लान्तिवितानस्य क्लान्तिसमूहस्य तानवं तनुत्वं कुर्वन्तीति क्लान्तिवितानतानवकृतः । करोतेः

१ अप्येते इति पाठान्तरम् । २ परिमला प्राग्भार इति पाठान्तरम् ।

किन्। अत्र मदा ते प्रसिद्धाः शैत्यमान्द्यसौरभ्यसंयुक्ताः श्रीखडशैलानिला मलयमारुताः वान्ति प्रसरति। "वा गतिगन्धनयोः" इति धातोर्लट्। एतेन विरहिणां दुरन्तदुःखजनकत्वसंयुक्तानां परमानन्दकत्वं चास्योक्तमित्यवगन्तव्यम्। अत्र वियोगाग्निरित्यत्र रूपकमाहुतिफलामित्यत्रोपमया सापेक्षितत्वात्संकीर्णं सच्छाब्देनानुप्रासेन संसृज्यते। वृत्तं पूर्ववत्॥ ८६॥

बटोहियोंकी जो विरहिणी स्त्रियां उनकी विरहाग्निमें आहुति फला फैलाती हुई जो आमके मौर हैं उन्हें कोकिला बडे अभिलापसे देखती हैं। इस वसन्तऋतुमें ये नवीन पाटल पुष्पके सुगन्धके पुंजको चुरानेवाले और विरह विस्तारको नया करनेवाले मलयाचलके पवनभी गमन करते हैं॥ ८६॥

प्रथितः[1] प्रणयवतीनां तावत्पदमातनोतु हृदि मानः॥
भवति न यावच्चंदनतरुसुरभिर्मलयपवमानः[2]॥ ८७॥

प्रथित इति॥ प्रथित प्रसिद्ध दृढतर इति यावत्। मानः प्रियतमस्यान्यस्त्रीसंगित्वजनितेर्ष्याकृतकोप। "स्त्रीणामीर्ष्याकृत कोपो मानोऽन्यासंगिनि प्रिये। श्रुते वानुमिते दृष्टे" इति दशरूपे। प्रणयवतीनां प्रियतमानां हृदि तावत्तावत्पर्यंत पदं स्थानमातनोतु करोतु तिष्ठत्वित्यर्थः। संभावनायां लोट्। "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु।" इत्यमरः। कियत्पर्यंतमित्यत आह। चंदनतरुसुरभि श्रीखंडद्रुमपरिशीलनसुगंधि। "सुगंधौ च मनोज्ञे च सुरभिर्वाच्यलिंगवत्।" इति विश्वः। मलयपवमानो मलयमारुतो यावत्पर्यंत न भवति न प्रसरति तावदिति संबंधः। सामान्यस्य विशेषपर्यवसानात्प्रसरणार्थत्वं भुवो द्रष्टव्यम्। "यावत्तावच्च साकल्येऽवधौ मानावधारणे।" इत्यमरः। अस्यात्यंतोद्दीपकत्वान्मानिन्योऽतिदृढमपि निजमानं विहाय प्रियतमपरतंत्राः स्वयमेव भवंतीत्यर्थः। आर्याभेद॥ ८७

---

1 प्रियपुरतो युवतीनां इति पाठान्तरम्। २ मधुसुनिर्मलः पवन इति पाठान्तरम्।

मणयवाली स्त्रियोंके हृदयमें यह प्रसिद्ध मान तभीलौं ठहरता है जबलौं चंदनकी सुगंधभरी मलयाचलकी स्वच्छ वायु नहीं चलती ॥ ८७ ॥

सहकारकुसुमकेशरनिकरभरामोदमूर्च्छितदिगन्ते ॥
मधुरमधुविधुरमधुपे मधौ भवेत्कस्य नोत्कण्ठा ॥८८॥

सहकारेति ॥ सहकारकुसुमानां रसालविशेषप्रसूनानाम् । " आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः । " इत्यमरः । ये केशरनिकरा. किंजल्कपुञ्जास्तेषां ये भराः समृद्धयस्तेषामामोदेन परिमलविशेषेण मूर्च्छिता व्याप्ता दिगन्ता यस्मिन् तस्मिन् मधुरेण माधुर्यगुणयुक्तेन मधुना मकरंदेन विधुरा विह्वला उन्मत्ता इति यावत् । मधुपा भृंगा यस्मिन् तस्मिन् इत्यमस्योक्तमुद्दीपकत्वमित्यर्थः । मधौ वसते कस्य जनस्य स्त्रियो वा पुरुषस्य वेत्यर्थः । उत्कंठा संभोगौत्सुक्य न भवेन्नोत्पद्येत अत· सर्वस्यापि उत्पद्यत एवेत्यर्थ । अतो मानत्यागो युज्यत इति भावः । अनुप्रासश्च शब्दालंकार । वृत्त पूर्ववत् ॥ ८८ ॥

आमके मोरकी जो केसर उसके समूहकी सुगन्ध दिशाओंमें छाय रही और मीठे मीठे मकरन्द पानकर जिसमें भ्रमर उन्मत्त हो रहे हैं ऐसे ऋतुराज वसन्तमें किसे उत्कण्ठा नहीं होती ॥८८॥

अच्छाच्छचन्दनरसार्द्रतरा मृगाक्ष्यो ।
धारागृहाणि कुसुमानि च कौमुदी च ॥
मन्दो मरुत्सुमनसः शुचि हर्म्यपृष्ठं ।
ग्रीष्मे मदं च मदनं च विवर्द्धयन्ति ॥ ८९ ॥

अथ त्रिभिर्ग्रीष्म वर्णयति—अच्छाच्छेति ॥ अच्छाच्छोऽतिस्वच्छो यश्चंदनरस· पटीरद्रवः । " गुणे रागे द्रवे रस. " इत्यमर. । तेनार्द्रतरा अत्यतार्द्राः सन्तापशांत्यर्थं सांद्रचन्दनपङ्कचार्चितांगा इत्यर्थः । मृगाक्ष्यस्तरुण्यश्च, धारागृहाणि जलयन्त्रवेश्मानि, कुसुमानि मल्लिकादीनि, कौमुदी

१ रसार्द्रकरा इति पाठान्तरम् ।

चन्द्रिका च सुमनसो जात्याः सम्बन्धी ग्रीष्मेऽतिविकाससम्भवात्तत्कुसुम-परिशीलनजनितामोदभरित इत्यर्थः। "सुमना मालती जाती" इत्यमरः। मन्दो मरुत् मन्थरगन्धवाहश्च, शुचि शुभ्र सुधालेपनेनेति भाव.। हर्म्यपृष्ठ सौधोपरिप्रदेशश्चेति ग्रीष्मे ऋतौ मद हर्षव्यतिकर मदन च विवर्धयन्त्युद्दीपयन्ति। अत्रापि द्वितीयसमुच्चयालङ्कार उन्नेयः॥ ८९॥

अतिस्वच्छ चन्दनके रससे जिन स्त्रियोंका अंग चर्चित है ऐसी स्त्रियें, फुहारेवाले मन्दिर, मन्द सुगन्धित पुष्प, विकसित चांदनी, सुगन्धित लता, मन्द मन्द पवन और महलकी श्वेत छत ये सब सामग्री ग्रीष्मऋतुमें कामदेवको और मदको बढाते हैं॥ ८९॥

स्रजो हृद्यामोदा व्यजनपवनश्चन्द्रकिरणाः।
परागः कासारो मलयजरजः शीधु विशदम्॥
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो।
निदाघर्तावेतद्विलसति लभंते सुकृतिनः॥ ९०॥

स्रज इति॥ हृद्यामोदा मनोहरगन्धा स्रज. पुष्पमालिकाश्च। व्यजनपवन-स्तालवृन्तमारुतश्च। "व्यजन तालवृन्तकम्" इत्यमरः। चन्द्रकिरणाश्च, पराग सुमनोरजश्च, कासार क्रीडासरश्च, मलयजरजश्चन्दनक्षोदश्च, विशद निर्मल शोभते अनेनेति शीधु मद्य च। "शीङो धुक" इत्यौणादिको धुक्प्रत्यय। शुचि शुभ्रो विहारयोग्य इत्यर्थ.। सौधोत्सङ्गः प्रासादप्रदेशश्च, प्रतनु वसन सूक्ष्माम्बर, पङ्कजदृश पद्मपलाशलोचनाश्चेत्येतत्सर्वं भोगसाधनम्। "नपुंसक०" इत्यादिना नपुंसकैकशेष। निदाघर्तौ ग्रीष्मर्तौ। "आद्गुण" इति रपरो गुण। विलसति विजृम्भमाणे सति सुकृतिनः पुण्यशालिनो लभन्ते प्राप्नुवन्ति। कथममुकृतानामिदंभोगसाधनलाभ इति भाव। शिखरिणी वृत्तम्॥ ९०॥

अच्छी सुगन्धित माला, पंखेका वायु, चादनी, पुष्पोंका पराग, तडाग, चंदन, उज्ज्वल मद्य, श्वेत धामकी अच्छी ऊंची छत,

१ निदाघे तूर्णं तत्सुखमुप० इति पाठान्तरम्।

अच्छे मलमलसे महीन वस्त्र और कमलनयनी सुन्दर स्त्री इत्यादि पदार्थोंसे ग्रीष्मऋतुमें पुण्यवान् पुरुष सुख उठाते हैं ॥ ९० ॥

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः ।
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभिः ॥
स्रजो हृद्यामोदास्तदिदमखिलं रागिणि जने ।
करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे ॥ ९१ ॥

सुधेति ॥ सुधया लेपनद्रव्येण शुभ्रं यद्वा सुधा अमृतं तद्वच्छुभ्रम् । " सुधा स्याल्लेपनद्रव्येऽमृते च " इति विश्वः । अतिसुरभि अत्यन्तसुगन्धि रागिणि विषयासक्ते विषयसंसर्गविमुखे विरक्ते । विरक्तस्य तेषामकिंचित्करत्वादिति भावः । निगदितव्याख्यानमन्यत् । वृत्तं पूर्ववत् ॥ ९१ ॥

चूनेसे सपेद अच्छा उज्ज्वल धाम, निर्मल चांदनीका चन्द्रमा, प्यारीका मुखकमल, सुगंधित चन्दन, अच्छे सुगंधित पुष्पोंकी माला ये सब वस्तु अनुरागी पुरुषोंके हृदयमे अत्यंत क्षोभ करते हैं; परन्तु विषयके संसर्गसे जो विमुख हैं उनके हृदयमें नहीं ॥ ९१ ॥

तरुणीवेषोद्दीपितकामा विकसज्जातीपुष्पसुगन्धिः ॥
उन्नतपीनपयोधरभारा प्रावृट् तनुते कस्य न हर्षम् ॥ ९२ ॥

अथ वर्षासमयवर्णनमारभते—तरुणीति ॥ उद्दीपित उत्पादितः कामो मन्मथः सुरताभिलाषो वा यया सा तथोक्ता । विकसन्ति विकस्वराणि यानि जातिपुष्पाणि तैः शोभनो गन्धो यस्याः सा तथोक्ता एकत्र जातिकुसुमविकाससंभवादन्यत्र तत्कुसुममालालङ्कृतत्वाच्चेति भावः । " गन्धस्येदुत्पूतिसुसुरभिभ्यः " इति गन्धशब्दस्य इकारान्तादेशः । यद्यपि गन्धशब्दश्चैतदेकान्तग्रहणम् इत्युक्तं तथापि कवीनां निरंकुशत्वात्पर्यनुयोगः । उन्नत उत्तुङ्गः पीनः पीवरश्च पयोधरभारोऽम्बुधरवृन्दश्च अन्यत्र स्तनभारश्च यस्याः सा

१ वेषा दीपित० इति पाठान्तरम् । २ विकसितजातीपुष्प० पाठान्तरम् ।
३ कुरुते इति पाठान्तरम् ।

तथोक्ता । " स्तनाभोगौ पयोधरौ " इति वैजयन्ती । अत एव तरुण्य वेष इव वेषो यस्याः सा कामिनीव मोहनकारिणीत्यर्थः । प्रावृड् वर्षा कस्य पुंसो हर्षं सम्भोगौत्सुक्यं न तनुते सर्वस्यापि तनुत एवेत्यर्थः । श्लेषानुप्राणितेयमुपमा । ९२ ॥

तरुणीके वेषवाली, कामदेवको उदित करनेवाली, जातिपुष्पके सुगन्धको विकाश करनेवाली, जिसके पुष्ट पयोधरके भार उन्नत हैं ऐसी यह वर्षाऋतु किसको नहीं हर्षित करती है जाही, जूही. लता वा जावित्री पयोधर मेघ और स्तनकोभी कहते हैं ॥ ९२ ॥

वियदुपचितमेघं भूमयः कन्दलिन्यो ।
नवकुटजकदम्बामोदिनो गन्धवाहाः ॥
शिखिकुलकलकेकारावरम्या वनान्ताः ।
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ९३ ॥

वियदिति ॥ उपचिता परिचिता मेघा यस्मिंस्तथोक्तम् । घनाघनसचारवदित्यर्थः । वियदाकाशं च, कन्दलान्यङ्कुराण्यासां सन्तीति कन्दलिन्यो भूमयो भूप्रदेशाश्च, नवो नूतनः कुटजानां गिरिमल्लिकानां कदम्बानां नीपकुसुमानां चामोदो गन्धविशेषो येषामस्तीति तथोक्ता गन्धवाहाः उद्यानपवनाश्च । " कुटजो गिरिमल्लिका " इत्यमरः । के मूर्ध्नि कायति ध्वनयतीति केका मयूरवाण्यः । " केका वाणी मयूरस्य " इत्यमरः । शिखिकुलानां मयूरनिकराणां ये कलकेकारवा अव्यक्तमधुरकेकास्वरास्तैः रम्या मनोहरा वनान्ताश्च केलिवनमध्यप्रदेशाश्च सुखिनं दुःखिनं वा सर्वमशेषं जनमुत्कण्ठयन्ति सम्भोगोत्सुक्यवन्तं कुर्वन्तीत्यर्थः । उद्दीपकत्वादिति भावः । उत्कण्ठाशब्दात् " तत्करोति० " इति ण्यन्तात् लट् । मालिनी वृत्तम् ॥ ९३ ॥

मेघसे व्याप्त आकाश और प्रफुल्लित पृथ्वी अर्थात् नये २ अंकुरोंपर ओसके जलसे पूर्ण, नवीन कुटज और कदम्बके पुष्पोंके समूहोंसे सुगंधित वायु और मयूरोंके झुंडकी सुन्दर वाणीसे रम-

णीय वनके प्रांत, सब सुखी और दुःखी पुरुषोंको उत्कण्ठा काम-देवकी इच्छा देते हैं ॥ ९३ ॥

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः ॥
क्षितिरपि कंदलधवला दृष्टिं पथिकः क्व पातयति ९४

उपरीति ॥ उपर्युपरिष्टात् घनं सान्द्रं घनपटलं मेघवृन्दं वर्तत इति शेषः । " घनाः कठिनसन्घातमेघकाठिन्यमुद्गराः । " इति वैजयन्ती । तिर्यक् दिक्ष्वित्यर्थः । मह्यामतिशयेन रवन्तीति मयूराः । पृषोदरादित्वा-त्साधुः । नर्तिता नृत्यन्तः । स्वार्थे णिचि " गत्यर्थाकर्मक० " इत्यादिना वर्तमाने कर्तरि क्तः । " मतिबुद्धिपूजार्थेभ्यश्च " इति चकाराद्वर्तमानता । यद्वा नर्तिताः मेघवृन्देन नाटिताः । मेघोदये तेषामुल्लासवशेन नाट्यसम्भ-वात् । तथाभूता मयूरा येषु ते तथोक्ता गिरयोऽपि वर्तन्ते इति शेषः । क्षितिरपि भूमिरपि कदलैर्नानाविधाङ्कुरैर्धवला स्वच्छा अतः पन्थानं गच्छ-तीति पथिकः पान्थः । " पथः ष्कन् " इति ष्कन्प्रत्ययः । दृष्टिं क्व कुत्र पातयति प्रसारयति न कुत्रापीत्यर्थः । सर्वत्राप्युद्दीपनसम्भवादिति भावः । महत्कष्टमत्र विरहिणामिति परमार्थः । आर्याभेदः ॥ ९४ ॥

ऊपर घन घोर छाय रहा है, दहिने बाएँ पहाडोंमें मयूर नाच रहे हैं, नीचे भूमिकी दूब ओसोंसे धवली हो रही है ऐसे समयमें दीन बटोही अपनी दृष्टिको कहां फेंके क्योंकि चारों ओर विरहके उद्दीपनही करनेवाले हैं ॥ ९४ ॥

इतो विद्युद्वल्लीविलसितमितः केतकितरोः ।
स्फुरन् गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ॥
इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां ।
कथं यास्यन्त्येते विरहदिवसाः संभृतरसाः ९५॥

१ वसुधा क० इति पाठांतरम् । २ दृष्टिः इति पाठांतरम् । ३ यातु सत्रासतः इति पाठांतरम् ४ स्फुरद् इति पाठांतरम् ।

इतं इति ॥ इतोऽस्मिन् प्रदेशे विद्युद्वल्लीनां तडिल्लतानां विलसित
णन् भवतीति शेषः। इत प्रदेशे केतकितरोः केतकाख्यवृक्षस्य तरुकु-
स्येत्यर्थः। "ङ्यापो सञ्ज्ञाच्छन्दसोर्बहुलम्" इति ह्रस्वः। कालिदास
वत्। स्फुरन् प्राप्नुवान् गन्धश्च वर्तते इति शेषः। इत प्रोद्यत्प्रवृद्धं
दनिनदस्य मेघगर्जितस्य स्फूर्जितमादरं च भवतीति शेषः।
श्च केकिनां शिखावलानां क्रीडासु केलिषु यः कलकलरवः कोलाहल-
ते। "शिखावल शिखी केकी, कोलाहल कलकलः" इति
रः। यद्वा कलकलरवः अत्यन्ताव्यक्तमधुरप्रकारस्वरश्च समुज्जृम्भते
त शेषः। पक्ष्माण्यासां सन्तीति पक्ष्मलाः। सिध्मादित्वाल्लच्प्रत्ययः।
भूता दृशो यासां तासां पारिप्लवलोचनानामेते प्रसिद्धाः सम्भृतरसाः
र्णशृंगारा उद्दीपका इत्यर्थः। विरहदिवसा वियुक्तवासराः कथं यास्यत्य-
गमिष्यति न कथंचिदपीत्यर्थः। दुरतरत्वाद्दिनमेकयुगं भविष्यतीति
य। शिखरिणी वृत्तम्॥ ९५॥

एक ओर विद्युत बिजलीकी छटाका विलास, एक ओर केत-
के वृक्षकी उत्कट सुगन्ध, एक ओर मेघकी गर्जना और एक
र मयूरकी क्रीडाका कल २ शब्द ये सब जहां एकत्र हैं वे
हके रसभरे दिन स्त्रियोंके कैसे वीतेंगे॥ ९५॥

असूचीसंचारे तमसि नभसि प्रौढजलद-।
ध्वनिप्राज्ञंमन्ये पतति पृषतानां च निचये॥
इदं सौदामन्याः कनककमनीयं विलसितं।
मुदं च म्लानिं च प्रथयति पथि स्वैरसुदृशाम्॥९६॥

असूचीति॥ तमस्यंधकारे न विद्यते सूचीसंचारो यस्मिन् तस्मिन्।
...मात्रमप्यनवकाशप्रदे गाढतमे सतीति यावत्। तथा नभस्यन्तरिक्षे

१ तमोरे इति पाठान्तरम्। २ ध्वनिप्राप्ते इति पाठान्तरम्। ३ तस्मिन्
इति पाठान्तरम्। ४ स्पदा नीरनिचये इति पाठान्तरम्।
५ पथिष्वेव सु० इति पाठान्तरम्।

च प्रौढः प्रगल्भो गभीर इति यावत् । यो जलदध्वनिर्मेघगर्जितं तेन प्राज्ञ वाचालमात्मानं मन्यत इति प्राज्ञंमन्ये बहुलतरमेघनिह्रादवति सतीत्यर्थः "आत्ममाने खश्च" इति खशि मुमागमः । तथा पृषतानां बिंदूनां च निचये संदोहे पतति सति । "पृषंति बिंदुपृषती" इत्यमरः । कनकक-मनीय कनकनिकषणलेखासुंदरमिदं प्रवर्तमानमिदं सौदामन्या विद्युतः । "तडित्सौदामनी विद्युत्" इत्यमरः । विलसितं स्फुरणम् । कर्तृ । स्वैर-सुदृशामभिसारिकाणां पथि प्रियगृहमार्गे मुदं मार्गप्रदर्शकत्वात्संतोषं म्लानि-मात्मप्रकाशकहेतुत्वात् ग्लानिं च । "ग्लै म्लै हर्षक्षये" इत्यस्माद्धातोः "भृजूरेभ्यो निः" इत्येकोऽधिको निप्रत्ययः । प्रथयति प्रकटयति करो-तीत्यर्थः । "कांताभिसरणोद्युक्ता स्मरार्ता साऽभिसारिका ।" इति लक्ष-णात् । कांतमुद्दिश्य निगूढमभिसरणशीलानां स्त्रीणामुपयोगानुपयोगाभ्यां हर्षाहर्षे हेतुत्वादिति भावः । "कांतार्थिनी तु या याति संकेतं साऽभिसा-रिका ।" इत्यमर. । वृत्तं पूर्ववत् ॥ ९६ ॥

ऐसे गाढे अन्धकारमें जिसमें सुई न प्रवेश कर सके जो आषाढ वा श्रावणके मासमें बडे मेघके शब्द और पत्थरसहित जलवृष्टिमें बिजुलीका वारंवार चमकना सो स्त्रियोंको अपने २ ब-टोही पतियोंके प्रति सुख दुःख उत्पन्न करता है ॥ ९६ ॥

आसारेण न हर्म्यतः[1] प्रियतमैर्यातुं बहिः शक्यते ।
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिंग्यते ॥
जाताः शीकरशीतलाश्च[2] मरुतो रत्यन्तखेदच्छिदो ।
धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासङ्गमे[3] ॥ ९७ ॥

आसारणेति ॥ प्रियतमैर्वल्लभैरासारेण धारासम्पातेन हेतुना । "धारा-सम्पात आसार." इत्यमर । हर्म्यतः प्रासादात् । धामत. इति पाठे गृहात् । उभयत्रापि "पञ्चम्यास्तसिल्" "अपपरिबहिः०" इत्यादिना

---

१ धामतः इति पाठांतरम् । २ शीतलशीकराश्च इति पाठांतरम् । ३ यान्त्य° इति पाठांतरम् ।

समासविधानज्ञापकात् बहिर्योगे पञ्चमी । बहिर्यातु न शक्यते न समर्थ्यते । " शक्लृ शक्तौ " भावे लट् " शकधृष० " इत्यादिना तुमुन्प्रत्ययः । तथा आयतदृशा दीर्घदृशा तरुण्या शीतेन यदुत्कम्पः गात्रवेपथुस्तन्निमित्तं तन्निवारणमित्यर्थ. । गाढमतिदृढमालिंग्यते परिरभ्यते । पूर्ववल्लट् । तथा शीकरैरम्बुकणैः शीतला शिशिराः । " शीकरोऽम्बुकणाः स्मृताः " इत्यमर. । रत्यते सुरतावसाने य खेदः श्रमस्त छिंदतीति तथोक्ताः। सुरतमरम्भजनितश्रमापहारिण इत्यर्थः । " श्रमः खेदोऽथ रत्यादेर्जातखेदादि भूमिकृत् । " इति लक्षणात् । मरुतश्च जाताः प्रवृत्ताः अतः धन्यानां पुण्यशालिना प्रियामङ्गमे प्रियासम्भोगे साति दुर्दिन दुष्टदिनमपि मेघच्छन्नदिनं च । " मेघच्छन्नेऽह्नि दुर्दिनम् " इत्यमरः । सुदिनता सुदिवसत्व याति अन्येषा तदेव भवतीत्यर्थ । बतेति विस्मये । " वत खेदानुकम्पामन्त्रण-सन्तोषविस्मये । " इत्यभिधानात् । अत्र दुर्दिनमपि सुदिनता यातीति स्फुरतो विरोधस्योक्तदेशान्समाधानाद्विरोधालङ्कारः । " आभासत्वे विरोधस्य ,विरोधालङ्कतिर्मता । " इति लक्षणात् । शार्दूलविक्रीडितं वृत्तम ॥ ९७ ॥

वर्षाकी झडीमें स्त्रीलोग धामके बाहर नहीं निकल सकता है और स्त्री प्रीतमसे आलिंगन किये जाती हैं कि वडा जाडा लगता है और देह कांपता है यो कह कह इसी निमित्त स्त्रियोंसे प्रीतमभी आलिंगन करते जाते हैं और वाहर नहीं निकल सकते और ठंढे २ जलके कणोंसहित वायु मैथुनके अंतमें श्रम हरनेवाला वह रहा है ऐसे धन्य पुरुषोंको प्यारीके संगमें दुर्दिनभी सुदिन हो जाते हैं ॥ ९७ ॥

अर्द्धं सुप्त्वा निशायाः सरभससुरतायाससंन्नश्लथांगः ।
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ॥

१ गाढ़ इति पाठांतरम् । २ खिन्न० इति पाठांतरम् ।

सम्भोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो ।
ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मंदपुण्यः॥

अथैकेन शरदं वर्णयति—अर्धमिति ॥ निशाया रात्रेरर्धं यामद्वयमित्यर्थः । "पुंस्यर्धोऽर्धं समेंऽशके" इत्यमरः । अत्यन्तसंयोगे द्वितीया । सुप्त्वा शयित्वा निद्रया यामद्वयं गमयित्वेत्यर्थः । ततो मध्ये इति शेषः । सरभसं सोद्वेगं यत्सुरतमाभ्यन्तरसम्भोगस्तेन य आयासः श्रमस्तेन सन्नानि परिखिन्नानि अत एव श्लथानि शिथिलान्यङ्गान्यवयवा यस्य स तथोक्तः । "मध्य नक्तमुदाहृतं शरदि च प्रत्यूषकाले हिमम्" इति भोजवचनादर्धरात्रकृतसुरतपरिश्रांत इत्यर्थः । एतेनैतस्य नायकस्य कामतन्त्रकुशलत्वं नायिकायाः शङ्खिनीत्वं सूच्यते तृतीययामस्य तत्सुरतयोग्यकालत्वात् । तदुक्तं रतिरहस्ये— "रमयति च तृतीये शङ्खिनीमार्द्रभावं गमयति रमणीयां पद्मिनीं तुर्ययामे ।" इति । अन्यत्राप्युक्तम् । "कुसुमितवनमध्ये कूचिमारस्तृतीये तिमिरनिबिडयामे शङ्खिनीं संलभेत ।" इति । अत एव प्रोद्भूता प्रकर्षेणोत्पन्ना अत एवामह्या स्वतः शमयितुमशक्या तृष्णा पिपासा यस्य स तथोक्तः । तथा मधुना सम्भोगप्राक्कालीनमद्यपानेन यो मदो मोहस्तेन निरतः परवश इत्यर्थः । "मदिराद्युत्कृतो मोहो हर्षव्यतिकरो मदः ।" इति लक्षणात् । विविक्ते विजने । "विविक्तौ पूतविजनौ" इत्यमरः । अन्यथा विस्रम्भविरहानुभवादिति भावः । हर्म्यपृष्ठे प्रासादोपरिप्रदेशे कर्करीतो गलन्तिकाख्यसच्छिद्रकुंडिकायाः । पञ्चम्यास्तसिः । "कर्कर्यालुर्गलन्तिका" इत्यमरः । सम्भोगक्लांतायाः सुरतायासपरिश्रांतायाः कांतायाः स्वप्रियतमायाः शिथिलया निःसहायया भुजलतया आवर्जितं धाराकारेण दत्तमिति स्वादातिशयोक्तिः । शारदं शरत्कालसंबन्धि सलिलं हंसोदकमित्यर्थः । ज्योत्स्नया चन्द्रिकयाभिन्ना मिश्रिता अत एवाच्छा धारा यस्मिन् कर्मणि तद्यथा तथा मन्दपुण्यो भाग्यहीनो न पिबति । भाग्यसम्पन्नस्तु पिबतीत्यर्थः । हंसोदकलक्षणमुक्तं द्रव्यरत्नमाला-

१ तर्जित इति पाठांतरम् । २ माग्य. इति पाठांतरम् ।

याम्। " वह्नितप्तमहिमांशुरश्मिभिः शीतमम्बु शशिरश्मिभिर्निशि। एवमेव तदहर्निशं स्थितं तच्च हंसजलनामकं स्मृतम् ॥ " इति। एतत्पाने गुणसंपत्तिरपि तत्रैवोक्ता। " प्रसादकं त्रिदोषघ्नं हृद्यं लघु च शीतलम्। वृष्यं मनोहरं स्वादु विघ्नघ्नं कान्तिकृत्परम् ॥ " इति। शरद्येतत्पाने नियमश्चाप्युक्तोऽन्यत्र। " कर्पूरागुरुजं सितादिभिरसैर्हंसोदकं वासितं सौधं चातिमनोहरं शिशिरतो मुग्धाङ्गनालिंगनम्। " स्रग्धरा वृत्तम् ॥ ९८ ॥

आधी रात व्यतीत भयेपर वेगसहित मैथुनके श्रमसे जिसके अंग थक रहे, मद्यमें मत्त, अत्यंत प्यासा, छतपर स्वच्छ और एकान्त ठौरमें बैठा, वैसेही मैथुनमे थकी स्त्रीने शिथिल भुजाओंसे झारी लाकर दिये और चांदनीमें जिसकी स्वच्छ धारा दीख पडती है ऐसी शरदृतुके जलको न पीवे तो मन्दभागी जानना चाहिये ॥ ९८ ॥

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोभृतः।
काश्मीरद्रवसान्द्रदिग्धवपुषश्छिन्ना विचित्रै रतैः ॥
वृत्तोरुस्तनकामिनीजनकृताश्लेषा गृहाभ्यन्तरे।
तांबूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥९९॥

अथ द्वाभ्यां हेमन्तं वर्णयति—हेमन्त इति ॥ हेमन्त ऋतौ दधि प्रसिद्धं दुग्धसर्पिषी क्षीरघृते तान्यशनं येषां ते तथोक्ताः। ननु दुग्धाज्यादीनां शैत्यासादकत्वेन सेवनं भवतु दधिसेवनस्य तदतिरेककरत्वात्तत्सेवनं कथं युक्तमिति चेन्न तस्याप्यायुष्कामस्य हेमन्ते सेवनोपयोगात्। तदुक्तं चारुचर्यायामृतुचर्याप्रस्तावे सर्वज्ञभोजराजेन। " त्रिषु च दधि निषेव्यं ग्रीष्मकाले वसन्ते शरदि च परिवर्ज्यं वाञ्छता दीर्घमायुः। यदि खलु परिवाञ्छा सेव्यतां सर्वकाले सगुडमरिचयुक्तं सामुद्रचूर्णे ॥" इति। मञ्जिष्ठया रञ्जकद्रव्येण रक्तानि माञ्जिष्ठानि वासांसि दुकूलवसनानि बिभ्रतीति तथोक्ताः। " तेन रक्तं रागात् " इत्य-

१ स्निग्धा इति पाठान्तरम्। २ पीनोरस्थल० इति पाठांतरम्।

णप्रत्ययः । यद्यपि " निर्वात भवन सुरक्तवसनं वह्नेः पर सेवनम् " इति वसन्तसमययोग्यत्वेन सुरक्तवसनधारणमभिहित तथापि मतांतरे रक्ताक्तमिति न विरोधः । काश्मीरद्रवेन कुकुमपकेन साद्र यथा तथा दिग्धानि रूषितानि वपूषि येषां ते तथोक्ताः । विचित्रैः बाह्याभ्यतरनिरूपणेन नानाविधैः रतैः छिन्नाः श्रांताः वृत्तौ वर्तुलौ ऊरू पीनौ च स्तनौ यासा तास्तथोक्ताः याः कामिन्यस्ता एव जनस्तेन कृताश्लेषाः विहितपरिरम्भाः तदुक्तम् । " कस्तूर्यागरुकुकुमैरतिधृत पान तटाकस्थित शीत नैव विदीर्यते प्रियतमैरालिगन कम्बलम् । " इति । तथा ताबूलीदलैर्नागवल्लीदलैः पूगै क्रमुकैश्च पूरितानि मुखानि वक्रांतरालानि येषा ते तथोक्तास्ताबूलचर्वणरताः तत्परा इत्यर्थः । " तूदस्तु पूग' क्रमुकः " इत्यमरः । इत्थभूता धन्याः सुकृतिनः गृहाभ्यन्तरे मन्दिरांतराले सुख यथा तथा शेरते स्वपन्ति । "शीडो रुट्" इति रुडागमः । तांबूलस्य मानसोल्लासादिबहुगुणहेतुत्वात्तच्चर्वणोक्तिः । तदुक्त चारुचर्यायाम् । " मनसो हर्षण श्रेष्ठ रतिद मदकारणम् । मुखरोगहर हृद्य दीपन वस्तिशोधनम् ॥ मुखशुद्धिकरमिदम् तांबूल श्रीकर परम ॥ " इति । तत्कालानुगुणोपचारत्वेन वीर्यवृद्धिकरत्वेन च प्रथम दधिक्षीराज्यप्राज्यमृष्टान्न भुक्त्वाऽनतर कुकुमकस्तूर्यादिमिश्रितचन्दनलेपनपूर्वक विविधसुरतसरभसभोगपरिश्रांता. कांतासमालिंगितगात्राश्च सन्तस्ताबूलचर्वणरता सुकृतशालिन. सुखेन निवातगृहाभ्यतरे स्वपन्तीति समुदायार्थः । शार्दूलविक्रीडित वृत्तम् ॥ ९९ ॥

दही दूध घृत और सुगन्ध सिखरन भोजन किये; केशर कस्तूरी सघन सर्वांग लगाये, अनेक प्रकारके आसनभेदकी रतिसे खिन्न, पुष्ट जंघें और स्तनवाली स्त्रियां जिन्हें लपटाय पान और सुपारी खाय, मञ्जीठके रंगे वस्त्र धारण किये प्यारीके साथ धन्य पुरुषही हेमंतऋतुमें सोते हैं ॥ ९९ ॥

प्रोद्यत्प्रौढप्रियंगुद्युतिभृति विकसत्कुंदमाद्यद्द्विरेफे ।
काले प्रालेयवातप्रचलविलसितोदारमंदारधाम्नि ॥
येषां नो कंठलग्ना क्षणमपि तुहिनक्षोददक्षा

मृगाक्षी । तेषामायामयामा यमसदनसमा यामिनी याति यूनाम् ॥ १०० ॥

प्रोद्यदिति ॥ प्रोद्यन्त्य उदित्वराः प्रौढाः प्रवृद्धाश्च याः प्रियङ्गवः फलिन्यस्ताभिर्द्युतिमुपचयजनितशोभा बिभर्तीति तथोक्ते । "प्रियगुः फलिनी फली" इत्यमरः । द्वौ रेफौ वर्णविशेषौ यस्य स द्विरेफो भ्रमरशब्द उपचारात्तदर्थेऽपि द्विरेफ उच्यते । यथाह कैयटः । "शब्दधर्मेणाप्यर्थस्य व्यपदेशो दृश्यते यथा भ्रमरशब्दस्य द्विरेफत्वाद्विरेफो भ्रमरः ।" विकसद्भिः कुन्दैर्माघ्यकुसुमैर्माद्यन्तो द्विरेफा यस्मिन् तस्मिन् ।"माघ्य कुन्दम्" इत्यमरः । "पुष्पमूलेषु बहुलम्" इति लुक् । यद्यपि कुन्दविकसनं शिशिरर्तुलक्षण तथापि तत्प्रत्यासत्त्योक्तमिति न विरोधः । प्रलयादागत प्रालेय हिमम् । "तत आगतः" इत्यण् । "केकयमित्रयुप्रलयानां यादेरिय" इतीयशब्दस्य इयादेशः । प्रालेयवातैस्तुषारवायुभिः प्रचल चञ्चलमत एव विलम्भित प्रकाशमानमुदार रम्य च । मन्दाराणां सन्तानकतरूणा धाम स्थान यस्य तस्मिन् । यद्वा मन्दाराणा पारिभद्रकतरूणां धामेति । उभयत्राप्युपचयहेतुत्वादिति भावः । "पारिभद्रो निंबतरुर्मन्दारः पारिजातकः ।" इत्यमरः । एवम्भूतकाले हेमन्तसमये येषा यूना तरुणाना शिशिरादे शीतनिवारणे दक्षा कुचकुम्भयोरौष्ण्यसम्भवेन तथालिंगनान्निवारणसमर्थेत्यर्थः । मृगाक्षी तरुणी क्षणमल्पकालमपि । अत्यन्तसयोगे द्वितीया । कण्ठलग्ना कण्ठावसक्ता कण्ठालिंगनतत्परेति यावत् । नो न भवतीत्यर्थः । तेषा यूनामायामा अत्यन्तदीर्घा यामाः प्रहराः यस्या सा । विरहवेदनावशात्तथा प्रतीयमानयामेत्यर्थः । यामिनी रजनी यमसदनसमा यमलोककल्पा दुरन्तदुःखदेत्यर्थ । याति गच्छति । तदानीमङ्गनाप्लवालिंगनमन्तरेण दुरतिरवेदनामहानधास्तारितुमशक्यत्वादिति भावः । "द्वौ यामप्रहरौ समौ, रजनी यामिनी तमी" इति चाप्यमर । अनुप्रासोपमयो. शब्दार्थालङ्कारयोः संसृष्टिः । स्रग्धरा वृत्तम् ॥ १०० ॥

जो उदित तथा प्रवृद्ध होती हुई प्रियंगुलताओंसे उपचित हुई शोभाको धारण करता है, जिसमें फूले हुए कुंदपुष्पोंके सेवनसे

भ्रमर मत्त हुए हैं और जिसमें तुषारवायुसे प्रचलित हुए मंदारवृक्षोंके स्थान प्रकाशमान तथा रम्य हैं ऐसे इस हेमंतकालमे जिन युवा पुरुषोंके गलेमें जाडेको नष्ट करनेमें समर्थ ऐसी हरिणलोचना स्त्री क्षणभरके लियेभी नहीं लिपटी हो उनकी यह रात्रि अत्यंत दीर्घ प्रहरोंवालीसी प्रतीत होती हुई तथा यमलोकके समान दुःख देती हुई व्यतीत होती है ॥ १०० ॥

चुंबन्तो गंडभित्तीरलकवति मुखे सीत्कृतान्यादधाना ।
वक्षःसूत्कंचुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ॥
ऊरूनाकंपयंतः पृथुजघनतटात्स्रंसयंतोऽशुकानि ।
व्यक्तं कांताजनानां विटचरितभृतः शैशिरा वांति वाताः ॥

अथ द्वाभ्यां शिशिरर्तुं वर्णयन्निगमयति–चुम्बन्त इति ॥ कांताजनानां गंडा भित्तय इव ताः गण्डभित्तीः कपोलस्थलीः चुम्बन्तः । "स्तननयनकपोलान् चुम्बनस्थानमाहुः" इति रतिरहस्योक्तेरिति भावः । अत एवालकवति विशेषणवशात् चूर्णकुन्तलालंकृते मुखे । "अलकाश्चूर्णकुन्तलाः" इत्यमरः । सीत्कृतानि सीत्काराणि । सीदित्यनुकरणशब्दः । आदधाना कुर्वाणाः उत्पादयन्त इत्यर्थः । वक्षःसु उरःस्थलीषु उत्कंचुकेषु उद्ग्रथितकूर्पासकेषु सत्स्वपि स्तनभरेषु पुलकोद्भेदं रोमांचप्रादुर्भावमापादयन्त इति सात्त्विकोक्तिः । ऊरून् सक्थीनि आकम्पयन्तः प्रचालयन्तः । पृथु विशालं यज्जघनतट-जघनप्रदेशस्तस्मादंशुकानि परिधानांशुकग्रन्थीनित्यर्थः । स्रंसयन्तः विश्लथयन्तः अत एव व्यक्तं स्फुटं विटानां पल्लविकानामिव चरितानि कृत्यानि बिभ्रतीति तथोक्ताः । शिशिरस्यैते शैशिराः शिशिरर्तुसंबन्धिनः । "तस्येदम्" इत्यण् । वाताः वांति संचरन्ति । विटसाधारणचेष्टत्वाद्वातानां तच्चरितभरणं युक्तमिति भावः । तदुक्तं रतिरहस्ये । "आलिंगन्कचिबुकगंड नासिकाग्रं च चुम्बन् पुनरुपहितनर्मारक्तं तालु जिह्वां च भूयः । भर्तालिंगितनाभीमूलवक्षोरुहांस्श्लथयितवृतधैर्यं श्लथयितनाथ नीवीन् ॥"

---

१ हृतः इति पाठांतरम् ।

इति । अत्र विटचरितभृत इत्यत्र उपमालङ्कारः । स च व्यस्तमित्यनेनाभिव्यजितोत्प्रेक्षयांगेन सकीर्यते इति सक्षेपः । वृत्तं पूर्ववत् ॥ १०१ ॥

यह प्रकार है कि शिशिरऋतुमे कामियोंके समान आचरण करते हुए पवन चलते हैं कि स्त्रियोंके कपोलोंको चुंबते हैं, केशोंवाले मुखमें सीत्कारशब्दको करते हैं, नहीं कंचुकी जिसपर ऐसी छातीपर स्तनोंमें रोमावलीको पैदा करते हैं, जंघाओंको कंपाते हैं और मोटी जंघा (रान) ओंके वस्त्रोंको उडाते हैं ॥ १०१ ॥

केशानाकुलयन्दृशौ मुकुलयन्वासो बलादाक्षिप-।
न्नातन्वन्पुलकोद्गमं प्रकटयन्नावेगकम्पं शनैः ॥
वारंवारमुदारसीत्कृतकृतो दन्तच्छदान्पीडय-।
न्प्रायः शैशिर एष संप्रति मरुत्कांतासु कांतायते १०२॥

केशानिति ॥ केशान् शिरोरुहानाकुलयन् व्याकुलीकुर्वन् । एकत्र विशेषणादन्यत्र केलिसरम्भाच्चेति भाव. । दृशो मुकुलयन्निमीलयन् । एकत्र परुषस्पर्शवशादपरत्र सुखपारवश्याच्चेति भावः । वासो जघनांशुक बलात्प्रसह्याक्षिपन्नाकर्षन् । एकत्र वेगवशादपरत्र सम्भोगेच्छया चेति भावः । पुलकोद्गम रोमाचमातन्वनुत्पादयन् । एकत्र शीतलस्पर्शादन्यत्र शृङ्गारोद्बोधकाच्चेति भावः । आवेगेनोद्वेगेन यः कम्पो गात्रवेपथुस्त शनैः प्रकटयन् मन्दमभिव्यजयन् इति विशेषणद्वयेन सात्त्विकोक्तिः । उदाराणि मनोज्ञानि सीत्कृतानि कुर्वतीति तथोक्तान् । छाद्यन्ते एभिरिति छदाः । " पुंसि सज्ञायां घ. प्रायेण '' इति घ प्रत्यय. । " छादेर्घेऽद्व्युपसर्गस्य '' इति ह्रस्वः । दन्तानां छदास्तानधरोष्ठान् वारवार पुनःपुनः पीडयन् । एकत्र शैत्यातिशयेनान्यत्र दन्तक्षतेन च व्यथयन्नित्यर्थः । एषोऽय शैशिरो मरुत् शिशिरमारुत. सम्प्रतीदानीं शिशिरर्तौ प्रायो भूम्ना कांतासु कामिनीषु विषये कांतायते । " कथाभिः कमनीयाभिः काम्यैर्भोगैश्च सर्वदा । उपचारैश्च

---

१ मालरद वम्रम्पने इति पाठान्तरम् ।

रमयेद्यः स कांत इतीरितः ॥ " इत्युक्तलक्षणः कांत इवाचरति । उक्तविशेषणैः कांतसादृश्यलाभात्स इव वर्तते इत्यर्थः । " उपमानादाचारे " इति क्यङ् । " अकृत्सार्वधातुकयोर्दीर्घः " इति दीर्घः । अत एवोपमा सा च प्रायःशब्दाभिव्यंजितोत्प्रेक्षया सङ्कीर्यते । तदुक्तमाचार्यदण्डिना । " मन्ये शंके ध्रुवं नूनं प्राय इत्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥ " इति ॥ १०२ ॥

बालोंको विखेरता, आखोंको किञ्चित् २ मूंदता, साडी बलात्कारसे उडाता, देहमें रोमाञ्चित करता, चलनेमें उद्वेग और कम्प प्रकट करता वेरबेर सीसी करनेमें ओठोंको पीडित करता इस प्रकारका शिशिरऋतुका वायुं स्त्रियोंके विषयमें पतिकासा आचरण करता है ॥ १०२ ॥

वैराग्ये सञ्चरत्येको नीतौ भ्रमति चापरः ॥
शृङ्गारे रमते कश्चिद्भुवि भेदाः परस्परम् ॥ १०३ ॥

वैराग्य इति ॥ एकः पुरुषो वैराग्ये सञ्चरति । चापरोऽन्यो नीतौ भ्रमति भ्रमणं करोति कश्चित् पुरुषः शृङ्गारे रमते भुवि पृथिव्यां पुरुषः परस्पर भेदाविशिष्टाः सन्तीत्यर्थः ॥ १०३ ॥

कोई पुरुष वैराग्यमें सञ्चार करता, कोई नीतिमें प्रवृत्त रहता और कोई शृंगारमें रमता है यों परस्पर मनुष्योंमें इच्छाका भेद है इसलिये भर्तृहरिजीका तात्पर्य यह है कि तीन प्रकारके मनुष्योंके हेतु तीनें शतक निर्माण किये हैं ॥ १०३ ॥

यद्यस्य नास्ति रुचिरं तस्मिंस्तस्य स्पृहा मनोज्ञेऽपि ॥
रमणीयेऽपि सुधांशौ न मनः कामः सरोजिन्याः॥१०४॥

इति भर्तृहरिकृतं शृंगारशतकं सम्पूर्णम् ॥ २ ॥

यदिति ॥ यस्य यत् रुचिरं नास्ति तत्र मनोज्ञेऽपि सुन्दरेऽप्यस्य स्पृहा न भवति । अत्र दृष्टान्तः । चन्द्रस्तु सर्वेषां प्रियङ्करः रमणीयः तस्मिन् सूर्य-

विकासिन्याः सरोजिन्या मनसः कामः प्रीतिर्नैव भवति । एव यस्य यत्र प्रीतिस्तस्य तत् रुचिकरम् । अतो नीतिः शृङ्गारश्च वैराग्य च उक्त एतेषु यत्र यस्य प्रीतिस्तेन तद्दृष्टव्यम् । इद शृङ्गारशतक भर्तृहारिणा कृत तत् कामबुद्धया न कृत आदावेव आरम्भे । "समस्तभावैः खलु बन्धन स्त्रियः" इत्युक्तम् । मध्येऽपि "दु.खैकहेतुर्न हि कश्चिदस्ति" इत्यादीनि वचनानि स्थले स्थले स्थितानि तासा कामिनीना प्रशसा कामिभिः क्रियते सा लिखिता । प्रान्ते सर्वं विवेकदृष्टया निन्दितम् ॥ १०४ ॥

इति भर्तृहरिकृतशृङ्गारशतकव्याख्याने शृङ्गारशतक सम्पूर्णम् ॥ २ ॥

जिस पदार्थमें जिसकी रुचि नही होती चाहे वह सुन्दरभी हो तोभी उसे उसकी इच्छा नही होती क्योंकि रमणीयचंद्रमामें कमोदनीकी इच्छा नहीं होती ॥ १०४ ॥

इति श्रीभर्तृहरिकृतशृंगारशतकभाषाटीकाया
शृङ्गारशतक सम्पूर्णम् ॥ २ ॥



॥ श्रीः ॥

अथ भर्तृहरिविरचितं

वैराग्यशतकम् ।

चूडोत्तंसितचंद्रचारुकलिकाचंचच्छिखाभास्वरो ।
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ॥
अंतःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन् ।
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

चूडेति ॥ चूडोत्तंसितस्य शिरोभूषणीकृतस्य चन्द्रस्य चारुकलिकया मनोहरकोरकयेव चञ्चच्छिखया प्रकाशमानाग्रेण भास्वरः प्रकाशमानः । विलोल. चञ्चल. काम एव शलभः सः लीलया विलासेन दग्धो येन । श्रेयसा शुभानां दशासु अवस्थासु अग्रे पुरत. स्फुरन् प्रकाशमानः । अतर्मनसि स्फूर्जतः विजृम्भमाणस्य अपारस्य अनन्तस्य मोहतिमिरस्य प्राग्भार गुरुप्राक्प्रदेशमुच्चाटयन् निरस्यन् ज्ञानप्रदीपो ज्ञानप्रकाशको हरो भक्तानां ज्ञानाज्ञानकृतमानसिकवाचिककायिकपापहारी भगवान् सांबशिव. योगिनां सनकादीनां चेतःसद्मनि मनस्येव गृहे विजयते सर्वोत्कर्षेण वर्तते । प्रथमतः चूडोत्तंसितेति वाक्ये चन्द्रपदग्रहणाद्भक्तानां तापहारीत्यर्थो लभ्यते । लीलादग्धेति वाक्ये कामशलभपदग्रहणान्महाशत्रुसंहारीति लभ्यते । अतःस्फूर्जदिति वाक्ये मोहतिमिरपदग्रहणात् यथा उदितः सूर्यः सर्वतिमिराणि नाशयति तथायमपि अज्ञाननाशं करोतीति । चेत.सद्मनीति वाक्ये ज्ञानदीपपदग्रहणात् कामक्रोधादिपंकरहितनिर्मलचित्तानां निस्संगानां योगिनां चेतांसि यथा वर्तते तथा भक्तानां सर्वाज्ञाननाशनम् कुर्वन् ज्ञानप्रदीपो हरो विजयते इत्यभिप्रायः । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

जो शिरमें भूषणके समान धारण किये हुए चंद्रकी मनोहर कलासे प्रकाशमान हैं, जिन्होंने लीलासे ही चंचल कामरूप शल-

मको दग्ध किया है, जो शुभदशाओंके अग्रभागमें प्रकाशमान हैं, जो अंतःकरणसें विजृंभमाण होते हुए अपार मोहरूप अंधकारके प्राग्देशको नष्ट करनेवाले ज्ञानप्रदीप हैं ऐसे महादेवजी योगियोंके मनोरूप गृहमें सर्वोत्कर्षसे वर्ते हैं ॥ १ ॥

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं ।
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ॥
भुक्तं मानविवर्जितं परगृहेष्वाशंक्या काकव-
त्तृष्णे जृंभसि पापकर्मपिशुने नाद्यापि संतुष्यसि ॥ २ ॥

अथ रागस्य तृष्णामूलकत्वात्तन्निग्रहेण विना न वैराग्यसिद्धिरित्यभिप्रेत्य तत्सिद्ध्यर्थमादौ तावत्तत्परिपन्थिभूतां तृष्णां दूषयति भ्रान्तमित्यादिनवभिः श्लोकैः । तत्र प्रथमं स्वकर्मकष्टनिवेदनपूर्वकं तृष्णां सम्बोध्य त्रिभिर्दूषयति-भ्रान्तमिति ॥ अनेकैर्बहुभिः दुर्गैः पार्वतवार्क्षजलदुर्गादिभिः विषमं विकटं दुःसञ्चारमित्यर्थः । देशं भ्रान्तं सञ्चरितं तथापि किंचिदल्पमपि फलं धनं न प्राप्तं न लब्धम् । बहुफलापेक्षयैव दुर्गमविदेशसञ्चारः कृतः फलं त्वीषदपि न प्राप्तमित्यर्थः । अत्र देशशब्दस्य नपुंसकत्वं निघण्ट्वन्तरेषु मृग्यम् । यद्वा देशमुद्दिश्य भ्रान्तम् । भावे क्तप्रत्ययः । अथवा "निष्कजनपदौ देशविषयौ" इत्यभिधानात् पुँल्लिङ्गस्यापि देशशब्दस्य नपुंसकत्वमस्वन्त्वमतन्त्रम् इति भाष्यकारप्रयोगाद्दिष्यते । तथा उचितमनुरूपं जातिकुलयोः जातिः ब्राह्मणत्वादिः कुलं सद्वंशः तयोरभिमानमित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । त्यक्त्वापि विसृज्य निष्फला फलशून्या सेवा परिचर्या कृता । धनाढ्यानामिति शेषः । उभयत्रापि फलेनानिष्टं न स्वल्पमपि किंचिदपीत्यर्थः । "लाभनिष्पत्तियोगेषु वले शस्ये फले धनम् ।" इति वैजयन्ती । तथा मानविवर्जितं अभिमानशून्यं यथा तथा बहुमानविहीनमिति वा आशङ्कया आकाङ्क्षया लोलुपत्वेनेति

---

१ [illegible] इति पाठांतरम् । २ दुर्गमतिपा० इति पाठान्तरम् । ३ निरते इति पाठान्तरम् ।

-यावत् । परगृहेषु काकेन बलिभुजा तुल्य काकवत् । " तेन तुल्य क्रिया चेद्वति. " इति वतिप्रत्ययः । भुक्तमभिमानत्यागेऽपि न बहुमानपूर्वकं किंतु नावमानमेव दत्त परान्नपिंडमभ्यवहृतमित्यर्थः । तथापि पापकर्मणा पापात्मना पिशुने सूचके । येषा तृष्णा त एव पापिष्ठा इति भावः । यद्वा पापकर्मणा दुष्कर्मणा पिशुने प्रवर्तके इत्यर्थः । एतद्व्यतिरेकेण दुष्कर्मप्रवर्तकान्तराभावादिति भावः । हे तृष्णे विषयस्पृहे जृम्भसि प्रवृद्धा भवसि । किंत्वद्यापि ईदृक्कष्टकर्मप्रवर्तनदशायामसीति भावः । न सन्तुष्यसि सन्तुष्टा न भवसि विरतिं न प्राप्नोषीत्यर्थः । इतः परमपि किंचिदुष्टकर्म कारयितुमपेक्षास्तीव प्रतिभातीति भावः ॥ २ ॥

दुर्गम अनेक देशोंमें मैंने भ्रमण किया पर कुछ फल न प्राप्त हुआ, यथार्थजाति और कुलका अभिमान त्यागकर पराई सेवा की सोभी व्यर्थ हुई, अपमानसे कौवेके समान सशंकित परघर भोजनभी करता रहा । हे तृष्णे ! पापकर्ममें प्रवृत्त तू अबतक सन्तुष्ट नहीं होती किंतु बढतीही है ॥ २ ॥

उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवो ।
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ॥
मंत्राराधनतत्परेण मनसा नीताः श्मशाने निशाः ।
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥ ३ ॥

उत्खातमिति ॥ निधिशङ्कया निक्षेपोऽत्र तिष्ठतीति भ्रान्त्या क्षितितलं किञ्चिदिष्टकादिनिचितभूतलमुत्खातमवदारितम् । तत्र न किंचिल्लब्धमित्यर्थः । तथा गिरेर्धातवः मनःशिलाद्याः ध्माताः सुवर्णभावं प्राप्स्यन्तीति धिया अग्नौ मूषायां समुज्झिकाविशेषे निक्षिप्य यावत्प्राणं फूत्कारैः सन्तापिता इत्यर्थः । तदपि न किंचिज्ज्ञातमिति भावः । " ध्मा शब्दाग्निसंयोगयोः " इत्यस्माद्धातोः कर्मणि क्तः । " धातुर्मनःशिलाद्यद्रेः " इत्यमरः । अत्राप्यु-

---

१ तृष्णेऽधुना मुञ्च माम् इति पाठान्तरम् ।

क्रम् । " सुवर्णरूप्यताम्राश्महरितालमनःशिला । गैरकाञ्जनकाश्मीरलोहसीसाश्च हिंगुलः । गन्धकाभ्रकमित्याद्या धातवो गिरिसम्भवाः । " इति । अत्र सुवर्णरूप्यव्यतिरेकेणैव योऽयमन्यथा प्रकृतासङ्गतेरिति । तथा सरितां पतिः समुद्रो निस्तीर्णः द्वीपांतरेषु वाणिज्येन बहु धनं सम्पादयिष्यामीति सांयात्रिकभावेन विलंघित इत्यर्थः । नृपतयो राजानश्च यत्नेन छन्दानुवर्तनरूपप्रयत्नेन संतोषिताः । तथा मन्त्राराधनतत्परेण मन्त्रजपतात्पर्यवता मनसा हेतुना श्मशाने प्रेतभूमौ निशा रात्रयो नीता यापिताः । भूतप्रेतपिशाचादिभ्यो भयमविगणय्य निध्यादिप्रदर्शकदेवताभिमुखीकरणसाधनमन्त्रजपतात्पर्येण निशासु श्मशाने स्थितमित्यर्थः । तथापि मया काणवराटकः अधकपर्दोऽपि न प्राप्तः । धनं तु दूरापास्तमिति भावः । " कपर्दश्च वराटकः " इति हलायुधः। अतस्तृष्णे सकामा सफलमनोरथा भव । त्वत्प्रतिज्ञातार्थनिष्पत्तेर्सिद्धसकल्पा भवेत्यर्थः । इत्थमनर्थहेतुभूतया तृष्णया वृथाव्यापारजनितश्रम एवावशिष्टो न वाञ्छितलाभ इत्यतस्तदुन्मूलने यत्नः कर्तव्य इति भावः ॥ ३ ॥

द्रव्य मिलनेकी आशासे मैंने ठौर २ भूमि खोदी, रसायन सिद्ध होनेके निमित्त पर्वतकी अनेक धातुओंको फूंक डाली, देशान्तरसे धन वा रत्नप्राप्तिके हेतु समुद्रभी मथ डाला और बडे प्रयत्नसे राजाओंकोभी प्रसन्न किया और मंत्र सिद्ध करनेके निमित्त मन लगाकर निरंतर रात्रियोंको महास्मशानमें बैठ जागा किया परन्तु यथार्थ मुझे एक कानी कौडीभी हाथ न आई । हे तृष्णे ! अब तु तौभी सकाम हो ॥ ३ ॥

खलालापाः सोढाः कथमपि तदाराधनपरै-।
र्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ॥
कृतो वित्तस्तम्भः प्रतिहतधियामञ्जलिरपि ।
त्वमाशे मोघाशे किमपरमतो नर्त्तयसि माम् ॥ ४ ॥

१ खलोलापा इति पाठान्तरम् । २ कृतश्चित्त० इति पाठान्तरम् । ३ प्रहसित० इति पाठान्तरम् ।

खलालापा इति ॥ खलानां दुर्जनानामालापा दुर्भाषितानि: तदाराधनतत्परैस्तत्सेवातत्परैः । अस्माभिरिति शेषः । कथमप्यतिकृच्छ्रेण सोढाः क्षांतमः । अन्यथाभावे कार्यभंगो भवेदिति भावः । तथा अन्तरभ्यन्तर एव बाष्पं तदालापश्रवणजनिताश्रु निगृह्य नियम्य शून्येन निरुत्सुकेन मनसा उपलक्षितैर्निर्भिन्नातःकरणैरित्यर्थः । हसित हासोऽपि कृत इति शेषः । कर्तरि क्तः । दुरालापैराक्षिता अपि ते सन्तोषवन्त एव न तु निर्विण्णा अतो विश्वसनीया इति बुद्ध्युत्पादनार्थं निर्विषयमिथ्याहासोऽपि विरचित इत्यर्थः । तथा वित्तेन धनेन यः स्तम्भो जडीभावस्तेन प्रतिहता मूढा विवेकशून्येति यावत् । धीर्येषां तेषां धनदुर्मदान्धानामित्यर्थ । " स्तम्भौ स्थूणाजडीभावौ " इत्यमरः । अत अञ्जलिरपि कृतः प्रह्वीभावोऽपि विहितस्तथापि न किंचित्फलमिति भावः । अतः मोघाशे व्यर्थमनोरथे आशे तृष्णे । " आशा तृष्णादिशोः प्रोक्ता " इति विश्वः । त्वं मामतोऽस्मात्खलालापसहनादिकृतात् अपरमितरत् किं कार्यं नर्तयसि नाटयसि । मया किं कार्यं कारयसीति यावत् । न किमपीत्यर्थः । नाटयितव्यार्थस्य वैयर्थ्यादिति भावः । ननु पूर्वश्लोके मयेत्येकवचनं प्रयुक्तमत्र तु तदाराधनपरैरिति बहुत्वं कथमेतत्समंजसमिति चेत्सत्यं तृष्णोपहतानां बहुत्वात्तत्प्रयुक्ततात्कर्मकर्तृभेदेन क्वचिदेकवचनं क्वचिद्बहुवचनं च विवक्षितमित्यवधेयमेतमुत्तरत्रापि योज्यम् । शिखरिणी वृत्तम् ॥ ४ ॥

खलोंकी सेवा करनेमें हमने तिनके ठट्टे और कुत्सित वाक्य सहे, हृदय नेत्र आंसूको रोक उनके आगे उदास मनसे हँसा किये और चित्त स्थिर कर उन हँसनेवालोंके सन्मुख हाथभी जोडा । हे तृष्णे ! व्यर्थ आशा करनेवाली इससे , अधिक अब क्या नचाती है ॥ ४ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां ।
कृते किन्नास्माभिर्विगलितविवेकैर्व्यवसितम् ॥

यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं मानव्रीडैर्निजगुणकथापातकमपि ॥ ९ ॥

अथ तृष्णादुर्विलसितेनैव महदनुचितमप्याचरितमित्याह—अमीषामिति ॥ किंच तुलितानि समीकृतानि बिसिनीपत्रपयांसि येषां तेषां नलिनीदलगतजलकवत्तरलानां क्षणभंगुराणामित्यर्थः । अमीषामविश्वसनीयानां प्राणानां कृते एतत्प्राणत्राणार्थमित्यर्थः । " अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसञ्ज्ञितौ । " इति वचनात् । विगलितो भ्रष्टो विवेकः कर्तव्याकर्तव्यविचारो येषां तैरस्माभिः किं दुष्कर्म न व्यवसितं नोद्युक्तम् । सर्वमपि व्यवसितमेवेत्यर्थः । कुतो यद्यस्मात्कारणात् द्रविणमदेन धनमदेन निःसञ्ज्ञानि निस्तम्भितानि मनांसि येषां तेषां विमर्शशून्यान्तःकरणानामाढ्यानां धनिकानाम् । " इभ्य आढ्यो धनी स्वामी " इत्यमरः । अग्रे पुरस्तात् मानव्रीडैर्निर्लज्जैरस्माभिर्निजगुणकथापातकं स्वकीयविद्याविनयादिगुणप्रशंसारूपपापमपि कृतम् । तच्च निषिद्धम् । " आत्मप्रशंसां परगर्हणमिव वर्जयेत् " इत्यापस्तम्बस्मरणात् । " आत्मप्रशंसा मरणं परनिंदा तथैव च । " इति वचनादात्मगुणप्रशंसैवात्मोपघातः तस्य च निरयप्रापकत्वेन पातकत्वं च । निजगुणप्रख्यापनेन धनं सम्पाद्य तेन प्राणान्सन्तर्पयिष्याम इत्याशयेनेदृशानुचितमाचरितं तथापि न तल्लब्धमित्यपिशब्दार्थः । वृत्तं पूर्ववत् ॥ ९ ॥

जैसे कमलके पत्रपर जलके बून्द चंचल रहते हैं वैसेही इन चंचल प्राणोंके हेतु विवेक त्यागकर हमने क्यों उद्यम न किया क्योंकि जिससे धनके मदसे मदान्ध लोगोंके निकट अपना गुण गान करना यह पाप निर्लज्ज होके किया ॥ ९ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः ।
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ॥

१ निःसंभ्रम० इति पाठान्तरम् । २ वित्त० इति पाठान्तरम् ।

ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं ।
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचिताः ६॥

अथ यद्यप्युचितमेवाचरितं तथापि तस्यायायातथ्यान्न फलोपधायकमभूदित्याह—क्षातमिति ॥ सत्यैवमपि परिभवहेतौ मनसोऽनुद्वेगः क्षमा तया न क्षांत न सोढमवमानादिकमिति शेष । किं त्वशक्ततयैवेति भावः । तथा गृहे उचितं युक्त यत् सुख मृष्टान्नभोजनकलत्रसभोगादिजनितानंदादि तन्न सतोषतः किमनेन तुच्छेनेति परितोषान्न त्यक्तम् । किं त्वसभावितमव्रतपर्यैवेति भावः । तथा दुःसहा. सोढुमशक्याः ये शीतवाततपनैः क्लेशा दुःखानि ते सोढाः क्षांता. । देहयात्रार्थं देशांतरसचारे तेषामनुभूतत्वादिति भावः । तपश्चाद्रायणादिक तु न तप्त न चरितम् । तथा नियमितप्राणैरतःप्रत्याहृतप्राणैरस्माभि अहश्च निशा चाहर्निशमहोरात्रम् । “ अचतुर० ” इत्यादिना निपातनात्साधुः । वित्त ध्यात चिंतित शभोः पद न ध्यातम् । अतो मुनिभिर्यद्यत्कर्म कृतमवमानसहनादिकमाचारित तत्तदेव कर्म अस्माभिश्च कृत किंतु तैस्तैस्तत्तत्कर्मनियतैः फलैर्वंचिता वर्जिताः । तेषामयथाचरणेन वैगुण्यात्फलभाजो न जाता इत्यर्थ. । क्षांत्यादिनैव यद्यवमानादिक क्षान्त स्यात्तर्हि फललाभो भवेदेव न तु तदाचरितम् । अत्र चानर्थस्तृष्णादुर्विलसितमूल एवेति फलितार्थः । शार्दूलविक्रीडित वृत्तम् ॥६॥

क्षमा तो हमने की परन्तु धर्म विचारके न की अर्थात् अशक्ततासे की, गृहसुख तो छोडा परन्तु संतोष पकडके न छोडा, शीतोष्ण वायुका दुःसह दुःख सहा पर तप न किया, धनका ध्यान करते रहे परन्तु संयमसे कल्याणदाता शिवके चरण न ध्याये, हमने वे कर्म किये जो विचारवाले मुनियोंने किये पर उन कर्मोंके फलोंसे हम वंचित हुए हैं ॥ ६ ॥

भोगा न भुक्ता वयमेव भुक्ता- ।
स्तपो न तप्तं वयमेव तप्ताः ॥

कालो न यातो वयमेव याता-।
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ७ ॥

अथ त्रिभिर्जरादूषणद्वारा तृष्णां निंदति—भोगा इति ॥ भुज्यत इति भोगाः स्रक्चन्दनादिविषया न भुक्ता नानुभूताः किंतु वयमेव भुक्तास्तत्प्राप्त्यर्थं दुरतचिंतया ग्रस्ता । तथा तपः व्रतोपवासादि पुण्य न तप्त नाचरित किंतु वयमेव तप्ता अध्यात्मिकादितापत्रयेण संतापिताः । तथा कालो न यातो न गतस्तस्याखण्डायमानत्वेन यानासंभवादिति भावः । किंतु वयमेव याता जीवितावधिकालमुल्लंघ्यावसान प्राप्ता इत्यर्थः । अथवा कालो न यात सदाचारसज्जनसहवासादिना न गतः । तथा चेच्छ्रेयो भवेदेवेति भाव । किंतु वयमेव याताः देहगेहादियोगक्षेमानुसंधानलंपटत्वेन कालमतिवाह्य गता इत्यर्थ । तथा तृष्णा न जीर्णा न शिथिला । तच्छैथिल्यहेतोरनुपस्थितत्वादिति भाव । किंतु वयमेव जीर्णा । तृष्णासहकृतजरया शिथिलांगा जाता इत्यर्थ । अत इतः पर वा क्षिप्र खट्वांगेनेव तृष्णोन्मूलनहेतुः संपादनीय इति भाव. ॥ ७ ॥

विषयोंको हमने नहीं भोगा किन्तु विषयोंनेही हमारा भुगतान कर दिया, हमने तप न तपे पर तपहीने हमें तपा डाला, काल व्यतीत न हुआ पर वयस हमारी बीत गई, तृष्णा पुरानी न हुई पर हम पुराने हो गये ॥ ७ ॥

वलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

वलिभिरिति ॥ वलिभिर्जराविश्लथचर्मरेखाभिर्मुख वक्त्रमाक्रांत वैरूप्य प्रापितमित्यर्थः । पलितेन जरसा शौक्ल्येन शिरो मस्तकमंकित चिह्नितम् । शिरःकेशादयो धवला जाता इत्यर्थ. । तथा गात्राणि करचरणाद्यवयवा. । अवयविवाचिनो गात्रशब्दस्यावयवार्थकत्व लक्षणया वेदितव्य अवयवावयविनोरभेदविवक्षया वा । न च तस्मादुभयविवक्षाया यथाश्रुतमेव समंजसमिति वाच्यम् । मुख शिर इत्येकवचनप्रयोगविरोधात् । ननु तत्रापि जात्येकव-

ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं ।
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचिताः ६॥

अथ यद्यप्युचितमेवाचरित तथापि तस्यायाथातथ्यान्न फलोपधायकमभूदित्याह—क्षांतमिति ॥ सत्येवमपि परिभवहेतौ मनसोऽनुद्वेगः क्षमा तया न क्षांत न सोढमवमानादिकमिति शेषः । किं त्वशक्ततयैवेति भावः । तथा गृहे उचित युक्त यत् सुख मृष्टान्नभोजनकलत्रसंभोगादिजनितानंदादि तच्च संतोषतः किमनेन तुच्छेनेति परितोषान्न त्यक्तम् । किं त्वसमाचितब्रह्मचर्येणैवेति भावः । तथा दुःसहा सोढुमशक्या ये शीतवाततपनैः क्लेशा दुःखानि ते सोढाः क्षांताः । देहयात्रार्थं देशांतरसंचारे तेषामनुभूतत्वादिति भावः । तपश्चान्द्रायणादिकं तु न तप्त न चरितम् । तथा नियमितप्राणैरतःप्रत्याहृतप्राणैरस्माभि अहश्च निशा चाहर्निशमहोरात्रम् । " अचतुर० " इत्यादिना निपातनात्साधु । वित्त ध्यातं चिंतितं शंभोः पदं न ध्यातम् । अतो मुनिभिर्यद्यत्कर्म कृतमवमानसहनादिकमाचरित तत्तदेव कर्म अस्माभिश्च कृत किंतु तैस्तैस्तत्तत्कर्मनियतै फलैर्वंचिता वर्जिताः । तेषामयथाचरणेन वैगुण्यात्फलभाजो न जाता इत्यर्थः । क्षांत्यादिनैव यद्यवमानादिक क्षान्त स्यात्तर्हि फललाभो भवेदेव न तु तदाचरितम् । अयं चानर्थस्तृष्णादुर्विलसितमूल एवेति फलितार्थः । शार्दूलविक्रीडित वृत्तम् ॥६॥

क्षमा तो हमने की परन्तु धर्म विचारके न की अर्थात् अशक्ततासे की, गृहसुख तो छोडा परन्तु संतोष पकडके न छोडा, शीतोष्ण वायुका दुःसह दुःख सहा पर तप न किया, धनका ध्यान करते रहे परन्तु संयमसे कल्याणदाता शिवके चरण न ध्याये, हमने वे कर्म किये जो विचारवाले मुनियोंने किये पर उन कर्मोंके फलोंसे हम वंचित हुए हैं ॥ ६ ॥

भोगा न भुक्ता वयमेव भुक्ता- ।
स्तपो न तप्तं वयमेव तप्ताः ॥

कालो न यातो वयमेव याता-।
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ७ ॥

अथ त्रिभिर्जरादूषणद्वारा तृष्णां निंदति—भोगा इति ॥ भुज्यत इति भोगाः स्रक्चदनादिविषया न भुक्ता नानुभूताः किंतु वयमेव भुक्तास्तत्प्राप्त्यर्थं दुरतचितया ग्रस्ताः । तथा तपः व्रतोपवासादि पुण्य न तप्त नाचरित किंतु वयमेव तप्ता अध्यात्मिकादितापत्रयेण सतापिताः । तथा कालो न यातो न गतस्तस्याखडडायमानत्वेन यानासभवादिति भाव. । किंतु वयमेव याता जीविताव धिकालमुल्लङ्घ्यावसान प्राप्ता इत्यर्थः । अथवा कालो न यातः सदाचारसज्जनसहवासादिना न गत । तथा चेच्छ्रेयो भवेदेवेति भाव । किंतु वयमेव याताः देहगेहादियोगक्षेमानुसधानलपटत्वेन कालमतिक्रम्य गता इत्यर्थ । तथा तृष्णा न जीर्णा न शिथिला । तच्छैथिल्यहेतोरनुपस्थितत्वादिति भाव । किंतु वयमेव जीर्णा । तृष्णानहकृतजरया शिथिलाङ्गा जाता इत्यर्थ । अत इत पर वा क्षिप्र खट्वाङ्गेनेव तृष्णोन्मूलनहेतु. सपादनीय इति भाव ॥ ७ ॥

विषयोंको हमने नहीं भोगा किन्तु विषयोंनेही हमारा भुगतान कर दिया, हमने तप न तपे पर तपहीने हमें तपा डाला, काल व्यतीत न हुआ पर वयस हमारी बीत गई, तृष्णा पुरानी न हुई पर हम पुराने हो गये ॥ ७ ॥

वलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

वलिभिरिति ॥ वलिभिर्जराविकृतचर्मरेखाभिर्मुख वक्रनाक्रात वैरूप्य प्रापितमित्यर्थः । पलितेन जरसा शौक्ल्येन शिरो मस्तकमङ्कित चिह्नितम् । शिर -केशादयो धवला जाता इत्यर्थ. । तथा गात्राणि करचरणाद्यवयवा । अवयविवाचिनो गात्रशब्दस्यावयवार्थकत्व लक्षणया बोद्धव्य अवयवावयविनोरभेदविवक्षया वा । न च वक्राद्युत्सवविवक्षाया चक्षुरन्तमेव समञ्जसमिति वाच्यम् । मुख शिर इत्येतत्पञ्चनमप्रयोगनिरोधात् । ननु नत्रापि जात्येक-

ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं ।
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचिताः ६॥

अथ यद्यप्युचितमेवाचरित तथापि तस्यायाथातथ्यान्न फलोपधायकमभूदित्याह—क्षांतमिति ॥ सत्येवमपि परिभवहेतौ मनसोऽनुद्वेगः क्षमा तया न क्षांत न सोढमवमानादिकामिति शेष· । किं त्वशक्ततयैवेति भावः । तथा गृहे उचितं युक्त यत् सुख मृष्टान्नभोजनकलत्रसभोगादिजनितानंदादि तन्न सतोषतः किमनेन तुच्छेनेति परितोषान्न त्यक्तम् । किं त्वसमावितब्रह्मचर्येणैवेति भाव. । तथा दुःसहा सोढुमशक्याः ये शीतवाततपनैः क्लेशा दुःखानि ते सोढाः क्षांताः । देहयात्रार्थं देशांतरसचारे तेषामनुभूतत्वादिति भावः । तपश्चान्द्रायणादिक तु न तप्त न चारितम् । तथा नियमितप्राणैरतःप्रत्याहृतप्राणैरस्माभि अहश्च निशा चाहर्निशमहोरात्रम् । " अचतुर० " इत्यादिना निपातनात्साधु. । वित्त ध्यात चिंतित शभोः पद न ध्यातम् । अतो मुनिभिर्यद्यत्कर्म कृतमवमानसहनादिकमाचरित तत्तदेव कर्म अस्माभिश्च कृत किंतु तैस्तैस्तत्तत्कर्मनियतै फलैर्वंचिता वर्जिताः । तेषामयथाचरणेन वैगुण्यात्फलभाजो न जाता इत्यर्थ. । क्षांत्यादिनैव यद्यवमानादिकं क्षान्त स्यात्तर्हि फललाभो भवेदेव न तु तदाचरितम् । अयं चानर्थस्तृष्णादुर्विलसितमूल एवेति फलितार्थः । शार्दूलविक्रीडित वृत्तम् ॥६॥

क्षमा तो हमने की परन्तु धर्म विचारके न की अर्थात् अशक्ततासे की, गृहसुख तो छोडा परन्तु संतोष पकडके न छोडा, शीतोष्ण वायुका दुःसह दुःख सहा पर तप न किया, धनका ध्यान करते रहे परन्तु संयमसे कल्याणदाता शिवके चरण न ध्याये, हमने वे कर्म किये जो विचारवाले मुनियोंने किये पर उन कर्मोंके फलोंसे हम वंचित हुए हैं ॥ ६ ॥

भोगा न भुक्ता वयमेव भुक्ता- ।
स्तपो न तप्तं वयमेव तप्ताः ॥

कालो न यातो वयमेव याता-।
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ७ ॥

अथ त्रिभिर्जरादूषणद्वारा तृष्णां निंदति—भोगा इति ॥ भुज्यत इति भोगाः स्रक्चंदनादिविषया न भुक्ता नानुभूताः किंतु वयमेव भुक्तास्तत्प्राप्त्यर्थं दुरतचिंतया ग्रस्ता । तथा तपः व्रतोपवासादि पुण्य न तप्तं नाचरित किंतु वयमेव तप्ता अध्यात्मिकादितापत्रयेण संतापिताः । तथा कालो न यातो न गतस्तस्याखण्डदण्डायमानत्वेन यानासंभवादिति भावः । किंतु वयमेव याता जीवितावधिकालमुल्लङ्घ्यावसान प्राप्ता इत्यर्थः । अथवा कालो न यातः सदाचारसज्जनसहवासादिना न गतः । तथा चेच्छ्रेयो भवेदेवेति भावः । किंतु वयमेव याताः देहगेहादियोगक्षेमानुसंधानलंपटत्वेन कालमतिक्रम्य गता इत्यर्थः । तथा तृष्णा न जीर्णा न शिथिला । तच्छैथिल्यहेतोरनुपस्थितत्वादिति भाव । किंतु वयमेव जीर्णा । तृष्णासहकृतजरया शिथिलांगा जाता इत्यर्थ । अत इतः परं वा क्षिप्रं खट्वांगेनेव तृष्णोन्मूलनहेतुः संपादनीय इति भाव ॥ ७ ॥

विषयोंको हमने नहीं भोगा किन्तु विषयोंनेही हमारा भुगतान कर दिया, हमने तप न तपे पर तपहीने हमें तपा डाला, काल व्यतीत न हुआ पर वयस हमारी वीत गई, तृष्णा पुरानी न हुई पर हम पुराने हो गये ॥ ७ ॥

वलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

वलिभिरिति ॥ वलिभिर्जराविश्लथचर्मरेखाभिर्मुख वक्रमाक्रांत वैरूप्य प्रापितमित्यर्थः । पलितेन जरसा शौक्ल्येन शिरो मस्तकमंकित चिह्नितम् । शिरःकेशादयो धवला जाता इत्यर्थ. । तथा गात्राणि करचरणाद्यवयवा । अवयविवाचिनो गात्रशब्दस्यावयवार्थकत्व लक्षणया वेदितव्य अवयवावयविनोरभेदविवक्षया सा । न च वस्तुबाहुल्यविवक्षाया यथाश्रुतमेव समंजसमिति साम्प्रतम् । मुख शिर इत्येकवचनप्रयोगविरोधात् । ननु तत्रापि जात्येकव-

चनग्रहणे न कोऽपि विरोध इति चेत्किमनेन वकबंधप्रयासेनेत्यलमतिप्रसङ्गेन । शिथिलायन्ते शिथिलानिवाचरन्ति जराजर्जरभावविश्लिष्टसन्धिबन्धतया कार्यकरणासमर्थानि जायन्त इत्यर्थः । किंतु एका तृष्णा तरुणायते तरुण इवाचरति । बलिष्ठा जातेत्यर्थः । जरया सर्वमप्येव विशकलित न तृष्णेति महदेतदाश्चर्यमिति भावः । उभयत्रापि " कर्तुः क्यङ् सलोपश्च " इति क्यङ् । " अकृत्सार्वधातुकयोर्दीर्घः " इति दीर्घः ॥ ८ ॥

मुहके चमडे सिकुड गये, शिरके बाल श्वेत हो गये और सब अंग शिथिल हो गये पर एक तृष्णा ही तरुण होती जाती है ॥ ८ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः ।
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ॥
शनैर्यष्ट्योत्थानं घनतिमिररुद्धे च नयने ।
अहो मूढः[1] कायस्तदपि मरणापायचकितः ॥९॥

निवृत्तेति ॥ भोगेच्छा विषयानुभवस्पृहा निवृत्ता निर्गता । अत्र जरादूषणाभिनिवेशपारवश्येनेत्यमुक्तम् । तेन तृष्णैका तरुणायत इत्यविरोधः । पुरुष इति यो बहुमानः सन्मान. सोऽपि गलितोऽपगतस्तत्प्रयोजकपौरुषाद्यपायादिति भावः । यद्वा पुरुषाणां बहुमानस्तत्कर्तृकसन्मानः सोऽपि गलितः । पूर्ववत्पुरुषादिना न बहु मन्यत इत्यर्थः । इदानीं तादृशगौरवाभावादिति भावः । अथ परेतबान्धवशोचनापदेशेन स्वस्यापदेशतां सूचयन्नाह । जीवितसमाः प्राणतुल्या अत्यन्तप्राणतुल्या इत्यर्थः । सुहृदो बन्धवश्च समानाः सबहुमानाः सन्तः सपदि सद्य एव जरावस्थायाः प्रागेवेत्यर्थः । स्वर्याताः स्वर्गं गता । निजसुकृतपाकेन पुण्यलोकं गता इत्यर्थः । जरादुर्दशापत्त्या बहुमानगर्हितोऽहं न यातो हीनजीवन इति भावः । यद्वा समाना. सवयसो जीवितसमा बन्धवश्च सपदि सद्य एव दुरवस्थापत्तेः पूर्वमेवेति भावः ।

---

१ विगलित- इति पाठान्तरम् । २ मूढ- इति पाठान्तरम् ।

न्वर्गाता लोकान्तरगता न त्वहमित्यर्थः । " स्वरव्यय स्वर्गनाकत्रिदिवत्रिदशालया ।" इत्यमरः । ननु कञ्चित्काल स्थीयता किमनेनामङ्गलाशसनेनेत्यत आह । शनैर्मन्द यष्ट्युत्थान यष्टयवष्टम्भनोत्थान प्राप्तमिति शेषः । पादपाटवविघट्टनात्स्वयमुत्थाने सचारे वा शक्तिर्नास्तीत्यर्थ । न त्वेतावन्मात्रमेव किंतु नयने चक्षुषी च । प्रगृह्यत्वादस्य अहो इत्यनेन सध्यभावः । घन निबिड यत्तिमिर पाटलाख्यनेत्ररोगविशेषो वैद्यशास्त्रप्रसिद्धः । " तिमिर ध्वाते नेत्रामयेऽपि च " इति विश्वप्रकाशश्च । तेन रुद्धे निरुद्धशुद्धप्रसारे अर्थग्रहणासमर्थे जाते इत्यर्थः । अन्धपगुर्जीवनाद्वर मरणमेवेति भाव । एतत्सर्वमनर्थजात जराकृतमेवेति हृदयम् । तदपि तथापि मूढो ज्ञानहीनः कायो देहो मरणेन योऽपायो विश्लेषो नाश इति यावत् । तस्माच्चकितो नीतो भवतीति शेषः । अत्र देहिधर्मस्तदुपाधौ देहे उपचर्यते । अहो ईदृक्कष्टदशायामपि जीविताशैव बलीयसी न विज्ञानोदय इत्याश्चर्यमित्यर्थः । एतदपि तृष्णाविलसितमेवेति भावः । शिखरिणी वृत्तम् ॥ ९ ॥

विषयभोगकी इच्छा न्यून हुई, लोगोंमें अपना मान भी घटा, समान वयसवालेभी मर गये, जो इष्ट मित्र थे वेभी समाप्त होनेवाले हैं अथवा अपने समान हैं, आपभी लकडी टेककर उठने लगे और आंखोंमें अंधेरी आई तौभी यह काया ऐसी निर्लज्ज है कि अपना मरण सुन चकित हो जाती है ॥ ९ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला ।
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ॥
मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी ।
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः १० ॥

नन्वेतादृगतृष्णामुल्लङ्घ्य स्वात्मसुखानुभवतत्परा ये केचन महात सन्ति वा नेत्याशङ्कय सन्त्येवेति निगमयन् तस्याः पृथग्जनदुस्तरतरत्वद्योतनार्थं महानदीत्व रूपयति—आशेति ॥ मृष्टान्नपानभोजनविचित्राम्बरभूषणधारण-

शोडशवार्षिककामिनीसम्भोगादिगोचरमानसव्यापारा मनोरथास्त एव जलानि यस्याः सा तथोक्ता । अप्राप्येष्वप्यर्थेषु प्राप्त्यभिलाषविशेषास्तृष्णास्ताभिरेव तरङ्गैः कल्लोलैराकुला सङ्कुला । अभिमतवस्तुषु स्नेहो रागः । उपलक्षणमेतद्द्वेषादीनाम् । तथा च रागद्वेषादय एव ग्राहा नक्रादयस्तत्रस्या सन्तीति तथोक्ता । तत्तत्पदार्थलाभगोचरा वितर्कास्त एव विहगाः कारण्डवादिपक्षिणो यस्यां सा तथोक्ता । " मनसो निर्विकारत्व धैर्य सत्स्वपि हेतुषु । " इत्युक्तलक्षण धैर्य तदेव द्रुमस्त ध्वंसयत्युन्मूलयतीति तथोक्ता । अज्ञान मोहमेव तद्वृत्तयो दम्भदर्पादयो लक्ष्यन्ते । तथा च मोहा अज्ञानवृत्तय एवावर्ता जलभ्रमास्तैर्दुस्तरा सुष्ठु तरितुमशक्या अतिगहना । एकत्र दुर्विभाव्यस्वभावादन्यत्र दुरवगाहत्वाच्चेत्यमिति निर्णेतुमशक्येत्यर्थः । इष्टाधिगमजनितध्यान चिताबहुविधत्वेऽपि चितानां तटद्वयरूपणोपयोगार्थं द्वित्व वक्ष्यते । तथा प्रोत्तुङ्गे अत्युन्नते चिते एव तटे यस्याः सा तथोक्ता । आशा नाम नैकविधात्यायता तृष्णा । "दशावस्था नैकविधात्याशा तृष्णापि चायता । " इत्यमरः । नामेति प्रसिद्धौ । आशेति प्रसिद्धेत्यर्थ । या नदी वर्तते इति शेषः । यत्तदोर्नित्यसम्बन्धात् तस्या आशानद्याः पार गता ज्ञानप्लवेनेति भावः । अत एव शुद्धमनसो निर्मलान्तःकरणाः योगीश्वराः महायोगिनः नन्दन्ति ब्रह्मानन्दमनुभवन्तीत्यर्थ । अतः सर्वथा तृष्णातरणोपायोऽन्वेषणीयः श्रेयस्कामेनेति भावः । अत्र प्रवाहरूपणाविच्छिन्नत्वसाम्यदशाया नदीत्व, प्रकृतिस्वरूपानिरूप्यत्वसर्वतोमुखसम्भ्रमत्वादिसादृश्यान्मनोरथेषु जलत्व, मज्जनोन्मज्जनपारम्पर्येण विरामाभावसाधर्म्यात्तृष्णासु तरङ्गत्व, दुष्टस्वाभाव्येन ग्रसिष्णुत्वसाम्याद्रागादिषु ग्राहत्व, नानाविधगतिमत्त्वसादृश्याद्वितर्केषु विहगत्व, स्थिरतरत्वस्वभावाद्धैर्ये द्रुमत्व निरन्तरदुरन्तभ्रामकत्वसाधर्म्यान्मोहेष्वावर्तत्व, अगाधभावनोत्कटत्वसाम्यच्चितासु तटत्व च रूपितमित्यवगन्तव्यम् । अत एव समस्तवस्तुवर्तिमानयवरूपकालङ्कार ॥ १० ॥

आशा नाम एक नदी है, मनोरथरूपी जल उसमें भरा है, तृष्णारूपी तरंगोंसे पूर्ण है, प्रीतिही उसमें मगर है, नानाविध तर्कही उसमें पक्षी हैं, धैर्यरूपी वृक्षको ढहानेवाले मोहरूपी भँवरे

उसमें पडे है, इससे वडी दुस्तर और कठिन हो रही है, वडी चिंताही उसके तट हैं उससे पार होकर वडे शुद्ध मननशील योगीही आनन्द पाते हैं ॥ १० ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं ।
विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥
महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया ।
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ११ ॥

यदुक्त योगिनस्तृणानदीं तीर्त्वा नन्दन्तीति तत्र विषयपरित्यागमन्तरा तदसम्भवादथ विषयपरित्यागविडम्बनोच्यते अथेति । अथ तृष्णादूषणानन्तर विषयाणा रूपादीनाम् । " रूप शब्दो गन्धरसस्पर्शाश्च विषया अमी । ' इत्यमर । यद्वा स्रक्चन्दनवनितादिभोग्यवस्तूनां परित्याग' सन्यासस्तस्य विडम्बनानुकरणमभिनय इति यावत् । उच्यत इति शेषः । तत्प्रकारमेवाह दशभि —न ससारोत्पन्नमिति ॥ ससारे अनादिभवपरम्परायामुत्पन्नमुदित फलोद्देशानानुष्ठितमिति यावत् । चरित पुण्याचरणम् । " आदिकर्मणि क्त' कर्तरि च " इति कर्तरि क्तः । कुशल क्षेमकर नानुपश्यामि नानुमन्दधामीत्यर्थ. । कुत. एतद्वैपरीत्यमित्याशक्य तत्रोपपत्तिमाह विपाक इति । पुण्याना पुराकृतसुकृतानां विपाकः सम्पद्रूपपरिपाकः विमृशत तत्फल परामृशतो मे मम भय जनयत्युत्पादयति । तत्पर्यालोचने सम्पदा पुण्यव्ययलभ्यत्वेन विपद्रूपत्वाद्भयजनकत्वमित्यर्थ । अत एवोक्त कविकुलसार्वभौमेन श्रीहर्षेण । " पूर्वपुण्यविभवव्ययलब्धा. सम्पदो विपद एव विमृष्टा । " इति । अथवा पुण्याना ज्योतिष्टोमादिमत्कर्मणां विपाक स्वर्गादिरूपफलपरिणामो विमृशत पूर्वोत्तर पर्यालोचयतो मे भय जनयति । "क्षीणे पुण्ये मर्त्यलोक विशन्ति" इति भगवद्वचनात् यावन्नियतकाल स्वर्गसुखमनुभूय पुण्यक्षये सति पुनर्मर्त्यलोकप्रवेशे महाविषादगर्भनिरयवासजन्मपरपराद् खप्रभवत्वाद्भयकरत्वमित्यर्थ । अत कुशल न पश्यामीति सम्बध. । एतत्फलभूतानां भोगानामप्यनर्थहेतुत्वमेवेत्याह । महद्भिर्भूयिष्टैः

पुण्यौघैः पुण्यसञ्चयैः हेतुभिश्चिरपरिगृहीताश्चिरकालमारभ्य सङ्गृहीता विषयाश्च भोगा अपि विषयिणां विषयासक्तानां व्यसनं विपत्तिं दुःखमिति यावत् । दातुमिव दातुमेव । इवशब्दोऽत्रावधारणार्थकः । न तूत्प्रेक्षाभिव्यञ्जकः । अन्यथार्थांतरता स्यादिति वेदितव्यम् । महान्तः प्रवृद्धा जायते भवति व्यसनप्रदानप्रवणैव एतद्बुद्धिः नान्यदानप्रवणेत्यर्थः । एवमैहिकामुष्मिकभोगानामनिष्टानुबंधित्वात्तत्त्याग एव श्रेयानिति भावः । शिखरिणी वृत्तम् ॥ ११ ॥

सांसारिक उत्पन्न चरित्रमें हम कुशल नहीं देखते और पुण्यफल स्वर्गादिविचारसे भयदायक ही देख पडता है अर्थात् पुण्यक्षय होनेपर वहांसे भी पतन होता है और बहुत दिनपर्यन्त पुण्यके समूहसे इस लोकमे जो विषयादि संचित किया है वह भी विषयासक्तोंको अन्तसमय दुःखदायक ही है ॥ ११ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया ।
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः ।
स्वयं त्यक्त्वा ह्येते शमसुखमनन्तं विदधति ॥ १२ ॥

अथ सर्वथा विषयाः परित्याज्या इति वक्तुं तेषां व्यवस्थितिमाह—अवश्यमिति ॥ विषया भोगाश्चिरतरं बहुकालमुषित्वा स्थित्वापि । "वसतिक्षुधोरिट्" इतीडागमः । "वचिस्वपि०" इत्यादिना सम्प्रसारणम् । अवश्यं नियतं सिद्धमिति यावत् । यातारो गतारः । आगमापायित्वेनास्थिरत्वात्परिचयानादरेण पुरुषं त्यक्त्वा यातार एव न तु परिचयदशाभावेऽपि स्थातार इत्यर्थः । तदुक्तं भगवता । "मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥" इति । यातेर्लुट् । अतः वियोगे विषयविरहे को भेदः को वा विशेषः न कोऽपीत्यर्थः । स्वकर्तृकत्यागे वा पुरुषकर्तृकत्यागे वा तस्य जायमानत्वादिति भावः । तथा हि यद्यस्मात्कारणात् जनो विषयासक्तः पुमान् अमून् वि-

यान् स्वय न त्यजाति गुणान् गृहीत्वा न विसृजाति । स्वयमेव त्यजाति चेत्तर्हि तेन कृतार्थो भवेदिति भावः । एतेन विषयकर्तृकत्यागे तु न कृतार्थत्वमिति सूच्यते । ननु कुत एतद्वैषम्यमित्याशक्य तत्र व्यवस्थामाह । स्वातन्त्र्यात्कर्तृत्वात् स्वाच्छन्द्यादिति यावत् । " स्वतन्त्रः कर्ता " इत्यनुशासनात् । त्यजन्तः पुरुष विसृजन्तः सन्त' विषया इति शेष. । मनसः अतुलपरितापाय दुरन्तसन्तापाय भवन्तीति शेषः । अत्यन्तदुःखकारिणो भवन्तीत्यर्थ. । स्वय स्वेन कर्त्रा पुरुषेण त्यक्ताः तुच्छत्वभावनया विसृष्टाश्चेत्तर्हि एते विषया अनन्तमपरिच्छिन्न शमसुख तृष्णोपशांतिसुख परमानन्दमिति यावत् । विदधाति कुर्वंति हि । हिरवधारणे । तदुक्तम् । "यच्च कामसुख लोके यच्च दिव्य महत्सुखम् । तृष्णाशमसुखस्यैते नार्हाः षोडशिकां कलाम् ॥ " इति । अतोऽनर्थापादकविषयकर्तृकत्यागात्पूर्वमेव स्वयं तत्त्यागतत्परेण भवितव्य श्रेयस्कामेनेति भाव । वृत्त पूर्ववत् ॥ १२ ॥

बहुकालपर्यन्त भोग किये हुए विषय अन्तमें अवश्य छूटेंगे फिर उनके वियोग होनेमें क्या संशय रहा जिसे यह मनुष्य पहिले आप ही क्यों न त्याग दे क्योंकि जब वे आपसे छोडेंगे तो मनको बडा सन्ताप देंगे और जो आप छोड देगा तो महासुखको प्राप्त होगा ॥ १२ ॥

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं ।
यन्मुंचंत्युपभोगभांज्यपि धनान्येकांततो निस्पृहाः ॥
संप्राप्तान्न पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययान् ।
वाञ्छामात्रपरिग्रहानपि परं त्यक्तुं न शक्ता वयम् ॥१३॥

ननु कीदृग्विधा पुरुषाः विषयत्यागसमर्था' इत्याकाक्षाया ज्ञानिन एव समर्था न तु मादृशा इत्याह—ब्रह्मेति ॥ ब्रह्मज्ञानेन यो विवेकस्तत्त्वविचारस्तेन निर्मला निष्कलङ्का असम्भावनादिरहितेति यावत् । सा धीर्येषा ते ज्ञानवन्त

१ वाचकध० इति पाठान्तरम् ।

इत्यर्थः । दुष्करं कर्तुमशक्यं कुर्वंति । अहो इत्याश्चर्ये । किं तद्दुष्करमित्याह । यद्यस्मादुपभोगं भजन्तीत्युपभोगभांजि स्रक्चन्दनादिभोगसाधनत्वेनानुभूयमानानीत्यर्थः । धनानि वित्तानि निःस्पृहा निरीहाः सन्त एकांततो नितांतं निरवशेषमिति यावत् । मुञ्चन्ति विसृजन्ति इदमेवातिदुष्करमत्यन्ताश्चर्यं चेत्यर्थः । वयमस्मद्विधा ज्ञानिनस्तु पुरा पुरातनकाले न सम्प्राप्तान्नाधिगतान् सम्प्रतीदानीं वर्तमानकालेऽपि प्राप्तौ वा भविष्यत्काललाभेऽपि वा न दृढप्रत्ययान्न दृढविश्वासान् अविश्वसनीयानिति यावत् । कालत्रयेऽप्यसम्भाव्यमानानित्यर्थः । "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ।" इत्यमरः । किंतु वाञ्छामात्रपरिग्रहान्मनोरथमात्रसंगृहीतान्मनोव्यापारमात्रगोचरीकृतानपीत्यर्थः । अनुभूयमानास्तु किमुतेति भाव. । विषयानिति शेषः । त्यक्तुं परमत्यन्तं न शक्ता असमर्था अतस्त एव धन्या इति भावः । "शकधृष०" इत्यादिना तुमुन् । विषयपरित्यागे ब्रह्मज्ञानमेव मुख्यसाधनमतस्तत्सम्पादनेन तत्परित्यागोऽवश्यं कर्तव्य इति फलितार्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

ब्रह्मज्ञानके विवेकी निर्मलबुद्धिवान् और सत्पुरुष यह बडा कठिन व्रत धारण करते हैं कि उपभोग भूषण वस्त्र चंदन वनिता शय्या तांबूल और धन इत्यादि विषयक सामग्री सब त्याग देते हैं और निरन्तर निस्पृह रहते हैं, हमको तो ये वस्तु न तो पहिले प्राप्त हुई न अब इच्छामात्रसे ग्रहण हो रहे हैं उसे भी हम परित्याग नहीं कर सक्ते अर्थात इनकी आशाका भी हमसे त्याग नहीं होता ॥ १३ ॥

धन्यानां गिरिकन्दरेषु[1] वसतां ज्योतिः परं ध्यायता- ।
मानन्दाश्रुकणान्[2] पिबन्ति शकुना निःशंकमङ्केशयाः ॥
अस्माकं तु मनोरथोपरचितप्रासादवापीतट- ।
क्रीडाकाननकेलिकौतुकजुषामायुः परं[3] क्षीयते ॥ १४ ॥

---

१ निवसतां इति पाठान्तरम् । २ जल इति पाठान्तरम् । ३ परि० इति पाठांतरम् ।

उक्तमेवार्थं भङ्ग्यन्तरेणाह—धन्यानामिति ॥ गिरिकन्दरेषु गिरिगह्वरेषु । " दरी तु कन्दरो वा स्त्री " इत्यमरः । वसतां विविक्ततया वर्तमानानाम् । " विविक्तसेवी लघ्वाशी " इति वचनादिति भावः । तथा परं ज्योतिः परं ब्रह्म ध्यायतां धन्यानां पुण्यशालिनाम् । " सुकृती पुण्यवान् धन्यः " इत्यमरः । आनन्दे ये अश्रुकणा बाष्पबिन्दवस्तान् निःशङ्कं तेषां तपःप्रशान्तत्वान्निर्भयं यथा तथा अङ्के शेरत इत्यङ्केशया उत्सङ्गवर्तिनः । " अधिकरणे शेतेः " इत्यच्प्रत्ययः । शकुनाः पक्षिणः पिबन्ति । किंतु मनोरथेन वाञ्छामात्रेणोपरचिता या प्रासादेषु हर्म्येषु वापीतटेष्वल्पसरस्तीरेषु क्रीडाकाननेषूद्यानेषु च केलयो विहारास्तासु कौतुकजुषामौत्सुक्यभाजामस्माकमायुः परमायुरेव क्षीयते नश्यति । दुर्लभविषयचिंतातत्परैर्वृथा कालो यापितः । न तु तत् ब्रह्मज्ञानं सम्पादितमतो वयमपि तथा न धन्या इति भावः ॥ १४ ॥

जो उत्तम पुरुष पर्वतकी कंदरामें रहते और परब्रह्मकी ज्योतिका ध्यान करते हैं जिनके आनन्दका आंसु पक्षी निडर हो गोदमें बैठकर पीते हैं उनको धन्य है हम और लोगोंकी तो अवस्था केवल मनोरथहीके मंदिरकी बावडीके तटमें जो क्रीडाका वन तिसमें लीलाके कौतुक करते ही क्षीण होती है । तात्पर्य यह है कि नानाप्रकारके मिथ्या कल्पनाहीमें जन्म व्यतीत होता है, वास्तवमें कोई मनोरथ सिद्ध नहीं होता ॥ १४ ॥

भिक्षाशनं तदपि नीरसमेकवारं ।
शय्या च भूः परिजनो निजदेहमात्रम् ॥
वस्त्रं[1] विशीर्णशतखण्डमयी च कन्था ।
हा हा तथापि विषया न परित्यजन्ति ॥ १५ ॥

अथ कस्यचिद्विषयाभिभूतस्य निर्वेदवचनमभिनीयाह—भिक्षाशनमिति ॥ भिक्षा भैक्ष्यमित्यर्थः । अशनमाहारस्तदपि भिक्षान्नाशनमपि नीरसं मधुराम्लादिर-

---

१ वस्त्रं च जीर्णशतखण्डमलीनवस्त्रा इति पाठान्तरम् ।

सहीन तदप्येकवार न तु द्वित्रिवारमित्यर्थः । शय्या शयनीय च भूः साप्यास्तरणादिरहितेति भावः । परिजन. सेवकजनो निजदेहमात्र स्वयमेव परिजनो न तु कश्चिदन्योऽस्तीत्यर्थः । वस्त्रमाच्छादन च विशीर्णा शतखण्डमयी विशेषेण जीर्णानेकचीवरशकलनिर्मिता कथा तथापीदृक्कष्टदशायामपीत्यर्थ· । विषयाः भोगवाछा न परित्यजन्ति न विसृजन्ति मामिति शेषः । हा हेति विषादविस्मयातिशयाभिनिवेदनार्थोक्तिरुक्तिः । पापिष्ठा इमे विषया हतमेव घ्नन्तीति भावः । अत्र विषयपरित्यागकारणसामग्र्यां सत्या कार्यानुदयाद्विशेषोक्तिरलङ्कारः । " तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते । " इति लक्षणात् । वसन्ततिलका वृत्तम् ॥ १९ ॥

नीरस अन्न एकही बेर भीख मागके खाते हैं, भूमिही पर सोते हैं, कुटुम्बभी उनका देहहीमात्र है, पुराने वस्त्र सेकडों टुकडेकीसी गुदडी पहिने ऐसी दशामें प्राप्त हैं तौभी बडा आश्चर्य है कि उन्हें विषयवासना नहीं परित्याग करती ॥ १९ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ ।
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ॥
स्रवन्मूत्रक्लिन्नं करिवराशिरःस्पर्धि जघनं ।
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ २० ॥

अथ विषयाणां कामिनीप्राधान्यात्तद्दूषणाभावे तत्परित्यागो न सुकर इति मनसि निधाय तां दूषयति—स्तनाविति ॥ स्तनौ कुचौ मांसग्रन्थी मांसपिण्डौ तथापि कनककलशौ अनर्घ्यहिरण्मयकुम्भावित्युपमितौ उपमाविपर्यीकृतकनककलशकल्पत्वेनोपवर्णितावित्यर्थ । मुखं वक्त्रं तु श्लेष्मागारं कफलालादन्तमलादिस्थानं तदपि च शशाङ्केन सुधारसमयेन चन्द्रेण तुलितं समीकृतं तत्तुल्यत्वेनोपवर्णितमित्यर्थः । अत्र तुलितशब्दस्य सादृश्यवाचित्वात्तद्योगेऽपि न " तुल्यार्थैरतुलोपमाभ्याम्० " इति तृतीयाप्रतिषेध । अत्र गौरं मन्त-

---

१ अहो नि० इति पाठान्तरम् ।

वाचिन एव ग्रहणादिति । जघन कटिपुरोभागस्तु । " पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघन पुरः । " इत्यमरः । स्रवता मदनसदनदार्ढ्याभावाद्गलता मूत्रेण क्लिन्नमार्द्रमपवित्रमित्यर्थः । तदपि करिवराशिरःस्पर्धि मदजलपरिप्लुतिश्लाघ्यगजेंद्रकुम्भस्थलसदृशमित्युपवर्णितमिति भावः । अतः मुहुः पौनःपुन्येन निंद्य ग्रन्थ्याद्याकारेण जुगुप्स्य रूप,स्तनाद्यवयवस्वरूप कामिन्या इति शेषः । कविजनविशेषैस्तत्तद्विशेषकल्पनाचतुरकवीश्वरैः गुरु कनककलशादिसादृश्यवर्णनेन श्रेष्ठ कृतम् । कविजनवाङ्मात्रसारमेवैतद्रूप न तु स्वतः सिद्धमारत्वादिति भावः । अत्र मांसग्रन्थित्वेन स्तनयोर्मर्दनानर्हत्व, श्लेष्मागारत्वेन मुखस्य चुम्बनाद्ययोग्यत्वं, स्रवन्मूत्रक्लिन्नत्वेन जघनस्य हेयतया सम्भोगापात्रत्वं च सूचितम् । एतत्कुत एव कामिनीना सम्भोगास्पदत्वेनाभिमतम् । इदमेवेत्थ जुगुप्सितत्वेन दूषित चेत्तर्हि किमन्यत्कामिन्या भोगयोग्यमस्तीति श्लोकतात्पर्यम् । "हासोऽस्थिसन्दर्शनमक्षियुग्ममत्युज्ज्वल तत्कलुष वसायाः । स्तनौ च पीनौ पिशितास्रपिंडौ स्थानांतरे किं नरको न योषित् ॥ " इति ॥ १६ ॥

स्त्रियोंके स्तन मांसके लोंदे हैं उन्हें स्वर्णकलशकी उपमा देते हैं, मुख थूक खकारका गृह है उसे चन्द्रमाके समान कहते हैं, और टपकते हुए मूत्रसे भीगी जघनको गजश्रेष्ठके गण्डस्थलके समान कहते हैं तो देखो कि वारंवार निन्दायोग्य स्त्रियोंका रूप है उसे कवियोंने कैसा बढाया है ॥ १६ ॥

एको रागिषु राजते प्रियतमादेहार्धहारी हरो ।
नीरागेषु जनो विमुक्तललनासंगो न यस्मात्परः ॥
दुर्वारस्मरबाणपन्नगविषव्याविद्धमुग्धो जनः ।
शेषः कामविडंबितान्न विषयान् भोक्तुं न मोक्तुं क्षमः १७॥

अर्थेक परमेश्वर एवैकांततोऽनुरक्तो विरक्तश्च अन्यस्तु तथाननुरक्तत्वादविरक्तत्वाच परिक्लिष्ट एवेत्याह—एक इति ॥ प्रियतमाया पार्वत्या देहस्य शरीरस्य अर्धमर्धभागम् । " अर्धं नपुंसकम् " इति समास । तद्धरतीति तथोक्त । महाकामुकतया क्षणमात्रविश्लेषस्याप्यसहिष्णुत्वान्निजदेहवामार्धपरि-

कृतप्रियतम इत्यर्थः । देहार्धधारीति च पाठः । एक एव हरो रागिष्वनुरक्तेषु कामुकेष्वित्यर्थः । राजते अप्रतिनिधित्वेन प्रकाशते । तादृशकामुकान्तरस्यानुपलभ्यमानत्वादिति भावः । तथा नीरागेषु विरक्तेष्वपि विमुक्तस्त्यक्तो ललनासङ्गो योषिदासक्तिर्येन स तथोक्तो जनो वैराग्यपुरुषो यस्मादपरात् परोऽन्यो नास्ति । तपश्चरणसमये मदनदहनादिना तादृग्वैराग्यप्रकटनात्तथाविधविरक्तो न कश्चिदस्तीत्यर्थः । किन्तु दुर्वारा निवारयितुमशक्याः स्मरबाणा एव पन्नगाः सर्पास्तेषां विषेण गरलेन तत्सदृशेन व्यामोहेन च व्याविद्धो व्याक्षिप्तोऽत एव मुग्धो मूढो निश्चेष्टश्च शेषोऽवशिष्टो जनः कामेन मन्मथेन हेतुना विडम्बितानुकृतान् स्वीकृतानिति यावत् । विषयान् स्त्रीसम्भोगादीन् भोक्तुमनुभवितुं वा मोक्तुं त्यक्तुं वा न क्षमस्तादृगनुरागविरागोत्कर्षाभावात्तथाविधभोगत्यागयोरसमर्थ इत्यर्थः । कर्तुमकर्तुमन्यथा कर्तुं समर्थः परमेश्वर एक एवानुरक्तेषु विरक्तेषु च परां काष्ठां प्राप्तस्तदन्यः सर्वोऽप्युभयभ्रष्ट एवेति भावः । स्मरबाणपन्नगेत्यत्र रूपकालङ्कारः ॥ १७ ॥

रागिजनोंमें अपने वामागमें दयिताको धारण करनेवाले एक महादेवजीही विराजमान हैं तथा विरक्तोंमेंभी जिन्होंने स्त्रीसंग छोड दिया है ऐसे महादेवजीसे दूसरा कोई जन नहीं है किन्तु इन महादेवजीसे इतर जन जो दुर्वार मदनबाणरूप सर्पके विषसे विद्ध होनेसे मूढ हुए हैं वे तो कामसे विडंबित विषयोंको न भोगनेको समर्थ हैं न छोडनेको समर्थ हैं ॥ १७ ॥

अजानन् दाहात्म्यं पततु शलभस्तीव्रदहने ।
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ॥
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-।
न्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १८॥

अथ विषयदोषपरिज्ञानेऽप्यत्यागे कारणमाह—अजानन्निति ॥ शलभः पतङ्गो दहत्यनेनेति दाहः । करणे घञ् । तस्य आत्मनः स्वभावस्य भावो

१ माहात्म्य इति पाठान्तरम् । २ मो दीपद० इति पाठान्तरम् ।

दाहात्म्य भस्मीकरणसामान्यमित्यर्थ । " आत्मा देहे धृती जीवे स्वभावे परमात्मनि । " इति विश्व । अजानन् अनवबुध्यन् तीव्रदहने जाज्वल्यमानाग्नौ पततु प्रविशतु । प्रविश्य भस्मीभवत्वित्यर्थः । सभावनाया लोट् । तथा स प्रसिद्धो मीनो मत्स्योऽपि अज्ञानादात्मविनाशकारणमेतदित्यविवेकात् बाडिशयुत मत्स्यवेधनसन्दानितमयोमयवक्रकण्टकाग्रस्यूतमित्यर्थः । पिशितं मांसमश्नातु भक्षयतु । आमिषलोभात्कटकगिलनेन गलनिरोधात्सोऽपि म्रियतामित्यर्थ । नात्रानयोरपराध । नाज्ञानमपराध्यति । " पतङ्गमातङ्गकुरङ्गभृङ्गमीना हता पञ्चभिरेव पञ्च । " इति च न्यायादिति भाव. । " वडिशं मत्स्यवेधनम्, पिशित तरस मासम् " इति चामर । किंत्विहास्मिन् लोके विजानन्तोऽपि विनिपातहेतव इति । विवेकवन्तोऽप्येते वय विपज्जालैरापत्परपराभिर्जटिलान् ग्रथितान् उपद्रवहेतूनपीत्यर्थः । पचादित्वान्मत्वर्थीये अच्प्रत्यय । कामान् विषयान्न मुञ्चामो न त्यजामः । विषयस्वरूपपरिज्ञानेऽप्यमुञ्चतामस्माकमेवापराध इति भाव । " शे मुचादीनाम् " इति नुमागमः । विचार्यमाणे नास्माकमप्यपराध प्रबलतरकारणसद्भावादित्याह । मोहस्याज्ञानस्य महिमा माहात्म्य गहनो दुर्विज्ञेय अघटनघटनापटुतराविद्याविलासमहिम्ना लोके जन अविहितमपि करोति अतो नास्माकमपराध इति भाव ॥ १८ ॥

देखो पतंग दीपककी अग्निमें आय गिरता है पर यह नहीं जानता कि मैं नष्ट हूंगा, मछली जो कंटियाका मांस निगल जाती है वहभी नहीं जानती कि इससे मेरे प्राण जायंगे पर हम लोगोंको देखो कि हम जान बूझके दुःखदाई विषयोंकी अभिलाषा नहीं छोडते यह महामोहकी महिमा अति कठिन है ॥ १८ ॥

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं ।
क्षुधार्तः शाल्यन्नं कवलयति मांसादिकलितम् ॥

---

१ स्वादु सुरभि इति पाठान्तरम् । २ सन् शालीन इति पाठान्तरम् ।
३ शाकादिवलितान् इति पाठांतरम् ।

प्रदीप्ते कामाग्नौ सुदृढतरमालिंगति वधूं ।
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ॥१९॥

अज्ञानमहिम्नैव सुखाभासेष्वप्यन्नपानादिविषयेषु सुखबुद्धिं करोतीत्याह—तृषेति ॥ तृषा तृष्णया आस्ये वक्त्रे शुष्यति शोषं प्राप्नुवति सति शीतं च तन्मधुरं चेति विशेषणयोरपि मिथो विशेषविशेष्यभावविवक्षायां "विशेषणं विशेष्येण बहुलम्" इति समासः । शैत्यगुणयुक्तं संतापहरं चेत्यर्थः । "शीतलीक्रियते तापो येन तन्मधुरं स्मृतम् ।" इति लक्षणात् । यद्वा मधुरं शर्करापानकवन्माधुर्यसंयुक्तं सलिलमुदकं पिबति । तथा क्षुधार्तो बुभुक्षापीडितः सन् मांसादिना मांसघृतपयोदध्यादिव्यजनद्रव्येणेत्यर्थः । कलितं रुचिरं स्वादूकृतमित्यर्थः । कलिः कामधेनुः शाल्यन्नं कवलयति भुंक्ते । तथा कामाग्नौ मदनदहने प्रदीप्ते प्रज्वलिते सति मन्मथोद्रेके सतीत्यर्थः । सुदृढतरमतिगाढं वधूं स्त्रियमालिंगत्याश्लिष्यति । अतो व्याधेः क्षुत्तृष्णादिरूपामयस्य प्रतीकारं तदुपशांतिकरान्नपानालिंगनरूपौषधसेवनरूपप्रतिक्रियामित्यर्थः । सुखं भोग इति जनो विपर्यस्यति विपर्यस्तबुद्धिं प्राप्नोति न तु तत्त्वम् जानातीत्यर्थः । अतस्मिंस्तद्ग्रहो विपर्यासः । अयं च अज्ञानदुर्विलास एवेति भावः ॥ १९ ॥

जब मनुष्योंका कंठ प्याससे सूखने लगता है तब शीतल मधुर जल पीता है, जब क्षुधासे पीडित होता है तो मांस आदि सामग्रीके साथ चावलोंके भोजन करता है, जब कामदेवकी अग्नि प्रचंड होती है तब सुन्दर स्त्रीको हृदयसे लगाता है, विचारो तो यह एक २ व्याधिकी औषधि है परन्तु मनुष्योंने इसे उलटा सुखही समझ लिया है ॥ १९ ॥

तुंगं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः ।
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ॥

---

१ नाति-र्या इति पाठान्तरम् ।

मत्वा विश्वमनश्वरं निविशते संसारकारागृहे ।
संदृश्य क्षणभंगुरं तदखिलं धन्यस्तु संन्यस्यति ॥ २० ॥

एव तावदज्ञो जनः ससारविषयासक्त्या बद्धो भवति। ज्ञानी तु सर्वसङ्ग परित्यज्य कृतकृत्यो भवतीति निगमयति—तुङ्गमिति ॥ वेश्म प्रासादादि तुङ्गमुन्नतम्, सुताः पुत्राः सता साधूनां विदुषामभिमता इष्टाः सम्प्राप्तविद्याविनयादिगुणा इत्यर्थः । "मतिबुद्धि०" इत्यादिना वर्तमानार्थे क्त. । अत एव "क्तस्य च वर्तमाने" इति षष्ठीविधानात् षष्ठी न समस्यते इति वक्तव्यम् । इति समासनिषेधः । सम्पद. धनधान्यादिद्रव्यसमृद्धयः सङ्ख्यातिगाः असङ्ख्येया अपरिमिता इत्यर्थः । दयिता प्रियतमा कल्याणी आनुकूल्यादिगुणसम्पन्नत्वाच्छोभना । तदुक्तम् । "अनुकूलां विमलाङ्गीं कुलजां कुशलां सुशीलसम्पन्नाम् । पञ्चलकारां भार्यां पुरुषः पुण्योदयाल्लभते हि ॥" वयश्च नव नूतन यौवनमित्यर्थः । "वयः पक्षिणि बाल्यादौ" इत्यमरः । इत्येवमज्ञानेन मोहेन मूढो विवेकशून्यो जनो विश्व गृहापत्यवित्तदारादिप्रपञ्चमनश्वर शाश्वत मत्वा आलोच्य ससार एव कारागृह वन्दीगृह तत्र निविशते प्रविशति तदासक्तो भवतीत्यर्थः । न तु तस्यानर्थमूलत्व जानातीति भावः । "नेर्विशः" इत्यात्मनेपदम् । अतिसङ्कटतया परमनिर्बंधहेतुत्वात्ससारस्य कारागृहत्वरूपणम् । "कारा स्याद्बन्धनालये" इत्यमर. । धन्यस्तु ज्ञानी । तुशब्दः पूर्वस्माद्वैलक्षण्य द्योतयति तदेवाह । तदखिल वेश्माद्यशेषप्रपञ्च क्षणभगुरमशाश्वत सदृश्य सम्यगालोक्य । सपूर्वाद्दृशे. क्त्वो ल्यबादेश । सन्यस्यति न तत्रासक्तो भवति किंतु विरक्तो भवतीति भावः । अतो ज्ञानेन सर्वानर्थमूलमज्ञान निरस्य कृतकृत्येन भवितव्यमिति तात्पर्यम् ॥ २० ॥

ऊंचा गृह, विद्वानोंके अभिमत सुत, अपरिमित संपत्ति, आनुकूल्यादिगुणसम्पन्न कल्याणी भार्या और वय नया इस प्रकार अज्ञानसे मूढ हुआ जन इस विश्वको शाश्वत समझके संसाररूप वंदीशालामें पडता है और कोई धन्य पुरुष इस अखिलको नश्वर समझके इसमें आसक्त नहीं होता है ॥ २० ॥

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा ।
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ॥
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं ।
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥२१॥

अथ याच्ञादैन्यदूषणमारभते अत्राभिप्रायः । विषयाणां याच्ञादैन्यप्रयोजकत्वाद्विषयपरित्यागविडम्बनानन्तर्येणैतत्प्रयोज्यं याच्ञाजनितदैन्यमपि दूषणीयमेवेति अतस्तत्प्रसङ्गानन्तरमेतद्दूषयितुमारभते दीनेत्यादि श्लोकदशकेन—दीना दीनमुखैरिति ॥ दीना दरिद्रा अत एव दीनानि शोभाहीनानि मुखानि येषां तैः । कुतः क्रोशद्भिः रुदद्भिः तत्कुतः क्षुधितैः सञ्जातक्षुधैः बुभुक्षितैरित्यर्थः । क्षुधाशब्दोऽप्याबन्तस्तस्मात् " तदस्य सञ्जातं तारकादिभ्य इतच् " इतीतच्प्रत्ययः । तारकादिराकृतिगणः । क्षुधिति धकारान्तपक्षे तु क्षुध प्राते क्षुधितैः क्षुधातुरैः । कर्तरि क्तः । " वसतिक्षुधोरिट् " इतीडागमः । शिशुकैरत्यन्तबालकैः । अल्पार्थे कन्प्रत्ययः । सदा सर्वदैवाकृष्टमन्नपानादियाच्ञापूर्वकमाक्षिप्तं जीर्णाम्बरं निर्जीर्णवस्त्रं यस्याः सा । तथा निरन्ना अन्नपानरहिता अत एव विधुरा विह्वला । निरन्ना च सा विधुरा चेति विशेषणसमासः । अन्नाभावात्कष्टजीवनेत्यर्थः । " विधुरं प्रत्यवेते स्यात्कष्टविश्लिष्टयोरपि । " इति विश्वः । गेहिनी गृहिणी दृश्या दृष्टिगोचरा न चेत् स्याद्यदि तर्हि मनस्वी सुमेधाः धैर्यशाली । प्रशंसायामिनिः । कः पुमान् याच्ञाभङ्गभयेन तेन गद्गदो हीनस्वरः । अनुकरणशब्दोऽयम् । यो गलः कण्ठस्तत्र त्रुट्यन्ति शकलीभवन्ति अत एव विलीनान्यनुच्चारितप्रायाण्यक्षराणि वर्णा यस्मिन् कर्मणि तद्यथा तथा । स्वस्य दग्धः प्लुष्टो यो जठरं उदरं तस्यार्थे तत्पूरणार्थमित्यर्थः । " अर्थे हेतौ च शब्दौ द्वौ तादर्थ्येऽव्ययसंज्ञितौ । " इत्यमरः । दग्धशब्दोऽत्र निर्वेदाभियोजकः । यथोक्तं सुरेश्वरवार्त्तिके । " अस्य दग्धोदरस्यार्थे किं न [illegible] । "

---

१ नैर्न वि० इति पाठान्तरम् । २ दृश्येत गे० इति पाठान्तरम् ।
३ त्वरत् इति पाठान्तरम् । ४ न्न इति पाठान्तरम् ।

इति देहीति वदेत् ब्रूयात् न कोपीत्यर्थ । तस्यादृश्यत्वादीदृगवस्थापन्नो भवत्यतोऽनर्थमूलत्वात्तत्परित्यागोऽवश्य कर्तव्य इति भावः ॥ २१ ॥

दीनोंसेभी दीन है मुख जिनका और अन्नके लिये रोते हुए ऐसे बालक जिस स्त्रीके फटे वस्त्रोको खींचते हों और जो निरन्न और दुःखित है ऐसी घरवाली (पत्नी) दृष्टिगोचर न होय तो ऐसा कौन धीर मनुष्य है जो केवल अपने उदर भरनेके लिये याचना (मांगने) के भङ्ग (नाहीं) के डरसे गद्गद वाक्योंसे टूटे फूटे अक्षरोंवाली ' देहि ' इस वाणीको कहे अर्थात् स्त्रीही सब कहाती है और पूरा बंधन है ॥ २१ ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी ।
गुरुतरगुणग्रामांभोजस्फुटोज्ज्वलचंद्रिका ॥
विपुलविलसल्लज्जावल्लीवितानकुठारिका ।
जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥ २२ ॥

इदानीं दैन्यानर्थमूलं जठरं निंदति—अभिमतेति ॥ अभिमतः कीर्तिप्रतिष्ठावहत्वादिष्टो यो महामानग्रन्थिर्गरिष्ठाभिमानग्रन्थिस्तस्य प्रभेदे विश्लेषणे पटीयसी समर्थतरा । पटुशब्दादीयसुनि " उगितश्च " इति ङीप् । गुरुतरा अतिशयेन वर्तमाना ये गुणग्रामा गांभीर्यधैर्यादिगुणगणाः त एवांभोजानि तेषां स्फुटं यथा तथा उज्ज्वलचन्द्रिका पूर्णिमाकौमुदी तत्संकोचहेतुभूतेत्यर्थः । विपुलं विस्तृतं यथा तथा विलसत्प्रकाशमानं यल्लज्जावल्लीवितानं व्रीडालताविततिस्तस्य कुठारिका परशुः । तदुच्छेदनसाधनभूतेत्यर्थः । दुष्पूरा पूरयितुमशक्या प्रत्यहमन्नपानादिपूरितापि पर्याप्त्यभावादिति भावः । "ईषदु०" इत्यादिना खल्प्रत्ययः । इयं जठरमुदरमेव पिठरी कुण्डी । " पिठरः स्थाल्युखा कुण्डम् " इत्यमरः । गौरादित्वात् ङीप् । तथा च कृष्णामृतस्तवे । जठरपिठरीपूर्तये नांतनासि " इति । विडंबना याच्ञानुकरणं करोतीति याच्ञादैन्यमस्माभिरभिनाटयतीत्यर्थः । एतद्व्यतिरेकेण दैन्यकारिणी न काप्यस्तीति भावः । वल्लीकाठेत्कुठारीकेति पाठे निशिततरपरशुरित्यर्थः । रूपकालङ्कारः २२

अभिमत महाभिमानके नाश करनेमें समर्थ, श्रेष्ठ गांभीर्यादि गुणगणरूप कमलोंके संकुचित करनेमें उज्ज्वल पूर्णिमाकी चांदनी, विपुल तथा प्रकाशमान लज्जारूप लतासमूहके नाश करनेमें कुठारिका ऐसी यह दुष्पूर जठरपिठरीही सब विडंबना करती है ॥२२॥

पुण्यंग्रामे वने वा महति सितपटच्छन्नपालिं कपालिं ।
ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ॥
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो ।
मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः २३॥

अथ मानिनस्तावद्बन्धुयाच्ञाया वरमन्यत्र भिक्षाशनतात्पर्येण प्राणधारणमित्याह—पुण्यग्राम इति ॥ न्यायगर्भं मीमांसाशास्त्रोक्तप्रकारगर्भितं यथा तथा यद्वा नीयन्ते ज्ञाप्यते बुभुत्सितार्था एभिरिति न्याया वेदशास्त्रपुराणादयस्ते गर्भे कुक्षौ येषां ते न्यायगर्भाः अधीताखिलविद्या इत्यर्थः । "कुक्षिभ्रूणार्भका गर्भाः" इत्यमरः । तथाभूता द्विजा ब्राह्मणास्तैर्हुता आज्यादिहविर्भिः सुतर्पिता ये हुतभुजोऽग्नयस्तेषां धूमेन धूम्राणि कृष्णलोहितवर्णानि उपकण्ठानि अन्तिमप्रदेशा यस्य तस्मिन् । "धूम्रधूमलौ कृष्णलोहिते, उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ।" इति चामरः । अत एव पुण्ये पवित्रे महति विपुले च । विशेषणद्वयेन निःसङ्कोचसञ्चारार्हत्वं सूच्यते । ग्रामे अग्रहारे वने अरण्ये वा तत्रापि वानप्रस्थादीनां विद्यमानत्वादिति भावः । सितपटेन श्वेतवस्त्रेण छन्ना पिहिता दृष्टिगोचरत्वाभावार्थमाच्छादिता यथा विशिष्टाचारात् पालिः कोटिर्यस्यास्ताम् । "पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु" इति वैजयन्ती । कपालिं भिक्षाहरणोचितपात्रमादाय गृहीत्वा क्षुधार्तः क्षुत्पीडितो मानी अभिमानवान् पुरुष इति शेषः । उदरमेव दरी गिरिगह्वरं तस्याः पूरणाय दुष्पूरत्वादिति भावः । "तादर्थ्ये चतुर्थी" । अथवा उदरं पूरयितुमित्यर्थः ।

१ पुण्ये इति पाठान्तरम् । २ [illegible] इति पाठान्तरम् । ३ प्रवृत्तो [illegible] इति पाठान्तरम् । ४ प्राणैः [illegible] इति पाठान्तरम् ।

" तुमर्थाच्च भाववचनात् " इति चतुर्थी । द्वारं द्वारं प्रतिद्वारं गृहमेधिनामिति शेषः । " नित्यवीप्सयोः " इति वीप्सायां द्विरुक्तिः । प्रविष्टः भिक्षार्थमित्यर्थः । प्राणैः सनाथः सहितश्चेति भिक्षाशनेन प्राणधारणतत्परः स्याच्चेदित्यर्थः । वरं मनाक्प्रियम् । " देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रियम् । " इत्यमरः । दिने दिने अनुदिनं प्रत्यहमित्यर्थः । यथार्थेऽव्ययीभावः । तुल्यकुल्येषु समानकुल्येषु समानकुलोद्भवेषु तन्मध्य इत्यर्थः । दीनः पुनः दैन्यवाश्चेन्न वरम् । बन्धुमध्ये याच्ञादैन्यनीचजीवनाद्वरं भिक्षान्नेन प्राणधारणम् । " न बन्धुमध्ये धनहीनजीवनम् " इति वचनादिति भावः । अत्र यद्यपि " त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितं व्रतम् ।" इति वचनान्मानिनः सर्वथा अयाचितत्वमेव मुख्यव्रतं तथापि यदि क्षुधातुरत्वेन याच्ञाप्रवृत्तिः स्यात्तदा कुत्रचिदपरिज्ञातदेशे श्रोत्रियगृहेषु कपालभिक्षान्नभक्षणेनोदरपूरणं कर्तव्यं न तु बन्धुजनयाच्ञा प्राणसङ्कटेऽपि तस्याः परमनर्थावहत्वादिति गूढाभिसन्धिः ॥ २३ ॥

पवित्र ग्राम अथवा पवित्र बडे वनमें उज्ज्वलवस्त्रसे ढका हुआ ठिकरा लेकर जिनकी चौखट न्यायपूर्वक ब्राह्मणोंकी होमी हुई अग्निके धूमसे मलिन हो उनके द्वारपर क्षुधासे पीडित पेटरूपी बन्दरा भरनेको नित्य प्रति भ्रमण करता हुआ मानी पुरुष अच्छा है पर समान कुलवालोंमें दीन होना अच्छा नहीं ॥ २३ ॥

गङ्गातरङ्गकणशीकरशीतलानि ।
विद्याधराध्युषितचारुशिलातलानि ॥
स्थानानि किं हिमवतः प्रलयं गतानि ।
यत्सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥

अथ निर्दिष्टमार्गगमनाभाववितर्कद्वारा दूषयति—गङ्गेति ॥ गङ्गातरङ्गाणां भागीरथीकल्लोलानां ये कणा बिन्दवस्तेषां शीकरैः प्रालेयप्रायलेशैः । अथवा कणाः ... शीकराः सूक्ष्माः ... शीतलानि शिशिराणि । विद्या-

1 ... इति पाठान्तरम् ।

अभिमत महाभिमानके नाश करनेमें समर्थ, श्रेष्ठ गांभीर्यादि गुणगणरूप कमलोंके संकुचित करनेमें उज्ज्वल पूर्णिमाकी चांदनी, विपुल तथा प्रकाशमान लज्जारूप लतासमूहके नाश करनेमें कुठारिका ऐसी यह दुष्पूर जठरपिठरीही सब विडंबना करती है ॥२२॥

पुण्यं ग्रामे वने वा महति सितपटच्छन्नपालिं कपालिं ।
ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ॥
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो ।
मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः २३॥

अथ मानिनस्तावद्बन्धुयाच्ञाया वरमन्यत्र भिक्षाशनतात्पर्येण प्राणधारणमित्याह—पुण्यग्राम इति ॥ न्यायगर्भं मीमांसाशास्त्रोक्तप्रकारगर्भित यथा तथा यद्वा नीयन्ते ज्ञाप्यते बुभुत्सितार्था एभिरिति न्याया वेदशास्त्रपुराणादयस्ते गर्भे कुक्षौ येषा ते न्यायगर्भा अधीताखिलविद्या इत्यर्थः । " कुक्षिभ्रूणार्भका गर्भाः " इत्यमरः । तथाभूता द्विजा ब्राह्मणास्तैर्हुता आज्यादिहविर्भिः सुतर्पिता ये हुतभुजोऽग्नयस्तेषां धूमेन धूम्राणि कृष्णलोहितवर्णानि उपकण्ठानि अन्तिमप्रदेशा यस्य तस्मिन् । " धूम्रधूमलौ कृष्णलोहिते, उपकण्ठान्तिकाभ्यर्णाभ्यग्रा चाप्यभितोऽव्ययम् । " इति चामरः । अत एव पुण्ये पवित्रे महति विपुले च । विशेषणद्वयेन निःसङ्कोचसञ्चाराहत्व सूच्यते । ग्रामे अग्रहारे वने अरण्ये वा तत्रापि वानप्रस्थादीनां विद्यमानत्वादिति भावः । सितपटेन श्वेतवस्त्रेण छन्ना परेषां दृष्टिगोचरत्वाभावार्थमाच्छादिता तथा विशिष्टाचारात् पालिरश्रिर्यस्यास्ताम् । " पालि. स्त्र्यश्र्यङ्कपङ्क्तिषु " इति वैजयन्ती । कपालिं भिक्षाहरणोचितशरावमादाय गृहीत्वा क्षुधार्तः क्षुरपीडितो मानी अभिमानवान् पुरुष इति शेष । उदरमेव दरी गिरिगह्वर तस्या पूरणाय पूर्त्यर्थमित्यर्थ. । " तादर्थ्ये चतुर्थी " । अथवा उदर पूरयितुमित्यर्थ. ।

---

१ पुण्ये इति पाठान्तरम् । २ सुसहुतभुग्धूम० इति पाठान्तरम् । ३ प्रवृत्तो पा० इति पाठान्तरम् । ४ प्राणी स धन्यो इति पाठान्तरम् ।

" तुमर्थाच्च भाववचनात् " इति चतुर्थी । द्वारं द्वारं प्रतिद्वारं गृहमेधिनामिति शेषः । " नित्यवीप्सयोः " इति वीप्साया द्विरुक्तिः । प्रविष्टः भिक्षार्थमित्यर्थः । प्राणैः सनाथः सहितश्चेति भिक्षाशनेन प्राणधारणतत्परः स्याच्चेदित्यर्थ । वरं मनाक्प्रियम् । " देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रियम् । " इत्यमरः । दिने दिने अनुदिनं प्रत्यहमित्यर्थः । यथार्थेऽव्ययीभावः । तुल्यकुल्येषु समानकुल्येषु समानकुलोद्भवेषु तन्मध्य इत्यर्थः । दीनः पुनः दैन्यवाश्चेन्न वरम् । बन्धुमध्ये याच्ञादैन्यनीचजीवनाद्वरं भिक्षान्नेन प्राणधारणम् । " न बन्धुमध्ये धनहीनजीवनम् " इति वचनादिति भावः । अत्र यद्यपि " त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितं व्रतम् ।" इति वचनान्मानिनः सर्वथा अयाचितत्वमेव मुख्यव्रतं तथापि यदि क्षुधातुरत्वेन याच्ञाप्रवृत्तिः स्यात्तदा कुत्रचिदपरिज्ञातदेशे श्रोत्रियगृहेषु कपालभिक्षान्नभक्षणेनोदरपूरणं कर्तव्यं न तु बन्धुजनयाच्ञा प्राणसङ्कटेऽपि तस्याः परमनर्थावहत्वादिति गूढाभिसन्धिः ॥ २३ ॥

पवित्र ग्रास अथवा पवित्र बडे वनमें उज्ज्वलवस्त्रसे ढका हुआ ठिकरा लेकर जिनकी चौखट न्यायपूर्वक ब्राह्मणोंकी होमी हुई अग्निके धुयेंसे मलिन हो उनके द्वारपर क्षुधासे पीडित पेटरूपी कन्दरा भरनेको नित्य प्रति भ्रमण करता हुआ मानी पुरुष अच्छा है पर समान कुलवालोंमें दीन होना अच्छा नहीं ॥ २३ ॥

गङ्गातरङ्गकणशीकरशीतलानि ।
विद्याधराध्युषितचारुशिलातलानि ॥
स्थानानि किं हिमवतः प्रलयं गतानि ।
यत्सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥

अथ निर्विण्णस्य तपस्थानाभावं वितर्कद्वारेण दूषयति—गङ्गेति ॥ गङ्गातरङ्गाणां सम्बन्धिनः शीकरा ये कणाः ते तेषां शीकराः प्रालेयप्रायलेशैः । अथवा गङ्गायास्तरङ्गकणैः शीकरैः सूक्ष्मकणैश्च शीतलानि शिशिराणि । वनशी-

---

१ पा० रवि पाठान्तरम् ।

करेति वा पाठः । तथा सांद्रा इत्यर्थः । विद्याधरैर्देवयोनिविशेषैरध्युषितानि अधिष्ठितानि । " गत्यर्थाकर्मक० " इत्यादिना वसेः कर्मणि क्तः । "वाचि-स्वपि० " इत्यादिना सम्प्रसारणम् । अत एव चारूणि मनोहराणि शिला-तलानि येषु तानि तथोक्तानि । विशेषणद्वयेनैतेन परमपवित्रत्व च सूच्यते । हिमवतो हिमाद्रेः सबधीनि स्थानानि प्रातप्रदेशाः प्रलय गतानि किं नष्टानि किम् । किं शब्दोऽत्र वितर्के । " कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते । " इति शाश्वतः । ननु कुल एव विद्यमानेष्ववस्थानेषु विनाशो वितर्क्यत इत्याशक्य तत्र कारणमाह । यद्यस्मात् कारणात् मनुष्या जनाः सावमानेषु याच्ञया तिरस्काराचरणपूर्वक दत्तेषु परपिंडेषु परान्नेषु रता आसक्तास्तादृग्परपिंडाशनेन प्राणत्राणतत्परा जाता इत्यर्थः । यदि स्थानानि न नश्येरन् तर्हि जना ईदृक्कष्टयाञ्चातत्परा न भवेरन् तेषां नष्टत्वादेवेदृग्दुरव-स्थापन्ना इति कृत्वा एव वितर्क्यत इति वाक्यार्थः । यद्वा गत्यतराभाव प्रश्नद्वारा दूषयति गगेति । किंशब्दोऽत्र प्रश्ने । नन्वेव कुतः पृच्छयत इत्यत आह । यस्मात्कारणात् हे मनुष्याः सावमानपरपिंडरता यूय जाता इति शेष. । अत' प्रश्नस्यावकाश इति भाव. । अन्यत्समानम् । एतेन दुर्भगयाच्ञापिशाचिकामूर्ध्न्यंघ्रिं पातयित्वा गिरिपरिसरेषु सुखेन वर्तितव्य-मिति सूचितम् ॥ २४ ॥

गङ्गाके तरङ्गोंके जलकी बिन्दुओंके छीटोंसे जो शीतल हो रहे हैं, जहां विद्याधर ठौर २ सुंदर पत्थरोंकी चट्टानोंपर बैठे हैं ऐसे हिमाचलके स्थानोंका क्या प्रलय हो गया है जो अपमान सहके भी पराये दिये ग्रासमें मनुष्य रत रहते हैं ॥ २४ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा
गिरिभ्यः । प्रध्वस्ता वा तरुभ्यः सरसफलभृतो
वल्कलिन्यश्च शाखाः ॥ वीक्ष्यन्ते यन्मुखानि प्रस-

१ वल्कलिन्यश्च इति पाठान्तरम् ।

भमपगतप्रश्रयाणां खलानां । दुःखाप्तस्वल्पवित्त-
स्मयपवनवशान्नर्तितभ्रूलतानि ॥ २९ ॥

इदानीं पुनर्जीवनोपायान्तराभावावितर्कद्वारा दूषयति—किमिति ॥ कदरेभ्यो गुहाभ्यः सकाशात् कंदा कदमूलादिपदार्थाः । क्षुन्निवारणक्षमा इति भावः । प्रलयं विनाशं विराममिति यावत् । उपगता प्राप्ताः किम् । "जुगुप्साविराम०" इत्यादिना पचमी । एवमुत्तरत्रापि किंशब्दो वितर्के । तथा गिरिभ्यः सकाशान्निर्झरा वा प्रवाहाश्च वा उपशमकरा इति भावः । प्रलयमुपगताः किमिति संबधः । "प्रवाहो निर्झरो झरः" इत्यमरः । "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये ।" इति चामरः । तथा तरुभ्यो वृक्षेभ्यः सकाशात् सरसानि माधुर्यरसयुक्तानि फलानि बिभ्रतीति तथोक्ताः । वल्कलिन्यो वल्कलवस्त्यः एतेन विशेषणद्वयेन सुभोज्यवस्तुसमृद्धत्वाच्छादनयोग्यत्वे सूचिते इत्यवगतव्यम् । शाखाश्च प्रध्वस्ता वा विनष्टाः किम् । अव्ययानामनेकार्थत्वात् । ननु विद्यमानकदमूलादिष्वविद्यमानकदमूलाभ्यो षिद्यमानत्व कुतो वितर्क्यत इत्यत आह । यद्यस्मात्प्रसभमत्यतमपगतप्रश्रयाणा विनयशून्याना खलाना दुरीशाना दुःखातमतिक्लेशेन प्राप्त तदपि स्वल्पं यद्वित्त धन तेन यः स्मयो गर्वः स एव पवनः स्मयः पवन इव तद्वशादानर्तिताश्चालिता भ्रुवो लता इव च येषां तानि सविकाराणीत्यर्थः । स्मयपवनेत्यत्र भ्रूलता इत्यत्र च उपमारूपकयोः साधकबाधकप्रमाणाभावात्सदेहसंकरः । मुखानि वीक्ष्यते दृश्यते याचकजनैरिति शेषः । कन्दमूलादीनां विनष्टत्वादेव जनैर्दुरीश्वरपरिचर्यातत्परैर्भूयते जीवनोपायार्थमतस्तदभाववितर्कस्यावकाश इति भावः । यद्वा जीवनोपायान्तराभावप्रश्नद्वारा निंदति किं कन्दा इति । किंवाशब्दौ प्रश्ने अत एव प्रश्नः क्रियते इत्यादि । यस्मात्कारणाद्दुर्विनीतदुरीश्वरमुखान्यवलोकयन्ते युष्मानिस्तस्मादभावप्रश्नो युज्यत इति भावः । शेषं समानम् । अत्रायमभिसंधिः । परमनैच्छ्यापि शास्त्रनिषिद्धं चेद्दुर्विनीतसेवनोपजीवनं परिहर्तव्यम् ॥ २९ ॥

---

१ दुःखोपात्ताल्प० इति पाठान्तरम् । २ दर्पपवनान० इति पाठान्तरम् ।

पहाडोंकी कंदराओंसे कन्द मूल और पर्वतोंमेंसे पानीके झरने क्या नष्ट हो गये, वल्कलवाले वृक्षोंमेंसे रसरहित फलवाली शाखा क्या ध्वस्त हो गई, जो अनम्र खल जिन्होंने बडे कष्टसे कुछ धन उत्पन्न किया उसके गर्वरूपी वायुसे भौंहरूपी लता जिनकी नाचती है उनका मुख देखते हैं अर्थात् उनके मुखके दर्शनको त्यागकर सत्पुरुष पहाडोंमें क्यों न वसते हैं ॥ २५ ॥

पुण्यैर्मूलफलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना ।
भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यावो वनम् ॥
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा ।
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते२६

अथ खलानां मुखानि दृश्यन्त इत्यनेन सूचितनिंदां प्रकटयितुं चिरकालदुराशासेवापरिखिन्नस्य कस्यचिन्निर्वेदवचनमभिनीयाह—पुण्यैरिति ॥ अधुनेदानीं पुण्यैः पवित्रैः मूलैः कन्दमूलैः फलैः कदलीरसालपनसादिफलैश्च । अपवित्ररक्तमूलककालिंगफलादिभक्षणनिषेधस्मरणात्पुण्यैरित्युक्तम् । तथा अनिर्वाच्यतया । प्रिय प्रणयिनीं इति पाठे हे प्रियसखे इत्यर्थः । प्रणयिनीं परमसुखावहतया प्रियतमां विशिष्टकन्दमूलाद्यशनस्यानशनप्रायत्वात्तस्यापि "तपो नानशनात्परम्" इति तपःपर्यवसानत्वात्तस्य च "तपसा कल्मषं हन्ति" इति सकलकर्मनिवर्तनद्वारा परमसुखावहत्वादिति भावः । वृत्तिं जीविकाम् । "वृत्तिर्वर्तनजीवने" इत्यमरः । कुरुष्व विधेहि । तथा अकृपणैरम्लानैर्नवपल्लवैर्भुवि शय्यां च कुरुष्व अत उत्तिष्ठ उत्थितो भव विलम्बं मा कुर्वित्यर्थः । वनं प्रति यावो गच्छावो यास्याव इत्यर्थः । किमनेन नीचसेवनेनेति शेषः । वर्तमानसामीप्ये वर्तमानप्रत्ययः । यामो वनमिति न साधीयान् पाठः । गमने हेत्वभ्युच्चयं फलमाह । यत्र वने क्षुद्राणां दीनानां कुतः अविवेकेनाज्ञानेन मूढानि कर्तव्याकर्तव्यविचारशून्यानि मनांसि येषां तेषाम् । तथा सदा

१ प्रिय प्रणयिनीं प्रीतिम इति पाठान्तरम् । २ वल्कलैरकृपणैः॰ इति पाठान्तरम् ।
२ यामः इति पाठान्तरम् । ४ वित्तव्याध्यविवेक॰ इति पाठान्तरम् ।

सर्वदा वित्तमेव व्याधिः सन्निपातादिरोगस्तेन यो विकारो विपरीतभावस्तेन विह्वला विकला अविस्पष्टा इति यावत् । तथाभूता गिरो येषा तेषामीश्वराणां राज्ञां नामापि नामधेयमपि न श्रूयते नाकर्ण्यते किमुत दर्शनसेवनादिकथेति भावः । तस्मादैहिकामुष्मिकफललेशसम्बधशून्य नीचसेवनं परित्यज्य सकलश्रेयःसम्पादक वन व्रज । वनवास एवावश्य कर्तव्य इति-तात्पर्यम् ॥२६॥

पवित्र फलमूलसे अब अपना पोषण कर, बनी बनाई भूमिशय्या और बने बनाये नवीन वल्कलके वस्त्रोंसे निर्वाह कर, जिस वनमें अविवेकसे जिनका मूढ मन है और जो क्षुद्र हैं और धनरूपी व्याधिजनित अविचारसे जिनकी बुद्धि विह्वल है उनका नामभी सुनाई नहीं देता है, चल अब हम उस वनको जावेगे ॥ २६ ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां ।
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ॥
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी ।
सहंते संतापं तदपि धनिनां द्वारि कृपणाः॥ २७ ॥

अथ च पुनः सत्यामपि निरवधिकानिरातकजीवनसाधनसामग्र्यां कृपणाः स्वकार्पण्यमत्यजत परयाच्ञादैन्येन क्लिश्यंति किं कर्तव्यमित्याह—फलमिति॥ वने वने प्रतिवन न त्वेकत्रैव क्लृप्तमित्यर्थः । "अव्ययं विभक्ति०" इत्यादिना यथार्थेऽव्ययीभाव. । न विद्यते खेदो यस्मिन् कर्मणि तद्यथा तथा अखेदमक्लेश स्वेच्छया स्वच्छन्देन लभ्य प्राप्य न तु परप्रेष्यमिति भावः । क्षित्यां रोहन्तीति क्षितिरुहा । क्विप् । तेषां कदलीरसालपनसादितरूणा फलमस्तीति शेष । उदरपूरणपर्याप्तमिति भावः । तथा स्थाने स्थाने प्रतिस्थानम् । वीप्सायां द्विरुक्ति । शिशिरमधुरम् । व्याख्यातमेतत् पिबति सलिल शीतमधुरमित्यत्र । पुण्यसरितां गङ्गागोदावर्यादिपुण्यनदीना पयस्तीर्थमस्तीति शेषः । स्नानपानाभ्यां बाह्याभ्यन्तरपङ्कप्रक्षालनद्वारा तृष्णोपशांतिकरमिति भावः । एतेनोभयेषामपि शास्त्रसिद्ध परोपकारत्व सूचितम् । तदुक्तम् । "परोपकाराय फलन्ति वृक्षा परोपकाराय वहन्ति नद्य ।"

इति । तथा मृदुः अकठिनः कोमल इति यावत् । स्पर्शो यस्याः सा हंसतूलिकातल्पकल्पेत्यर्थः । कुतः सुललितान्यतिकोमलानि यानि लतापल्लवानि तन्मयी तत्प्रचुरा तैर्निर्मितेत्यर्थः । अथवा तन्मयी तद्विकारा । प्राचुर्ये विकारार्थे मयट् इति ङीप् । शय्या चास्तीति शेषः । सुखस्वापोचितेति भावः । तदपि तथापि धनिना धनाढ्यानां द्वारि प्रतीहारप्रदेशे । " स्त्री द्वार्द्वार प्रतीहारः " इत्यमरः । कृपणाः धनलिप्सापरतन्त्राः सन्तापं तदनुवर्तनाद्यायासपरिताप सहन्ते मृष्यन्ति । श्रेयोऽर्थिना किं तत्रास्माभिः कर्तव्यमिति भावः । अतः फललाभसम्बन्धशून्यां प्रत्युत बलवदनिष्टानुबन्धिनीं दुरन्तसन्तापकारिणीं परमकार्पण्यकर्णेजपामिहामुत्र च कीर्तिप्रतिष्ठाभञ्जनीं याच्ञादैन्यपरमनीचत्वादूषणीं पापिष्ठामिमां दुरीश्वरद्वारबहिर्वितर्दिकां दुराकारडाकिनीं विवेकोच्चाटनमन्त्रेणोत्सार्यानेकश्रेयःसम्पादिकां वनवासजीविकाश्रियमेव समाश्रयेद्विद्वानिति तात्पर्यम् । तदुक्तं श्रीभागवते । " चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नो वाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् । रुद्धा गुहा किमु न सन्ति महानुभावा यस्माद्भजन्ति यतयो धनदुर्मदान्धान् ॥ " इति ॥ २७ ॥

वन वनमें विना क्लेश ही स्वच्छंदतासे वृक्षोंके फल लभ्य हैं, स्थान स्थानमें पवित्र नदियोंका शीतल मधुर जल है, तथा जगह जगहमें अतिकोमल लताओंके पल्लवोंकी मृदुस्पर्शवाली शय्या है तौभी कृपण जन धनियोंके द्वारमें संतापको सहन करतेही हैं ॥२७॥

ये वर्तन्ते[1] धनपतिपुरः प्रार्थनादुःखभाजो ।
ये चाल्पत्वं दधति विषयाक्षेपपर्याप्तबुद्धेः[2] ॥
तेषामन्तः स्फुरितहसितं वासराणि स्मरेयं ।
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः २८॥

इदानीं दुरीश्वरसेवनयाच्ञादैन्यजन्यगर्वितयाऽभिनिवेश निर्वेदावसाने स्वस्य सिद्धवद्वा विशेषोदयां सूचयन्नाह—य इति ॥ धनपतेर्धनाढ्यस्य पुरोऽग्रे प्रार्थ-

---

१ वर्तन्ते इति पाठान्तरम् । २ पर्यन्त इति पाठान्तरम् ।

न्नादुःख याच्ञादैन्य भजतीति तथोक्ताः सतः । "भजो ण्विः" । ये पुरुषा वर्तते तथा ये च पुरुषाः विषयाक्षेपे भोगसंग्रहे पर्याप्ता तावन्मात्र एव पर्यवसिता न तु तत्त्वविचार इत्यर्थः । तादृशी या बुद्धिस्तस्याः । पर्यस्तेति पाठे विषयाक्षेपेण भोगासक्त्या पर्यस्ता विक्षिप्ता या बुद्धिस्तस्याः हेतोरल्पत्व नीचत्व दधति तेषां पुरुषाणा वासराणि दिवसान् तदनुभूतदुर्दिनानीत्यर्थः । "वा तु क्लीबे दिवसवासरौ" इत्यमरः । अभिमतदेवताया चित्तस्थिरीकरणं ध्यान तस्य विच्छेदे अवसाने ब्रह्मध्यानव्युत्थानसमय इत्यर्थः । शिखरिकुहरे गिरिगह्वरे यो ग्रावा पाषाणः स एव शय्या तस्यां निषण्णः विश्रमार्थं शयितः सन्नित्यर्थ । अन्तरन्त करण एव स्फुरित समुत्पन्न हसित हासो यस्मिन् कर्मणि तद्यथा तथा । तदानीं तेषामपहास्यत्वात्तदनुभावत्वेनोत्पन्नहासगर्भितमित्यर्थः । स्मरेयम् । "सदृशा दृष्टिचिन्ताद्याः स्मृतिबीजस्य बोधकाः ।" इति वचनात्कुतश्चिच्चिंतावशाद्दृष्टिवशाद्वा समुद्बुद्धसंस्कारस्तदीयदुर्दिनानि स्मृतिविषयाणि कुर्यामित्यर्थ । वासराणां स्मरेयमिति पाठः । तथा "अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी । अधीगर्थाना च शेषाधिकारात् अशेषत्वविवक्षाया तु द्वितीयैव स्मर्यते । सम्भावनायामुत्तमपुरुषैकवचनम् । यथाह याच्ञादुःखाभिभततविषयाक्षिप्तचित्तजनदुर्दशादर्शनात्संजातनिर्वेदः केनाचिद्भाग्योदयेन परमेश्वरानुगृहीतस्तद्ध्यानव्युत्थाने तदीयदुर्दिनस्मरणतत्परो भवेय तथा विवेकिभि श्रेयोर्थिभिर्भवितव्य न तु तद्वद्दुर्दशाभागिभिरिति निगूढोपदेशस्तात्पर्यार्थविषयीकृत इत्यवधेयम् ॥ २८ ॥

जो दिन धनवानोंके निकट प्रार्थनाका दुःख सहनेवालोंके जाते हैं और जो विषयोंके नष्ट होनेसे विपरीत बुद्धिवालोंको छोटे प्रतीत होते हैं उन दिनोंको हम अन्तःकरणमें हँसकर ध्यानसे विश्रामको पाकर पर्वतकी कन्दरामें पत्थरकी चट्टानरूपी शय्यापर बैठे हुए स्मरण करेंगे अर्थात् विरक्त होंगे ॥ २८ ॥

ये संतोपनिरंतरप्रमुदितास्तेषां न भिन्ना मुदो ।
ये त्वन्ये धनलुब्धसंकुलधियस्तेषां न तृष्णा हृता ॥

इति । तथा मृदुः अकठिनः कोमल इति यावत् । स्पर्शो यस्याः सा हंसतूलिकातल्पकल्पेत्यर्थः । कुतः सुललितान्यतिकोमलानि यानि लतापल्लवानि तन्मयी तत्प्रचुरा तैर्निर्मितेत्यर्थः । अथवा तन्मयी तद्विकारा । प्राचुर्ये विकारार्थे मयट् इति ङीप् । शय्या चास्तीति शेषः । सुखस्वापोचितेति भावः । तदपि तथापि धनिना धनाढ्याना द्वारि प्रतीहारप्रदेशे । " स्त्री द्वार्द्वार प्रतीहारः " इत्यमरः । कृपणाः धनलिप्सापरतन्त्राः सन्ताप तदनुवर्तनाद्यायासपरितापं सहन्ते मृष्यन्ति । श्रेयोऽर्थिनां किं तत्रास्माभिः कर्तव्यमिति भावः । अतः फललाभसम्बन्धशून्या प्रत्युत बलवदनिष्टानुबान्धिनीं दुरन्तसन्तापकारिणीं परमकार्पण्यकर्णेजपामिहामुत्र च कीर्तिप्रतिष्ठाभञ्जनीं याच्ञादैन्यपरमनीचत्वादूषणीं पापिष्ठामिमां दुरीश्वरद्वारबहिर्वितर्दिका दुराकारडाकिनीं विवेकोच्चाटनमन्त्रेणोत्सार्यानेकश्रेयःसम्पादिकां वनवासजीविकाश्रियमेव समाश्रयेद्विद्वानिति तात्पर्यम् । तदुक्त श्रीभागवते । " चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नो वाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् । शुद्धा गुहा किमु न सन्ति महानुभावा यस्माद्भजन्ति यतयो धनदुर्मदान्धान् ॥ " इति ॥ २७ ॥

वन वनमें विना क्लेश ही स्वच्छंदतासे वृक्षोंके फल लभ्य हैं, स्थान स्थानमें पवित्र नदियोंका शीतल मधुर जल है, तथा जगह जगहमें अतिकोमल लताओंके पल्लवोंकी मृदुस्पर्शवाली शय्या है तौभी कृपण जन धनियोंके द्वारमें संतापको सहन करतेही हैं ॥२७॥

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजो ।
ये चाल्पत्वं दधति विषयाक्षेपपर्यासबुद्धेः ॥
तेषामन्तः स्फुरितहसितं वासराणि स्मरेयं ।
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥२८॥

इदानीं दुरीश्वरसेवनयाच्ञादैन्यतत्परविषयाक्षिप्तचित्त निंदाव्रशेनं स्वस्य सिद्धवद्वाविश्रेयोदशां सूचयन्नाह—य इति ॥ धनपतेर्धनाढ्यस्य पुरोऽग्रे प्रार्थ-

१ वर्धंते इति पाठांतरम् । २ पर्यंन्त इति पाठांतरम् ।

नादुःख याच्ञादैन्य भजतीति तथोक्ताः सतः। "भजो ण्विः"। ये पुरुषा वर्तन्ते तथा ये च पुरुषाः विषयाक्षेपे भोगसंग्रहे पर्याप्ता तावन्मात्र एव पर्यवसिता न तु तत्वविचार इत्यर्थः। तादृशी या बुद्धिस्तस्याः। पर्यस्तेति पाठे विषयाक्षेपेण भोगासक्त्या पर्यस्ता विक्षिप्ता या बुद्धिस्तस्याः हेतोरल्पत्व नीचत्व दधति तेषां पुरुषाणा वासराणि दिवसान् तदनुभूतदुर्दिनानीत्यर्थः। "वा तु क्लीबे दिवसवासरौ" इत्यमरः। अभिमतदेवताया चित्तस्थिरीकरण ध्यान तस्य विच्छेदे अवसाने ब्रह्मध्यानव्युत्थानसमय इत्यर्थः। शिखरिकुहरे गिरिगह्वरे यो ग्रावा पाषाणः स एव शय्या तस्यां निषण्णः विश्रमार्थ शयितः सन्नित्यर्थः। अन्तरन्तःकरण एव स्फुरित समुत्पन्न हसित हासो यस्मिन् कर्मणि तद्यथा तथा। तदानीं तेषामपहास्यत्वात्तदनुभावत्वेनोत्पन्नहासगर्भितमित्यर्थः। स्मरेयम्। "सदृशा दृष्टिचिन्ताद्याः स्मृतिबीजस्य बोधकाः।" इति वचनात्कुतश्चिच्चितावशाद्दृष्टिवशाद्वा समुद्बुद्धसंस्कारस्तदीयदुर्दिनानि स्मृतिविषयाणि कुर्यामित्यर्थः। वासराणां स्मरेयमिति पाठः। तथा "अधीगर्थदयेशा कर्मणि" इति कर्मणि षष्ठी। अधीगर्थानां च शेषाधिकारात् अशेषत्वविवक्षायां तु द्वितीयैव स्मर्यते। सम्भावनायामुत्तमपुरुषैकवचनम्। यथाह याच्ञादुःखाभिनततविषयाक्षिप्तचित्तजनदुर्दशादर्शनात्मजातनिर्वेदः केनाचिद्भाग्योदयेन परमेश्वरानुगृहीतस्तद्ध्यानव्युत्थाने तदीयदुर्दिनस्मरणतत्परो भवेय तथा विवेकिभिः श्रेयोर्थिभिर्भवितव्य न तु तद्वद्दुर्दशाभागिभिरिति निगूढोपदेशस्तात्पर्यार्थविपर्यीकृत इत्यवधेयम्॥ २८॥

जो दिन धनवानोंके निकट प्रार्थनाका दुःख सहनेवालोंके जाते हैं और जो विषयोंके नष्ट होनेसे विपरीत बुद्धिवालोंको छोटे प्रतीत होते हैं उन दिनोंको हम अन्तःकरणमें हँसकर ध्यानसे विश्रामको पाकर पर्वतकी कन्दरामें पत्थरकी चट्टानरूपी शय्यापर बैठे हुए स्मरण करेंगे अर्थात् विरक्त होंगे॥ २८॥

ये संतोषनिरंतरप्रमुदितास्तेषां न भिन्ना मुदो।
ये त्वन्ये धनलुब्धसंकुलधियस्तेषां न तृष्णा हता॥

इत्थं कस्य कृते कृतः स विधिना ताहक्पदं संपदां ।
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ २९॥

अथ तृष्णाया यावताप्युपसंहाराभावात्किं याच्ञादैन्येनेत्याह—य इति ॥ ये पुमांसः दैवाल्लब्धेन वस्तुना जनितमनोविलासः सन्तोषस्तेन निरन्तरं सतत प्रमुदिताः परितुष्टास्तृप्ता इति यावत् । तेषां मुदः आनन्दा न भिन्नाः किंतु प्रवृद्धा एवेत्यर्थः । तथान्ये इतरे ये पुमासः धने लुब्धा गार्ध्यवती अत एव सङ्कुला धीर्येषां ते तथोक्तास्तेषा तृष्णा वस्तुस्पृहा न हता न विरतेत्यर्थः । धनलोभस्येयत्ताभावादिति भावः । इत्थमेव व्यवस्थिते सतीति शेषः । स प्रसिद्धः सम्पदां रत्नादिसमृद्धीनां तादृगित्यामिति वक्तुमशक्य पद स्थानमनिर्वाच्यधनसम्पदास्पदमित्यर्थः । तथा स्वात्मन्येव स्वस्मिन्नेव समाप्तः पर्यवसितः न तु परोपकारपर्याप्त इत्यर्थः । तादृशो हेममहिमा काञ्चनसम्पत्तिर्यस्य तथोक्तो मेरुर्विधिना ब्रह्मणा कस्य कृते कस्य पुंसः प्रयोजनार्थं कृतो निर्मित· नित्यसन्तोषसम्पन्नानामनपेक्षितत्वादर्थलुब्धानामपर्याप्तत्वाच्चानुपयोगादिति भाव· । अतो निरर्थकत्वात् मे मह्य न रोचते रुचिगोचरो न भवति ।.न सम्मत इत्यर्थः । "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी । तस्मात्सुमेरुतुल्यधनलाभेऽपि तृष्णाधनपिशाच्या· परितोषाभावात्तत्प्रयुक्तयाच्ञादैन्यविभ्रान्तिं तत्त्वविचारेण निरस्य सन्तुष्टांत·करणैर्भवितव्यमायुष्मद्भिरिति तात्पर्यम् ॥ २९ ॥

जो निरंतर तृप्त हैं उनका आनन्द कभी नष्ट नहीं होता और जो सदा धनके लोभसे व्याकुल बुद्धिवाले हैं उनकी तृष्णा कभी नष्ट नहीं होती ऐसी स्थिति होनेपर ब्रह्माने सम्पदाका स्थान मेरु पर्वत किसके लिये बनाया है, न इससे तृप्त मनुष्यका आनंद बढता है और न धनलुब्ध मनुष्यकी तृष्णा नष्ट होती, इससे अपनेहीमें लीन रहनेवाली कांचनसम्पत्तिसे युक्त यह मेरुपर्वत मुझे सम्मत नहीं है ॥ २९ ॥

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वतो ।
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ॥
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं ।
शंभोःसत्रमवार्यमक्षयनिधिं शंसंति योगीश्वराः ३०॥

तर्हि कथं जीवनमित्याशङ्क्य तदुपायं सपरिकरं निवेदयन्निगमयति— भिक्षेति ॥ योगीश्वराः परमार्थतत्त्वज्ञा महायोगिनः भिक्षाहारं भैक्ष्याशनं कर्म न विद्यते दैन्यं याच्ञाकार्पण्यं यस्मिन् तत्तथोक्तं देहीत्युच्चारणानन्तरमेव सद्गृहस्थैर्बहुमानपूर्वकं दीयमानत्वादिति भावः । यद्वा व्यावहारिकदैन्यसम्भवेऽपि पारमार्थिकदैन्याभावादिति भावः । न विद्यते प्रतिसुखं यस्य तत्तथोक्तं स्वयमेव निरतिशयसुखं न तु स्वस्य प्रतिभटभूतं सुखांतरमस्तीत्यर्थः । सर्वतः सर्वत्रापि भीतिच्छिदं भयविनाशकं भिक्षाशनतत्परस्याकुतोभयत्वादिति भावः। दुष्टानां दुःस्वभावानां मात्सर्यमदाभिमानानामसहिष्णुत्वदर्पाहङ्काराणां मथनं निरासकम् । दुःखौघविध्वंसनं सांसारिकाशेषबाधानिवर्तकम् । यद्वा दुःखौघस्य एकविंशतिमहादुःखसमुदायस्य विध्वंसनं विच्छेदकमेकविंशतिमहादुःखध्वंसरूपमोक्षनिदानमित्यर्थः । "आत्यन्तिकदुःखध्वंसो मोक्षः" इति वैशेषिकास्तार्किकाश्च । अत्र यत्किंचिद्वक्तव्यमस्ति विस्तरभयान्नोच्यते । सर्वत्र सर्वेष्वपि देशेष्वित्यर्थः । तत्राप्यन्वहं प्रतिदिनं तत्रापि चाप्रयत्नं यत्नं विनैव सुलभं सुखलभ्यमित्यर्थः । साधूनामनहंकारिणां प्रियमिष्टं पावनं पवित्रं शंभोः शिवस्य सत्रं तृप्तिसाधनमित्यर्थः । "रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते" इत्यनेनैवोक्तत्वात् । यद्वा शंभोः सत्रं शंभुभक्तिनिरतान्नसत्रमित्यर्थः । खंडमंडलाधिपतिसत्रं तु नश्वरमिदं तु सकलभुवनाधीश्वरप्रवर्तितत्वाच्छाश्वतमिति भावः । अत एवावार्यं न केनापि निवारयितुं शक्यमक्षयं निधिमविनाशि निदानं च नित्योपयोगेऽप्यक्षयभावादिति भावः । शंसंति कथयंति अनुभवसिद्धत्वादित्थं वर्णयंतीत्यर्थः । अतोऽर्थपरपराजनितदैन्यं याच्ञादैन्यं विहायोत्तरीत्या नमस्तमद्गुणविचित्रं शम्भुसत्रं प्रामाणिकोक्तं समाश्रयणीयमिति भावः ॥ ३० ॥

अदैन्यपूर्वक भिक्षाहारही अतिशय सुखकारक, सर्वत्र भयरहित, दुष्टोंके मात्सर्य और मदको नष्ट करनेवाला, दुःखसमूहका निवर्तक, सर्वत्र प्रतिदिन विना यत्न ही प्राप्त होनेवाला, साधुओंका प्रिय, पवित्र और शिवप्राप्तिसाधन तथा अवार्य और अक्षय है, योगीश्वर ऐसी भिक्षाहारकी ही प्रशंसा करते हैं ॥ ३० ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं ।
मांने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ॥
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं ।
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ३१

अथ भोगानामस्थैर्यकथने याच्ञादैन्यमदूषितप्रायमेवेति मनसि निधाय तद्दूषणानंतर भोगास्थैर्यमाह—भोग इति ॥ भोगे स्रक्चंदनवनितासंभोगसुखानुभवे । " भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः । " इत्यमरः । रोगाद्वातपित्ताद्यामयाद्भयमस्तीति शेषः । तस्य तदंतरायत्वादिति भावः । कुले सद्वंशे च्युतेराचारभ्रंशाद्भयं तस्यास्तदप्रतिष्ठावहत्वादिति भावः । अथवा च्युतेः सन्तानविच्छेदाद्भयं तस्याः सम्प्रदायोपहतिहेतुत्वादिति भावः । वित्ते द्रव्यसमृद्धौ नृपालाद्राज्ञो भयं तस्य तदपहर्तृत्वादिति भावः । माने अभिमाने दैन्यात्कार्पण्याद्भयं तस्य तद्भंगहेतुत्वादिति भावः । बले सामर्थ्ये रिपोः शत्रोर्भयं तस्य तद्दमशीलत्वादिति भावः । रूपे सौंदर्ये जराया वार्धकावस्थाया भयं तस्यास्तद्विलोपित्वादिति भावः । शास्त्रे वेदांतादिशास्त्रकलापे वादिभ्यः शुष्कतर्ककलहकटकेभ्यो भयं तेषां तदपरोक्षकत्वादिति भावः । गुणे विद्याविनयादिगुणगणे खलाद्दुर्जनाद्भयं तस्य तदपकत्वादिति भावः । काये देहे कृतांताद्यमाद्भयं तस्य तदंतकरत्वादिति भावः । " कायो देहः क्लीबपुंसोः, कृतांतो यमसिद्धांतौ " इति चामरः । सर्वत्र " भीत्रार्थानां भयहेतुः " इत्यपादानत्वात्पञ्चमी । अतो भुवि नृणां सर्वाधि सर्वं वस्तु भोगाद्यशेषार्थजातं भयान्वितमुक्तरीत्या भयसहितं सांतकत्वा-

---

१ मौने इति पाठांतरम् । २ वादम० इति पाठान्तरम् ।

स्सापायमित्यर्थः । किंतु विरागो विषयानभिलाषो येषां ते विरागास्तेषां भावो वैराग्यं तदेकमेव । न विद्यते भयं यस्य तदभयं भयहेतुत्वाभावान्निर्भयम् । निरातंकत्वान्निरपायमित्यर्थः । यद्वा विरागा अस्थिरभोगास्तेषां भावो वैराग्यं तदेकमेव न विद्यते भयं यस्य तदभयम् । भयहेतुत्वाद्याभिनिवेशं परित्यज्य सुस्थिरवैराग्यमेवाश्रयणीयं श्रेयस्कामैरिति भावः । इत्थं भोग इत्यादिष्वधिकरणसप्तम्याश्रयणेन व्याख्यास्य सतिसप्तम्याश्रयणेन व्याख्यातम् । सतिसप्तम्याश्रयणे त्वेवं व्याख्येयम् । अतः सर्वं भुवि नृणां भयान्वितं भयकरमित्यर्थं । किंतु वैराग्यमेव । न विद्यते भयं यस्मात्तत् अभयं भयनिवारणमित्यर्थः । नतिं वैराग्ये सर्वस्यापि मिथ्यात्वेन प्रतीयमानतया द्वितीयाभावात् । अतो भयावहं भोगादिकं परित्यज्य भयापहं वैराग्यमेवाश्रयणीयमिति तात्पर्यम् । शेषं समानम् ॥ ३१ ॥

भोगमें रोगका भय, सुख वढनेमें उसके क्षयका भय, अधिक धन होनेमें राजभय, मान होनेमें दीनताका भय, संग्राम जीतनेमें शत्रुभय, रूपमें वृद्ध अवस्थाका भय, शास्त्रसे मान वढनेमे अपमानका भय, सद्गुणमें दुर्जनका भय और शरीरमें मृत्युका भय या सर्वत्र भयके ही स्थान देख पडते हैं केवल वैराग्य ही निर्भय ठौर है ॥ ३१ ॥

आक्रांतं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं ।
संतोषो धनलिप्सया शमसुखं प्रौढांगनाविभ्रमैः ॥
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै- ।
रस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ ३२ ॥

उपक्रांतभोगास्थैर्यं तत्तद्दृष्टान्तरेण नवभिर्वर्णयति आक्रांतमित्यादिभिः — आक्रांतमिति ॥ जन्म उत्पत्तिर्मरणेन स्वरूपनाशकेन मृत्युना आक्रांतं ग्रस्तम् । "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥" इत्यादिवचनादिति भावः । अत्युज्ज्वलं-निरतिशयेन

१ विगुणैः इति पाठान्तरम् । २ विभूतिरप्युपहता इति पाठान्तरम् ।

भास्वर यौवनं नूतनवयस्तारुण्यमिति यावत् । जरसा जरया अपायहेतुभूतया आक्रांतम् । "जराया जरसन्यतरस्याम्" इति जरसादेशः । सन्तोषो दैववशाल्लब्धवस्तुजनितपरितोषो धनालिप्सया तदुपद्रवकारिण्या धनवाञ्छया आक्रातः। लभेः सन्नन्तात् स्त्रियामप्रत्यये टाप् । शमसुखमिन्द्रियव्यापारोपरमापादितानन्दः प्रौढागनानां प्रगल्भविलासिनीना विभ्रमैस्तदुपमर्दकै. कक्षाविक्षेपकर्णकण्डूयनेन सकोमलकुचमर्दनादिविलासैराक्रातम् । गुणा विद्याविनयादयो मत्सरिभिः परोत्कर्षासहिष्णुभिर्लोकैर्जनैस्तदपवादकैरित्यर्थः । उपहता ग्रस्ता इति यावत् । वनभुवः पुण्यारण्यप्रदेशा व्यालैर्दुष्टगजैः सर्पैर्वा तत्प्रदेशानवकाशप्रदैरिति भावः । उपहता ग्रस्ताः । नृपा राजानो दुर्जनैर्दुर्मन्त्रोपदेशेन तद्बुद्धिविपर्यासकारिभि. पिशुनैरुपहता समाक्रांता इत्यर्थः । विभूतयः सम्पदोऽप्यस्थैर्येण तदप्रतिष्ठावहेनास्थिरत्वेन उपहता दूषिताः । अतः किं वस्तु केन वा उपद्रवेण न ग्रस्तमुक्तरीत्या सर्वमपि ग्रस्तमेवेत्यर्थः । अतः सर्वस्याप्यस्थिरत्वान्न कुत्रापि चित्तं स्थिरीकर्तव्यमिति भावः ॥ ३२ ॥

मृत्युने जन्मको, बुढापेने युवावस्थाको, धनकी इच्छाने संतोषको, सुंदर स्त्रियोंके हावभावने शान्तिसुखको, मत्सरी (जो पराई बड़ाई न सहे) लोगोंने गुणको, सर्पोंने वनभूमिको, दुर्जनोंने राजाको और चञ्चलताने धैर्यको, योंही इस संसारमें किसने किसको नहीं ग्रास कर रक्खा है ? ॥ ३२ ॥

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते ।
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ॥
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसा- ।
त्तत्किं तेन निरंकुशेन विधिना यन्निर्मितं सुस्थिरम् ॥ ३३ ॥

पुनः श्रोतृजनस्य विश्वासदार्ढ्यार्थमुक्तमेवार्थं प्रपञ्चयन्नाह—आधीति ॥ विविधैः नानाप्रकारैः आधीनां मनोव्यथानां व्याधीनां पित्तादिशारीररोगाणां च शतैरनेकैराधिव्याधिभिरित्यर्थः । " पुंस्याधिर्मानसी व्यथा, रोगव्याधि-

---

१ नाम इति पाठान्तरम् ।

गदामयाः '' इति चामरः । जनस्यारोग्य देहस्वास्थ्यमुन्मूल्यते निर्मूलीक्रियते । तथा यत्र यस्मिन् पुरुषे लक्ष्मीरैश्वर्यसमृद्धिस्तिष्ठतीति शेषः । तत्र तस्मिन् पुरुषे व्यापदः महोपद्रवा विवृतान्युद्घाटितानि कवाटानि द्वाराणि यासां तास्तथोक्ता इव पतति तद्विघटनार्थमप्रतिबध प्रविशतीत्यर्थः । तथा मृत्युरतकः जात जात प्रारब्धकर्मवशात्पुन' पुनरुत्पन्नम् । वीप्सायां द्विर्भावः । अत एव विवश विह्वल जतुमिति शेष' । अवश्य नियतमाशु शीघ्रमेवात्मसात् आत्माधीन करोति । मारयतीत्यर्थः । '' तदधीनवचने सातिः '' इति सातिप्रत्ययः । अतस्तेन प्रसिद्धेन निरकुशेन निरर्गलेन अप्रतिहतव्यापारेणेत्यर्थ । विधिना ब्रह्मणा यद्वस्तु निर्मित तत्किं वा सुस्थिरं न किमपीत्यर्थः । अतोऽस्थिरभोगाशसन न कर्तव्यमिति भावः ॥ ३३ ॥

सैकडों मानसिक दैहिक रोगव्याधिने मनुष्योंकी आरोग्यताको मूलसे उखाड डाला है, जहां द्रव्य बहुत होता है वहां विपत्ति द्वार तोडके आ पडती है, जो जन्मता है उसे मृत्यु बलात्कारसे अवश्य वश कर लेती है ऐसी कौन वस्तु है कि जिसे निरंकुश विधाताने स्थिर बनाई है ॥ ३३ ॥

भोगास्तुंगतरंगभंगतरलाः प्राणाः क्षणध्वंसिनः ।
स्तोकान्येव दिनानि यौवनसुखस्फूर्तिः प्रियासु स्थिता ॥
तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका ।
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ३४ ॥

तर्हि किं कर्तव्यमित्याशकायां तेषामस्थैर्यकथनपूर्वक कर्तव्य तावन्निमिरुपदिशति—भोगा इति ॥ भोगा स्रक्चदनादिविषया तुगतरगा' कल्लोला भगा अल्पतरगा त इव तरलाश्चपला अतिसूक्ष्मा इत्यर्थः । न तु कतिपयेष्वपि दिवसेषु स्थायिन इति भाव । प्राणा क्षणध्वसिन क्षणे क्षणकाल एव ध्वसो विनाश एषामस्तीति तथोक्ता । अस्थिरा इति यावत् । यौवने या सुखस्फूर्तिर्निरपेक्षसुखाभिव्यक्ति सा स्तोकान्येव दिनान्यल्पेष्वेव दिवसेष्वित्यर्थ । अत्यन्तसयोगे द्वितीया । प्रियासु वनितासु स्थिता स्थायिनी ।

कर्तरि क्तः । न तु यावज्जीवभाविनी वार्धकदशायां तदपायादिति भावः । तत्तस्मात्कारणात् बोधका हितोपदेष्टारः हे बुधा विद्वांसः निखिलं संसारं भोगादिरूपमसारमस्थिरमेव बुद्ध्वा आलोच्य परमदयालुत्वप्रयुक्तानुग्रहतया युष्माभिर्ज्ञानोपदेशादिना संसारार्णवनिमग्ना जनास्तारयितव्या न तूपेक्ष्यास्तथाविधजनोद्धरणे महाफलश्रवणादिति भावः । यद्वा लोकानुग्रहे पेशलेनानुरक्तेन मनसा यत्नः ब्रह्मध्यानप्रयत्नसमाधीयतार्थत्वेऽपि युष्माभिरयं यत्नः कर्तव्यः । यतो युष्मत्कृतप्रयत्नतात्पर्येण जना अपि कृतार्था भविष्यन्ति । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥" इति भगवद्वचनादिति भावः । समाधीयतामिति विध्यर्थे विहितोऽस्य लोट्प्रयोगः । परमपुरुषार्थसाधकब्रह्मध्यानप्रयत्नस्यावश्यविधेयमाविपक्षे अनर्थप्राप्तिं ज्ञापयतीत्यवधेयम् ॥ ३४ ॥

भोग तो बडे तरंगोंके भंगके समान चंचल हैं, प्राण भी क्षणभरमें नष्ट होनेवाले हैं, यौवनसुखकी स्फूर्तिभी प्रियतमाओंके विषयमें थोडे ही दिनोंतक ठहरती है इसलिये हे बोधक बुधो ! यह अखिल संसार निःसार समझके लोकानुग्रहके विषयमें मनको अनुरक्त कर ब्रह्मध्यान करनेके लिये प्रयत्न करो ॥ ३४ ॥

भोगा मेघवितानमध्यविलसत्सौदामनीचञ्चला ।
आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ॥
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं ।
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ३५

पुनः प्रत्ययदार्ढ्यार्थं युक्त्यन्तरालाभाच्च उपदिष्टमेवार्थं भङ्ग्यन्तरेणोपदिशति द्वाभ्याम्—भोगा इति ॥ तनुभृतां शरीरिणां भोगाः पूर्वोक्ताः मेघवितानस्याभ्रवृन्दस्य विद्युन्मन्यः परिस्फुरन्त्यो याः सौदामन्यस्तडितस्ता इव चञ्चला क्षणिका इत्यर्थः । "तडित्सौदामनी विद्युत्" इत्यमरः । सुदाम्ना अद्रिणा एकदिक् सौदामनीति विग्रहः । "तेनैकदिक्" इत्यण् । तथा आयुर्जीवितं च वायुना विघट्टितं तरङ्गितं तदब्जपटलीलीनाम्बु पद्म-

---

१ वाभ्र० इति पाठान्तरम् ।

पत्रप्रातसश्लिष्टजलबिंदुस्तद्वद्भगुर भङ्गलीलावन्नश्वरमित्यर्थ. । तथा यौवने लालसा: महाभोगाभिलाषाः । " कामोऽभिलाषस्तर्षश्च स महान् लालसा द्वयोः । " इत्यमरः । लोला अस्थिरा इत्येवमाकलय्य आलोच्य हे बुधाः, द्रुत शीघ्रमेव विलम्बस्यानवकाशादिति भाव: । धैर्यं धीरत्व समाधिश्चित्तस्थैर्यं तयोः सिद्ध्वा निष्पत्त्या सुलभे सुखलभ्ये योगे ब्रह्मध्याने बुद्धिं निश्चयात्मिकां मनीषा विधद्ध्व कुरुत ब्रह्मज्ञाननिष्ठा भवतेत्यर्थः ॥ ३५ ॥

विस्तृत मेघमे चमकती हुई विजुलीके समान देहधारियोंका भोग चञ्चल है, वायुसे हिलते हुए पद्मके पत्रमें लीन हुए जलबिंदुके सदृश आयुष्य नाशवान् है और यौवनकी उमंगभी स्थिर नहीं है । हे पंडितो ! ऐसा समझकर धैर्य समाधिकी सिद्धिसे सुलभ जो योग है तिसमें बुद्धि धारण करो ॥ ३५ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री- ।
रर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ॥
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं ।
ब्रह्मण्यासक्तचिता भवत भवभयाम्भोधिपारं तरीतुम् ३६

आयुरिति ॥ आयुः कल्लोललोल कल्लोलवल्लोलमतिभगुरं न त्वाचन्द्रार्कस्थायीत्यर्थ· । यौवनश्रीर्यौवनसम्पत् कतिपयेष्वल्पेषु दिवसेषु तिष्ठतीति तथोक्ता न तु याबज्जीववर्तिनीत्यर्थः । अर्थाः धनधान्यग्रामपश्वादिवस्तुविभवा. सङ्कल्पकल्पा मनोरथतुल्या इत्यर्थ । तेऽपि न चिरस्थायिन इति भावः । " ईषदसमाप्तौ कल्पब्देश्यदेशीयरः " इति कल्पप्रत्ययः । भोगपूगाः विषयपरम्पराः घनसमये वर्षाकाले यास्तडितस्तासामिव विभ्रमाः स्फुरणानि येषा ते तथोक्ताः । क्षणभगुरा इत्यर्थः । तथा प्रियाभि. प्रौढांगनाभिर्यत्कण्ठाश्लेषेण कण्ठग्रहेणोपगूढमुपगूहनमालिङ्गनमिति यावत् । भावे क्तः । प्रणीत रचित तदपि प्रौढागनालिङ्गनमपि न चिर चिरकालावस्थायि न भवतीत्यर्थः । अतो हे बुधाः, भवात्ससाराद्यद्भय तदेवाम्भोधिस्तस्य पार तरीतुं

१ भोगपूरा' इति पाठान्तरम् ।

संसारसागरमुल्लङ्घितुमित्यर्थः । ब्रह्मण्यासक्तचित्ता भवत ब्रह्मध्यानैकतत्परा भवतेत्यर्थः । न ह्येतद्व्यतिरेकेण तरणोपायं किंचिदपि पश्यामीति भावः । त्रिवारशुद्ध्या दृढतरविश्वासोत्पादनार्थं त्रिभिः श्लोकैः परमार्थपर्यवसायिनी ब्रह्मध्याननिष्ठोपदिष्टा न त्वनर्थपर्यवसायिनी संसारासक्तिः ।-यदत्र युक्तं तद्ग्राह्यं तत्वविचारपारावारपारीणैरिति श्लोकत्रयतात्पर्यम् ॥ ३६ ॥

आयुष्य जलतरंगसी चञ्चल है, यौवनावस्थाकी शोभा अल्प काल रहनेवाली है, धन मनके संकल्पसे भी क्षणिक है, भोगके समूह वर्षाकालके मेघकी विजलीसे चञ्चल हैं और प्यारी स्त्रीको गलेसे लगाना वहुत दिन स्थिर नहीं रहता इसलिये संसारके भयरूपी समुद्रसे पार होनेके लिये ब्रह्ममें चित्तको लीन करो ॥ ३६ ॥

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भमध्ये ।
कांताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ॥
वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः ।
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥

ननु लोके प्रायः संसारसुखतत्परा एव दृश्यन्ते अतः कथमयं निषिध्यत इत्याशङ्क्यादित आरभ्य विचार्यमाणे न तत्र सुखलेशोऽप्यस्तीत्याह—कृच्छ्रेणेति ॥ गर्भवासे गर्भावस्थानदशायाममेध्यमध्ये मूत्रपुरीषमध्ये नियमिततनुभिः सङ्कुचितगात्रैः प्राणिभिरिति शेषः । कृच्छ्रेणातिकष्टेन स्थीयते । तथा यौवने उपभोगः सम्भोगश्च कान्ताविश्लेषेण प्रियतमावियोगेन यो दुःखव्यतिकरो दुःखसम्पर्कस्तेन विषमो विरूपो भवतीति शेषः । तथा वामाक्षीणां मनोहरनयनानामवज्ञाविहसितानामवमानपूर्वकपरिहासानां वसतिः स्थानं तासां तस्य हेतुत्वात्परिहासास्पदमित्यर्थः । वृद्धभावो वृद्धत्वमप्यसाधुरसमीचीनः अपहासास्पदीभूतस्य कुतः साधुत्वमिति भावः । अतो रे इति नीचसम्बोधने । नीचत्वं च सांसारिकत्वादिति द्रष्टव्यम् । " नीचसम्बोधने तु रे " इत्य-

---

१ विश्लेषेण इति पाठान्तरम् । २ नार्गणामस्यवज्ञा निष्पाति लिय । इति पाठान्तरम् ।

-मरः । संसारे गर्भवासजन्मजरादिरूपे स्वल्पं तुच्छं किंचिदीषदपि सुखमस्ति यदि वर्तते चेत्तर्हि तद्वदत ब्रूत । अत. किमर्थं क्लिश्यथ गर्भवासनिरयत्रासादिसांसारिकदुःखैः पुनरावृत्तिरहितनित्यनिरतिशयानन्दबन्धुरब्रह्मपदप्राप्त्यर्थमेव प्रयतध्वमित्यर्थः ॥ ३७ ॥

अपवित्र मलमूत्रके स्थानमें बडे कष्टसे हाथ पैर बन्धे हुए बाल्यावस्थामें गर्भ बन्दीगृहमें रहता है, फिर युवावस्थामें स्त्रियोंके वियोगदुःखसे क्लेशित रहता है और वृद्धावस्थामें नारियोंसे निरादर पाकर नीचा शिर किये शोचमें पडा रहता है तो हे मनुष्यो ! इस संसारमें किंचित् मात्रभी सुख होय तो वह हमसे कहो अर्थात् सुखका लेश भी नहीं है ॥ ३७ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती ।
रोगाश्च शत्रव इव प्रहरन्ति देहम् ॥
आयुः परिस्रवति भिन्नघटादिवाम्भो ।
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥३८॥

अथ स्वविनिपातहेतौ सन्निहिते लोका न कुशला भवन्ति महदेतदाश्चर्यमित्याह—व्याघ्रीति ॥ जरा वार्धकावस्था व्याघ्री व्याघ्राङ्गनेव । "जातेरस्त्रीविषयादयोपधात्" इति ङीप् । परितर्जयन्ती भापयन्ती सती तिष्ठति । कलेवरकवलनाभिनिवेशेन वर्तमाना मृत्योः प्रत्यासत्तिमभिनिवेदयतीत्यर्थः । रोगा वातपित्तश्लेष्मादिव्याधयश्च शत्रवो वैरिण इव देहं प्रहरन्ति ताडयन्ति परिपीडयन्तीत्यर्थः । आयुश्च भिन्नघटात् छिद्रकलशादम्भ इव परिस्रवति प्रतिक्षणं नश्यतीत्यर्थः । तथापि लोको जनः अहितं परापकारमाचरतीति चित्रमाश्चर्यम् । परापकारदन्यत्किमकुशलमिति भाव. । यद्वा अहितं स्वस्यानिष्टमाचरति स्वविनिपातहेतुभूतमेव कर्म करोति न त्वात्मोद्धरणार्थं ब्रह्मध्यानादि करोतीत्यर्थः । चित्रमाश्चर्यम् । तदुक्तं गीतासु । "उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन. ॥" इत्यादि ।

तर्जयन्तीत्यत्र तर्जयतेः परस्मैपदम् । " तर्जयन्निव केतुभिः " इत्यादि-
महाकविप्रयोगात्सिद्धम् । तर्जयतेरनुदात्तत्वेऽपि चक्षिङो ङित्करणेन अनुदा-
त्तत्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति । उपमा ॥ ३८ ॥

वृद्धावस्था वाघिनीसी सन्मुख खडी है सब रोग शत्रुओंके समान देहपर दण्डप्रहार कर रहे हैं, आयु प्रतिदिन इस प्रकार निकलती जाती है जैसे फूटे घडेसे पानी निकलता जाय, तिस-परभी लोक जिसमें अपना बुरा हो वही काम करते जाते हैं यह बडा आश्चर्य है ॥ ३८ ॥

भोगा भंगुरवृत्तयो बहुविधास्तैरेव चायं भव-
स्तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ॥
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
[2]कामोत्पत्तिवशात्स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ ३९ ॥

अथ सर्वथा यद्यस्मदुपदेशे विश्वासस्तर्ह्यात्मन्येव मनः समाधेयं न त्वन्य-त्रेत्याह—भोगा इति ॥ भोगा विषया भंगुरा भङ्गशीला च वृत्तिर्येषां ते तथोक्ता आगमापायित्वादस्थिरा इत्यर्थः । बहुविधाः नानाप्रकाराश्च कारण-वैचित्र्यपूर्वकत्वात्कार्यवैचित्र्या इति भावः । अस्तु ततः किं तत्राह । तैर्भो-गैरेवायं परिवर्तमानो भवः शरीरधारणादिसंसारः कल्पित इति शेषः । जन्मानरीयकत्वात्तस्येति भावः । " भोगायतनं शरीरम् " इति वैशेषिकाः । तत्तस्मात्कारणात् रे लोका जना इहात्र भवे कस्य कृते कस्य भोगस्य प्राप्त्यर्थमित्यर्थः । "अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसञ्ज्ञिनौ ।" इति वचनात् । परिभ्रमत सञ्चरत न परिभ्रमितव्यमित्यर्थः । सञ्चितकर्मवशात्मन एव तेषां सम्भाव्यमानत्वादिति भावः । अतश्चेष्टितैर्भोगसंग्रहव्यापारैः कृतं तत्संग्रहव्यापारा न कर्तव्या इत्यर्थः । कृतमिति निषेधार्थकमव्ययं चादिषु पठ्यते । कृतमिति निवारणनिषेधयोरिति गणव्याख्याने । नहि किमपि पर कर्तव्यमुपदिश्यत इत्यत आह । अस्मद्वचः अस्मदीयमुपदेशवचनं श्रद्धेय

१ कस्येह इति पाठान्तरम् । २ क. [illegible] स्व० इति पाठः [illegible] ।

यदि विश्वसनीयं चेत् युष्माभिरिति शेषः । आशा अतितृष्णास्ताः पाशा रज्जव इव बन्धहेतुत्वात् । " आशा दिगतितृष्णयोः " इति वैजयन्ती । तेषां शतानि अनेक आशापाशा इत्यर्थः । तेषामुपशान्त्योपशमनेन विशदं निर्मलं चेतश्चित्तं कामोत्पत्तिवशादनुरागोदयवशादनुरागमुत्पाद्येत्यर्थ. । स्वरूपमात्मा तद्रूपं धाम स्थानं तस्मिन् । " स्वो ज्ञाता वात्मनि स्वम् " इत्यमरः । समाधीयतां स्थिरीक्रियतामतरात्मप्रवणमेव क्रियताम् । न बाह्यविषयासक्तमित्यर्थः । अन्यथा महाननर्थः स्यादिति भावः । यद्वा स्वशब्देन जीव उच्यते तस्य धामनि निलये स्थाने परब्रह्मणि । अथवा स्वधामनि स्वयंज्योतिषि स्वरूपभूततेजसीति वा । इहात्यतविप्रकृष्टार्था बहवः परिस्फुरन्ति विस्तरभयान्न लिख्यंते । समाधीयतां समाहितं क्रियतामित्यर्थः । अयमेव हितोपदेष्टृत्वान्मुख्यगुरूणामस्माकं परमोपदेशः । एतद्विश्वासेनान्यासंगं परित्यज्य मनो ब्रह्मणि कृत्वा तदाज्ञया श्रेय. संपादनीयम् । " सत्संप्रदायसंयुक्तब्रह्मविद्याविशारद. । एवमादिगुणोपेतो देशिकोऽशेषवदितः ॥ " इत्युक्तलक्षणदेशिकाचार्योपदेशवचनश्रद्धाभक्तियुक्तस्य श्रेयोलाभावश्यंभावात् । " यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्था. प्रकाशंते महात्मन ॥ मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ । यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥ " इत्यादिश्रुतिस्मृतिसहस्रेभ्योऽयमर्थो निश्चीयत इत्यलमतिप्रसंगेन । शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

जितने भोग हैं उनकी वृत्ति नाशवान् है, उनके संसर्गसे भय है अर्थात् वारंवार जन्म मरण है यह जानकर भी हे लोगो ! किसलिये भोगरूपी चक्रमें भ्रमते हो ? ऐसी चेष्टासे क्या फल मिलता है ? यदि हमारे वचनका विश्वास मानो तो स्वयंप्रकाशरूप परब्रह्ममें आशापाश छेदन करनेसे शुद्ध हुआ चित्त अनुरागसहित निरन्तर लगाओ ॥ ३९ ॥

ब्रह्मेंद्रादिमरुद्गणांस्तृणकणान् यत्र स्थितो मन्यते ।
यत्स्वादाद्विरसा भवंति विभवास्त्रैलोक्यराज्यादयः ॥

भोगः कोऽपि स एक एष परमो नित्योदितो जृंभते ।
भो साधो क्षणभंगुरे तदितरे भोगे रतिं मा कृथाः ॥८०॥

ननु यदि ते सर्वथा भोग एव स्पृहा तर्ह्यस्मदुपदिष्ट एवाभिरतिं कुरु नान्यत्रेत्युपसंहरति—ब्रह्मेति ॥ यत्र यस्मिन् निरतिशयैकनित्यभोगसाम्राज्ये स्थितो वर्तमानः सन् पुमानिति शेषः । ब्रह्मेन्द्रावादी येषां ते तथोक्ता ये मरुद्गणाः सुरसङ्घाः तानपि किमुतान्यानिति भावः । “ मरुतौ पवनामरौ ” इति वैजयन्ती । तृणकणान् तृणलेशान् अत्यन्तनिःसारान् परमनीचानिति यावत् । मन्यते अवबुध्यते । पारमेष्ठ्यस्वाराज्ययोरप्येतादृशभोगसाम्राज्यसहस्रांशसादृश्यस्याप्यनर्हत्वादिति भावः । “मन्यकर्मण्यनादरे विभाषाप्राणिषु” इति विकल्पाद्द्वितीया । तथा यस्य विशिष्टभोगसाम्राज्यस्य स्वादात् रुच्यनुभवात् त्रयो लोकास्त्रैलोक्यम् । ब्राह्मणादित्वात् ष्यञ् । तत्र यद्राज्यमाधिपत्यं तदादि येषां ते तथोक्ता विभवाः सम्पदो विरसा अनभिमताः । हेया इति यावत् । भवन्ति तेषु तथाविधरुच्यतिशयाभावादिति भावः । यद्वा यस्य ब्रह्मानन्दरूपभोगस्य स्वादात् त्रैलोक्यराज्यमादि कारणं येषां ते तथोक्ता सकलभुवनाधिपत्यसम्भवा इत्यर्थः । विभवाः सुखसम्पदः विरसा रसहीना निकृष्टा इति यावत् । भवन्ति । ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भूतत्वात् । “ एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ” इति श्रुतेरिति भावः । कोऽप्यनिर्वाच्यः । कुतः परमः सर्वोत्कृष्टः निरतिशय इति यावत् । तत्कुतः नित्योदितः नित्याभ्युदयमप्यत्र इत्यर्थः । स एक एव भोगो ब्रह्मानन्दरूपो जृम्भते । महाराजश्रोत्रियाद्यानन्दानामुत्तरोत्तरमानन्त्यमुक्तं वाऽस्य सर्वोत्कृष्टत्वस्य श्रुत्युक्तत्वादिति भावः । अतो भो साधो सज्जनेत्युपदेशश्रवणाभिमुखीकरणार्थं सम्बोधना अत्रैकवचनं समुदायाभिप्रायमत एव रे लोका इति न पूर्वश्लोकस्थबहुवचनविरोधः । अस्मदुपदेशं ये न शृण्वन्ति त एव नीचाः यस्तु शृणोति स एव साधुरिति सम्बोधनद्वयतात्पर्यम् । क्षणभङ्गुरे अनित्ये [illegible] । परमनीच इत्यर्थः । तदितरे तस्माद्विशिष्टभोगादितरस्मिन् । अत एव विषयादिसामान्याश्रितः । भोगे सांसारिकसुखानुभवे रतिं रागं प्रीतिमिति यावत् ।

" रतिः स्मरप्रियाया च रागेऽपि सुरतेऽपि च । " इति विश्वः । मा कृथाः मा कार्षीः किंतु पूर्वोक्त एव तस्मिन् भोगे रतिं कुरु । तस्यैव परमश्रेयस्करत्वादिति भावः । कृञो लुङि " न माङ्योगे " इत्यडागमप्रतिषेधः ॥ ४० ॥

जिसमें स्थित हुआ मनुष्य ब्रह्मेंद्रादि देवगणको तृणके समान तुच्छ मानता है, जिसके स्वादसे त्रैलोक्यके राज्यादिक विभवभी विरससे जान पडते हैं ऐसा वह एक परम नित्य उदित ब्रह्मानंदरूप भोगही सर्वोत्कृष्टतासे विराजता है इसलिये हे साधो ! तदितर इस क्षणभंगुर भोगमें प्रीति मत करो ॥ ४० ॥

सा रम्या नगरी महान्स नृपतिः सामंतचक्रं च त-।
त्पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ॥
उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः ।
सर्वं यस्य वशादगात्स्मृतिपदं कालाय तस्मै नमः ॥ ४१ ॥

अथ सर्वस्यापि कालनियम्यत्वात्तन्महिमानं दशभिर्वर्णयति तत्रादौ तस्य नियामकत्वं प्रकटयन्नमस्करोति—सेति ॥ अत्र सर्वत्रापि तच्छन्दः पूर्वानुभूतविषयः अत एव न यच्छन्दः । तदुक्तं काव्यप्रकाशे । " प्रक्रांतप्रसिद्धानुभूतार्थगोचरस्तच्छब्दो न यच्छब्दमपेक्षते " इति । तथा च सा पूर्वानुभूता रन्तु योग्या रम्या मनोहरा नगरी राजधानी च तत्र स महान् साम्राज्यभारधौरेयतया पूज्यो नृपतिः राजा च । तस्येति सम्बन्धसामान्ये षष्ठी सर्वत्र सम्बध्यते । तस्य नृपतेस्तत् सामन्तचक्रं प्रत्यर्थिराजमण्डलम् । यद्वा सेवार्थं समागताखण्डमण्डलाधिपतिपरिवारश्च । तस्य पार्श्वे स्थितामिति शेषः । सा विदग्धपरिषत् विद्वत्सभा च । अथवा विदग्धानां कर्तव्यार्थचतुराणां परिषत् समुदायश्च । " कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते ।" इति लक्षणात् । तस्य ताश्चन्द्रबिम्बमिवाननं यासां ताः सुन्दर्यश्च । तस्य स

१ भ्रांत कष्टमहो इति पाठांतरम् । २ सापि राजप० इति पाठान्तरम् । ३ उद्रिक्त इति पाठांतरम् ।

उद्वृत्त उत्पथगत उद्दण्ड इति यावत् । राजपुत्रनिवहो राजकुमारवर्गश्च । तस्य ते वन्दिनः स्तुतिपाठकाश्च । " वन्दिनः स्तुतिपाठकः " इत्यमरः । तस्य ताः कथाः श्राव्यवाचश्चेति सर्वमशेषमपि यस्य वशादायत्तत्वात् । " वश आयत्ततायां च " इत्यमरः । स्मृतिपथ स्मरणमार्गम् । "ऋक्पू०" इत्यादिना समासांतोऽप्रत्ययः । अगात् प्रापत् । कालमहिम्ना सर्वमपि नष्टमभूदित्यर्थः । सर्वसंहर्तुः कालस्य महिमा वर्ण्यत इति भावः । " इणो गा लुङि " इतीणो गा लुङि गादेशः । तस्मै कालाय नमः प्रह्वभावः । "कालः कलयतामहम् " इति भगवद्वचनात् कालो भगवानेव तथा च तन्नमस्काररूपमङ्गलाचरणं युज्यत इति भावः । " नमःस्वस्ति० " इत्यादिना चतुर्थी ॥ ४१ ॥

पहिले यहां कैसी सुन्दर नगरी थी, उसका राजा कैसा उत्तम था और राज्य उसका कैसा दूरतक था, उसके निकट विदग्धसभा कैसी होती थी और चन्द्रमुखी स्त्रियां कैसी शोभायमान थीं और राजाके पुत्रोंका समूह कैसा प्रबल था, कैसे वे वन्दीगण थे और कैसी अच्छी कथा कहते थे अब वे सब जिस कालके वश हो लुप्त हो गये उस कालको नमस्कार है ॥ ४१ ॥

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको ।
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ॥
इत्थं नेयौ रजनिदिवसौ लोलयन् द्वाविवाक्षौ ।
कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ॥ ४२ ॥

अथास्याक्षचूर्णनाम्येन सर्वप्राणियन्तृत्वमाह—यत्रेति ॥ यत्र यस्मिन् गृहे वेश्मनि कोष्ठे च क्वचित्कदाचित् । यद्वा यत्र क्वचिदपि यस्मिन् कस्मिंश्चिद्गृहे अनेकः बहुलः प्राणी शारश्च तिष्ठति । अथानन्तरं तत्र तस्मिन्नेव गृहे कदाचिदेकस्तिष्ठति । एकत्र कालभेदवशादन्यत्र परिणामवशाद्वेति भावः । तथा

---

१ चैकं इति पाठान्तरम् । २ दोल्यन् इति पाठान्तरम् । ३ द्याम्या इति पाठान्तरम् ।
४ तद् बहुरत्र इति पाठान्तरम् ।

यत्र यस्मिन् गृहे कदाचिदेकास्तिष्ठति तदनु तदनन्तरं बहवास्तिष्ठन्तीति शेषः । तत्र तस्मिन् गृहे अंते अवसानकाले द्यूतसमाप्तौ च एकोऽपि च न तिष्ठति । इत्थमुक्तरीत्या भुवन फलकमिव शारप्रवर्तनोचितकोष्ठयन्त्रमिव तस्मिन् नेयै प्रवर्तनीयैरिति यावत् । प्राणिनः शाराः द्यूतगूढा इव अक्षोपकरणानीवेति यावत् । तैः साधनैः । "पल्याणे स्त्री विहङ्गे ना शारो द्यूतगूढे नपुंसकम् ।" इति वैजयन्ती । कल्यः कलनासमर्थः देवनचतुरश्च कालः कर्ता अक्षधूर्तश्च गम्यते । रजनिदिवसौ रात्र्यहनी कर्म द्वावक्षौ पाशकाविव । "पणोऽक्षेषु ग्लहेऽक्षास्तु देवकाः पाशकाश्च ते ।" इत्यमरः । लोलयन् पौनःपुन्येन गृह्णन् सृजश्चेत्यर्थः । क्रीडति दीव्यति । प्राणिसंयोगवियोगयोर्वृद्धिक्षयादीना च काल एव कर्तेति भावः । अत्राक्षाविवेति स्पष्टोपमालिंगात्सर्वत्रोपमितसमासः । यदि चक्रक्रीडनोपयोगित्वाद्रूपकमेवाश्रयणीयमित्यभिमानस्तदैकदेशवर्तिरूपकमुपमा त्वङ्गमिति संक्षेपः ॥ ४२ ॥

जिस घरमें अनेक थे वहां एक दृष्टि पडता है और जहां एक था वहां अनेक देख पडे, फिर वहांही एकही रह गया तो देखो रात और दिनके पासे लुढा लुढाके इस संसाररूपी चौपडमें प्राणियोंको गोटी बनाके कलनासमर्थ काल पुरुष खेल रहा है ॥ ४२ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं ।
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ॥
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते ।
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४३ ॥

अथ नित्यप्रमत्तोऽयं लोको नैतन्महिमानं ज्ञातुं शक्नोतीत्याह—आदित्यस्येति ॥ आदित्यस्य सूर्यस्य गतागतैरुदयास्तमयैरिति यावत् । अहरहः प्रत्यहमहन्यहनीत्यर्थः । वीप्सायां द्विरुक्तिः । अत्यन्तसंयोगे द्वितीया । जीवितमायुः संक्षीयते विनश्यति कालक्रमेणायुःक्षयो भवतीत्यर्थः । "क्षि क्षये" इत्यस्माद्धातोः कर्तरि लट् । तथापि सोऽयं न ज्ञायत इत्याह । बहवोऽनेके ये कार्यभारा देहगेहादिनिमित्तकर्तव्यार्थपरम्परास्तैर्गुरुभिर्गरिष्ठैर्व्यापारैर्जीवनो-

पायोधोगैः कालोऽपि जीवितक्षयकरसमयोऽपि न ज्ञायते । कार्यशतसर्पो-कुलव्यापारपारवश्यान्नावबुध्यत इत्यर्थः । तथा जन्मजराविपत्तिमरणमुत्पत्ति-जरावस्थापन्निधनानीत्यर्थः । " सर्वो द्वन्द्वो विभाषैकवद्भवति " इत्येकव-द्भावः । दृष्ट्वा त्रासो भीतिश्च नोत्पद्यते नोदेति । किं जगत् सर्वोऽपि लोको मोहमयीमज्ञानप्रचुरां बुद्धिविपर्यासकारिणीमिति यावत् । प्राचुर्ये मयट् टित्त्वात् ङीप् । प्रमादमादिराम् । " प्रमादोऽनवधानता " इत्यमरः । मदिरा मद्य तां पीत्वा निषेव्य उन्मत्तभूतं क्षीबकल्प विवेकशून्यमिति यावत् । भवतीति शेषः । कालेनैव प्रमाद प्रापितोऽय लोकः कथङ्कारमेतन्महिमान ज्ञास्यतीति भावः ॥ ४३ ॥

सूर्यके उदय अस्त होनेसे आयु दिन दिन घटती जाती है, अनेक कार्योंसे भारी व्यापारमें काल बीता जाना नहीं जाता और जन्म वृद्धापन विपत्ति और मरण देखकेभी त्रास नहीं होता इससे यह निश्चित हुआ कि मोहमयी प्रमादरूपी मदिरा पीके जगत् मतवाला हो रहा है ॥ ४३ ॥

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो ।
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तक्रियाः ॥
व्यापारैः पुनरुक्तभुक्तविषयैरित्थंविधेनामुना ।
संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥ ४४ ॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—रात्रिरिति । रात्रिरियं प्रवर्तमाना रजनी सैव पुनः गतरात्रिसदृश्येवेत्यर्थः । पुनःशब्दो वाक्यालङ्कारे । अथ रात्रिः पुनः भूयोऽपि सैव गतरात्रिरिव नैनङ्क्षेदो विज्ञायत इति भावः । तथा दिवसोऽह्नः स पुनः स एव गतदिवससदृश एवेत्यर्थः । पुनरादिकरणोऽत्राप्युक्तः इति मत्वा [illegible] मुधानि जन्तवः प्राणिनः उद्यमिनस्तदर्थमुद्योगिनः [illegible] । तथैव निभृतं निगूढं [illegible] यावत् । प्रारब्धा [illegible] क्रियास्तदर्थं [illegible] पुनः

१ मुधा इति पाठान्तरम् । २ [illegible] इति पाठान्तरम् । ३ [illegible] पाठान्तरम् ।

पुनरनुभूतकल्पाश्चर्वितचर्वणप्राया इति यावत् । तथाभूता विषया जग्धियन्त्यादिभोगा तैर्व्यापारैश्चेष्टाभि मुधा व्यर्थं धावन्ति वृथा प्रयासमन्तरेण फलांतरसम्भवादिति भावः । किंत्वित्यविधेनैवम्प्रकारेणामुना परिवर्तमानेन संसारेण कुत्सितोऽर्थः कदर्थ । "कोः कत्तरपुरुषेऽचि" इति कुशब्दस्य कदादेशः । कदर्थवन्त. कृता कदर्थिता हीनार्थीकृता अपि । कदर्थशब्दात् "तत्करोति०" इति ण्यन्तात्कर्मणि क्तः । णाविष्ठवद्भावे "विन्मतोर्लुक्" इति लुक् । वय मोहादज्ञानान्न लज्जामहे न जिह्नेम । अहो एवं कालमहिम्ना निःसार्यं तिरस्कृता अपि लज्जां न प्राप्नुम इत्याश्चर्यमित्यर्थः ॥ ४४ ॥

वही रात और वही दिन नित्य होते हैं यह जानकेभी बुद्धिमान् मनुष्य उद्योग करते हुए उसी प्रतिदिनकी रीतिसे यथार्थ तिस २ कार्यका प्रारंभ करके वारंवार कहे और भोगे हुए हैं विषय जिनमें ऐसे २ व्यापारोंसे जहां तहां दौडते हैं इस पूर्वोक्त प्रकारके इस संसारसे निंदित अर्थवालेभी हम मोहसे लज्जाको प्राप्त नहीं होते ॥ ४४ ॥

न ध्यातं पदमीश्वरस्य विधिवत् संसारविच्छित्तये ।
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ॥
नारीपीनपयोधरोरुयुगुलं स्वप्नेऽपि नालिङ्गितं ।
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ४५ ॥

अथ लोके तावत्पुरुषाणां धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थसम्पादनसाधनीभूततया परमेश्वरपदध्यानेज्याध्ययनयशोवित्तार्जनगुरुशुश्रूषांगनालिंगनादयो यथायोग विधेयास्तस्माभिस्तु तेषा मध्ये न कश्चिदपि विरचित· अतोऽस्मज्जन्म निरर्थकमिव जातमिति वारंवार शोचता वचनमभिनयाह न ध्यातमित्यादित्रिभि —न ध्यातमिति ॥ संसारविच्छित्तये संसारोच्छेदार्थं मोक्षप्राप्त्यर्थमित्यर्थ. । ईश्वरस्य शम्भो· । "स्थेशभास० " इत्यादिना वरच् । पदं पादारविंदयुगलमित्यर्थः । विधिवत् विध्यर्हं यथाशास्त्रमित्यर्थः । "तदर्हम् " इति वतिप्रत्ययः । न ध्यातमेकाग्रचित्ततया न ध्यानविषयीकृतम् ।

यतः " शम्भुपादांबुजध्यानं साक्षान्मोक्षैकसाधनम् । " इत्यनेकपुराणेतिहाससहितावचने. साक्षान्मोक्षसाधनतया विधेयमित्यभिहितं शम्भुपदध्यानं न विहितमतस्तत्साध्यमोक्षपुरुषार्थो न सम्पादित इति भावः । तथा धर्मार्थसम्पादनानुशोचनं कथयन्ति । अत्र अथातो धर्मजिज्ञासेत्युपक्रममाणः सूत्रकृन्महर्षिर्धर्मस्य प्राधान्येन स्वतःसिद्धं पुरुषार्थत्वं मन्यते फलत्वानुषङ्गिकमस्य पुनः साक्षात्परंपरया च स्वर्गापवर्गपुरुषार्थद्वयसाधनतया सुखहेतौ चन्दने सुखस्यपदोपचारिकं मन्यते तत्र च द्वितीयं पक्षमाश्रित्याह । स्वर्गेति । अत्र स्वर्गशब्दोऽपवर्गस्योपलक्षकः । तथा च स्वर्गापवर्गद्वारयोः कवाटे तयोः पाटने विदलने पटुः समर्थः स्वर्गापवर्गसाधक इत्यर्थः । धर्मो ज्योतिष्टोमादिरपि नोपार्जितो न सम्पादितः । यतः " ज्योतिष्टोमेन स्वर्गकामो यजेत, धर्मात्सुखं च ज्ञानान्मोक्षमवाप्नुयात् । " इत्यादिश्रुतिस्मृतिभिः पुरुषार्थद्वयसाधकत्वेनावश्यमनुष्ठेय इति बोधितो धर्मोऽपि नानुष्ठितः । अतस्तत्साध्यपुरुषार्थद्वयमपि न सिद्धमिति भावः । अत्र देहलीदीपन्यायेन स्वर्गापवर्गसाधकत्वकथनं धर्मस्य किंचिदतिशयं द्योतयति ततो न पौनरुक्त्यमित्यनुसंधेयम् । तथा नारीणां पीनौ पीवरौ यौ पयोधरौ स्तनौ तयोरुरु दुर्भरं यद्युगलं पीवरदुर्भरकुचकुम्भयुग्ममित्यर्थः । यद्वा पयोधरयोरूर्वोश्च युगलं पयोधरयुगलमूरुयुगलं चेत्यर्थः । तत्स्वप्नेऽपि स्वप्नावस्थायामपि किमुत जाग्रदवस्थायामिति भावः । नालिंगितं नाश्लिष्टम् । " संसारे पटलाततोयतरले सारं यदेकं परं यस्यायं च समग्र एष विषयग्रामप्रपन्नो जनः । तत्सौख्यं परतत्त्ववेदनमहानन्दोपमं मदधीः को वा विंदति सूक्ष्ममन्मथकलावैचित्र्यमूढो जनः ॥ " इत्यादिकामशास्त्रोक्त्या कामपुरुषार्थस्याप्युपादेयत्वात्तन्निष्पादकत्वेनाधिगतमङ्गनाकुचकुम्भालिंगनाधरचुम्बनादिकमपि न कृतमतस्तन्निष्पाद्यकामपुरुषार्थोऽपि न समर्थित इति भावः । अयमेव भावः उत्तरपद्यद्वयेऽप्यनुसन्धेयः । अत्र बाह्यसुरते पयोधरालिंगनं समरतप्रयोज्यग्राम्यकरणे दोलायितत्वन्वे ऊरुयुगलालिंगनमिति विवेकः । अत्र वात्स्यायनीयः । " बाह्यमाभ्यन्तरं चेति द्विविधं रतमुच्यते । तत्राद्यं चुम्बनाश्लेषनखदंतक्षतादिकम् ॥ द्वितीयं सुरतं साक्षान्नानाकरणकल्पितम् । " इति । किंतु केवलमत्यंतं मातुर्जनन्या

यौवन तारुण्यमेव वन सुपुष्पितोद्यान तस्य च्छेदे विदारणे वय कुठार परशव एव यौवनस्य पुत्रोत्पत्त्यवधिकत्वात्तदुच्छेदनसाधनभूता एव न त्वर्थान्तरसाधका अतो निरर्थक मज्जन्मेति भाव ॥ ४९ ॥

संसार छेदनेके लिये ईश्वरके चरणकमलोंका विधिवत् ध्यान न किया, स्वर्गद्वार खुलनेके लिये कोई निपुण धर्म भी संचय न किया और नारीके पुष्ट पयोधर और दोनों जंघा स्वप्नमें भी छातीसे न लगाये, केवल हम माताके यौवनरूपी वन काटनेके हेतु कुल्हाडे ही उत्पन्न हुए ॥ ४९ ॥

नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिता ।
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ॥
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये ।
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ४६ ॥

नेति ॥ दम्यते भज्यते अनयेति दमनी भजनी प्रतिवादिवृन्दानां प्रतिभटवादीश्वरनिवहाना दमनी अथवा प्रतिवादिना वृन्दानि दमयतीति तथोक्ता सम्प्रदायशुद्धदेशिकाचार्यशिक्षानिबन्धननिष्कृष्टकर्तृप्रयुक्तवीर्यातिशयवर्तमानप्रतिवादिपाण्डित्यगर्वनिर्वाणसमर्थेत्यर्थ. । "कृत्यल्युटो बहुलम्" इत्युभयत्रापि कर्मकर्तरि ल्युट् टित्वात् ङीप् । तथा विनीताना साधूनामुचिता सहृदयहृदयाह्लादिनीत्यर्थ । यद्वा विनीताना विनयविधेयत्वादिगुणोपेताना शिक्षितानामिति यावत् । उचिता अभ्यासार्हा । "अभ्यासेऽप्युचित न्याय्यम्" इत्यमर । विद्या वेदशास्त्रपुराणादिरूपा नाभ्यस्ता नाभ्यासविषयीकृता सम्यक् न परिशीलितेति यावत् । अधीतापि विद्या सम्यक्परिशीलनाभावे फलवदर्थावबोधापर्यवसायित्वादनधीतप्रायैव भवतीति यावत् । आवृत्तिरसकृदुपदेशादिति न्यायेन तत्परिशीलनस्य फलोक्तेश्च सर्वथा परिशीलनयैव प्रथमत अनधीतेव चेन्न तत्र प्रत्युत्तरावकाश । एव व्यवस्थाया सत्यां "विद्या नाम नरस्य रूपमधिकम्" इत्यादिवचनेन

१ भुवि इति पाठान्तरम् ।

-कीर्तिप्रतिष्ठाविज्ञानादिफलसाधनतया अध्ययनपूर्वकमभ्यसनीयेति बोधिता विद्या नाधीता नाभ्यस्ता च । ततस्तत्साध्यफलजातमपि न संगृहीतमिति भावः । तथा करिकुम्भाः पीठानीव तेषां दलनैर्विदारणैरथवा करिकुम्भपीठानि दलयन्तीति तथोक्तानि तैः शत्रुसेनासंरम्भविजृम्भमाणकरिकुम्भस्थलपाटनानि-घाघाटपाटवैरित्यर्थः । "दल विदलने" इति धातोः पूर्ववल्ल्युट् । खड्गाग्रैः यशः कीर्तिं नाकं स्वर्गम् । "स्वर्गान्तरिक्षयोर्नाक" इत्यमरः । न नीतं न प्रापितम् । क्षत्रधर्मेण लोकान्तरश्लाघनीयकीर्तिरपि न संपादितेत्यर्थः । यथा लोके प्रासादाद्युन्नतस्थानं प्रापणीयं वस्तु वेणुदण्डाग्रादिना प्रापयति तद्वदिति ध्वनिः । अथवा खड्गाग्रैः खड्गधाराभिः साधनैर्यानि करिकुम्भपीठानां दलनानि विदारणानि तैर्हेतुभिः शत्रुसेनादलितनिर्वहारुंतुदखड्गप्रहारैरित्यर्थः । यशः नाकं न नीतम् । "कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः ।" इत्यादिवचनैः स्वसाधनत्वेन निवेदिता कीर्तिर्न सम्पादिता । ततस्तत्साध्यफललाभो न जात इति भावः । अत्र "क्षितितले किं जन्म कीर्तिं विना" इति वचनाज्जन्मसाफल्यार्थं कीर्तेः पृथङ् मुख्यत्वेन संपादनीयत्वादानुषंगिकफलत्वात्साधनान्तरत्वात्स्वर्गमात्रसाधकत्वाच्च "स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः" इत्यनेन न पौनरुक्त्यमित्यवगन्तव्यम् । नाकं न नीतं यश इत्यत्र "नीवह्योर्न" इति वचनाद्द्विकर्मकान्नयतेः कर्मणि क्तप्रत्ययः। अत एव यशसः प्रथमान्तस्य प्रधानकर्मत्वम् । अन्यत्र "अकथितं च" इति । "प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥" इति वचनात् । तथा चन्द्रोदये चन्द्रोदयसमये कान्तायाः प्रियतमायाः कोमलो मृदुलो यः पल्लवाधरः किसलयकल्पाधरोष्ठस्तस्य रसः अधरामृतमित्यर्थः। न पीतः । "तिक्तादौ चामृते चैव निर्यासे पारदे ध्वनौ । रसः" इति शब्दार्णवः । पल्लवाधरसुधा पीतेति पाठे स्पष्टोऽर्थः । अतो न तृतीयपुरुषार्थोऽपि संपादित इति भावः । तटस्थोद्दीपनविभावस्य चन्द्रस्य शृङ्गाररसनिमित्तकारणत्वात्तदुदयोक्तिः । तदुक्तं शृङ्गारतिलके । "मलयानिलचन्द्राद्यास्तटस्थाः परिकीर्तिताः ।" इति । अतस्तारुण्यं यौवनं शून्यालये निर्जनगेहे दीपेन तुल्यं दीपवत् । "तेन तुल्यं क्रिया चेद्वतिः" इति वति-

प्रत्ययः। निष्फलं निरर्थकमेव गतम्। यथा शून्यगृहदीपस्य कस्यचिदप्यनुपयोगान्निरर्थकत्वं तथा तारुण्यस्यापि कस्यचिदप्यर्थस्यासाधकत्वान्निरर्थकत्वमित्यर्थः। अहो इत्याश्चर्ये विषादे वा। तद्धितगतेयमुपमा ॥ ४६ ॥

नम्र जनोंकी प्रसन्नताके योग्य और वादियोंके समूहको दमन करनेहारी विद्याका अभ्यास हमने न किया, तरवारकी धारसे हाथीके मस्तकका पृष्ठभाग काटके स्वर्गलों अपना यश न पहुँचाया और चांदनी रातमें सुन्दर स्त्रीके कोमल अधरपल्लवका रसभी न पान किया तो इस भूमिपर हमारी युवा अवस्था योंही बीती जैसे शून्य मंदिरमें दीपक जलकर आपही ठंडा हो जाता है ॥ ४६ ॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं।
शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता ॥
आलोलायतलोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः।
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥ ४७ ॥

विद्येति ॥ कलङ्करहिता निष्कलङ्का सप्रमाणेत्यर्थः। विद्या नाधिगता नाभ्यस्ता नाधीतेति यावत्। "नाभ्यस्ता प्रतिवादिवृन्ददमनी" इत्यत्र उक्तभाव एवात्राप्यनुसंधेयः। वित्तं त्यागभोगपर्याप्तं धनं च नोपार्जितम्। "यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः। स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥" इत्युक्तेः। "धनमार्जय काकुत्स्थ धनमूलमिदं जगत्। अन्तरं नाभिजानामि निर्धनस्य मृतस्य च ॥" इत्यादिवचनेन च बहुफलसाधनतया आर्जनीयमित्युपदिष्टं वित्तं नार्जितं ततस्तत्साध्यफलमपि न साधितमिति भावः। ननु "अर्थानामार्जने दुःखमार्जितानां च रक्षणे। रक्षितानां व्यये दुःखं धिगर्थं दुःखभाजनम् ॥" इति निषेधोक्तेः कथं तदुपार्जनाभावानुशोचनमिति चेत्सत्यं तस्याव्यवहिताविसंवादैहिकामुष्मिकफलजनकत्वेनाभ्यर्हिततरत्वात्पुरुषार्थपर्यवसानाच्च न दोष इति मन्तव्यम्।

---

१ युवतय इति पाठान्तरम्। २ प्रेरितः इति पाठान्तरम्।

तथा समाहितेन सावधानेन प्रसन्नेनेत्यर्थ । मनसा अन्तःकरणेन । अन्तः-करणशुद्धिपूर्वक विहितस्य कर्मणः फलजनकत्व नियमादिति भावः । पित्रोर्माता-पित्रोरित्यर्थः । "मातापितरौ पितरौ" इत्यमरः । "पिता मात्रा" इत्येक-शेपः । शुश्रूषा परिचर्या सेवेति यावत् । "शुश्रूषा श्रोतुमिच्छायां परिच-र्याप्रधानयोः ।" इति विश्वः । न सम्पादिता न कृता । "मातापितृसम दैव सर्वेषां न हि विद्यते । तस्मात्समर्चयेन्नित्य पितरौ देवरूपिणौ ॥" इत्या-दिवचनैः परमेश्वराराधनकल्पतया बहुफलदायकत्वेन कर्तव्येति बोधिता पितृसेवा न कृता ततस्तत्साध्यफलमपि न सम्पादितामिति भावः । आलोले चचले तरले आयते कर्णान्तविश्रान्ते च लोचने यासा ताः । जगन्मो-हननयनविलासवत्य इत्यर्थः । प्रियतमा अत्यन्तमनोविनोदकारिण्यः सम्भोगयोग्याः समानुरागिण्यस्तरुण्य इत्यर्थः । अन्यथा रसाभासप्र-गात् । स्वप्नेऽपि नालिंगिताः एतेनात्यन्तमिथ्याभूतस्वप्नालिंगनाभावानु-शोचनेन जाग्रद्दशायां तस्यात्यन्तासम्भावितत्व सूच्यते । ननु काम-निष्पत्त्यर्थमङ्गनालिंगनाधरचुम्बनादिकमावश्यक तत्र पूर्वश्लोके अधरचु-म्बनमुक्तं किंतु पूर्वतरश्लोकोक्तमेवालिंगन पुनरत्राप्युक्तमत. पीनरुक्तदोषः प्रसक्त इति चेन्न । तत्र कतिपयालिंगनाभावमात्रानुशोचनमत्र तु सर्वांगना-लिंगनाभावानुशोचनमिति न दोपप्रसक्तिरिति वेदितव्यम् । किं त्वय परि-वर्तमानः काल· काकैर्बलिभुग्भिरिव अस्माभिरिति शेप. । परपिंडेषु परान्नेषु लोलुपतया लालसतया सावमानपरपिंडादनकुक्षिभरितयेत्यर्थः । प्रेर्यते याप्यते । न त्वर्थसाधकतयेति भावः । "परान्नः परपिंडादः" इत्यमरः । प्रपूर्वादीरयतेः कर्मणि लट् । एतत्सर्वं कालविलसितमेवेति तात्पर्यम् । यद्य-प्यत्र वैराग्यप्रकरणे धर्मार्थपितृशुश्रूषाविद्यायशोधिगमाना यथाकथंचि-त्पुरुषार्थोपयोगितया तदभावानुशोचन वक्तुं युक्त न त्वङ्गनालिंगनादिसम्भोगा-भावानुशोचनम् । तदपि श्लोकत्रयेण त्रिवारशुद्ध्यर्थं कथयितुमत्यन्तायुक्तम् । ननु विद्याध्ययनाभावे द्विवारानुशोचन न युक्तमिति चेन्न तस्या उपादेयत्वेन शतकृत्वस्तदभावानुशोचनेऽप्यनौचित्यामावात् । अन्यस्य त्वनुपादेयत्वादेत-दनुशोचनमनुचितमिव प्रतिभाति । तथापि तस्यापि पुरुषार्थमध्यपरिगणन-

या सपातापातत्वात्, प्रसूतिभाजो विश्वस्य स्त्रीपुंसाभ्यामेव निष्पन्नत्वात्कामस्य पुरुषार्थत्वेन च पितृऋणविमोचनहेतुभूततया च तादृशशास्त्रस्य महापुरुषप्रणीतत्वात्। "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ।" इति भगवद्वचनात्तद्विरुद्धस्यैवानुपादेयत्वात्। अत्र तु तदविरुद्धस्यैतत्कामस्य विवक्षितत्वेनोपादेयत्वाच्च तदभावानुशोचनमुचितम्। यद्वा लोके तावदुत्तमवस्त्वलाभे अधमवस्त्वपेक्षा तस्याप्यलाभे तदनुशोचनं प्रायशः प्रसिद्धम्। यथा पिपासितस्यालब्धशर्करापानकस्यारनालापेक्षायां तदलाभेऽनुशोचनं तद्वत्कालविप्रलब्धस्याधिगतपरमार्थकामापेक्षाया तदलाभेऽनुशोचनमुचितमेव। अत एव श्लोकत्रयेऽपि प्रतिश्लोकं पूर्वार्धे उत्तममध्यमभेदेन पक्षद्वयाभावानुशोचनमुक्त्वा अधमत्वातिशयेन तृतीयपक्षे तदभावानुशोचनमुक्तमित्यलमतिप्रपञ्चेन ॥४७॥

निष्कलंक विद्या नही पढी, धन न कमाया, एकाग्रचित्त होके मातापिताकी सेवा न की, तथा चंचल और बडे नेत्रवाली स्त्रियोंको स्वप्नमेंभी गलेसे न लगाया किंतु पराये ग्रासका लोभ करते २ काकके समान सब समय योंही विताया ॥ ४७ ॥

वयं येभ्यो जाताश्चिरपरिचिता एव खलु ते।
समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः॥
इदानीमेते स्मः प्रतिदिवसमासन्नपतनाः[२]।
गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥४८॥

अथ कालविकलनाविपाकवचनमाह—वयमिति ॥ वयं येभ्यो मातापितृभ्यो जाता उत्पन्नास्ते चिरपरिचिता एव चिरकालपरिचयवन्त एव विनष्टा एवेत्यर्थः। खलुशब्दोऽत्र निश्चये वा वाक्यालङ्कारे वा। तथा यैर्जनैः समं संवृद्धाः सम्यग्वृद्धिं गताः। नवृत्ता इति पाठे प्रवृत्ता इत्यर्थः। तेऽपि स्मृतिविषयतां स्मरणगोचरत्वं गमिताः प्रापिताः कालेनेति शेषः। तेऽपि विनष्टा इत्यर्थः। गमेर्ण्यन्तात्कर्मणि क्तः। "गतिबुद्धि०" इत्यादिना अणि कर्तुः कर्मणि चिण्यन्ते कर्तुश्च कर्मण इति वचनात्। अथवा गमिता

१ परिगता इति पाठान्तरम्। २ पतनात् इति पाठांतरम्।

गता इत्यर्थः । स्वार्थे णिचि " रामो राज्यमकारयत् " इतिवत् । इदानीं चार्धकावस्थायामेते वय प्रतिदिवस प्रत्यहम् । यथार्थेऽव्ययीभावः । आसन्नं समीपवर्ति पतन निधन येषां ते तथोक्ताः । अत एव सिकतास्मिन्नस्तीति सिकतिल सैकतप्रायम् । " देशे लुविलचौ च " इत्यनेन तदस्त्यस्मिन्नित्यर्थे इलच्प्रत्ययः । यन्नदीतीरं नदीतटप्रदेशस्तत्र ये तरवः वृक्षास्तैस्तुल्यावस्था गताः समदशां प्राप्ताः स्मः क्षिप्रमेव यास्याम इत्यर्थः । एतत्सर्वं कालकृतमेव अन्यथा कथमन्यस्येदृक्सामर्थ्यमिति भावः । अत्र तरङ्गभङ्गस्याघातैः सिकतापनये अविलम्बेन तरूणा निर्मूलोन्मूलस्तद्द्योतनार्थं नदीतीरस्य सिकतिलविशेषणम् । " स्त्री शर्करा शर्करिलः शार्करः शर्करावति । देश एवादिमावेवमुन्नेयाः सिकतावति ॥" इत्यमरः । शिखरिणी वृत्तम् ॥ ४८ ॥

जिनके संग हम जन्मे थे उनको तो गये बहुत दिन बीते, फिर जिनके साथ हम बडे हुए वेभी स्मरणपदमें गये अर्थात् मरे अब हमभी दिन दिन गिरते देख पडते हैं, वालुकामय नदीतटके वृक्षके तुल्य दशाको प्राप्त हो रहे हैं ॥ ४८ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं ।
तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्ववृद्धत्वयोः ॥
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते ।
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥४९॥

अथ प्राणिना विचार्यमाणे लेशस्याप्यवकाशो नास्तीत्याह—आयुरिति ॥ नृणा मर्त्यानामायुर्जीविताविधिकालो वर्षशत शतसंवत्सरात्मक परिमितं कृतं ब्रह्मणेति शेषः । " विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः । " इत्यमरः । तदर्धं तस्य वर्षशतस्यार्धं पञ्चाशद्वत्सरात्मक रात्रौ गतमिन्द्रियव्यापारोपरमरूपनिद्रावस्थया गलित भवतीत्यर्थः । परस्य तस्य जागरूकेण वर्तमानस्यार्धस्य पञ्चाशद्वत्सरात्मकस्यापरमन्यदर्धं पञ्चविंशतिसंवत्सरात्मक बालत्ववृद्धत्वयोर्गतमज्ञानाशक्त्यावस्थाविषयतया नष्टमित्यर्थ । द्वादशसंवत्सरात्मकमेकमर्धं बालत्वेऽन्यद्वृद्धत्वे इति विवेकः । शेष पञ्चविंशतिसंवत्सरात्मक-

मेतदवशिष्टमेतदवशिष्टार्धं व्याधिभिः रोगैः वियोगदुःखैः पुत्रकलत्रादिविरहप्रयुक्तदुःखैः सहितं सत् सेवादिभिः स्वजीवनार्थं वित्तवत्परिचर्यादिकष्टकर्मभिर्नीयते अतिवाह्यते । अतो वारितरङ्गवच्चञ्चलतरे अतिचञ्चले क्षणिके इत्यर्थः । जीवे जीवने प्राणिनां सौख्यं सुखं कुतः न कुतोऽपीत्यर्थः । उक्तरीत्या विचार्यमाणे सुखलेशस्याप्यनवकाशादिति भावः ॥ ४९ ॥

प्रथम तो मनुष्यकी आयुष्यही सौ वर्षकी प्रमाण हुई है उसमेंसे आधी पचास वर्ष सोनेहीमें रात्रिको व्यतीत होती है, शेष आधीके तीन भाग करो, उनमेंसे प्रथम अंश बालपनके अज्ञानतामें जाता है, दूसरा वृद्धा (जरा) अवस्थामें जाता है, जो बची सो व्याधि, वियोग, दुःख, पराई सेवा, कलह, हर्ष, शोक, हानि, लाभ इत्यादि नाना क्लेशमें व्यर्थ व्यतीत होती है । यदि सौ वर्षपर्यन्त जीवन हो तोभी लेखासे सुखके दिन कुछ नहीं निकलते । यह तो जलतरङ्गके समान जीवन है इसमें प्राणियोंको कहांसे सुख प्राप्त होगा ॥ ४९ ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः ।
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ॥
जराजीर्णैरंगैर्नट इव वलीमंडिततनु- ।
र्नरः संसारांते विशति यमधानीयवनिकाम् ॥ ५० ॥

अथ कालत्रययुक्तवात्याद्यवस्थाक्रमेण मर्त्यः सर्वोऽपि म्रियत इत्युपसंहरति—क्षणमिति ॥ क्षणं क्षणमात्रमीषत्कालमित्यर्थः । अत्यन्तसंयोगे द्वितीया बालः शिशुर्भूत्वा । तथा क्षणमपि कामेन मन्मथेन रसिकः शृंगाररसाभिनिविष्टः । यद्वा काम्यन्ते अभिलष्यन्ते इति कामा कामिनीसम्भोगादयस्तेषु रसिकोऽनुरागवान् युवा तरुणश्च भूत्वा । तथा निर्धनो भूत्वा । क्षणमपि सम्पूर्णविभवः परिपूर्ण... अपि " इति पर्यायेष्वमरः । तथा क्षण... धिवधीरिति यावत् । अगैरप्यक्षित

...ति पाठान्तरम् । २ चेत्तत्त्व० इति ...
१ जन्मातोऽस्मि इति पाठान्तरम् ।

उक्तमेवार्थं भंग्यन्तरेणाह—अर्थानामिति ॥ त्वमर्थाना धनानामीशिषे ईश्वरो भवसि तथा वयमपि च यावानर्थो यावदर्थं यावदभिधेय यथा तथेत्यर्थः । " यावदवधारणे " इत्यव्ययीभावः । " अर्थोऽभिधेय-रैवस्तुप्रयोजननिवृत्तिषु ।" इत्यमरः । गिरा शास्त्रवचनानामीश्महे अशेषशा-स्त्रविशेषार्थाना प्रभवाम इत्यर्थः । विद्महे इति पाठे गिरा यावदर्थमित्यर्थः । विद्महे जानीमहे । तथा त्व शूरः शौर्यवान् रिपुदलने इति शेष । तथा नोऽस्माक वादिदर्पव्युपशमनविधौ प्रतिवादिगर्वनिर्वापणविधाने । " विधिर्वि-धाने दैवे च " इत्यमरः । अक्षयमविनाशि पाटव सामर्थ्यमस्तीति शेषः । त्वां धनाढ्या धनस्वामिनः । " इभ्य आढ्यो धनी स्वामी " इत्यमर । सेवन्ते भजन्ते । तदविनाशार्थं तदभिवृद्ध्यर्थं चेति भावः । यद्वा धनाढ्या धनाढ्यत्वाभिलाषिणो राजसेवया धनसम्पादनेच्छव इत्यर्थः । त्वां सेवन्ते । मामप्यस्मानपीत्यर्थः । मतिमलहृतये बुद्धिजाड्यनिवृत्त्यर्थम् । " यस्तु पर्य-टते देशान् यस्तु सेवेत पण्डितान् । तस्य विस्तारिता बुद्धिस्तैलबिंदुरिवां-भसि ॥ " इति वचनादिति भाव । यद्वा मतिमलानि रागद्वेषादयस्तेषां हतये प्रक्षालनार्थं बुद्धिशुद्धिद्वारा ज्ञानावाप्त्यर्थमित्यर्थः । श्रोतु कामोऽ-भिलाषो येषा ते श्रोतुकामाः शुश्रूषव. । " गुरुमुखाच्छ्रोतव्यम् " इति न्यायेनास्मन्मुखाच्छास्त्रार्थश्रवणेच्छवः । " गुरुशुश्रूषया विद्या " इत्युपदेशवचनविश्रामवत शिष्या इत्यर्थः । सेवते इति सबध । "तु काममनसोरपि" इति तुमुनो मकारलोप. । अतो हे राजन्, त मय्यपि आस्था न चेदनादरो यदि तदा मम त्वय्यपि नितरामत्यतम् । अव्यया-दाम्प्रत्यय. । अनास्था निरपेक्षत्वादिति भाव । किं त्वेषोऽहं गतोऽस्मि अन्यत्र गमिष्यामीत्यर्थः । वर्तमानसामीप्ये वर्तमानप्रत्यय । स्वस्य निर-कुशत्वद्योतनार्थमेतच्छब्दप्रयोगः । पूर्वश्लोकोक्तभाव एवात्राप्यनुसंधेय. । स्रग्धरा वृत्तम् ॥ ९२ ॥

तुम धनके कोशके ईश्वर हो तौ हमभी विद्याके कोशके ईश्वर हैं, तुम युद्ध करनेमें वीर हो तौ हमभी शास्त्रार्थ करनेवाले वादि-प्रतिवादियोंके अभिमानके तोडनेमें कुशल हैं, तुम्हें बडे लोग

धनाढ्य अथवा भन चाहनेवाले आशाग्रसित सेवन करते हैं तो इसमेंभी अपनी बुद्धिका अज्ञान दूर करनेको शास्त्र सुननेकी इच्छा-वाले सेवते हैं तो हे राजन्! यदि हमारे विषय तुम्हारी श्रद्धा नहीं है तो हमारी तुममे नहीं है, लो इम अब जाते हैं ॥ ५२ ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः ।
सम इव परितोषो निर्विशेषो विशेषः ॥
स तु भवति दरिद्रो यस्य तृष्णा विशाला ।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥ ५३ ॥

अथ कथमन्यत्र गमिष्यसीत्याशकायामस्माक नित्यसतुष्टांतःकरणत्वान्न किञ्चिदपि कृच्छ्रमित्याह—वयमिति ॥ हे राजन्, वयमिदानीं वल्कलैर्दारुत्वङ्-निर्मितचीवरैः परितुष्टाः सतुष्टाः । त्व दुकूलैः क्षौमैर्विचित्रचीनांबरैरित्यर्थः । परितुष्ट इति वचनपरिणामेन सबधः । परितोषः अस्माक तव सन्तोषः सम इव तुल्य एव । इवशब्दोऽत्रावधारणार्थकः । विशेष अन्यतरोत्कर्षस्तु निर्विशेषो विशेषरहितः मामकतावकपरितोषयोरतर न किंचिदप्यस्तीत्यर्थः । सम इव परितोषो जायते को विशेषः इति वा पाठः । किंतु यस्य पुसस्तृष्णा धनलिप्सा विशाला अत्यायता स पुमान् दरिद्रोऽकिंचनो भवतु न त्वन्य इत्यर्थः । सभावनायां लोट् । कथमेतदित्याशक्योक्तमर्थमर्थांतरन्यासेन द्रढयति । मनसि च परितुष्टे चित्ते येनकेनचित्सतुष्टे सति कः पुमानर्थवान् द्रव्यसपन्न कश्च वा दरिद्र द्रव्यहीनो न कोऽपीत्यर्थः । मनःपरितोषे लाभालाभयोरकिंचित्करत्वादिति भावः । अतो न किंचिदप्यस्माक कृच्छ्रमिति वेदितव्यम् ॥ ५३ ॥

हम वृक्षके वकले पहिरके संतुष्ट हैं, तुम दुकूलोंसे संतुष्ट हो, जब हमारी तुमारी तुष्टि सम ठहरी तब संतोष निर्विशेष हुआ

---

१ च लक्ष्म्या इति पाठान्तरम् । २ इह इति पाठातरम् ।
३ निर्विशेषाविशेष इति पाठान्तरम् ।

अर्थात् भेद न रहा, दरिद्री वह होता है जिसे बडी तृष्णा है, जब मन संतोषसे पूर्ण हुआ तो फिर कौन दरिद्री और कौन धनवान् है ? ॥ ५३ ॥

फलमलमशनाय स्वादु पानाय तोयं ।
क्षितिरपि शयनार्थं वाससे वल्कलं च ॥
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणा- ।
मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥

तथापि शरीरयात्राया अन्यथा समाव्यमानत्वान्न दुर्जनाविनयं सोढुं शक्नोमीत्याह—फलमिति ॥ फलमशनाय भोजनाय क्षुन्निवारणार्थमित्यर्थः अल पर्याप्तम् । अलमिति पर्याप्त्यर्थग्रहणात् " नमस्वस्ति० " इत्यादिना चतुर्थी । एवमुत्तरत्रापि द्रष्टव्यम् । तथा स्वादु मधुरम् । " त्रिष्विष्टे स्वादु मधुरम् " इत्यमरः । तोयमुदक पानाय तृष्णोपशांत्यर्थमलम् । क्षितिरपि शयनार्थं सवेशनायालम् । तथा वल्कल च वाससे आच्छादनार्थमलम् । अतः नव सद्यःसम्भावित यद्धन तदेव मधुपान मद्यपान तेन भ्रातान्यन्यमार्गवर्तीनि सर्वाणींद्रियाणि येषा तेषाम् । धनमधुपानस्य चित्तविकाराविवेकादिकारित्वेन यथाकथंचिद्विवेकलेशसम्भवे तन्निवृत्तिर्धनविशेषणमत्तस्य । दुर्जनानां दुर्मार्गशालिनामविनय दुर्विनयमनादरमिति यावत् । अनुमतुमगीकर्तुं नोत्सहे न मृष्यामि । सति गत्यतरे किमर्थं सोढव्यमिति भावः ॥ ५४ ॥

बहुतसे फल भोजनके लिये, मधुर जल पीनेको, पृथ्वी सोनेको और वृक्षके वकले पहिरनेके निमित्त हैं, फिर थोडासा धनरूपी मदिरापानवाले, जिनकी सब इन्द्रियां घूमती हैं ऐसे दुर्जनोंका निरादर हम क्यों सहें ॥ ५४ ॥

अशीमहि वयं भिक्षामाशावासो वसीमहि ॥
शयीमहि महीपृष्टे कुर्वीमहि किमीश्वरैः ॥ ५५ ॥

---

१ विज० इति पाठान्तरम् । २ शयनमवनिपृष्ठे वल्कले वाससी च इति पाठांतरम् ।

एनमेवार्थं भग्यतरेणाह—अशीमहीती ॥ वय भिक्षान्नमशीमहि भोक्ष्यामः । "अश भोजने" इति धातोर्लिङ् । आत्मनेपदोत्तमपुरुषबहुवचनम् । एव-मुत्तरत्रापि द्रष्टव्यम् । तथा आशा एव वासो वसीमहि आच्छादयिष्याम दिगवरा भविष्याम इत्यर्थः । महीपृष्ठे भूतले शयीमहि स्वप्स्यामः । अत ईश्वरैः राजभिः किं कुर्वीमहि करिष्यामः न किमपीत्यर्थः । शरीरयात्राया अन्यथैव सम्भाव्यमानत्वादिति भाव. । इत्थ स्थितित्वमेव ब्रह्मनिष्ठयतिल-क्षणम् । तदुक्त महाभारते उद्योगपर्वणि धृतराष्ट्र प्रति सनत्सुजातेन । "येन केनचिदाच्छन्नो येन केनचिदाशित. । यत्र क्वचन शायी स्यात्त देवा ब्राह्मण विदु ॥" इति । उक्त च महाभागवते । "चीराणि किं पथि न सन्ति दिशन्ति भिक्षा नो वाङ्घ्रिपा. परभृत सरितोऽप्यशुष्यन् । रुद्धा गुहाः किमु न सति महानुभावा कस्माद्भजति यतयो धनदुर्मदाधान् ॥ " इति । तथा चोक्त शिवगीतायाम् । " सव्रीतो येन केनाश्नन्भक्ष्य वामक्ष्यमेव वा । शयानो यत्र कुत्रापि सर्वात्मा मुच्यतेऽत्र सः ॥ " इति ॥ ५५ ॥

हम भिक्षान्न भोजन करेंगे, दिशारूप वस्त्र पहनेंगे अर्थात् नग्न रहेंगे और पृथ्वीतलपरही सोवेंगे, जब हम इस प्रकार वर्तन करेंगे सो हमारा पृथ्वीश्वरों (राजाओं) से क्या काम है ? ॥ ५५ ॥

न नटा न विटा न गायका[1] नच सभ्येतरवादचुंचवः[2] ॥
नृपमीक्षितुमत्र[3] के वयं स्तनभारानमिता न योषितः[4] ॥५६॥

अथ स्वस्य राजदर्शयोग्यताया प्रकटतापदेशेन त निन्दति—नेति ॥ वय नटा विविधवेषधारिणो विचित्रनाट्यनिपुणा. न भवाम इत्यर्थ । येन नयनानन्दो भवेदिति भाव' । विटा एकविद्या नायकानुकूलनचतुराः न भवाम । येन तत्तन्नायिकानुकूल्यप्रयोजन सिद्ध्येदिति भाव । तदुक्तमलं-कारशास्त्रे । " नायकाना नायिकानुकूलने सहाया पीठमर्दविटचेटाविदूषका-दय " इति । तल्लक्षण च तत्रैव । " किंचिदून पीठमर्द एकविद्यो विटः

1 गायना इति पाठांतरम् । २ परद्रोहनिबद्धबुद्धय इति पाठान्तरम् ।
३ नृपसद्मनि नाम इति पाठातरम् । ४ कुच इति पाठातरम् ।

स्मृतः । सन्धानकुशलश्चेटो हास्यप्रायो विदूषकः ॥ " इति । गायन्तीति गायकाः सङ्गीतकुशलाः ते न भवामः । येन श्रवणानन्दो भवेदिति भावः । सभायां साधवः सभ्याः । " तत्र साधुः " इति यत्प्रत्ययः । तेभ्य इतरे ये वा । अशिष्टगर्ह्यालापाः साधारणजनमनोविनोदमात्रपर्यवसायिनो न तु शास्त्रसंवादिन इत्यर्थः । यद्वा सभ्या विद्वांसस्तदितरे साधारणजनास्तेषां वादास्तद्वदनयोग्यवाक्यानि तैर्वित्ताश्चुञ्चवो हास्यकारिण इत्यर्थः । न भवामः । येन मनोविनोदो भवतीति भावः । "तेन वित्तश्चुञ्चुप्चणपौ " इति चुञ्चुप्प्रत्ययः । तथा स्तनभारैः कुचकुम्भभारैरानमिता ईषन्नम्राङ्ग्यः योषितोऽपि न भवामः । येन सरभसम्भोगौत्सुक्य भवेदिति भावः । अतो नृप राजानमीक्षितु द्रष्टुमत्र नटादिषु च वय के न केचिदित्यर्थः । एतेषामन्यतरत्वे योग्यता स्यादिति भावः । एतेन असभ्यानामेवावकाशप्रदो न तु सभ्यानामिति नृपस्य निंदा गम्यते । नृप वीक्षितुमिति पाठस्तदा हे नृपेत्यामत्रण त्वामिति शेषः । अन्यदुक्तार्थं वैतालीयाख्यमर्धसमवृत्तम् । " षड विषमेऽष्टौ समे कलाः षट् च समे स्युर्नो निरन्तराः । न समात्र पराश्रिताः कला वैतालीयेऽते रलौ गुरु' ॥ " इति लक्षणात् ॥ ९६ ॥

न तो हम नट हैं, न परस्त्रियोंसे लम्पट हैं, न गवैये हैं, न झूठे कथार हैं और न बडे २ स्तनवाली स्त्री हैं फिर हमको राजाका दर्शन किस तरहसे होगा ? ॥ ९६ ॥

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा ।
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ॥
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते ।
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥९७॥

निंदामेव चतुर्भिः प्रपञ्चयति—विपुलेति ॥ पुरा पूर्वकाले विपुलहृदयैर्महामानसैरुदारबुद्धिभिरित्यर्थः । ईशैर्हरिश्चन्द्रादिसार्वभौमैः एतत्परिदृश्यमान जगन्मण्डल जनितमुत्पादित ममप्रथमाचरणे सम्पादितमित्यर्थः । तथा परैर्गया-

१ धन्ये कश्चित्र० इति पाठान्तरम् ।

तिप्रभृतिभिरीश्वरैर्विधृत विशेषेण धृत सम्यक्परिपालितमित्यर्थः। तथान्यैर्बलिप्रभृतिभिर्विजित्य शत्रुजयेन स्ववशं कृत्वा तृण यथा तृणमिव दत्तमर्थिसात्कृतम्। एतेनैतेषां महौदार्यं सूच्यते। इह हि इदानीमपि अन्ये धीरा धैर्यशालिनश्चतुर्दशभुवनानि भूरादिचतुर्दशविष्टपानि भुञ्जते अनुभवन्ति। तादृक्सामर्थ्यसम्पन्नास्तिष्ठन्तीत्यर्थः। "भुज पालनाभ्यवहारयोः" इति धातोर्लट्। "भुजोऽनवने" इत्यात्मनेपदम्। अतः कतिपयानि च तानि पुराणि च तेषां द्वित्राणां पञ्चषाणां वा पुराणामित्यर्थः। स्वाम्ये आधिपत्ये साति पुंसामेषः परिदृश्यमानो मदो दर्प एव ज्वरः सन्निपातज्वरः बुद्धिभ्रंशहेतुत्वात् कः किमर्थमित्यर्थ। अत पुरातनमहाराजचरितानुस्मरणाल्लज्जितव्यं न तून्मत्तेन भवितव्यमिति भाव॥ ५७॥

कोई महात्मा ऐसे भये जिन्होंने जगत्को उत्पन्न किया, कोई ऐसे भये जिन्होंने धारण किया, कोई ऐसे हुए जिन्होंने इसे जीतकर तुच्छ समझ औरोंको दे दिया और कोई ऐसे हैं कि चौदह भुवनको पालते हैं। अब यहां देखो कि थोडेसे गांवकी ठकुराई पाकर जो अभिमानका ज्वर लोगोंको होता है वह क्या ?॥ ५७॥

अभुक्तायां यस्यां क्षणमपि न जातं नृपशतै-।
र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभृताम्॥
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो।
विषादे कर्त्तव्ये विदधति जडाः प्रत्युत मुदम्॥५८॥

अभुक्तायामिति॥ नृपशतैरनेकभूपालैर्यस्यां भुवि अभुक्तायामननुभूतायां सत्यां क्षण क्षणमात्रमपि जातम्। किंतु क्षणमात्रव्यवधानरहितमेवानुभूयत इत्यर्थः। तस्या भुवो लाभे प्राप्ते क्षितिभृता राज्ञां क इव। इवशब्दो वाक्यालङ्कारे। "इवेतोपदर्थोपमावाक्यालङ्कारेषु" इति गणव्याख्याने। बहुमान उत्कर्षो न कोऽपीत्यर्थः। सर्वसाधारण्यादित्यर्थः। किंतु तस्या

१ यात इति पाठांतरम्। २ क्षितिभुजां इति पाठांतरम्।

-भुवोंऽशस्यापि अंशे भागे च तथा तस्यांशस्य योऽवयव एकदेशस्तस्य लश अत्यल्पकोणेऽपि चेत्यर्थः । पतयः ईश्वरा जडा. मन्दा विषादे स्वल्पतमभूखण्डाधिपतयो वय जाता इति विषादे दुःखे कर्तव्ये सति प्रत्युत वैपरीत्येन मुद सन्तोष विदधति कुर्वंति मोदन्त इत्यर्थः । अहो महानयमेतेषामविवेक इत्यर्थ. । " प्रत्युतेत्युक्तवैपरीत्ये " इति गणव्याख्याने ॥ ५८ ॥

सैकडों राजा इस पृथ्वीको अपनी २ मान चले गये पर उनसे यह भोगी न गई तो इसके लाभ होनेसे राजाओंको क्या अभिमान करना चाहिये, अब तो उसके टुकडेका टुकडा फिर तिसका टुकडा उससेभी न्यून अंश पाके अपनेको भूपाति मानते हैं तो जो बात सोच करनेको योग्य है उसमें मूर्खलोग देखो उलटे आनंदही मानते हैं यह आश्चर्य है ॥ ५८ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं न त्वणुः ।
स्वांशीकृत्य तमेव संगरशतै राज्ञां गणा भुंजते ॥
ते दद्युर्ददतोऽथ वा किमपरं क्षुद्रा दरिद्रा भृशं ।
धिग्धिक् तान्पुरुषाधमान्धनकणान्वांछंति तेभ्योऽपि ये ५९

आस्ता तावत् क्षुद्रनृपवार्ता तदाश्रयापरास्तु ततोऽप्यत्यतक्षुद्रा इत्याह—मृत्पिड इति ॥ जलरेखया समुद्रकारणजलरेखया जलधारया च वलयितो वेष्टितः पुञ्जीकृतश्च योऽय परिदृश्यमान सर्वोऽशेषोऽपि मृत्पिडश्च अणुर्ननु । त तादृशमृत्पिंडमेव सगरशतैर्युद्धशतै स्वांशीकृत्य स्वभागीकृत्य ये राज्ञां गणा भुजते अनुभवन्ति ते राजगणा दद्युर्हि अर्थं नितरयुर्वा । ददातेर्भविष्यति लिङ् । अथवेति पक्षांतर । ददतो वितरतो वा । ददातेर्वर्तमाने शतृप्रत्ययः । " नाभ्यस्ताच्छतुः " इति नुमभावः । ददतेऽथवेति वा पाठ । अपरमन्यद्दत्तकरादिक किमस्ति किमपि नास्त्येवेत्यर्थ । भृशमत्यर्थं क्षुद्रा हीना दरिद्रा दीनाश्च । अनेकनृयुगक्लेशार्जितमृत्पिंडभोक्तृभ्यान् क्षुद्र न तत्राप्यश-

१ [illegible] त्व संगरशतै राज्ञां गणैर्भुज्यते इति पाठान्तरम् ।
२ तद्द्युर्ददतोऽथ वा न किमपि इति पाठान्तरम् ।

भागित्वाद्दरिद्रत्वं चावगतव्यम् । ततस्तेभ्यः क्षुद्रदरिद्रेभ्यो राजगणेभ्यो ये पुरुषाधमा धनकणान् धनलेशान् वाञ्छ्यभिलषति तान् पुरुषाधमान् मानुषापसदान् धिग्धिक् । कूपेराधःप्रसृतजलपानवत्तथाविधक्षुद्रयाच्ञायाः परमनैच्यावहत्वात्तद्याचितारस्ततोऽपि नीचास्ते नराधमाः पौनःपुन्येन निन्द्या इत्यर्थः । " धिङ्निर्भर्त्सननिंदयोः " इत्यमर । " उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ " इति वचनात् पुरुषाधमानिति द्वितीया । वीप्सायां द्विर्भाव । स्वदग्धकुक्षिकुडपूरणैकप्रयोजनाया. पुरुषाधमत्वजनन्या क्षुद्रयाच्ञाया धिक्कारं विधाय स्वतःसिद्धानन्दव्याकुलस्य पुरुषोत्तमत्वजनकस्य यतिभावस्यैव जीवातुमार्गेण विधेयमिति तात्पर्यम् ॥ ५९ ॥

यह भूमि एक मिट्टीका लोंदा पानीकी रेखासे घिरा हुआ है, पहिले आपही यह सम्पूर्ण छोटासा है तिसे राजा सैकडों लडाइया लडलडकर अपना अपना भाग बांटके किसी प्रकारसे भोगते हैं ऐसे क्षुद्र और दरिद्रीको जो बडे दानी कहते हैं, अबभी देखें दान करते हैं या नहीं यों कह कहके उनसे धनके कणिकाकी वाछां करते हैं तिन अधम पुरुषोंको धिक्कार है ॥ ५९ ॥

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं ।
कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ॥
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना ।
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ६० ॥

किं बहुना स एव सफलजन्मेति निगमयति—स इति ॥ स पुमान् कोऽपि कश्चिदेव जातः सफलजन्मासीत् । न सर्व इत्यर्थः । कोऽसावित्यत आह । यस्य पुंस धवलं शुभ्रं कपालं शिरोऽस्थि मदनरिपुणा शम्भुना उच्चैरुन्नते सर्वोपरिवर्तमान इत्यर्थः । मूर्ध्नि निजमस्तके अलङ्कारविधये[१]

[१] विषये इति पाठान्तरम् ।

भूषणविधानाय विनिहित निक्षिप्त स एक एवेति सम्बन्धः । सकलसुरासुर-मौलिखचितमणिप्रभादीपितपादारविंदस्य कैलासमेरुगिरीश्वरस्य भगवतः शंभोः कपालशेखरत्वादिति भावः । किंत्वधुनेदानीं प्राणत्राणे तुच्छ-प्राणसंरक्षणे प्रवणा सक्ता मतिर्येषां तैस्तथोक्तैरत एव नमद्भिर्नमस्कुर्वाणैः कैश्चित् काश्चित् कतिपयैरेव नृभिर्मनुष्यैः । हेतौ तृतीया । अथवा नमद्भिः पुंसा नरवरमन्यानां राज्ञामयं परिदृश्यमानः अतुलो निःसीमो दर्पो मदः स एव ज्वरभरो ज्वरोद्रेकः अपभ्रंशहेतुत्वात् कः किमर्थमित्यर्थः । मरणानन्तरेऽपि यस्य शिरः आदरपूर्वक महदुपादेयं भवति स एव सफलजन्मा पुरुषोत्तमश्च । अन्यः सर्वोऽपि निष्फलजन्मा पुरुषाधमश्चेति भावः ॥ ६० ॥

पहिले तो ऐसे पुरुष हुए हैं कि जिनके उज्ज्वल मस्तककी माला बनाकर तो शिवजीने धारण कर लिया कि जिससे कंठका भूषण हो, अब देखो अपने प्राण पोषण करनेवाले तथा नमस्कार करनेवाले थोडेसे मनुष्योंसे प्रतिष्ठा पाकर अपनेको नरवर माननेवाले राजा क्यों अभिमानके ज्वरसे भारी हो रहे हैं ॥ ६० ॥

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा ।
प्रसादं किं नेतुं विशसि हृदय क्लेशकलितम् ॥
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगणो ।
विविक्तः संकल्पः किमभिलषितं पुष्यति न ते॥ ६१॥

अथ मनोनियमनदक्षस्यैव यतित्वात्तत्प्रसङ्गानन्तरं मनःसंबोधनपूर्वकं तन्नि-यमनप्रकारमाह—परेषामिति ॥ हे हृदय, प्रतिदिवसमनुदिनं बहुधा बहुप्रकारैः । "संख्याया विधार्थे धा" इति धाप्रत्ययः । परेषां चेतांसि आराध्य प्रसाद्य तत्कालोचितानुवर्तनैरनुमुखीकृत्येत्यर्थः । क्लेशेनातिप्रयासेन कलितं सम्पा-दितं प्रसादमनुग्रहं नेतुं प्रापयितुं मनासीत्यर्थः । नयतेर्द्विकर्मकात्तुमुन्प्रत्ययः । विशसि किं प्रवर्तसे किमित्यर्थः । अथ यथाकथंचित्परचित्तप्रसादनेनाभिल-

1 हा इति पाठान्तरम् । 2 निमुक्त इति पाठान्तरम् ।

षित साधयिष्यामि अतः किमर्थमेव निषिध्यत इत्यत आह। प्रसन्न इति। त्वयि अन्तरभ्यन्तरे प्रसन्ने समाहिते सति बहिर्मुखत्ववैमुख्येन स्वस्थान एव स्थिते सतीत्यर्थः। स्वय स्वप्रयत्न विनैवेत्यर्थः। उदित आविर्भूताश्चिंतामाणिगणः चिंतारत्ननिचयरूप इत्यर्थः। एवमेव चिंतामणिरशेषाभिलषितदानसमर्थस्तद्ग- णश्च किं वक्तव्यमिति भावः। विविक्तो निष्कलंकः सकल्प इच्छाविशेषः। ते तवाभिलपित वांछित न पुष्यति किं न पूरयति किम्। पूरयत्येवेत्यर्थः। अथवा किं वाभिलषित न पुष्यति सर्वमपि पुष्यत्येवेत्यर्थः। अतः आत्म- प्रसक्त्यैवाभिलाषितप्राप्तौ किमन्यप्रसादनायासेनेत्यर्थ। अन्यथा सत्यक्षेत्र विहायारण्यकर्षणन्यायः प्रसज्येतेति तात्पर्यम् ॥ ६१ ॥

हे मन! तू पराये चित्तमें प्रसन्न करनेको किस प्रसादके लेनेके हेतुसे क्लेशसे मलीन होता हुआ घुसता है? तू सर्व संकल्प अर्थात् तृष्णा छोडकर अपनेहीमे प्रसन्न होकर चिन्तामणि कैसी गुण प्रकट करेगा अर्थात् शांति संतोषादि गुण ग्रहण करेगा तो क्या तेरी अभिलाषा पूरी न होगी? ॥ ६१ ॥

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां।
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ॥
अतीतमननुस्मरन्नपि च भाव्यसंकल्पय-।
न्नतर्कितसमागमाननुभवामि भोगानहम् ॥ ६२ ॥

एव मनःप्रसादे गुणमुक्त्वा तस्यागुणत्वमाह—परिभ्रमसीति॥ हे चित्त, मुधा व्यर्थं किं किमर्थं परिभ्रमसि सञ्चरसि न परिचारितव्यमित्यर्थः। प्रयोजनाभावादिति भावः। तर्हि किं कर्तव्यमत आह। क्वचन कुत्रचित् स्थले विश्राम्यता स्थीयता स्वस्थाने एव स्वैर वर्ततामित्यर्थ। नन्वेव चेत्कथ कार्य- सिद्धिरित्यत आह। यत्कार्यं यथा येन प्रकारेण भवति तत्तथा स्वयमप्रयत्ने- नैव भवति अन्यथा वैपरीत्येन न भवति। "यद्भावि तद्भवत्येव" इत्यादि वचनात्सर्वमेतद्दैवायत्तमिति भावः। अतो विश्राम्यतामिति सबध.। विश्रमे किं फलमित्यत आह। अहमतीतमतिक्रातमर्थमननुस्मरन्नचिंतयन्ननुशोचय-

नित्यर्थः । तथा भावि चापि भविष्यदर्थमपि च । वस्तुसामस्त्ये नपुंसकत्व-निर्देशः । असंकल्पयन्ननाकाङ्क्षन् अतर्कितोऽनभ्यूहितः समागमो येषां तान-चिंतितोपनतानित्यर्थः । भोगान् विषयाननुभवामि दैववशात्संभावितार्थान् भोक्ष्यामि । वर्तमानप्रत्ययः । यद्वा अनुभवामि भुञ्जे । अतो मदर्थं न परि-भ्रमितव्यमिति भावः । एवं चेत्परमेश्वरस्याप्यवश्यं प्रियो भवेयमिति तात्प-र्यम् । तदुक्तं भगवता । " यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति । शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥" अन्यत्राप्युक्तम् । "गता-र्थान्नानुशोचन्ति नार्थयन्ते मनोरथान् । वर्तमानेन वर्तन्ते तेन मे पाण्डवाः प्रियाः ॥ " इति ॥ ६२ ॥

हे मन ! तू क्यों जहां तहां तहां घूमता है ? कहीं विश्राम ले ले ।-जो होनेवाला है सोही होगा; अन्यथा कभी नहीं होगा और मैं न व्यतीत हुएका स्मरण करता हूं न होनेवालेका संकल्प करता हूं किंतु अतर्कित प्राप्त हुए भोगोंको भोगता हूं ॥ ६२ ॥

एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रय ।
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ॥
स्वात्मीभावमुपैहि संत्यज निजां कल्लोललोलां गतिं ।
मा भूयो भज भंगुरां भवरतिं चेतः प्रसीदाधुना ६३ ॥

अथ विशिष्य मनोबोधनप्रकारमेवाह—एतस्मादिति ॥ हे चेतः, एतस्मा-त्परिदृश्यमानात् आयासयतीत्यायासकात् दुःखजनकात् । इन्द्रियार्था. शब्दा-दिविषया एव गहनमरण्यं तस्मात् दुर्विगाहत्वादेतद्रूपेण विरम निराम प्राप्नुहि । अत्यंतदुःखविषयासक्तिं मा कुर्वित्यर्थः । " जुगुप्साविराम० " इत्यादिना पञ्चमी । " व्याङ्परिभ्यो रमः " इति परस्मैपदम् । किंतु क्षणात् क्षणमात्रेणैव अशेषदुःखशमनमेकान्तिकानिमित्ताद्दुःखादिव्यमनमेव व्यापा-रस्तत्र दक्षं समर्थं श्रेयोमार्गं ज्ञानमार्गमाश्रय अनुसर तत्र प्रवर्तस्वेत्यर्थः ।

---

१ स्वात्म मा० इति पाठान्तरम् ।

तथा स्वात्मीभाव स्वरूपानुसधानतत्परत्वमुपेहि प्राप्नुहि । तथा निजा स्वकीयाम् । "चचल हि मनः कृष्ण" इत्यादौ प्रसिद्धामित्यर्थः । कल्लोलवल्लोलामतिचपलां गतिं व्यापार सत्यज सम्यग्विसृज्य सुस्थिर भवेत्यर्थः । भूयः पुनरपि भगुरां भगशीलामशाश्वता भवरतिं ससारासक्तिं मा भज न सेवस्व । किंत्वधुनेदानीं प्रसीद प्रसन्न भव । चित्तप्रसादमतरा पुण्यशतैरपि श्रेय प्राप्त्यसभवादिति भाव॰ ॥ ६३ ॥

हे चित्त ! बडे परिश्रमसे प्राप्त हुए और दुःखदाई आश्रयवाले इन्द्रियोंके विषयरूपी वनसे विश्राम ले, सकल दुःखध्वंस करनेके व्यापारमें समर्थ कल्याणमार्गको शीघ्र प्राप्त हो, शांतभाव ग्रहण कर, तरंगसी अपनी चंचल गति छोड दे, इस नाशवान् संसारी इच्छाको फिर सेवन मत कर, अब तु आपही प्रसन्नरूप हो ॥६३॥

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ ।
चेतः स्वर्गतरंगिणीतटभुवामासङ्गमङ्गीकुरु ॥
को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु[1] च ।
ज्वालाग्रेषु च पन्नगेषु च सुहृद्वर्गेषु[2] च प्रत्ययः ॥६४॥

अथ विश्वसनीयेष्वेव विश्वास कुरु नान्यत्रेत्याह—मोहमिति ॥ हे चेतः, मोह पुत्रमित्राद्यासक्तिजनकाज्ञान मार्जय शोधय त्यजेति यावत् । तत्र विश्वास मा कुर्वित्यर्थः । किंतु चन्द्रार्ध चूडामणिर्यस्य तस्मिन् चद्रशेखरे शभौ तां तथाभूतामनिर्वाच्यामित्यर्थ. । रतिमनुरक्तिमुपार्जय सपादय । तथा स्वर्गतगगिण्या मदाकिन्या यास्तटभुवस्तीरप्रदेशास्तासामासग तत्र निवासासक्तिमगीकुरु अनुमन्यस्व । उभयत्रैव विश्वास कुर्वित्यर्थ । एतस्यैव श्रेयस्करत्वादिति भावः । कुत एतदित्याशक्यान्यत्राविश्वासोत्पादनार्थमस्वरसमुद्भावयति । वीचिषु वारितरगेषु च, बुद्बुदेषु जलस्फोटेषु च, तडितो लेखा इव तासु विद्युल्लतासु च, श्रीषु सपत्सु च । तडिल्लेखामतल्लीषु चेति

1 स्त्रीषु च इति पाठान्तरम् । 2 सर्पेन्द्रेगेषु इति पाठांतरम् ।

गठे प्रशस्तास्तडिल्लेखास्तडिल्लेखामतल्लयस्तासु च । “ प्रशंसावचनैश्च ” इति नित्यसमासः । “ मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । ” इत्यमरः । ज्वालाग्रेष्वग्निशिखामुखेषु च, पन्नगेषु सर्पेषु च, सुहृद्वर्गेषु बन्धुजनसमुदायेषु च को वा प्रत्ययः । उत्तरोत्तर तारतम्येन नश्वरतया प्रत्यक्षसिद्धेषु विचित्रसस्थितिषु चतुर्षु, गृहदीप इति चुम्बनकरणे श्मश्रुदाह इति लोकन्यायेन प्रत्यक्षेण च दाहहेतुतया प्रसिद्धेषु ज्वालाग्रेषु च, स्पृष्टतया प्राणहतेषु पन्नगेषु च विपत्सु परित्यागशीलेषु बन्धुजनेषु च को वा विश्वास न कोऽपीत्यर्थः । उत्तरोत्तरमविश्वसनीयत्वादिति भावः । “ प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु । ” इत्यमरः । अत्र प्रस्तुताना स्वबन्धुजनानामप्रस्तुताना वीचिप्रभृतीना च यथाकथचिदौपम्यस्य गम्यत्वाद्दीपकालङ्कारभेदः । तदुक्त विद्यानाथेन । “ प्रस्तुताप्रस्तुताना च सामस्ये तुल्यधर्मतः । औपम्य गम्यते यत्र दीपक तन्निगद्यते ॥ ” इति ॥ ६४ ॥

हे चित्त ! मोहको छोड, जिनके शिरमें अर्द्धचंद्र विराजमान है उन शिवजीसे प्रीति कर और गंगातटके वृक्षोंके नीचे विश्राम ले, देखो, तरंग, पानीके बुलबुले, विजुलीकी चमक, श्री, अग्निकी ज्वालाकी शिखा, सर्प और सुहृद्वर्गमें स्थिर रहनेका क्या विश्वास है अर्थात् इन सबके विलासमें तू मत भूल ॥ ६४ ॥

चेतश्चिंतय मा रमां सकृदिमामस्थायिनीमास्थया ।
भूपालभ्रुकुटीकुटीविहरणव्यापारपण्यांगनाम् ॥
कंथाकंचुकिनः प्रविश्य भवनद्वाराणि वाराणसी- ।
रथ्यापंक्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥६५॥

अथ प्रकारान्तरेण सम्बोधयति—चेत इति ॥ हे चेतः, अस्थायिनीम- स्थिरा इमां भूपालानां राज्ञां भ्रुकुटी भ्रमङ्ग एव कुटी कुटीरं तत्र विहरण विहारो यस्य तथोक्तो यो व्यापारस्तेन पण्याङ्गनां वणिग्विलासिनीं वारस्त्री । सुन्दरीणां त्वरितगतिलीलामित्यर्थः । तदायत्तस्थानस्था इति भावः । एतां

भूपालभ्रुकुटीकुटीरे विहरणमेव व्यापारो यस्याः सा तथोक्ता सा च पण्यांगना वारविलासिनी ता तथाभूता तदधीनत्वात्तत्प्रयुक्तप्रवृत्तिनिवृत्तिकामित्यर्थः। अत्र पाण्यांगनारूपेण विहारे विशृंखलत्वद्योतनार्थं नैयत्येन व्यभिचरणशीलत्वप्रकटनार्थं च। यथा वारवनिता कुत्रचित्कंचित्कालं विहृत्यानन्तरमन्यत्र गच्छति तद्वदिति ध्वनिः। इह कानिचिदर्थांतराणि स्फुरन्ति बुद्धिमद्भिरूह्यानि ग्रन्थगौरवभयान्न लिख्यन्ते। तामिमा परिदृश्यमाना रमा सम्पत्तिमास्थयादरेण नक्तस्कदाचिदपि मा चिंतय मा कांक्षय तत्सप्रार्थनप्रयत्नं मा कुर्वित्यर्थः। तर्हि कथं जीविकेत्याशंकायामाह। कन्थैव कंचुकमेषामस्तीति कथाकंचुकिनः कन्थावर्मितगात्रा सन्तः। अत्र यद्यपि बहुव्रीहिणैव विवक्षितार्थलाभात्पुनः प्रत्ययांतरग्रहणे प्रक्रियागौरवं न कर्मधारयान्मत्वर्थीय इति निषेधात् तथापि " त्वगुत्तरासङ्गवतीम्। कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने। " इत्यादिमहाकविप्रयोगश्च वर्तते इति वैयाकरणाः कथयन्ति। यद्वा कन्थया कंचुकिनः कंचुकवन्तः कथाच्छादितगात्रा सन्त इत्यर्थः। वयमिति शेषः। वाराणस्या काशीपट्टनस्य। " काशी वाराणस्यवन्ती " इत्यमरः। रथ्यापंक्तिषु राजमार्गश्रेणिषु। " रथ्या प्रतोली विशिखा " इत्यमरः। भवनद्वाराणि गृहप्रातिहारप्रदेशान् प्रविश्य पाणिरेव पात्रं तत्र पतितां निक्षिप्ताम्। एतेन याच्ञापूर्वकत्वं सूच्यते। भिक्षामपेक्षामहे स्पृहयामहे। " पाणिपात्र उदरमात्रपात्रे पतितमश्नीयात् " इत्यादिश्रुतेः। अनायाससिद्धभिक्षाहारेण शरीरयात्रां निर्वर्तयन्तः पुण्यक्षेत्रेषु सुखेन निवसिष्याम इत्यर्थः। तदुक्तम्। " भिक्षाहारो निराहारो भिक्षान्नेन प्रतिग्रहः। असतो वा सतो वापि सोमपानं दिने दिने॥ " इति॥ ६९॥

हे मन! राजाओंकी भ्रुकुटीरूप कुटीमें विहार करनेवाली मानो पण्यांगनाही ऐसी इस चंचल लक्ष्मीकी आकांक्षा तू आदरपूर्वक कभी मत कर, क्योंकि अब हम कंथारूप कंचुकोंको पहिनके काशीनगरीकी वीथियोंमें घूमते २ वहांके गृहद्वारोंमें प्रवेश कर वहां हस्तरूप पात्रमें गिरी भिक्षाकी ही इच्छा करते हैं॥ ६९॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः ।
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ॥
यद्यस्त्येवं कुरु भवरसास्वादने लंपटत्वं ।
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥६६॥

अथ तव यदि सर्वदा संसाररसानुभवेऽभिनिवेशस्तावदित्थंभूतसामग्र्यां तत्राभिरतिं कुरु अन्यथा ध्याननिष्ठो भवेत्याह—अग्र इति ॥ अत्र गीतशब्देन गायकजनो लक्ष्यते । तथा च हे चेत इत्याव्याहार । अग्रे पुरस्ताद्गीत वीणावादनप्रवीणगायकसमुदायश्च । तथा पार्श्वयोरपीत्यर्थः । दाक्षिणात्या दक्षिणदेशोद्भवास्तेषामेव विचित्रप्रबन्धनिर्माणकौशलसंभवादिति भाव । "दक्षिणापश्चात्पुरसस्त्यक्" इति त्यक्प्रत्यय । सरसा रसोल्लसितशब्दार्थसंघटनाचतुरा ये कवयः कथयितारस्ते च । तथा पश्चात् पृष्ठभागे चामराणि प्रकीर्णकानि गृह्णन्तीति चामरग्राहिण्यस्तासां वालव्यजनवीजनतत्पराणां रमणीनाम् । "चामरं तु प्रकीर्णकम्" इत्यमरः । लीलया वीजनवैचित्र्यविलासेन यद्वलयरणितं मणिकङ्कणझणत्कारस्तच्चेत्येतत्सर्वम् । "नपुंसकमनपुंसकेन" इत्यादिना नपुंसकैकशेष । एवमुक्तप्रकारेणास्ति यदि वर्तते चेत्तर्हि भवे संसारे यो रसस्तस्यास्वादने अनुभवे लंपटत्वं लोलुपत्वं कुरु तदासक्तं भवेत्यर्थः । "लोलुपो लोलुभो लोलो लालसो लम्पटश्च स ।" इति यादवः । नो चेदेवं नास्ति चेत् सहसा अविलम्बेनैव । "स्वरादिपाठादव्ययम्" इति शाकटायन । निर्विकल्पे निरानन्दे समाधौ ध्याने प्रविश ब्रह्मध्याननिष्ठो भवेत्यर्थ. । किमन्यथाभयभ्रंशहेतुना वृथा दैन्यनेति भावः ॥६६॥

सन्मुख प्रवीण गवैये गाते हों, दाहिने बायें दक्षिण देशके सरस कविलोग काव्य सुनाते हों और पीछे चँवर डोलानेवाली सुंदर स्त्रियोंके कंकणकी मधुर झनकार होती हो जो ऐसी सामग्री तुझे प्राप्त हो तो संसारके रसका स्वाद लेनेमें लिपट नहीं तो हे चित्त ! स्थिर समाधिमें प्रवेश कर ॥ ६६ ॥

१ पार्श्वे इति पाठान्तरम् । २ पु० लीलावलयरणितं [illegible]

प्राप्ताः श्रियः सकलकामदुघास्ततः किं।
[1]न्यस्तं पदं शिरसि विद्विषतां ततः किम् ॥
[2]सम्पादिताः प्रणयिनो विभवैस्ततः किं।
[3]कल्पस्थितास्तनुभृतां [4]तनवस्ततः किम् ॥ ६७॥

अथ विचार्यमाणे सम्पत्तिलाभशत्रुजयादीनामप्यकिंचित्करत्वमेवेत्याह—प्राप्ता इति ॥ हे चेतस्तनुभृता शरीरिणा सकलकामान् दुहन्तीति सकलकामदुघा अशेषमनोरथपरिपूरका इत्यर्थः। श्रियः प्राप्तास्ततः किम्। तथा विद्विषताममित्राणाम्। "द्विषोऽमित्रे" इति शतृप्रत्ययः। शिरसि पदं न्यस्तं निक्षिप्तं पराक्रमातिशयेन सर्वे शत्रवः पादाक्रान्तीकृता इत्यर्थः। ततः किम्। विभवैर्धनैः प्रणयिनः सुहृदः सम्पादिता संगृहीता वशवदीकृता इत्यर्थः। समानिता इति पाठे बहुमानितास्ततः किम्। तथा कल्पस्थिताः कल्पान्तरस्थायिन्य इत्यर्थः। तनवः शरीराणि सम्पादिता इति सम्बन्धः। केनचिद्योगेन संगृहीतास्ततः किम्। तेषां श्रेयःसाधनत्वनिषेधादिति भावः। एतदादिश्लोकचतुष्टयं वसन्ततिलकावृत्तम् ॥ ६७ ॥

इन नश्वर शरीरधारियोंने सब कामनाओंकी दुहनेवाली लक्ष्मी पाई तो क्या, शत्रुओंके शिरपर पग दिया तो क्या, धनसे मित्रोंको प्राप्त किया तो क्या, फिर इन देहधारियोंके देह कल्पभर रहे तोभी क्या अर्थात् परलोक न बनाया तो कुछ न किया॥ ६७॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं।
स्नेहो न बन्धुषु न मन्मथजा विकाराः॥
संसर्गदोषरहिता विजना वनान्ता।
वैराग्यमस्ति किमतः [5]परमर्थनीयम् ॥ ६८ ॥

---

१ दत्तं इति पाठान्तरम्। २ समानिताः इति पाठान्तरम्। ३ कल्प स्थित त० इति पाठान्तरम्। ४ तनुभिस्त० इति पाठान्तरम्। ५ परमार्थनीयम् इति पाठान्तरम्।

नन्वेव श्रेयःसाधनत्वेन व्यवहृतानामेतेषां निषेधे किमन्यच्छ्रेयःसाधनमित्यत आह भक्तिरिति ॥ हे चेत, भवे शम्भौ भक्तिर्भजनानुराग कार्य इति शेषः । किंच मरणजन्मभ्यां महोपद्रवकारिभ्यां निधनोत्पत्तिभ्यां भयं हृदि तिष्ठतीति हृदिस्थं कर्तव्यमिति शेषः । न तु विस्मर्तव्यमिति भावः । बंधुषु । पुत्रमित्रकलत्रादिषु विषये स्नेहोऽनुरागो न कार्यः । तथा मन्मथाज्जायन्त इति तथोक्ता विकाराः स्त्रीपरतन्त्रत्वादयो न कार्याः । श्रेयोऽन्तरायत्वादिति भावः । इत्थं श्रेयःसाधनत्वेन कर्तव्यद्वयं तदसाधनत्वेनाकर्तव्यद्वयं चोपदिश्येदानीं पुनर्मुख्यं कर्तव्यांतरमुपदिशति । संसर्गदोषैः रहिताः कामक्रोधादिप्रसङ्गवर्जिता इत्यर्थः । "संगात्संजायते कामः" इत्यादिभगवद्वचनेन संगजनितकामादिदोषपरम्पराया अनर्थहेतुत्वादिति भावः । कुतः विजनाः विविक्ताः वनान्ता वनप्रदेशाः सेव्या इति शेषः । तत्र किमस्तीत्याशंकायामाह । वैराग्यमस्ति सम्भवतीत्यर्थः । अतो वैराग्यात्परमन्यदितिकमर्थनीयमभिलषणीयं न किमपीत्यर्थः । तस्यैव परमश्रेयःसाधनत्वादिति भाव ॥ ६८ ॥

सदाशिवकी भक्ति हो, जन्म मरणका भय हृदयमें न हो, बन्धुवर्गमे स्नेह न हो, कामदेवका विकार मनसे दूर हो, संसर्गदोषसे छूटे निर्जन वनमें बैठे हों इससे अधिक और क्या वैराग्य है जो ईश्वरसे मागने योग्य है अर्थात् यही वैराग्य है ॥ ६८ ॥

तस्मादनन्तमजरं परमं विकासि ।
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ॥
यस्यानुषंगिण इमे भुवनाधिपत्य- ।
भोगादयः कृपणलोकमता भवन्ति ॥ ६९ ॥

अथ ब्रह्मविचारनिरतस्य ते भवाऽपि भुवनाधिपत्यादयस्तुच्छा इव प्रतिभान्तीत्युपसंहरति—तस्मादिति ॥ तस्मात् यस्माद्वैराग्यमेवापेक्षितं तस्मादित्यर्थः । हे चेतः, अनन्तमपरिच्छिन्नं त्रिविधपरिच्छेदशून्यम् । तथा अजरं जरामरणादिरहितम् एव परमं सर्वोत्कृष्टम् । [illegible] विकासि [illegible]

त्यर्थ. । यद्वा विकासि भास्वर तद्ब्रह्म चिंतय विचारय । एभिः क्रियमाणे-रसद्विकल्पैरसद्भिरसाधुभिरनिस्थैर्यो विकल्पैस्तत्तद्भोगप्राप्त्यप्राप्तिगोचरविचारैः किं विकल्पसाध्य नास्तीत्यर्थः । " गम्यमानसाधनक्रियापेक्षया करणत्वात्तृ-तीया न केवल श्रूयमाणैव क्रिया निमित्त कारकभावस्य अपि तु गम्यमा-नापि " इति वचनात् । यत्तदोर्नित्यसवधात्तच्छब्दस्य यच्छब्दाकाक्षामाह । यस्य ब्रह्मणः अनुषगिन· सवधवत यद्ब्रह्मविचार इत्यर्थः । तवेति शेषः । इमे काम्यमाना भुवनाधिपत्य लोकाधिपत्य भोग· स्वर्गादिसत्यातलोकसमुदा-यस्थरतावादी येषां ते तदादयो भोगाः कृपणलोकानां ब्रह्मविचारहीनजनानां मता इष्टा योग्या इति यावत् । भवति प्रतिभाति तेषामेव योग्यास्ते न मादृशानामिति प्रतीयत इत्यर्थः । भुवनाधिपत्यादीनामेव प्रतीयमानत्वं किमुतान्येषामिति भाव. । तदानीं तव तृणीकृतब्रह्मपुरदरत्वात्सर्वेऽपि तुच्छा एव प्रतिभातीति परमार्थः । यद्वा ननु सर्वथा भोगजातमेव ममाभिलषित नान्यादीति यदि मन्यसे तदा इत्थभूतस्य तव सर्वे भुवनाधिपत्यादिभोगा अनुसगास्त्वयमेव समवतीति समाधानमभिप्रेत्याह । हे चेतः, तत् सकलवे-दांतप्रसिद्धम् । यद्वा तच्छब्दलक्ष्यार्थभूतमित्यर्थ. । तत्त्वमसीति महावाक्ये तथा व्याख्यानादिति भावः । ब्रह्म चिंतय । चिंतनफलमाह । यस्य ब्रह्म-चिंतनतत्परस्य ते कृपणलोकमता इमे भुवनाधिपत्यभोगादयः अनुषगिणः भवति । अनुषगास्त्वयमेव समवतीत्यर्थः । ब्रह्मध्याननिष्ठसाम्राज्यलक्ष्मीपतेः किं ते दुर्लभमिति भावः । शेष समानम् । यद्वा यस्य ब्रह्मचिंतनस्येमे भुव-नाधिपत्यादयः अनुषगिणः अनुबधिनः भवति । तथा च सति ब्रह्मचिंतने तदनुबधवशात्सर्वेऽपि स्वयमेव समवतीति भाव· । अत्र " शिखा ते वर्तते नून गुह्ची पिब शावक । " इति शास्त्रवचनमनुसृत्य तात्पर्यांतरेणैव समा-हितमित्यनुसन्धेयम् । कृपणलोकमता इत्यत्र यद्यपि " मतिबुद्धि० " इत्यादिना वर्तमानार्थे क्तप्रत्यये " क्तस्य च वर्तमाने " इति षष्ठीसमासनि-षेधः तथापि निरकुशाः कवय इत्यलम् ॥ ६९ ॥

जिस ब्रह्मका लेशमात्र आनन्द पानेवालोंके निकट त्रिभुवनके राजाओंका भोग विलास मूर्खोंके योग्य ठहरता है अत एव उसी

अनन्त अजर और सर्वोत्तम शोकरहित ब्रह्मका चिंतवन करो इन विकल्पोंसे क्या फल है अर्थात् देहादि अहंभाव त्यागके ब्रह्मकी चिंता करो ॥ ६९ ॥

पातालमाविशसि यासि नभो विलंघ्य ।
दिङ्मण्डलं भ्रमसि मानस चापलेन ॥
भ्रान्त्यापि जातु विमलं कथमात्मनीनं ।
न ब्रह्म संस्मरसि निर्वृतिमेषि येन ॥ ७० ॥

एवमेवार्थं पुनः प्रकारांतरेणोपदिशन्निगमयति—पातालमिति ॥ हे मानस, चापलेन तत्तद्विषयासक्तिजनितचापल्येन । युवादित्वादण् । हेतौ तृतीया । पातालमाविशासि अत्यताधःप्रदेशमपि गच्छसीत्यर्थः । तथा नभोऽतरिक्षं विलध्य यासि अत्यूर्ध्वप्रदेशमपि गच्छसीत्यर्थः। तथा दिङ्मण्डल दिक्चक्रवाल भ्रमसि अतिदूरदेशमपि धावसीत्यर्थ. । सर्वत्रापि मनोगतेर्निरर्गलत्वादिति भाव. । किंतु भ्रांत्या भ्रमवशेनापि मास्तु । विवेकेनेत्यपिशब्दार्थ । तथापि जातु कदाचिदपि विमल निर्मलमविद्याकार्यसम्बन्धशून्यमित्यर्थ । सर्वत्रापि मनोगतेर्निरर्गलत्वादिति भाव । किंतु आत्ममहितमात्मनीन सुखस्वरूपत्वात् । "आत्मन्विश्वजनभोगोत्तरपदात्खः" इति खप्रत्ययः । आत्मलीनामिति पाठे आत्मन्यन्तर्गतमानि लीन निलीय स्थित सर्वान्तर्यामित्यर्थ । ब्रह्म कथ न सस्मरसि न ध्यायसि सर्वदा स्मर्तव्यमित्यर्थः । कुतः येन सस्मरणेन निर्वृतिमानन्दमेपि प्राप्नोषि । अत यथाकथचित्स्मरणेऽप्यानन्दजनकत्वादवश्य स्मर्तव्यमेव । "हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावक ॥" इत्यादिवचनादिति भाव· ॥ ७० ॥

हे चित्त ! तू अपनी चंचलतासे पातालमें प्रवेश करता है, आकाश उलंघकर ऊपर जाता है और सब दिशाओंमें भ्रमण करता है पर भूलेभी कदाचित् अपने हृदयमें स्थित विमल ब्रह्मका स्मरण नहीं करता है कि जिसके स्मरणसे परमानन्दको प्राप्त होगा ॥ ७० ॥

१ आत्मलीनं इति पाठान्तरम् ।

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः ।
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ॥
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं ।
स्वात्मानन्दपदप्रवेशकलनं शेषा वणिग्वृत्तयः ॥७१॥

अथ वेदाध्ययनस्मृतिपर्यालोचनशास्त्रपठनपुराणश्रवणादिभिर्न कोऽपि लाभः किंतु विचारात् श्रवणमनननिदिध्यासनादिभिरात्मानुभव एव लाभ इति मत्वा जनानुद्दिश्य बोधयति किं वेदैरिति श्लोकेन—किमिति ॥ वेदैः ऋग्यजुःसामाथर्वणसञ्ज्ञिकैश्चतुर्भिर्वेदैः किं प्रयोजन न किमपि प्रयोजनमित्यर्थ । स्मृतिभि मन्वाद्यष्टादशस्मृतिभिरुपस्मृतिभिश्च किं प्रयोजन न किमपीत्यर्थ । पुराणपठनै ब्रह्मांडपुराणाद्यष्टादशपुराणोपपुराणपठनैश्च न किमपीत्यर्थः । महाविस्तरैरतिविस्तृतैः शास्त्रैस्तर्कव्याकरणादिषड्दर्शनैर्न किमपीत्यर्थ. । स्वर्गे सर्वपुण्यकृन्निवासे नाकलोके च ग्रामेषु ब्राह्मणप्रधानवर्णानां निवासेषु कुटीषु पर्णगृहेषु यो निवासस्तेन फलदै. फलप्रदः कर्मणां स्नानसन्ध्यावन्दनोपासनयज्ञादीना क्रियाभिर्व्यापारैर्विभ्रमैश्च न किमपि प्रयोजनमित्यर्थः । भवात् जननमरणरूपससारात् यद्दु.ख दारिद्र्यभार्यापुत्रादिनाशस्तस्य भार असह्यातिशयस्तस्य रचना कलना तस्याः विध्वसो नाशस्तस्य कालानल प्रलयाग्निरूपम् । स्वस्य आत्मानद. आत्मसुखानुभवस्तस्य पदं स्थान तस्मिन् प्रवेशस्तस्य कलनमेकम् । " एके मुख्यान्यकेवलाः " इत्यमर. । मुक्त्वा विहाय शेषा उक्तेभ्य अन्या वणिग्वृत्तयः । वर्तकव्यापारा जना इत्यर्थः । आत्मज्ञान विना उक्ताना वेदादीनामध्ययनादिभिरपि फलं नास्तीत्युक्तत्वात् सर्वेषा वेदांतवाक्याना अद्वैते ब्रह्मणि तात्पर्यमित्युक्तरीत्या ब्रह्मज्ञानमेव सम्पादनीय न त्वितरादित्याशय· । शेषैर्वणिग्वृत्तिभिरिति पाठे वर्तकव्यापारसदृशै शेषैरुक्तान्यै न किमपि प्रयोजनमित्याशय· ॥ ७१ ॥

श्रुति, स्मृति, पुराण और वडे विस्तारपूर्वक शास्त्रोंके पढनेसे क्या फल है और जिसका फल स्वर्गरूपी ग्राममें कुटी बनाके रह-

१ भवबन्धदुःखर० इति पाठांतरम् । २ शेषैर्वणिग्वृत्तिभिः इति पाठांतरम् ।

नाही है ऐसे कर्मकांडकी कर्त्तव्यताके विभ्रमसे क्या है, संसारबंधनके दुःखरचनाके विध्वंस करनेके हेतु प्रलयाग्निकी सदृश ब्रह्मानंदपदमें एक प्रवेशके उद्योगके विना और सब शेष वणिज (वैश्यों) का व्यापार है ॥ ७१ ॥

यतो मेरुः श्रीमान्निपतति युगान्ताग्निवलितः ।
समुद्राः शुष्यंति प्रचुरमकरग्राहनिलयाः ॥
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता ।
शरीरे का वार्त्ता करिकलभकर्णाग्रचपले ॥७२ ॥

अथातिरिक्तस्यानित्यत्वमेव प्रपचयति—यत इति ॥ यतो यस्मात्कारणात् श्रीमान् मणिहिरण्यादिसकलवस्तुसमृद्धिमान् मेरुः मेरुगिरिरपि युगान्ताग्निना प्रलयकालानलेन वलितः सवेष्टित सन् निपतति । विशिष्टाग्निसंपर्कान्निलीनो भवतीत्यर्थः । तथा प्रचुराः प्रभूता मकरा नक्रा ग्राहा इत्यर्थः । जलग्राहाश्च तेषां निलयाः समाश्रयाः समुद्रा सप्त सागराश्च शुष्यंति शोषं प्राप्नुवंति । तथा धरतीति धरा । पचाद्यच् । धरण्याः धरा महेन्द्रादिसप्तकुलाचलास्तेषां पादैः प्रत्यंतपर्वतैः । "पादाः प्रत्यन्तपर्वताः" इत्यमरः । धृता सम्यगवष्टब्धा धरा भूमिश्च अंत नाशं पातालं वा गच्छति प्राप्नोति । उभयत्रापि प्रलयाग्निमेलनादेवेति भावः । तस्मात् कारणात् । [illegible] । करिकलभस्य करिपोतस्य कर्णाग्रं कर्णाञ्चलं तद्वच्चंचले च । [illegible] शरीरे इति शरीरे का वार्ता का कथा । न कापीत्यर्थः । यतोऽत्यन्त[illegible]मपि ईदृग्व्यवस्था किमु तत्क्षणभङ्गुराणां शरीराणाम् । "[illegible] गण्यते मशकानां तु का कथा ।" इति न्यायादिति भावः । [illegible] नश्वरा एव ततोऽप्यतिनश्वरं शरीरमिति तात्पर्यम् । [illegible] विशेषणमनिदमित्थं[illegible] [illegible] [illegible] "करिकलभकर्णाग्र[illegible]" इत्याह [illegible] ॥ ७२ ॥

---

१ [illegible] । २ [illegible] । ३ [illegible]

प्रलयकालकी अग्निका मारा जब श्रीमान् सुमेरु पर्वत गिर पडता है और बडे २ मगर और ग्राहोंके स्थान ऐसे समुद्रभी जब सूख जाते हैं और पर्वतोंके पगसे दबी हुई पृथ्वीभी नष्ट हो जाती है तब हाथीके बच्चोंके कानके कोरके समान चंचल मनुष्यके शरीरकी क्या गणना है अर्थात् यह तो अवश्य नष्ट होगा ॥ ७२ ॥

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-।
र्दृष्टिर्नश्यति वर्धते बधिरता वक्रं च लालायते ॥
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते।
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते७३॥

अथ शरीरिणो जरया दुरवस्थामाह द्वाभ्याम्—गात्रमिति ॥ गात्र शरीर सकुचित भग्नमभूदिति शेषः । गतिः संचारोऽपि गलिता संचारशक्तिरपि नष्टेत्यर्थ. । दंतावलिर्दंतपंक्तिश्च भ्रष्टा पतिता । दृष्टिश्चक्षुरिंद्रियं च नश्यति अर्थग्रहणापटुर्भवतीत्यर्थः । बधिरता श्रोत्रेंद्रियापाटव वर्धते वृद्धिं प्राप्नोति । वक्त्र च लाला दंतांतर्गतजल लालेवाचरति लालायते लालामय भवतीत्यर्थ. । "सृणिका स्यन्दिनी लाला" इत्यमर. । तथा बंधव एव बान्धवाः । स्वार्थेऽण्प्रत्ययः । त एव जनो बंधुवर्गश्च वाक्य वचन नाद्रियते न रोचयत इत्यर्थ । किं बहुना भार्यापि न शुश्रूषते न सेवते । यद्वा सेवितु नेच्छति सेवा दूरापास्तेति भावः । अतो जीर्णवयसो जरावस्थासपन्नस्य पुरुषस्य । हेति विषादे । कष्ट कृच्छ्र कुतः पुत्रोऽप्यात्मसभवोऽपि अमित्रायते अमित्रः शत्रुरिवाचरति प्रतिकूलाचरणतत्परो भवतीत्यर्थः । लालयत इत्यत्र "कर्तुः क्यङ् सलोपश्च" इति क्यङ् । अत्र तु "उपमानादाचारे" इति उभयत्रापि "अकृत्सार्वधातुकयोर्दीर्घ" इति दीर्घः॥७३॥

बडा खेद है कि वृद्ध मनुष्यकी यह दशा होती है कि गात सुकड जाता है, गति (चलना) नष्ट हो जाती है, दांतोंकी पंक्ति गिर जाती है, दृष्टि नष्ट हो जाती है, बहिरा हो जाता है, मुखसे

नाही है ऐसे कर्मकांडकी कर्त्तव्यताके विभ्रमसे क्या है, संसारबंधनके दुःखरचनाके विध्वंस करनेके हेतु प्रलयाग्निकी सदृश ब्रह्मानंदपदमें एक प्रवेशके उद्योगके विना और सब शेष वणिज (वैश्यों) का व्यापार है ॥ ७१ ॥

यतो मेरुः श्रीमान्निपतति युगान्ताग्निवलितः ।
समुद्राः शुष्यंति प्रचुरमकरग्राहनिलयाः ॥
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता ।
शरीरे का वार्त्ता करिकलभकर्णाग्रचपले ॥ ७२ ॥

अथातिरिक्तस्यानित्यत्वमेव प्रपञ्चयति—यत इति ॥ यतो यस्मात्कारणात् श्रीमान् मणिहिरण्यादिसकलवस्तुसमृद्धिमान् मेरुः मेरुगिरिरपि युगांताग्निना प्रलयकालानलेन वलितः संवेष्टितः सन् निपतति । विशिष्टाग्निसंपर्कान्निलीनो भवतीत्यर्थः । तथा प्रचुराः प्रभूता मकरा नक्रा ग्राहा इत्यर्थः । जलग्राहाश्च तेषां निलयाः समाश्रयाः समुद्राः सप्त सागराश्च शुष्यति शोषं प्राप्नुवंति । तथा धरतीति धराः । पचाद्यच् । धरण्याः धरा महेन्द्रादिसप्तकुलाचलास्तेषां पादैः प्रत्यंतपर्वतैः । "पादाः प्रत्यंतपर्वताः" इत्यमरः । धृता सम्यगवष्टब्धा धरा भूमिश्च अंतं नाशं पातालं वा गच्छति प्राप्नोति । उभयत्रापि प्रलयाग्निमेलनादेवेति भावः । तस्मात् कारणात् । यत्तदोर्नित्यसंबंधात् । करिकलभस्य करिपोतस्य कर्णाग्रे कर्णांचलं तद्वच्चले चचले शरीरं इति शरीरे का वार्ता का कथा । न कापीत्यर्थः । यतोऽत्यंतस्थिरानगाणामपि ईदृश्यवस्था किमु तत्क्षणभंगुराणां शरीराणाम् । "गजा यत्र न गण्यंते मशकानां तु का कथा ।" इति न्यायादिति भावः । सर्वेऽपि नश्वरा एव ततोऽप्यतिनश्वरं शरीरमिति तात्पर्यम् । करिकलभेत्यत्र करिशब्दस्य विशेषप्रतिपत्तिहेतोर्वैशेष्यप्रतीत्यर्थत्वादपौनरुक्त्यमत एवंकारार्थपदमप्रयोज्यमित्युक्त्वा "करिकलभकर्णावतंसादिषु प्रतिविशेषकत्वं न दोषः" इत्याह वामनः ॥ ७२ ॥

---

१ यदा इति पाठान्तरम् । २ निहत इति पाठांतरम् । ३ निकर० इति पाठांतरम् ।

प्रलयकालकी अग्निका मारा जब श्रीमान् सुमेरु पर्वत गिर पडता है और बडे २ मगर और ग्राहोंके स्थान ऐसे समुद्रभी जब सूख जाते हैं और पर्वतोंके पगसे दबी हुई पृथ्वीभी नष्ट हो जाती है तब हाथीके बच्चोंके कानके कोनेके समान चंचल मनुष्यके शरीरकी क्या गणना है अर्थात् यह तो अवश्य नष्ट होगा ॥ ७२ ॥

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-
र्दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ॥
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते ।
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते७३॥

अथ शरीरिणो जरया दुरवस्थामाह शार्दूल—गात्रमिति ॥ गात्रं शरीरं संकुचितं संभ्रमभूदिति शेषः । गतिः सञ्चारोऽपि गलिता सञ्चारशक्तिरपि नष्टेत्यर्थः । दन्तावलिर्दन्तपङ्क्तिश्च भ्रष्टा पतिता । दृष्टिश्चक्षुरिन्द्रियं च नश्यति अर्थग्रहणापटुर्भवतीत्यर्थः । बधिरता श्रोत्रेन्द्रियापाटवं वर्धते वृद्धिं प्राप्नोति । वक्त्रं च लाला दन्तान्तर्गतजलं लालेवाचरति लालायते लालामयं भवतीत्यर्थः । "सृणिका स्यदिनी लाला" इत्यमरः । तथा बधिर एव बाधवः । स्वार्थेऽण्प्रत्ययः । स एव जनो बन्धुवर्गश्च वाक्यं वचनं नाद्रियते न रोचयत इत्यर्थः । किं बहुना भार्यापि न शुश्रूषते न सेवते । यद्वा सेवितुं नेच्छति सेवा दूरापास्तेति भावः । अतो जीर्णवयसो जरावस्थामापन्नस्य पुरुषस्य । हेति विषादे । कष्टं कृच्छ्रं कुतः पुत्रोऽप्यात्मसंभवोऽपि अमित्रायते अमित्रः शत्रुरिवाचरति प्रतिकूलाचरणतत्परो भवतीत्यर्थः । लालयत इत्यत्र "कर्तुः क्यङ् सलोपश्च" इति क्यङ् । अत्र तु "उपमानादाचारे" इति उभयत्रापि "अकृत्सार्वधातुकयोर्दीर्घः" इति दीर्घः॥७३॥

बडा खेद है कि वृद्ध मनुष्यकी यह दशा होती है कि गात सुकड जाता है, गति (चलना) नष्ट हो जाती है, दांतोंकी पंक्ति गिर जाती है, दृष्टि नष्ट हो जाती है, बहिरा हो जाता है, मुखसे

लार टपकने लगती है, बंधुजन वाक्यका आदर नहीं करते, स्त्रीभी सेवा नहीं करती और पुत्रभी शत्रुके समान हो जाता है इससे ईश्वरकी भक्तिही श्रेष्ठ है ॥ ७३ ॥

वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां ।
स्थानं जरापरिभवस्य तथा पुमांसम् ॥
आरोपितास्थिशतकं परिहृत्य यांति ।
चंडालकूपमिव दूरतरं तरुण्यः ॥ ७४ ॥

वर्णमिति ॥ तरुण्यो युवतय. । कर्त्र्यः । " वयसि प्रथमे " इति ङीप् । शिरसि रोहतीति शिरोरुहाश्चिकुराः । " इगुपधज्ञाप्री० " इति कप्रत्ययः । तेषा. सित वर्णं धावल्यगुण पलितत्वमिति यावत् । झटित्यजसा वीक्ष्य दृष्ट्वा । " द्राग्झटित्यजसाह्नाय " इत्यमरः । तदा तस्मिन्समये दर्शनसमनतरकाल एवेत्यर्थ । जरया वार्धकावस्थया य परिभव. अवमानस्तस्य स्थानमास्पद तथा आरोपित बहिः स्फुटलक्ष्यत्वादारोपितप्रायमास्थिशतक यस्य त तथोक्तम् । अन्यत्रारोपित निक्षिप्तमस्थिशतक यस्मिन् तम् । आरोपितास्थिशकलमिति पाठे एकत्रारोपितप्रायकीकसखडमन्यत्र निक्षिप्तकीकसखडमित्यर्थः । पुमास पुरुष चडालकूप चडालसर्वाविजलाशयमिव परिहृत्य परित्यज्य दूरतरमतिविप्रकृष्ट यांति हेयत्वाद्विहायान्यत्र गच्छतीत्यर्थः । अतः कष्ट जीर्णवयसोऽपि जीवनमिति भाव. ॥ ७४ ॥

तरुण स्त्रियां वृद्ध पुरुषके बालोंका सफेद वर्ण देखके उसको जरासे होनेवाले अवमानका स्थान तथा सैकडों हाड जिसमें आरोपित किये हैं ऐसा चांडालका कूप समझके उसको छोडके दूरसे चली जाती हैं ॥ ७४ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो ।
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः ॥

१ कलेवरगृह इति पाठांतरम् ।

आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् ।
संदीप्ते[1] भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥७५॥

अतो [illegible] ॥ यावत् [illegible] भवतीति शेषः । एवमुत्तरत्रापि । तथा यावत् न [illegible] तत्तत्कार्याक्षमत्वात् [illegible] भवति । " [illegible] " इत्यमरः । [illegible] अरुजं [illegible] भवति । तथा [illegible] कार्य- [illegible] । तथा [illegible] च अप्रतिहता [illegible] भवति । [illegible] तावत् तावत्पर्यन्तमेव [illegible] । [illegible] विदुषा अभिज्ञेन । " [illegible] " इति [illegible] । [illegible] मोक्षप्राप्तावित्यर्थः । महान् फलजननपर्याप्तः [illegible] तपःसम्पादनोद्योगः कार्यः ननु कोऽयं नियमः अवसानेऽपि प्रयत्नस्य कर्तुं युक्तत्वादित्याशङ्क्यावकाशाभावान्न युक्त इति [illegible] । भवने गृहे सन्दीप्ते अग्निना दह्यमाने सति कूपखननं प्रतिकूपनिर्माणं प्रत्युद्यमः प्रयत्नः कीदृशः कीदृग्विधः न युक्त इत्यर्थः । अवकाशाभावादिति भावः । गृहदाहवेलायां कूपखननप्रयत्न इव अवसानकाले श्रेयःप्राप्त्यर्थोद्यमोऽपि न युज्यते इति भावः । तस्मात्स्वस्थावस्थायामेव श्रेयःसाधनसम्पादनतत्परेण भवितव्यमवश्यं बुद्धिमतेति तात्पर्यम् ॥ ७५ ॥

जबतक शरीर अपना पुष्ट और नीरोग है और वृद्धावस्था दूर है, जबलों इन्द्रियोंकी शक्ति न्यून न हुई और आयुष्यभी क्षीण नहीं हुई है तबतक बुद्धिमान पुरुषको उचित है कि अपने कल्याणका यत्न अच्छी भांतिसे कर ले, जब घर जलने लगा तब कूप खोदनेके उद्योगसे क्या होता है ॥ ७५ ॥

---

1 प्रोद्दीप्ते इति पाठान्तरम् ।

लार टपकने लगती है, बंधुजन वाक्यका आदर नहीं करते, स्त्रीभी सेवा नहीं करती और पुत्रभी शत्रुके समान हो जाता है इससे ईश्वरकी भक्तिही श्रेष्ठ है ॥ ७३ ॥

वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां ।
स्थानं जरापरिभवस्य तथा पुमांसम् ॥
आरोपितास्थिशतकं परिहृत्य यांति ।
चंडालकूपमिव दूरतरं तरुण्यः ॥ ७४ ॥

वर्णमिति ॥ तरुण्यो युवतयः । कर्त्र्यः । " वयसि प्रथमे " इति ङीप् । शिरसि रोहतीति शिरोरुहाश्चिकुराः । " इगुपधज्ञाप्री० " इति कप्रत्ययः । तेषां सितं वर्णं धावल्यगुणं पलितत्वमिति यावत् । झटित्यंजसा वीक्ष्य दृष्ट्वा । " द्राग्झटित्यंजसाह्नाय " इत्यमरः । तदा तस्मिन्समये दर्शनसमनंतरकाल एवेत्यर्थः । जरया वार्धकावस्थया यः परिभवः अवमानस्तस्य स्थानमास्पदं तथा आरोपितं बहिः स्फुटलक्ष्यत्वादारोपितप्रायमस्थिशतकं यस्य तं तथोक्तम् । अन्यत्रारोपितं निक्षिप्तमस्थिशतकं यस्मिन् तम् । आरोपितास्थिशकलमिति पाठे एकत्रारोपितप्रायकीकसखंडमन्यत्र निक्षिप्तकीकसखंडमित्यर्थः । पुमांसं पुरुषं चंडालकूपं चंडालसंबंधिजलाशयमिव परिहृत्य परित्यज्य दूरतरमतिविप्रकृष्टं यांति हेयत्वाद्विहायान्यत्र गच्छंतीत्यर्थः । अतः कष्टं जीर्णवयसोऽपि जीवनमिति भावः ॥ ७४ ॥

तरुण स्त्रिया वृद्ध पुरुषके बालोंका सफेद वर्ण देखके उसको जरासे होनेवाले, अवमानका स्थान तथा सैकडों हाड जिसमें आरोपित किये हैं ऐसा चांडालका कूप समझके उसको छोडके दूरसे चली जाती हैं ॥ ७४ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो ।
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ॥

१ कलेवरमिदं इति पाठांतरम् ।

आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् ।
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥७८॥

अतो दुरवस्थाक्रान्तेः पूर्वमेव श्रेयःसम्पादनार्थं यत्नः कर्तव्यो नान्यथेति सदृष्टान्तमाह—यावदिति ॥ यावत् यावत्पर्यन्तमिदमेतच्छरीर स्वस्थ पीडारहित भवतीति शेषः । एवमुत्तरत्रापि । तथा यावत् न विद्यते रुजा रुग्यस्य तत्तथोक्तमारोग्ययुक्त भवति । " स्त्री रुग्रुजा चोपतापः " इत्यमर. । यद्वा अरुज सत् स्वस्थमविकल भवति । तथा यावज्जरा दूरत. दूरे भवति वार्धकदशा यावत्पर्यंत नाक्रमतीत्यर्थ । तथा यावदिंद्रियशक्तिश्चक्षुरादींद्रियपाटव च अप्रतिहता अखण्डिता भवति । यावदायुपः क्षयो नाशो न भवति तावत् तावत्पर्यंतमेव तन्मध्यकाल एवेत्यर्थः । वेत्तीति विद्वान् तेन विदुषा अभिज्ञेन । " विदे शतुर्वसुः " इति वसुप्रत्ययः । आत्मनः श्रेयसि विषये मोक्षप्राप्तावित्यर्थ । महान् फलजननपर्याप्तत्वेन पूज्य. प्रयत्न ज्ञानवैराग्यतप सम्पादनोद्योग· कार्य ननु कोऽय नियम अवसानेऽपि प्रयत्नस्य कर्तुं शक्यत्वादित्याशङ्क्यावकाशाभावान्न युक्त इति व्यतिरेकदृष्टांतमाह । भवने गृहे सन्दीप्ते अग्निना दह्यमाने सति कूपखनन प्रतिकूपनिर्माण प्रत्युद्यम· प्रयत्न कीदृशः कीदृग्विध· न युक्त इत्यर्थ । अवकाशाभावादिति भाव । गृहदाहवेलाया कूपखननप्रयत्न इव अवसानकाले श्रेय प्राप्त्यर्थोद्यमोऽपि न युज्यते इति भाव· । तस्मात्स्वस्थावस्थायामेव श्रेय साधनसम्पादनतत्परेण भवितव्यमवश्य बुद्धिमतेति तात्पर्यम् ॥ ७९ ॥

जबतक शरीर अपना पुष्ट और नीरोग है और वृद्धावस्था दूर है, जबलों इन्द्रियोंकी शक्ति न्यून न हुई और आयुष्यभी क्षीण नही हुई है तबतक बुद्धिमान पुरुषको उचित है कि अपने कल्याणका यत्न अच्छी भांतिसे कर ले, जब घर जलने लगा तब कूप खोदनेके उद्योगसे क्या होना है ॥ ७८ ॥

---

१ प्रदीप्ते इति पाठान्तरम् ।

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं ।
गुणोदारान् दारानुत परिचरामः सविनयम् ॥
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसा- ।
न्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ७६॥

अथ तपश्चरणादीन् बहून् कर्तव्यतया विकल्प्यानन्तरमवश्यं तत्र एव समाचरणीयमिति केषाञ्चिन्निश्चयमनुमन्वायाह तपस्यन्त इति द्वाभ्याम्—तपस्यन्त इति ॥ तपस्यन्तस्तपश्चरन्तः सन्तः के वयमिति शेषः । "॥ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ्प्रत्ययः । सुरनदीं मन्दाकिनीमधिनिवसामः किमधितिष्ठामो वा वैराग्येणेति भावः । किंशब्द उत्तरत्राप्यनुवर्तनीयः । "उपान्वध्याङ्वसः" इति सुरनद्याः कर्मत्वम् । उत अथवा विनयेनानुकूल्येन सहित यस्मिन् कर्मणि तद्यथा तथा गुणैः सौभाग्यसौशील्यादिभिरुदारान् रम्यान् दारान् जायाः परिचरामः किमनुसरामो वा सांसारिकधर्मेणेति भावः । "भार्या जायाऽथ पुंभूम्नि दाराः" इत्यभिधानात् दारशब्दस्य पुंस्त्वं बहुत्वं च । तथा शास्त्रौघान् शास्त्रकलापान् पिबामः किम् । अर्थेव कीर्तिप्रतिष्ठाविज्ञानार्थमित्यर्थः । "पाघ्राध्मा०" इत्यादिना पातेः पिबादेशः । उत यद्वा विविधानि काव्यानि काव्यनाटकालङ्कारा एवामृतरसाः सुधाद्रवाः अथवा विविधेषु काव्येषु ये अमृतरसास्तान् पिबामः । सकलकलाभ्यासार्थमित्यर्थः । जनशब्देनात्र तत्समुदायो विवक्षितः । तथा च जने जनसमुदाये कतिपये कियन्तः ये निमेषास्तावन्मात्रकालपरिच्छिन्नमायुर्यस्य तस्मिन् सतीत्यर्थः । जात्येकवचनाविवक्षायां तु जनेष्वस्मासु कतिपयनिमेषायुःषु सत्स्वित्यर्थः । किमुक्ततपश्चरणादिषु किं वा कुर्मः । सर्वेषामाचरणे अवकाशाभावादिति भावः । न विद्मः न जानीमः । निश्चयाभावादिति भावः ॥ ७६ ॥

तप करते हुए गंगातटपर वसें अथवा गुणवान् स्त्रियोंके संग प्रेमसहित विचरें, वेदान्तशास्त्रसमूहको सुनें वा अनेक काव्यामृत-

1 गुणोदारान् इति पाठान्तरम् । 2 ... इति पाठान्तरम् ।

रस पियें। भावार्थ इस निमेषमात्र आयुष्यवाले देहको देखकर हम नही जान सकते कि क्या करें ॥ ७६ ॥

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो।
वयं तु स्थूलेच्छाः सुमहति फले बद्धमनसः॥
जरा देहं मृत्युर्हरति दयितं जीवितमिदं।
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः॥७७॥

नतः किमित्याशङ्क्य ततो निश्चयमाह—दुराराध्या इति॥ तुरगाः उत्तमाश्वास्तद्वच्चलानि चित्तानि येषां ते अस्थिरहृदया इत्यर्थ। अमी परिदृश्यमानाः क्षितिभुजो राजानः दुराराध्या आराधयितुं प्रसादयितुमशक्याः प्रसादोन्मुखीकरणाशक्या इत्यर्थः। तथा स्थूलेच्छा अधिकाशांतरगरा वयं च सुमहति बहुले फले धने बद्धं मनो, येषां ते तथोक्ता बहुधनाकांक्षिण इत्यर्थ। आकांक्षामात्रमेवास्माकं न तु ते दास्यन्तीति भावः। तथा जरा वार्धक्यदशा देहं हरति क्षिणोति। मृत्युरन्तकश्च दयितं प्रियतममिदं जीवितमिमान् प्राणानित्यर्थः। हरति अतः हे सखे, जगत्यस्मिन् लोके विदुषस्तत्त्वज्ञस्य पुंसस्तपसोऽन्यत्रान्यत् इतरदित्यर्थ। अन्यदसाधारणमुत्तमं श्रेय मोक्षसाधनं नास्ति ततोऽन्यत्परमं श्रेयोऽन्तरं नास्ति अतः सर्वदा तदेव संपादनीयमिति भावः॥ ७७॥

राजा घोडेके समान चंचलचित्त हैं, इससे इनकी सेवा करनी बडी कठिन है, हम तो मोटी इच्छावाले हैं, बडे फलमें हमारा मन बंधा (लगा) हुआ है और देहकी वृद्ध अवस्था है और जीवितको मृत्यु हर लेती है इससे हे मित्र ! ज्ञानवान्को तपसे अन्य कल्याण कहीं नही है॥ ७७॥

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि।
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने॥

१ दुराराध्याः स्वामी इति पाठान्तरम्। २ मनसः इति पाठान्तरम्।

युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-।
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ७८ ॥

अथ तपसः श्रेयोहेतुत्वे तदाचरणस्य किंवा योग्यस्थानमित्याकाङ्क्षायामाह—मान इति ॥ अभिमाने म्लायिनि भग्ने सति । तथा वसुनि धने च खण्डिते विनष्टे सति । "देवभेदेऽनले रश्मौ वसू रत्ने धने वसु ।" इति विश्वः । अत एवार्थिनि याचके व्यर्थे अलब्धमनोरथत्वान्निरर्थके प्रयाते सति वांछितार्थालाभाद्विमुख्य गते सतीत्यर्थः । बन्धुजने पुनर्मित्रादिबन्धुजनसमूहे क्षीणे अन्नाद्यलाभात्कृशपरिजने भृत्यवर्गे गते वेतनदानाभावादन्यत्र गते सति । तथा शनैर्मन्दं यौवने तारुण्ये नष्टे गलिते सति । अनित्यत्वस्वाभाव्यात्सर्वस्मिन् निपन्ने सतीत्यर्थः । सुधियां बुद्धिसम्पन्नानामेतदेव इदमेकं केवलमत्यन्त युक्तमुचितम् । किमेतदित्यत आह । क्वचित् कस्मिंश्चित् जह्नुकन्यापयःपूता गङ्गाजलपवित्राः ग्रावाणः पाषाणा यस्मिन् स तथोक्तो यो गिरीन्द्रस्तस्य कन्दरतट्यां हिमवद्गिरेर्विहारस्थल्यां निकुञ्जे लतागृहाभ्यन्तरे निवासः इति यत् तदेतद्युक्तमिति सम्बन्धः । तथैव श्रेयःसाधनभूततपोयोगस्य स्यादिति भावः । "निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ।" इत्यमरः ॥ ७८ ॥

जब प्रतिष्ठा भंग हुई, द्रव्य नष्ट हो गया, याचक लोग आय २ विमुख फिर जाने लगे, भ्राता स्त्री पुत्र और सम्बन्धी आदि भ्रष्ट हो गये उस समय बुद्धिमान् पुरुषोंको उचित है कि जिस पर्वतके पाषाण गंगाजलसे पवित्र हैं उसकी कंदराके समीप तटी और कुंजमें कहीं निवास करें ॥ ७८ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली ।
रम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ॥
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं ।
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥ ७९ ॥

[illegible]

अथ चित्तस्य नित्यानित्यवस्तुविवेके सति रम्यमपि सर्वमरम्यमेव प्रतिभातीत्याह द्वाभ्याम्—रम्या इति ॥ चन्द्रमरीचयश्चन्द्रकिरणाः रम्याः रमणीया उद्दीपकत्वादिति भावः । तथा तृणवती शाद्वलप्राया वनांतस्थली वनमध्यभूमिः रम्या रतु योग्या । " जानपद० " इत्यादिना अकृत्रिमार्थे ङीप् । तथा साधुसमागमात् सज्जनसहवासादागत प्राप्त यत्सुख तदपि रम्यम् । कवयते वर्णयतीति कविस्तस्य कर्म काव्यम् । ब्राह्मणादित्वात् ष्यञ् । तस्य पंकजादिवद्रूढत्वाद्रसोल्लसितशब्दार्थसंघटनार्थकमेव न कर्ममात्र तथा च काव्येपूक्तप्रकारेषु काव्यनाटकादिषु कथा अन्यवाचः उपाख्यानानि वा रम्या मनोहराः तथा कोपोपाहिता. प्रणयकलहादिषु कोपवशादुत्पन्ना ये बाष्पबिंदव. अश्रुकणास्तैस्तरलमाविलं प्रियाया मुख रम्यम् । अतः सर्वमपि रम्यमुक्तरीत्या सकलमपि मनोहरमेव । किंतु चित्ते मनसि अनित्यता नित्यानित्यवस्तुविचारतत्परतामित्यर्थ' । उपगते सति किंचित्पुनः किंचिदपि रम्य न भवति ब्रह्मानद विनेति शेष' ॥ ७९ ॥

चन्द्रमाकी किरणें भली लगती थीं, हरिततृणवाली वनभूमि सुहावनी देख पडती थी, मित्रोंके समागमसे अच्छा सुख होता था, शृंगाररसवाली काव्यकथा प्यारी जान पडती थी, क्रोधके आंसुओंके वृन्दसे चंचल और मनभावन प्यारीका मुख सुंदर लगता था, पर जब संसारकी अनित्यता चित्तमें निश्चित हुई तब सब रमणीयता जाती रही ॥ ७९ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं ।
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ॥
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपांकुर- ।
च्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः ८० ॥

उक्तमेवार्थं विवृण्वन्किंगमयानि—रम्यमिति ॥ हर्म्यतल प्रासादोपरिप्रदेशः वसतये निवासाय न रम्य किम् । रम्यमेवेत्यर्थ । तथा गेय गानम् ।

१ पन्नगसतगपक्ष० इति पाठान्तरम् ।

अथ चित्तस्य नित्यानित्यवस्तुविवेके सति रम्यमपि सर्वमरम्यमेव प्रतिभातीत्याह द्वाभ्याम्—रम्या इति ॥ चन्द्रमरीचयश्चन्द्रकिरणाः रम्याः रमणीया, उद्दीपकत्वादिति भावः । तथा तृणवती शाद्वलप्राया वनांतस्थली वनमध्यभूमिः रम्या खलु योग्या । " जानपद० " इत्यादिना अकृत्रिमार्थे ङीप् । तथा साधुसमागमात् सज्जनसहवासादागत प्राप्त यत्सुखं तदपि रम्यम् । कवयते वर्णयतीति कविस्तस्य कर्म काव्यम् । ब्राह्मणादित्वात् ष्यञ् । तस्य पंकजादिवद्रूढत्वाद्रसोल्लसितशब्दार्थसंघटनार्थकमेव न कर्ममात्र तथा च काव्येषूक्तप्रकारेषु काव्यनाटकादिषु कथा श्रव्यवाचः उपाख्यानानि वा रम्या मनोहरा. तथा कोपोपाहिता प्रणयकलहादिषु क्रोधवशादुत्पन्ना ये वाष्पबिंदव अश्रुकणास्तैस्तरलमाविल प्रियाया मुख रम्यम् । अत. सर्वमपि रम्यमुक्तरीत्या सकलमपि मनोहरमेव । किंतु चित्ते मनसि अनित्यता नित्यानित्यवस्तुविचारतत्परतामित्यर्थ । उपगते सति किंचित्पुनः किंचिदपि रम्य न भवति ब्रह्मानंद विनेति शेष ॥ ७९ ॥

चन्द्रमाकी किरणें भली लगती थीं, हरिततृणवाली वनभूमि सुहावनी देख पडती थी, मित्रोंके समागमसे अच्छा सुख होता था, शृंगाररसवाली काव्यकथा प्यारी जान पडती थी, क्रोधके आसुओंके बून्दसे चंचल और मनभावन प्यारीका मुख सुंदर लगता था, पर जब संसारकी अनित्यता चित्तमें निश्चित हुई तब सब रमणीयता जाती रही ॥ ७९ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं ।
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ॥
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपांकुर- ।
च्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः ॥८०॥

उक्तमेवार्थं विशदयन्नभिगमयति—रम्यमिति ॥ हर्म्यतल प्रासादोपरिप्रदेशः वसतये निवासाय न रम्य किम् । रम्यमेवेत्यर्थ । तथा गेय गानम् ।

१ पतत्पतङ्ग० इति पाठान्तरम् ।

युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः- ।
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ७८ ॥[१]

अथ तपसः श्रेयोहेतुत्वे तदाचरणस्य क्विा योग्यस्थानमित्याकाङ्क्षायामाह—मान इति ॥ अभिमाने म्लायिनि भग्ने सति । तथा वसुनि धने च खण्डिते विनष्टे सति । " दैवभेदेऽनले रश्मौ वसू रत्ने धने वसु । " इति विश्वः । अत एवार्थिनि याचके व्यर्थे अलब्धमनोरथत्वान्निरर्थके प्रयाते सति वांछितार्थालाभाद्विमुख्य गते सतीत्यर्थ. । बन्धुजने पुत्रमित्रादिबन्धुजनसमूहे क्षीणे अन्नाद्यलाभात्कृशपरिजने भृत्यवर्गे गते वेतनदानाभावादन्यत्र गते सति । तथा शनैर्मंद यौवने तारुण्ये नष्टे गलिते सति । अनित्यत्वस्वाभाव्यात्सर्वस्मिन् विपन्ने सतीत्यर्थ· । सुधिया बुद्धिसम्पन्नानामेतदेव इदमेवैक केवलमत्यत युक्तमुचितम् । किमेतदित्यत आह । क्वचित् कस्मिश्चित् जह्नुकन्यापयःपूता· गङ्गाजलपवित्राः ग्रावाणः पाषाणा यस्मिन् स तथोक्तो यो गिरीन्द्रस्तस्य कन्दरतट्या हिमवद्गिरेर्विहारस्थल्या निकुञ्जो लतामण्डपस्तस्मिन्निवास इति यत् तदेतद्युक्तमिति सम्बन्ध । तस्यैव श्रेयःसाधनभूततपोयोगस्थलत्वादिति भावः । " निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे । " इत्यमर· ॥ ७८ ॥

जब प्रतिष्ठा भंग हुई, द्रव्य नष्ट हो गया, याचक लोग आय २ विमुख फिर जाने लगे, भ्राता स्त्री पुत्र और सम्बन्धी आदि भ्रष्ट हो गये उस समय बुद्धिमान् पुरुषोंको उचित है कि जिस पर्वतके पाप.०, गंगाजलसे पवित्र हैं उसकी कंदराके समीप तटमें और कुंजमें कहीं निवास करें ॥ ७८ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली ।
रम्यं साधुसमागमागतसुखं[२] काव्येषु रम्याः कथाः ॥
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं ।
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥७९॥

१ दरी इति पाठान्तरम् । २ समागम गमम्० इति पाठान्तरम् ।

युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-।
पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ७८ ॥

अथ तपसः श्रेयोहेतुत्वे तदाचरणस्य किंवा योग्यस्थानमित्याकाङ्क्षायामाह— मान इति ॥ अभिमाने म्लायिनि भग्ने सति । तथा वसुनि वने च खण्डिते विनष्टे सति । "देवभेदेऽनले रश्मौ वसू रत्ने वने वसु ।" इति विश्वः । अत एवार्थिनि याचके व्यर्थे अलब्धमनोरथत्वान्निरर्थके प्रयाते सति वांछितार्थालाभाद्विमुख्य गते सतीत्यर्थ. । बन्धुजने पुत्रमित्रादिबन्धुजनसमूहे क्षीणे अन्नाद्यलाभात्कृशपरिजने भृत्यवर्गे गते वेतनदानाभावादन्यत्र गते सति । तथा शनैर्मंद यौवने तारुण्ये नष्टे गलिते सति । अनित्यत्वस्वाभाव्यात्सर्वस्मिन् विपन्ने सतीत्यर्थ. । सुधियां बुद्धिसम्पन्नानामेतदेव इदमेवैक केवलमस्यत युक्तमुचितम् । किमेतदित्यत आह । क्वचित् कस्मिंश्चित् जह्नुकन्यापय'पूताः गङ्गाजलपवित्राः ग्रावाणः पाषाणा. यस्मिन् स तथोक्तो यो गिरींद्रस्तस्य कन्दरतट्यां हिमवद्द्रिर्विहारस्थल्या निकुञ्जो लतामण्डपस्तस्मिन्निवास इति यत् तदेतद्युक्तमिति सम्बन्ध । तस्यैव श्रेयःसाधनभूततपोयोगस्थलत्वादिति भावः । "निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ।" इत्यमर' ॥ ७८ ॥

जब प्रतिष्ठा भंग हुई, द्रव्य नष्ट हो गया, याचक लोग आय २ विमुख फिर जाने लगे, भ्राता स्त्री पुत्र और सम्बन्धी आदि भ्रष्ट हो गये उस समय बुद्धिमान् पुरुषोंको उचित है कि जिस पर्वतके पाप।ण गंगाजलसे पवित्र हैं उसकी कंदराके समीप तटी और कुंजमें कहीं निवास करें ॥ ७८ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली[1]।
रम्यं साधुसमागमागतसुखं[2] काव्येषु रम्याः कथाः ॥
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं ।
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः॥७९॥

१ दरी इति पाठान्तरम् । २ समागम गतसु० इति पाठान्तरम् ।

अथ चित्तस्य नित्यानित्यवस्तुविवेके सति रम्यमपि सर्वमरम्यमेव प्रतिभातीत्याह द्वाभ्याम्—रम्या इति ॥ चन्द्रमरीचयश्चन्द्रकिरणाः रम्याः रमणीया उद्दीपकत्वादिति भावः। तथा तृणवती शाद्वलप्राया वनांतस्थली वनमध्यभूमिः रम्या खलु योग्या। " जानपद० " इत्यादिना अकृत्रिमार्थे ङीप्। तथा साधुसमागमात् सज्जनसहवासादागतं प्राप्तं यत्सुखं तदपि रम्यम्। कवयते वर्णयतीति कविस्तस्य कर्म काव्यम्। ब्राह्मणादित्वात् ष्यञ्। तस्य पंकजादिवद्रूढत्वाद्रसोल्लसितशब्दार्थसंघटनार्थकमेव न कर्ममात्रं तथा च काव्येषूक्तप्रकारेषु काव्यनाटकादिषु कथा श्रव्यवाचः उपाख्यानानि वा रम्या मनोहरा. तथा कोपोपाहिताः प्रणयकलहादिषु क्रोधवशादुत्पन्ना ये बाष्पबिंदवः. अश्रुकणास्तैस्तरलमाविलं प्रियाया मुखं रम्यम्। अतः सर्वमपि रम्यमुक्तरीत्या सकलमपि मनोहरमेव। किंतु चित्ते मनसि अनित्यता नित्यानित्यवस्तुविचारतत्परतामित्यर्थः। उपगते सति किंचित्पुनः किंचिदपि रम्यं न भवति ब्रह्मानंद विनेति शेषः ॥ ७९ ॥

चन्द्रमाकी किरणे भली लगती थीं, हरिततृणवाली वनभूमि सुहावनी देख पडती थी, मित्रोंके समागमसे अच्छा सुख होता था, शृंगाररसवाली काव्यकथा प्यारी जान पडती थी, क्रोधके आसुओंके वृन्दसे चंचल और मनभावन प्यारीका मुख सुंदर लगता था, पर जब संसारकी अनित्यता चित्तमें निश्चित हुई तब सब रमणीयता जाती रही ॥ ७९ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं।
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ॥
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपांकुर-।
च्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः॥८०॥

उक्तमेवार्थं विदृण्वन्निगमयति—रम्यमिति ॥ हर्म्यतलं प्रासादोपरिप्रदेशः वसतये निवासायापि न रम्यं किम्। रम्यमेवेत्यर्थः। तथा गेयं गानम्।

१ पवनचलन्नयन० इति पाठान्तरम्।

" भव्यगेय० " इत्यादिना कर्तरि निपातः । तदादि यस्य तत्तथोक्तम् । आदिशब्देन वीणानादादिकमपि संगृह्यते । " शेषाद्विभाषा " इति कप्प्रत्ययः । न श्रव्यं किं श्रोत्रसुखावहं न किं श्रव्यमेवेत्यर्थः । तथा प्राणसमायाः प्राणप्रियनायिकायाः समागमेन सम्भोगेन यत्सुखं तच्च अधिकप्रीतये अत्यन्तसन्तोषाय नैव भवति किम् । भवत्येवेत्यर्थः । किंतु सन्तः वस्तुविचारतत्परपुरुषाः सकलमशेषं हर्म्यतलनिवासादिकमपि भ्रान्तः पतनेच्छया परिभ्रमन् यः पतङ्गः शलभः । " पतङ्गः शलभे भानौ " इति विश्वः । तस्य पक्षयोः पवनेन गरुतोः वायुना व्यालोलोऽतिचञ्चलो यो दीपाङ्कुरो दीपकलिका तस्य च्छाया कान्तिस्तद्वच्चञ्चलं तरलं नश्वरमित्यर्थः । आकलय्यालोच्य वनात् वनमध्यं गताः । शाश्वतब्रह्मानन्दसाधनतपश्चर्यार्थमिति भावः ॥ ८० ॥

संतजनोंके निवासके लिये क्या महल न था और सुननेके योग्य क्या उत्तम २ गाना न था और क्या अधिक प्रीति करनेवाली प्राणप्यारी स्त्रीका सुख न था- अर्थात् यह सब था तौभी संत जन इस जीवलोक (जगत्) को भ्रमते हुए मूर्ख पतंगके पक्षोंके पवनसे हिलते हुए दीपककी छायाके समान चंचल देखकर वनमें चले गये ॥ ८० ॥

आसंसारं त्रिभुवनमिदं चिन्वतां तात ताहङ् ।
नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ॥
योऽयं धत्ते विषयकरिणीगाढगूढाभिमान- ।
क्षीवस्यान्तःकरणकरिणः संयमानायलीलाम् ॥ ८१ ॥

ननु वस्तुविचारप्रसक्तानुप्रसक्तया तपसोऽत्यन्तावश्यकत्वमुक्तं तात्कालिकाभिमानाद्वा शिवार्चनव्यतिरेकेणान्यत्र किंचिदप्यस्तीति मनसि कृत्वेदानीं नानन्दिवार्चनं वर्णयति । तच्चार्चनं द्विविधं बाह्यमाभ्यन्तरं चेति । तत्राद्यं बहुप्रकल्पनात्मकं बहिर्मुखविषयत्वादमुख्यं चेत्यभिप्रेत्यादौ तद्रूपेस्य

---

१ सन्तो गतो वा इति पाठान्तरम् । २ संयमारानलीलाम् इति पाठांतरम् ।

मुख्याभ्यन्तरपूजनप्रकारमेवानुभवमभिनीयाह—आससारादिति ॥ अत्र तातेत्याश्चर्यश्रवणाभिमुखीकरणार्थमादरातिशयद्योतक पृथग्जन प्रति सम्बोधनवचन हे तात जनक । " तातस्तु जनकः पिता " इत्यमरः । आ ससारादनादिससारमारभ्येत्यर्थः । पदद्वयमेतत् । विकल्पपदसमासः । इद प्रसिद्ध त्रयाणा भुवनानां समाहारस्त्रिभुवन भुवनत्रयमपि । " तद्धितार्थ० " इत्यादिना समाहारसमासे पात्राद्यदन्तत्वान्न स्त्रीत्वम् । चिन्वतां मार्गमाणाना कर्मवशात्तत्र प्रवेशलाभादिति भावः । अथवा चिन्वता पगमृशतामस्माक नयनपदवीं लोचनमार्गं वा श्रोत्रमार्गं श्रवणपथ वा तादृक् तथाविधः पुमान् न गतो न प्राप्त एव । तादृक् पुमान् न श्रुतो न दृष्टश्चेत्यर्थः । कोऽसावित्यत आह । योऽय पुमान् प्रतीयमानतया भोगसाधनानि स्रक्चन्दनवनितादीनि विषयास्त एव करिण्य इभ्यस्तासु गाढोऽतिदृढो गूढ. अप्रकाशश्च योऽभिमान अत्यन्तासक्तित्वाग्रहस्तेन क्षीवस्य मत्तस्य । " मत्ते शौडोत्कटक्षीवाः " इत्यमरः । " क्षीव मदे " इत्यस्य धातोरनुपसर्गात् "फुल्लक्षीबकृशोल्लाघाः " इति निष्ठातो निपात । अन्तःकरणमेव करी तस्य चित्तमत्तेभस्य सयमे सम्यङ्नियमने आनायस्य रज्जुनिर्मितजालस्य लीलाम् । " आनाय पुसि जाल स्यात् " इत्यमरः । आलानेति पाठे आलानस्य बन्धनस्तम्भस्य लीलां धत्ते । दुर्दममनोनियमनसमर्थो भवतीत्यर्थः । तादृगिति सम्बन्ध । अत्रेदृक्पुरुषस्य नयनश्रोत्रपथविषयसम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धेऽसम्बन्धरूपातिशयोक्तिस्तया च मनोनियमनस्यात्यताशक्यत्वरूप वस्तु व्यज्यत इत्यलकारेण वस्तुध्वनि' । तथा च केनचिद्योगेन मनो नियम्य तत्त्वब्रह्मानन्दसाधनभूतात्मप्रशिवार्चनतपोऽवश्य कर्तव्यमिति गूढोऽयमभिप्राय. । तथा अन्यधर्मस्यान्यत्र सम्बन्धासम्भवादानायलीलामिव लीलामित्यौपम्यपर्यवसानात्सम्भवद्वस्तुसम्बन्धरूपो निदर्शनालङ्कारः । स चोक्तरूपकेणाङ्गाङ्गिभावेन सकीर्यते ॥ ८१ ॥

जबसे यह संसार प्रवृत्त हुआ आजतक हे भैयया ! हम त्रिभुवनमें खोजते फिरते हैं पर ऐसा पुरुष देखने और सुननेमें न

आया जो विषयरूपी हाथिनीमें पैदा हुआ है तथा जिसको अत्यंत अहंकार है ऐसे अन्तःकरणरूपी उन्मत्त हाथीको रोककर वशमें रक्खें अर्थात् विषयोंमें फँसा मन वशमें करे ॥ ८१ ॥

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं ।
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ॥
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृश-।
न्न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ८२ ॥

अथ तपःप्रवृत्तिप्रकारमेवाह—यदिति ॥ स्वच्छन्द यथेच्छमपराधीनमिति यावत् । विहरण विहारश्च । न विद्यते कार्पण्य दैन्य यस्मिंस्तत्तथोक्तमशनं भिक्षान्नभोजनं कन्दमूलाद्याहारो वा । तथा आर्यैर्विज्ञानसम्पन्नैः सह संवासः समागमश्च । तथा उपशमो विषयभोगविरतिरेव एक मुख्य व्रतफल यस्मिंस्तत्तथोक्त शान्तिफलकतपश्चरणबोधकमित्यर्थः । श्रुत वेदान्तशास्त्रश्रवण च । " श्रुत शास्त्रावधृतयोः " इति विश्वः । तथा बहिः बाह्यदेशे मन्दस्पन्दं मन्दप्रचारमन्तर्मुखत्वादिति भावः । मनोऽप्यन्तःकरण चेति यदेतत्सर्वं वर्तत इति शेषः । " नपुंसकमनपुंसकेनैकवच्च " इत्यादिना एकशेषः । एषेति विधेयप्राधान्यात् स्त्रीलिङ्गता । " शैत्यं हि यत्सा प्रकृतिर्जलस्य " इतिवत् । कस्योदारस्य महतस्तपसः परिणति परिपाको वा न जाने न वेद्मीत्यर्थः । यद्वा परिणतिः परिणामो वा न जाने । किंवा तप एवरूपेण परिणत तन्न जानामीत्यर्थः । कथम्भूत. सन्नपि चिरस्य चिरकालमित्यर्थ । विमृशन्वि-मृशन्नपि । " चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः । " इत्यमर । विभक्तिप्रतिरूपकमव्ययम् । तच्च तप शिवपूजनमेव कथमन्यथान्यस्यैतत्फल-साधने एवंविधपरिणमने वा सामर्थ्यं सम्भवेदिति भावः ॥ ८२ ॥

स्वाधीन विचरना, विना याचे भोजन करना, श्रेष्ठ पुरुषोंके संग रहना, ऐसा शास्त्र कहना वा सुनना कि जिसका उपशम-रूपी व्रतही फल हो और यदि मन बाह्य पदार्थोंमें हो तो विचार

करता हुआ मन्द मन्द गमन करे यह सब प्राप्त होना हम नहीं जानते कि किस प्राचीन और बडे तपका फल है ॥ ८२ ॥

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं ।
हन्तांगेषु गुणाश्च वंध्यफलतां याता गुणज्ञैर्विना ॥
किं युक्तं सहसाभ्युपैति बलवान् कालः कृतांतोऽक्षमी ।
हा ज्ञातं मदनांतकांघ्रियुगलं मुक्त्वास्ति नान्यागतिः॥

अथ शिवचरणमेव शरणमिति स्मरणमभिनीयाह—जीर्णा इति ॥ मनोरथा विषयाभिलाषाश्च हृदयेऽन्तरङ्ग एव जीर्णा नष्टा वांछामात्रेणानुभूता इत्यर्थः । तथाङ्गेष्ववयवेषु तत्तथाभूतं कामिनीसम्भोगोपयुक्तमित्यर्थः । यौवनं यातं गलितम् । हन्तेति विषादे । तथा गुणज्ञा गुणग्राहिणः सहृदया इति यावत् । तैर्विना । "पृथग्विना०" इत्यादिना तृतीया । गुणा विद्याक्षिनयादयश्च वन्ध्यफलता निष्फलता याता गताः । अनुभावकाभावान्निरर्थका जाता इत्यर्थः । तथा बलवान् बलिष्ठः दुर्जय इत्यर्थः । कालः कालस्वरूपः अपरावर्त इति यावत् । अक्षमी असहनश्च कृतांतो यमः सहसाभ्युपैति अभियुक्ते प्राणापहरणार्थमिति भावः । "कृतान्तो यमसिद्धांतौ" इत्यमरः । अतः किं युक्तमुचितमीदृग्दशायां किं कर्तव्यमित्यर्थः । हा कष्टं तथापीदमेकं तरणसाधनमस्तीति स्मरणमभिनीयाह । ज्ञातमवगतमिदम् । ज्ञातमित्यत आह । मदनांतकस्य शम्भोरंघ्रियुगलं पादयुग्मं मुक्त्वा विहायान्या गतिः शरणं नास्ति अतस्तदेव शरणमिति भावः ॥ ८३ ॥

सब मनोरथ हृदयहीमें जीर्ण हो गये, कोईभी सिद्ध न हुए, युवावस्था भी व्यतीत हुई और गुणग्राहकोंके विना सब गुण निष्फल हो गये, अब सर्वनाशक बलवान काल सहसा निकट चला आता है इससे अब यह जाना कि कामनाशक शिवजीके दोनो चरण छोड और कोई दूसरी गति नहीं ॥ ८३ ॥

[illegible]

महेश्वरे वा जगतामधीश्वरे ।
जनार्दने वा जगदन्तरात्मनि ॥
न वस्तुभेदप्रतिपत्तिरस्ति मे ।
तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ८४ ॥

ननु १" यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् । ध्यातुर्मनश्च कुलशैलविसृष्टवज्र ध्यायेच्चिर भगवतश्चरणारविंदम् ॥ " इत्यादिना शिवाद्यशेषदेवताकल्याणप्रदे अखिललोकाराध्ये संसारार्णवतरणयानमात्रे भगवतश्चरणारविंदे जाग्रति कथं शिवांघ्रियुगलं विनान्या गतिर्नास्तीति प्रलपति स इत्याशङ्क्याह—महेश्वर इति ॥ जगतां चतुर्दशभुवनानामधीश्वरे स्वामिनि महेश्वरे शिवे वा । तथा जगतामंतरात्मनि अंतःकरणसाक्षिणि अंतर्यामिणीति वा । अथवा अन्तर्भूतात्मनि जीवात्मस्वरूपे अविद्याप्रतिबिम्बचैतन्यत्वेन तथाभूतत्वादिति भावः । यद्वा जगन्त्यन्तरात्मनि यस्य तस्मिन् तथोक्ते कुक्षिस्थाखिलभुवन इत्यर्थः । जनानर्दयतीति जनार्दने विष्णौ वा । मे मम वस्तुभेदप्रतिपत्तिः अयं महेश्वरः अयं जनार्दन इति वस्तुगोचरभेदबुद्धिर्नास्ति । " शिवाय विष्णुरूपाय " इत्यादिना तयोर्वस्तुतो भेदाभावादिति भावः । तथापि भेदप्रतिपत्त्यभावेऽपि तरुणेंदुःशेखरः शिरोभूषणं यस्य तस्मिन् शिवे भक्तिर्भजनानुरागोऽस्तीति शेषः । अत एव नान्या गतिरित्युक्तमिति भावः । इदं च " स्वभावो दुरतिक्रमः " इति न्यायादित्यवगन्तव्यम् । वंशस्थवृत्तम् । ' जतौ तु वंशस्थमुदीरितं जरौ " इति लक्षणात् ॥ ८४ ॥

जगदीश्वर महेश्वर अर्थात् शिव और जगदात्मा जनार्दन अर्थात् विष्णु इन दोनोंमें मुझे यह शंकर यह विष्णु इस प्रकार वस्तुभेदबुद्धि नहीं तथापि जिनके भालमें चंद्र विराजमान है उन्हींमें हमारी प्रीति है ॥ ८४ ॥

---

१ ध्यायेच्चिरं इति पाठान्तरम् ।

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने।
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः॥
भवाभोगोद्विग्नाः शिवशिवशिवेत्युच्चवचसः।
कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम्॥८५॥

अथ स्थायिनः शमस्योदयवशाच्छांतरसाभिव्यञ्जकवाक्यान्याह पञ्चभिः—स्फुरादिति॥ शांता उपरता ध्वनयः पक्षिमृगादिरुतानि यासु तासु तथोक्तासु। एतेन चित्तविक्षेपहेतुराहित्यमुच्यते। रजनीषु रात्रिषु स्फुरन्ती प्रकाशमाना स्फारा वृद्धा च या ज्योत्स्ना चन्द्रिका तया धवलित पाण्डुरीकृत तलं प्रदेशो यस्य तस्मिन् क्वापि कस्मिंश्चित् द्युसरितो गङ्गायाः सम्बन्धिनि पुलिने सैकते सुखं यथा तथा आसीनाः उपविष्टाः सन्तः भवाभोगात्संसारविस्तारादुद्विग्नाः विह्वलाः दुःखजनकत्वादिति भावः। वयमिति शेषः। अत. शिवेत्यादित्रिवारमुच्चानि ताराणि वचांसि आक्रन्दवचनानि येषां ते तथोक्ताः। १आर्तवचसः इति पाठे दैन्यवचनाः सन्त कदा कस्मिन् वा समये अन्तरभ्यन्तरे गता नियमनवशादन्तर्लीना इति यावत्। बहुलाश्च ये बाष्पा आनन्दाश्रूणि तैराकुला व्याकुला या दशा अवस्था तां यास्याम.। अतर्नियमितानन्दबाष्पपर्याकुलावस्थां कदा गमिष्याम इत्यर्थः। दशामिति पाठे बाष्पाकुला या दृग्दृष्टिस्तां यास्याम इत्यन्वय.। कदा २स्यामानन्दोद्गतबहुलबाष्पाकुलदृशः इति पाठे आनन्दादुद्गता उत्पन्ना ये बहुलबाष्पास्तैराकुला दृशो येषां ते तथोक्ताः कदा स्याम भवेम। तदानीं खलु वयं कृतकृत्या इति भावः॥८५॥

जहां प्रकाशित फैली चांदनीसे निर्मल स्थल है ऐसे गंगातटमें सुखसे बैठे रहें जब सब ध्वनि बन्द हो तब रात्रिमें शिव शिव शिव ऐसे ऊंचे स्वरसे कहते हुए संसारके दुःखसे व्याकुल हो अभ्यंतरमें लीन हुए आनन्दाश्रुओंसे व्याकुल हुई ऐसी अवस्थाको हम कब प्राप्त होंगे॥ ८५॥

---

१ त्वार्तवचना इति पाठान्तरम्। २ स्याम आनन्दोद्गतबहुलबाष्पाकुलदृशः इति पाठान्तरम्।

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः ।
स्मरन्तः संसारे विगुणपरिणामां विधिगतिम् ॥
वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणा- ।
स्त्रियामा नेष्यामो हरचरणचिंतैकशरणाः ॥८६॥

वितीर्ण इति ॥ सर्वस्वे निखिलधने वितीर्णे दत्ते अर्थिसात्कृते सति । "स्वो ज्ञातावात्मनि स्व त्रिष्वात्मीये स्वोऽस्त्रियां धने । " इत्यमरः । ततस्तरुणा प्रत्यग्रा या करुणा भूतदया तया पूर्णानि पूरितानि हृदयानि येषां ते तथोक्ताः । तथा संसारे विधिगतिं दैवप्रवृत्तिं विगुणपरिणामां विषमपरिपाकामकुशलपर्यवसायिनीमिति यावत् । स्मरन्तः मनस्यनुसन्दधानाः सन्तः वयं पुण्यारण्ये तपोवने हरचरणचिंता शिवपादारविंदध्यानमेवैकं मुख्यं शरणं रक्षणं येषां ते तथोक्ताः सन्तः परिणताः परितो व्याप्ताः शरच्चन्द्रकिरणाः शारदेंदुमयूखाः यासु तास्तथोक्तास्त्रियामाः रात्रीः नेष्यामो गमयिष्यामः । कदेति शेषः । " द्वयोः प्रथमचरमयामार्धयोर्दिनव्यवहारात्त्रयो यामा यस्याः सा त्रियामा " इति स्वामी ॥ ८६ ॥

सर्वस्व नष्ट होनेपर बडी करुणासे पूर्ण हृदयवाले, संसारमें विषम परिपाकवाली दैवगतिका स्मरण करते हुए और शिवके चरणके ध्यान अपना रक्षक समझनेवाले ऐसे हम किसी पवित्र वनमें बैठके शरदृतुकी चांदनीसे युक्त ऐसी रात्रियोंको कब व्यतीत करेंगे अर्थात् कब हमारा यह संसार छूटेगा ॥ ८६ ॥

कदा वाराणस्याममरतटिनीरोधसि वसन् ।
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ॥
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन ।
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥८७॥

कदेति ॥ कदा कस्मिन् वा काले वाराणस्यां काश्याममरतटिनीरोधसि गङ्गातीरे वसन् तिष्ठन् तथा कौपीनं गुह्याच्छादनवस्त्रं वसानः आच्छा-

दयन् लोकविरोधपरिहारार्थं तावन्मात्रपरिग्रह एव न तु परिग्रहांतरापेक्ष इत्यर्थः । "वस आच्छादने" इति धातोः शानच् । शिरस्यञ्जलिपुटं करसम्पुटं निदधानः सन् अये भो गौरीनाथ पार्वतीपते । त्रयाणां पुराणां समाहारस्त्रिपुरम् । पात्रादित्वान्न ङीप् । तस्य हरतीति हरः । हे त्रिपुरहर हे त्रिपुरांतक । शं सुखमस्माद्भवतीति शम्भो त्रिनयन हे त्र्यम्बक । क्षुभ्नादित्वान्न णत्वम् । एतदामन्त्रणचतुष्टयं परमेश्वरस्य लोकसंग्रहकारणत्वाशक्यकार्यकरणसामर्थ्यत्वभक्तजनसुखमन्वायकत्वासाधारणमहिमास्पदत्वद्योतनार्थमित्यवगन्तव्यम् । प्रसीद प्रसन्नो भवेति क्रोशन्नुच्चै रटन् दिवसाननेकान् निमिषमिव क्षणमिव नेष्यामि । अत्र भावितीव्रनरकयातनानुचिंतनादिभिर्विभावैर्जनितः कौपीनधारणशिरोऽञ्जलिपुटसंघटनादिभिरनुभावैरभिव्यक्तः कदेतिपदसूचितेन चिंताख्येन सञ्चारिभावेन च परिपुष्टः स्वात्मावमाननलक्षणो निर्वेदस्थायी शांतरसः परिस्फुरतीत्यवगन्तव्यम् । एवमुत्तरत्रापि योज्यम् ॥ ८७ ॥

काशीजीमें गंगाके तटपर खडा हुआ, कौपीनमात्र पहिरा हुआ, शिरपर अंजलिपुट धरा हुआ तथा हे गौरीनाथ ! हे त्रिपुरहर ! हे शंभो ! हे त्रिनयन ! मुझपर प्रसन्न हो इस प्रकार पुकारता हुआ मैं अनेक दिनोंको निमिषके समान कब व्यतीत करूंगा ॥ ८७ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां । ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ॥
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ ८८ ॥

स्नात्वेति ॥ गङ्गाया इमानि गाङ्गानि । "तस्येदम्" इत्यण् । तैः पयोभिर्गाङ्गजलैरित्यर्थः । स्नात्वा शुद्धो भूत्वा हे विभो स्वामिन्, शुचिभिः शुद्धैः सद्यस्समुत्थैरिति यावत् । कुसुमैः फलैश्च त्वामर्चयित्वा समाराध्य । एतेन

१ निवेश्य इति पाठान्तरम् । २ तव चरणयोः [illegible] इति पाठान्तरम् ।

बाह्यपूजाया अप्यंशतः प्राधान्यमस्तीति सूचितम् । ध्येये ध्यातु योग्ये वस्तुनि त्वच्चरणारविंद एवेत्यर्थः । ध्यानं निवेश्य, एकाग्रचित्तो भूत्वेत्यर्थः । तथा क्षितिधरकुहरे यो ग्रावा पाषाणः सः एव पर्यंकः सुखशय्या तस्य मूले निषण्णः सन्निति शेषः । समाधिव्युत्थानानंतर सुखसंवेशयोग्यताद्योतनार्थं ग्राव्णि पर्यंकत्वरूपणम् । आत्मन्येवारमत इत्यात्मारामो विषयांतरासक्तिशून्यः सन्नित्यर्थः । "रमन्ते योगिनोऽनंते नित्यानंदे चिदात्मनि ।" इति स्मृतेः । तथा फलाहार शरीरधारणार्थमिति भावः । गुरुवचनरतः आचार्योपदिष्टकर्माचरणतत्परः सन्नहम् । इत्थंभूतताया एव श्रेयोहेतुत्वादिति भावः । हे स्मरारे मदनांतक, शंभो त्वत्प्रसादात्त्वदनुग्रहात् मकरेण मकराकाररेखया सह वर्तत इति समकरश्चरणो यस्य तस्मिन् तथोक्ते पुंसि महाभाग्यसंपन्ने पुरुषे विषये राज्ञीत्यर्थः । सेवासमुत्थं परिचर्यासमुत्पन्नं दुःखं कदा मोक्ष्ये तथा मामनुगृहाणेत्यर्थः । परमेश्वरानुग्रहं विना श्रेयोलाभाभावादिति भावः । समकरचरणस्य महाभाग्यसंपन्नत्वमुक्तं सामुद्रिके । " मकरो मत्स्यरेखा च पद्मशंखाकृतिः पदे । महाधनी महाभोगी दाता दीर्घायुरेव च ॥ " इति ॥ ८८ ॥

हे स्वामी कामदेवके शत्रु शिव ! मैं गंगाजलसे स्नान कर सुन्दर पवित्र फूल फलोंसे तुझे पुज पर्वतकी कंदरामें पत्थरकी चट्टानकी शय्यापर बैठ ध्यानयोग्य तुम्हारी मूर्तिमें ध्यानावस्थित हो गुरुके वचन मान आत्माराम और फलहारी होके तुम्हारी कृपासे कब मैं मकररेखासे युक्त चरणवाले अर्थात् महाभाग्यवाले पुरुष (राजा) की सेवासे उत्पन्न हुए दुःखसे छूटूंगा ॥ ८८ ॥

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ८९ ॥

एकाकीति ॥ एकाकी असहायः सङ्गरहित इति यावत् । "सङ्गात्संजायते कामः" इत्यादिस्मृतेः सङ्गस्यानर्थहेतुत्वादिति भावः । " एकान्ते निवसेत् " इत्यादिस्मृतेश्च । निःस्पृहः विषयाभिला-

पञ्शून्य' अत एव शांतः रागाद्यनुपहतचित्तः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वा अतः पाणिरेव पात्रं भिक्षापात्र यस्य स तथोक्त' । तथा दिश एवाम्बराणि यस्य स तथोक्तः सन्नहमिति शेषः । हे शम्भो कर्मणा सचितप्रारब्धाना निर्मूलने समूलविध्वसने क्षमः समर्थः कदा भविष्यामि कर्मचयात् कदा मोक्ष्यामीत्यर्थः । "भिद्यते हृदयग्रंथिश्छिद्यते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥" इति ईश्वरसाक्षात्कारमतरा कर्मक्षयाभावात्तदर्थं त्व प्रत्यक्षो भवेति भावः ॥ ८९ ॥

असंग, इच्छारहित और शान्तरूप, हाथहीका पात्र बनाये, दिगंबर और कर्मोंकी जड उखाडनेमें समर्थ हे शिव ! ऐसे हम कब होंगे ॥ ८९ ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्ष्येण संतुष्यतां ।
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ॥
अत्यागेऽपि तनोरखंडपरमानंदाववोधस्पृशा- ।
मध्वा कोऽपि शिवप्रसादसुलभः संपत्स्यते योगिनाम् ९०

अथैव भूताना शिवप्रसादान्मोक्षमार्गोऽविलम्बेनैव सुलभो भवतीति निगमयति—पाणिमिति ॥ पाणिं करतलमेव पात्र भोजनभाजन कुर्वता पात्रयताम् । पात्रशब्दात् "तत्करोति०" इति ण्यन्ताल्लट शत्रादेश । निसर्गशुचिना स्वभावपरिपूतेन भैक्षेण भिक्षाकदम्बकेन सन्तुष्यता सन्तोष प्राप्नुवताम् । "भिक्षादिभ्योऽण्" । "भैक्ष भिक्षाकदम्बकम्" इत्यमर । यत्र क्वापि यस्मिन् कस्मिन् प्रदेशे श्मशाने वने वेत्यर्थ । निषीदतामुपविशताम् । मुहु पौनःपुन्येन विश्व प्रपञ्च बहुतृणमीषदनसमाप्त तृण तृणकल्पमित्यर्थ । "विभाषा सुपो बहुच्पुरस्तात्" इति बहुच्प्रत्यय । प्रकृते हृवं भवति । "स्यादीषदसमाप्तौ तु बहुच्प्रकृतिलिङ्गक ।" इति प्रकृतिवचनात्प्रकृतिलिङ्गता । पश्यतामाकलयताम् । तथा तनोरत्यागेऽपि देहसम्बन्धसद्भावेऽपि अखण्डोऽपरिच्छिन्नो य परमानन्दो ब्रह्मानन्दस्तस्यावबोधेऽनुभव स्पृशन्तीति

तयोक्ताना जीवन्मुक्तत्वादिति भावः । "स्पृशोऽनुदके क्विन्" इति क्विन्प्रत्ययः । योगिना ध्याननिष्ठाना शिवप्रसादेन सुलभः सुलभ्यः कोऽप्यनिर्वाच्यः अध्वा मोक्षमार्ग इत्यर्थः । सम्पत्स्यते सम्पन्नो भवति ॥ ९० ॥

जो हाथकोही भोजनोचित पात्र बनाते हैं, जो स्वाभाविक पवित्र भिक्षाहारसेही सन्तुष्ट रहते हैं, जो विश्वको तृणके समान देखते हैं और जो शरीरसंबंधके न छूटनेपरभी अखंड परमानंदका अनुभव लेते हैं ऐसे योगियोंकाही शिवजीके प्रसादसे सुलभ ऐसे मोक्षमार्गकी प्राप्ति होती है ॥ ९० ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी ।
नैश्चिंत्यं निरपेक्षभैक्ष्यमशनं निद्रा श्मशाने वने ॥
स्वातंत्र्येण निरंकुशं विहरणं स्वांतं प्रशांतं सदा ।
स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम् ९१ ॥

शिवार्चनस्य मोक्षोपयोग्यवधूतभावफलकत्वात् "अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशाम्" इत्युक्तत्वादिदानीं तावदवधूतचर्यामाह । अथावधूतचर्येति । अवधूतो नाम ब्रह्मात्मैक्यानुसन्धानतत्परो निरस्तबहिःप्रपञ्चो जीवन्मुक्तशब्दवाच्योऽसहितो योगपुरुषस्तस्य चर्या आचार उच्यत इति शेषः । उक्तां नामवधूतचर्यां दशभिर्वर्णयति—कौपीनमिति ॥ शतखण्डैरनेकशतैर्जर्जरतरमतिजीर्णं कौपीनं गुह्याच्छादनचर्मखण्डं यदि अस्ति चेदित्यर्थः । एवमुत्तरत्रापि । "कौपीनं स्यादकार्यं च गुह्यचीरप्रभेदयोः ।" इति विश्वः । तादृशी तथाभूतशतखण्डजर्जरतरेत्यर्थः । कन्था पुनः कन्था चास्ति यदि । नैश्चिन्त्यं निश्चिन्तताधिक्यं च यदि । तथा निरपेक्षमनानुवर्तनं देवाद्यगृहीतं भैक्ष्यमशनं भोजनं यदि । श्मशाने प्रेतभूमौ वने महारण्ये वा निद्रा च यदि । स्वातन्त्र्येण स्वच्छन्देन निरङ्कुशमप्रतिबन्धं विहरणं विचरणं च

यदि । सदा प्रशांतं प्रसन्नम् । " वा दांत० " इत्यादिना निपातः । स्वांतं चित्तं यदि । योगमहोत्सवे योगः समाधिरेव महोत्सवस्तस्मिन् स्थैर्यं च यदि अस्ति चेत्तर्हि त्रैलोक्यराज्येन त्रिलोकाधिपत्येन किं न किमपीत्यर्थः । तस्यैव परमसौख्यावहत्वादिति भावः । त्रयो लोकास्त्रैलोक्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः ॥ ९१ ॥

जिनकी कौपीन और कंथा सैकडों जगह खंडित होनेसे महाजर्जर हो गई है जो विषयचिंतासे रहित हैं, जो विना किसीकी अपेक्षा प्राप्त हुआ अन्न खाते हैं जो श्मशान या महारण्यमें सोते हैं जिनका मन सदा शांत है और जो योगमहोत्सवमें स्थिर हैं ऐसे अवधूतोंके लिये त्रैलोक्यका आधिपत्यभी क्या है कुछभी नहीं है याने तुच्छ है ॥ ९१ ॥

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितेनाब्धिः क्षुब्धो न खलु जायते ॥ ९२ ॥

नन्वत्यन्तसौख्यावहत्वेन प्रसिद्धं त्रैलोक्यराज्यं निषिध्य कौपीनादिमत्त्वस्यैवोत्तमत्वं प्रतिपादितं तदसत् यतस्तस्यैवात्यन्तप्रलोभकत्वादित्याशङ्क्य मनस्विनस्तावदेतावदेवाप्रलोभकं किंतु ब्रह्माण्डमपि तत्राकिंचित्करमेवेति सदृष्टान्तमाह—ब्रह्मांडमिति ॥ मण्डलीमात्रं बिंबमात्रं घटादिवदियत्तया परिच्छिन्नमित्यर्थः । मण्डलीभूतमिति वा पाठः तदा अमंडलं मंडलं संपद्यमानं मंडलीभूतम् । अभूततद्भावे च्विः । " ऊर्यादिच्विडाचश्च " इति गतिसंज्ञायां " कुगतिप्रादयः " इति समासः । " बिंबोऽस्त्री मंडलं त्रिषु " इत्यमरः । ब्रह्माण्डं चतुर्दशभुवनगर्भितब्रह्माण्डकटाहं मनस्विनो धीरस्य योगिनः इत्यर्थः । प्रशंसायामिनिः । लोभाय चित्तप्रलोभनाय । किं भवतीति शेषः । न भवत्येव किंतु तदेककोणे निलीनं त्रैलोक्यराज्यमिति भावः । तत्र दृष्टान्तमाह । अब्धिः समुद्रः शफरीस्फुरितेन मत्स्यविशेषोल्लुण्ठनेन क्षुब्धः क्षोभितः मथित इति यावत् । " क्षुब्धस्वान्त० " इत्यादिना निपातः । न जायते खलु । न

१ अब्धेः क्षुब्धता जातु जायते इति पाठान्तरम् ।

भवति खलु । " प्रोष्ठी तु शफरी द्वयोः " इत्यमरः । मत्स्योल्लुठनेनाब्धिक्षोभणमिव त्रैलोक्यराज्येन मनस्विनः प्रलोभनमित्यर्थः । अतस्तदेवातिसाख्यावहमिति भावः ॥ ९२ ॥

मनस्वी अर्थात् ब्रह्मविचारवान्के लुभानेको ब्रह्मांडमण्डल तुच्छ है,-मछलीके उछलनेसे समुद्र नहीं उमगता । तात्पर्य यह है कि ब्रह्मज्ञानीका चित्त समुद्रवत् गंभीर है, त्रैलोक्यकी संपत्ति उसके आगे छोटी मछली है ॥ ९२ ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मा स्म भूर्भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि ॥
सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतैर्भिक्षावस्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ९३ ॥

अथ वैराग्यप्रकारमाह—मातरिति ॥ मातर्जननि हे लक्ष्मि । " अम्बार्थनद्योर्ह्रस्वः " इति ह्रस्वः । अत्र मातृग्रहणमेतावत्कालं त्वया रक्षिता वयमिति भक्त्यतिशयसूचनार्थमित्यवगन्तव्यम् । अपरमन्यं कंचिद्भाग्यवन्तं पुरुषं भजस्व सेवस्व मत्कांक्षिणी मद्विषयाभिलाषिणी मा स्म भूर्न भवेत्यर्थः । " स्मोत्तरे लङ् च " इति चकारादाशीरर्थे लङ् । " न माङ्योगे " इत्यडागमप्रतिषेधः । नन्विदानीं कुतः एतद्वैराग्यमित्यत आह— । भोगेषु स्रक्चन्दनादिविषयानुभवेषु स्पृहयालवः स्पृहावन्तः पुमांसः । " स्पृहि० " इत्यादिना [illegible] प्रत्ययः । तव वशे स्वाधीनतायां वर्तन्ते इति शेषः । त्वदधीना भवन्तीत्यर्थः । " वश आयत्ततायां च " इत्यमरः । तर्हि यूयं के इत्याशङ्कायामाह— । निःस्पृहाणां भोगाभिलाषशून्यानां कासि [illegible] न कामीत्यर्थः । वयं निःस्पृहा इति भावः । [illegible] ऽस्मान् विहाय अन्यत्र गच्छेति [illegible] । [illegible] कथं [illegible] इत्याशङ्कायामाह— । [illegible] " [illegible] " इत्यादिना निपा-

---

१ [illegible] स्पृहयन्ते [illegible] इति पाठान्तरम् । २ [illegible] इति पाठान्तरम् । ३ [illegible] इति पाठान्तरम् ।

स्तनात्साधुः । स्यूता विरचिता । कर्मणि क्तः । " छ्वोः शूडनुनासिके च ॥ इति ऊठि यणादेश । पलाशपत्रपुटिका किंशुकपर्णपुटिकेव पात्र भिक्षाहरणोचितभाजन तस्मिन् पवित्रीकृतै. पावनीभूतैरित्यर्थः । अभूततद्भावे च्वि । " अस्य च्वौ " इतीकार । भिक्षावस्तुभिरन्नकवलरोपितशाकादिभिक्षाद्रव्यैरेव । भिक्षासक्तुभिरिति पाठेऽपि भिक्षासक्तुविशेषैरित्यर्थः । वृत्ति जीविका समीहामहे अभिलाषामहे । विरक्ता भवाम इत्यर्थ । अतः किमर्थ त्वमस्माकमिति भाव: । अत्र पलाशपत्रपुटिकाया सद्य स्यूतत्वकथन विशदत्वद्योतनार्थमन्यथा भिक्षाहरणानुपयुक्ता स्यादिति वेदितव्यम् । तथा " पलाश पद्मपत्र च " इत्यादिवचनात्पवित्रीकरणयोगेषु पलाशपत्रेषु निक्षिप्तसाधारणान्नादीनामपि पवित्रत्व किमुत निसर्गशुचिभिक्षावस्तूनामिति चावगन्तव्यम् ॥ ९३ ॥

हे लक्ष्मी माता ! अब तू अन्य किसी पुरुषका सेवन कर, हमारी आकाक्षा मत कर, विषयभोगके इच्छुक तेरे वशमें रहते हैं, निःस्पृही विरक्तोंके समीप तू तुच्छ है क्योंकि अब हम तत्काल बनाये पलाशपत्रके पवित्र दोनेमें भिक्षाके वस्तुसेही अपने जीवनवृत्तिकी इच्छा रखते हैं ॥ ९३ ॥

महाशय्या पृथ्वी विपुलमुपधानं भुजलता ।
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ॥
शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः ।
सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥९४॥

अथ योगिनः सार्वभौमसाम्यमाह—महाशय्येति ॥ पृथ्वी भूमिः महाशय्या विशालकटपर्यङ्कः । मही शय्या पृथ्वीति पाठे पृथ्वी पृथुः । " वोतो गुणवचनात् " इति ङीप् । मही नाम । " गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही । " इत्यमरः । भुजलता बाहुवल्ली विपुलं विस्तीर्ण-

१ मही रम्या शय्या इति पाठान्तरम् । २ स्फुरद्दीपश्चन्द्रो इति पाठान्तरम् ।
३ हरः इति पाठान्तरम् ।

मुपधानम् । " उपधानं तूपबर्हम् " इत्यमरः । आकाशं च वितानमुल्लोचम् । " अस्त्री वितानमुल्लोचम् " इत्यमरः । अथ प्रवर्तमानोऽनुकूलोऽनिलः पवनः व्यजनं तालवृन्तकमित्यर्थः । " व्यजनं तालवृन्तकम् " इत्यमरः । शरच्चन्द्रो दीपः । शरद्ग्रहणं चन्द्रस्य प्रकाशातिशयद्योतनार्थम् । इत्येतत्सर्वमयत्नसिद्धमपरिच्छिन्नं चेत्यर्थः । प्रसिद्धं तु नैवंभूतमिति भावः । स्वयं विरतिः विरक्तिरेव वनिता तस्याः संगेन मुदितः संतुष्टः अत. सुखी आनंदपूर्ण. शान्तः शमशीलो मुनि । " निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः । ध्यानस्थो निष्क्रियो दान्तस्तुल्यमृत्काञ्चनो मुनि. ॥ " इत्युक्तलक्षणः कश्चिद्योगीश्वरः अतनुभूतिरखण्डितैश्वर्यसंपन्नो नृपः सार्वभौम इव शेते स्वपिति निरातङ्कं निद्रातीत्यर्थः । रूपकसंकीर्णोऽयमुपमालंकार. । तया उपमानान्नृपादुपमेयस्य मुनेरपरिच्छिन्नशय्यादिसंपन्नत्वेनाधिक्यप्रतीतेर्व्यतिरेको व्यज्यत इत्यलंकारेणालंकारध्वनि. ॥ ९४ ॥

भूमिही जिसकी सुन्दर शय्या है, भुजाही सिरहानी (तकिया), आकाशही चंदोवा, अनुकूल वायुही पंखा और शरच्चंद्रमाही प्रकाशमान दीपक है इन सामग्रियोंसे विरक्तरूपी स्त्रीके संग आनन्दमें शान्त सुखी मुनि बडे ऐश्वर्यवान् राजाओंके समान सुखसे शयन करता है ॥ ९४ ॥

भिक्षाशी जनमध्यसंगरहितः स्वायत्तचेष्टः सदा ।
हानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ॥
रथ्याक्षीणविशीर्णजीर्णवसनः संप्राप्तकन्थासनो ।
निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ९५ ॥

अथ वैराग्यस्य [illegible] निरूपयति—भिक्षाशीति ॥ भिक्षामश्नातीति भिक्षाशी भिक्षान्नमात्रभोजनेन शरीरधारणपर इत्यर्थः । जनमध्ये संगरहितः आसक्तिवर्जितः । " [illegible] " इत्यादिस्मृतिवचनात् [illegible] । [illegible]

१ [illegible] इति पाठान्तरम् । २ [illegible] इति पाठान्तरम् ।

स तथोक्तः । स्वच्छंदविहारनिरत इत्यर्थः । स्वाधीनात्मीयव्यापारो वा । " अधीनो निघ्न आयत्त. " इत्यमरः । हानादानयोस्त्यागस्वीकारयोर्विरक्त. असकीर्णः यो मार्गस्तत्र निरत आसक्तः । नियमेन हेयवस्तुहानोपादेयोपादानतत्पर इत्यर्थः । यद्वा हानमिदं हेयमिति त्याग. आदानमिदमुपादेयमिति स्वीकारस्ताभ्यां विरक्तः विरहितः यो मार्गस्तत्र निरत आसक्तः । नियमेन हेयवस्तुहानोपादेयोपादानतत्पर इत्यर्थः । यद्वा हानमिद हेयमिति त्यागः आदानमिदमुपादेयमिति स्वीकार· । हेयोपादेयबुद्धिशून्य इत्यर्थः । " निस्त्रैगुण्ये पथि विहरतां को विधिः को निषेध· । " इत्यादिवचनात्तस्य विधिनिषेधातीतत्वादिति भाव । रथ्याया वीथ्यामाकीर्ण· अनुपयुक्तत्वाज्जनैर्विक्षिप्त. । कुतो विशीर्णं विशकलितं तत्कुतो जीर्णं पुरातनं तथाभूतं वसनमाच्छादनं यस्य स रथ्याकीर्णविशीर्णजीर्णवसन । " चीराणि किं पथि न सति दिशति भिक्षाम् । " इत्यादिना तस्य तथाविधवसनधारणस्वाभाव्यादिति भाव । अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्यय । अर्शआदिराकृतिगण । रथ्यायां कीर्णमनादरेण निक्षिप्त विशीर्णं जीर्णं च वसन निजाच्छादन येन स तथोक्त । सम्प्राप्त समधिष्ठित कर्थासनं येन स तथोक्तः । चतुर्गुणितकन्थोपर्युपविष्ट इत्यर्थ । अत एव निर्मानोऽभिमानशून्य ससाराध्यासरहित इत्यर्थः । निरहङ्कृतिरहङ्कारशून्यस्तदात्माध्यासरहित इत्यर्थः । शमो नाम वैराग्येण निर्विकारचित्तत्व तेन य सुखाभोग आनन्दातिशयस्तत्र एक मुख्य यथा तथा बद्धा स्पृहा येन स तथोक्त । ब्रह्मध्याननिष्ठ इत्यर्थ । कश्चित्कोऽपि तपस्वी महात्मा योगीश्वर । प्रशान्तात्मा [illegible] । स्थित [illegible] वर्तत इत्यर्थ [illegible] रथ्याकीर्णेति सम्प्राप्तेति च विशेषणद्वयेन [illegible] नित्यवगन्तव्यम् । स्वभावोक्तिरलङ्कार । " [illegible] इति लक्षणात् ॥ ९९ ॥

भीख मांगके खाना, लोगोंके सम्पर्क [illegible] रहना, स्वाधीन चेष्टा करना, हेय और लेनेमें निवृत्त मार्गमें रत रहना, मार्गमें पड़े पड़े पुराने हाथके टूकड़ेकी गुदड़ी [illegible] और [illegible]

रहित होना, शमसुख अर्थात् ब्रह्मानन्दहीमें इच्छा रखना इस प्रकारसे कोई तपस्वी स्थिर रहता है ॥ ९५ ॥

चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः ।
किं वा तत्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि किम् ॥
इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनै- ।
र्नक्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः॥९६॥

अथ योगिनो मानावमानतुल्यतामाह—चण्डाल इति ॥ अयं परिदृश्यमानः चण्डालः किमंत्यजो वा । अथ वेति पक्षांतरे । द्वे जाती शूद्रत्वब्राह्मण्यरूपे यस्य स तथोक्तः । किं ब्राह्मणो वा । "जन्मना जायते शूद्रः कर्मणा जायते द्विजः ।" इति वचनादिति भावः । यद्वा द्वे जाती जन्मनी गर्भनिर्गमनसंस्काराभ्यां यस्य स द्विजातिः किमयं । यद्वा शूद्रः किं वृषलो वा [illegible] यद्वा तापसः किं तपोनिष्ठो वा किंवा । तत्वनिवेशपेशला परमार्थे[illegible] मतिर्यस्य स. तथोक्तः कश्चित्कोऽपि योगीश्वरः किं ध्याननिष्ठो वा इत्यनेन प्रकारेणोत्पन्नैरुदितैर्विकल्पजल्पैर्विकल्पवाक्यैर्मुखरा वाचा[illegible]भूतवाक्यानि वदद्भिरित्यर्थः । जनैः पथि मार्गे आभाष्यमाणा [illegible] अपि न क्रुद्धा न कोपिताः चण्डाल[illegible]ति भावः । नैव [illegible] न सन्तुष्टान्तःकरणाश्च द्विजाति[illegible]ति भावः । [illegible] क्रुद्धा स्वयं यान्ति तूष्णीं गच्छन्ति ब्रह्मनिष्ठत्वादिति भावः । [illegible]वचनम् । "न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् । स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ [illegible] तथा मानापमानयोः । [illegible] ॥ एक [illegible] योगी [illegible] ।" इत्यादि ॥ ९६ ॥

यह चंडाल है या ब्राह्मण है, शूद्र है या तपस्वी है अथवा [illegible] बुद्धिमान् कोई योगीश्वर है ऐसे संदेहयुक्त अनेक प्रकारके [illegible] मार्गमें संभाषण करनेवालों

-योगी लोग न क्रुद्ध होते हैं न हर्षित होते हैं किन्तु स्वच्छन्द अपने मार्गमें चले जाते हैं ॥ ९६ ॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं ।
व्यालानां पशवस्तृणांकुरभुजस्तुष्टाः स्थलीशायिनः ॥
संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां ।
तामन्वेषयतां प्रयांति सततं सर्वे समाप्तिं गुणाः ॥ ९७ ॥

अथ हिंसादिराहित्यवृत्तिमाह—हिंसेति ॥ हिंसया अन्योपतापकवधादिभिः शून्यं रहितमयत्नेन यत्नं विना लभ्यं प्राप्यमशनमन्नम् " भिःसा [illegible] गकमन्धोऽन्नम् " इत्यमरः । धात्रा ब्रह्मणा व्यालानां सर्पाणाम् । " व्यालो दुष्टगजे सर्पे " इति विश्वः । मरुतां वायुना कल्पितं निर्मितम् । [illegible] तृणांकुरान् बालतृणानि भुञ्जन्ति [illegible] स्थलीशायिनः [illegible] प्रदेशे शयनवन्तस्तुष्टाः सन्तुष्टाः । संसारः पुत्रमित्रकलत्रादिधारा-[illegible] एव [illegible] क्षमा धीर्येषां तेषां [illegible] । यथा तरणिद्वारा [illegible] तथा ज्ञानद्वारा संसार [illegible] । सा वृत्तिः पूर्वोक्त [illegible] कृता निर्मिता [illegible] । ता वृत्तिमन्वेषयतां मार्गमाणानां [illegible] जनितदोषाणां सर्वे गुणाः [illegible] समाप्तिं नाशं प्रयाति प्राप्नुवन्ति । " यो मे गर्भगतस्यापि वृत्तिं [illegible] । शेषवृत्तिविधानाय स किं सुप्तोऽथवा मृतः ॥ " इति [illegible] वृत्तिकल्पने जागरूकः [illegible] हिंसादि-[illegible] वृत्तिं कुर्वन् यदृच्छया सम्प्राप्तद्रव्येण तुष्टः [illegible] योगी [illegible] ॥ ९७ ॥

विधाताने हिंसारहित बिना प्रयत्न [illegible] भोजन सर्पोंके [illegible] जीविका बनाई और पशु [illegible] बनाये जो सदा संतोषपूर्वक तृणोंको खाते हैं और भूमिपर सोते हैं और जिनकी बुद्धि संसार-

रूपी समुद्र लांघनेको समर्थ है उन मनुष्योंकी वृत्ति ऐसी बनाई कि जिसके खोजमें सब गुण समाप्त हो जांय पर वह सिद्ध न होय॥९७॥

गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ।
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ॥
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः ।
कण्डूयन्ते जरठहरिणाः स्वांगमंगे मदीये ॥ ९८॥

अथ निर्वृतिप्रकारमाह—गंगेति ॥ गङ्गायाः सुरनद्यास्तीरे कूले । " कूलं रोधश्च तीरं प्रतीरं च तटं त्रिषु । " इत्यमरः । तीरग्रहणं तद्गतशीतत्वपावित्र्यादिसिद्ध्यर्थम् । हिमगिरेः शीतनगस्य शिलायाः पाषाणस्य उपरि बद्धं पद्मासनं येन तस्य किंच ब्रह्मणः ध्यानमुपासनं तस्य अभ्यसनमभ्यासस्तस्य विधिः विधानं तेन । " विधिर्विधाने दैवेऽपि " इत्यमरः । योगनिद्रां गतस्य प्राप्तस्य योगिनः मम तैः सुदिवसैः पुण्यदिनैर्भाव्यं किम् । यत्र ते जरठहरिणाः वृद्धकुरङ्गाः निर्विशङ्काः निर्भीताः सन्तः स्वांगं स्वशरीरं मदीये अङ्गे शरीरे कण्डूयन्ते तैर्भाव्यमित्यभिप्रायः । [illegible] गङ्गातीरे हिमगिरिशिलापाषाणोपरि पद्मासनासनवर्ती ब्रह्मध्यानाभ्यास[illegible] योगनिद्रां गतः [illegible] निर्विशङ्के जरठहरिणैः [illegible] ॥ ९८ ॥

जिस समय हम गंगाके तट हिमाचलकी शिलापर आसन लगा पद्मासन बांधे बैठेंगे और ब्रह्मज्ञानके अभ्यासमें विधिपूर्वक आंख मूंद योगनिद्रामें प्राप्त होंगे, ऐसे हमारे ऐसे सुदिन कब होंगे जहां निःशंक हो बूढे २ हरिण हमारी देहसे अपना अंग खुजाकर सुख [illegible] ॥ ९८ ॥

येषां निःसंगताङ्गीकरणपरिणतस्वात्मसन्तोषिणस्ते ।
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ९९

अथ केवल सर्वसङ्गपरित्यागमाह—पाणिरिति ॥ पवित्र परिशुद्ध पाणि हस्त एव पात्र भाजनम् । " योग्यभाजनयो. पात्रम् " इत्यमर' । भ्रमणेन सञ्चारेण परित प्राप्त भैक्ष भिक्षाकदम्बकमक्षय्य नाशरहितमन्नमशनम् । आशान दिशा दशक दश विस्तीर्ण विशाल वस्त्र वास. । उर्वी भूमिरतल्य महत् अचपलमचचल तल्प शय्या । येषा निःसङ्गताया: सङ्गराहित्यस्य अङ्गीकरणे परिणत परिपक्व गत यत् स्वात तेन सन्तोषिण सन्तुष्टास्ते धन्याः । सन्यस्ता त्यक्ता दैन्यस्य व्यतिकरनिकरा यैस्ते तथोक्ता सन्त कर्म निर्मूलयन्ति नाशयन्ति । एव च यत्र कुत्र वा वसन् पाणिपात्रेण भैक्षान्न भुक्त्वा दिगम्बर उर्वीशयनो निःसङ्गपरिणतचित्तेन सन्तुष्ट सन् त्यक्तदैन्यव्यतिकरनिकरो धन्य. कर्मधाराबाहिकजन्मपरम्पराप्रद कर्म निमूलयतीत्यभिप्राय. ॥ ९९ ॥

अपने आत्मामें सन्तोषवाले उन पुरुषोंको धन्य है कि जिनका हाथही पात्र है, जो भ्रमण करके भिक्षाका अन्न खाते हैं, जिनका निर्मल दिशारूपी दशावाला आकाश वस्त्र है, जिनकी छोटीसी पृथिवी शय्या है, जो परिणाममें असंग (इकले) रहनेका स्वीकार करते हैं और जिन्होंने दीनताके समूहको भली प्रकार छोड दिया है और जो कर्मकी जडको उखाड देते हैं ॥ ९९ ॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल ।
भ्रातर्व्योम निबद्ध एव भवतामंत्यः प्रणामाञ्जलिः ॥
युष्मत्संगवशोपजातसुकृतस्फारस्फुरन्निर्मल- ।
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ १०० ॥

---

१ प..र्ति इति पाठान्तरम् । २ ...इति पाठान्तरम् ।
३ ... इति पाठान्तरम् ।

रूपी समुद्र लांघनेको समर्थ है उन मनुष्योंकी वृत्ति ऐसी बनाई कि जिसके खोजमें सब गुण समाप्त हो जांय पर वह सिद्ध न होय॥९७॥

गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ।
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ॥
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः ।
कण्डूयन्ते जरठहरिणाः स्वांगमंगे मदीये ॥ ९८॥

अथ निर्वृतिप्रकारमाह—गगेति ॥ गङ्गायाः सुरनद्यास्तीरे कूले । "कूल रोधश्च तीर प्रतीर च तट त्रिषु ।" इत्यमरः । तीरग्रहण तद्गत-शीतत्वपावित्र्यादिसिद्ध्यर्थम् । हिमगिरेः शीतनगस्य शिलाया पाषाणस्य उपरि बद्ध पद्मासन येन तस्य किंच ब्रह्मणः ध्यानमुपासन तस्य अभ्यसनम-भ्यासस्तस्य विधिः विधान तेन । "विधिर्विधाने दैवेऽपि" इत्यमर । योगनिद्रा गतस्य प्राप्तस्य योगिन मम ते सुदिवसैः पुण्यदिनैर्भाव्य किम् । यत्र ते जरठहरिणाः वृद्धकुरङ्गाः निर्विशकाः निर्भीता सन्तः स्वांग स्वशरीर मदीये अङ्गे शरीरे कण्डूयन्ते तैर्भाव्यमित्यभिप्रायः । एव च ग्रामनिवास त्यक्त्वा गङ्गातीरे हिमवत्पर्वतपाषाणोपरि पद्मासनासनवर्ती ब्रह्मध्यानाभ्यास-विधानेन योगनिद्रा गत सन्नह निर्विशके जरठहरिणैः साक यदा स्यास्ये तदा मे सुदिवसा जायन्त इत्यभिप्राय ॥ ९८ ॥

जिस समय हम गंगाके तट हिमाचलकी शिलापर आसन लगा पद्मासन बांधे बैठेंगे और ब्रह्मज्ञानके अभ्यासमें विधिपूर्वक आंख मूंद योगनिद्रामें प्राप्त होंगे, देखें हमारे ऐसे सुदिन कब होते हैं जहां निःशंक हो बूढे २ हरिण हमारे देहमें अपना अंग रगडके खुजलाहट मिटावेंगे ॥ ९८ ॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं ।
विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी ॥

येषां निःसंगताङ्गीकरणपरिणतस्वात्मसन्तोषिणस्ते ।
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ९९

अथ केवल सर्वसङ्गपरित्यागमाह—पाणिरिति ॥ पवित्र परिशुद्ध पाणि हस्त एव पात्र भाजनम् । " योग्यभाजनयो' पात्रम् " इत्यमर. । भ्रमणेन सञ्चारेण परित प्राप्त भैक्ष भिक्षाकदम्बकमक्षय्य नाशरहितमन्नमशनम् । आशान दिशा दशक दश विस्तीर्ण विशाल वस्त्र वास. । उर्वी भूमिरत्यल्प महत् अचलमचचल तल्प शय्या । येपा निःसङ्गताया: सङ्गराहित्यस्य अङ्गीकरणे परिणत परिपक्व गत यत् स्वांत तेन सन्तोषिण सन्तुष्टास्ते धन्या. । सन्न्यस्ता त्यक्ता दैन्यस्य व्यतिकरनिकरा यैस्ते तथोक्ता सन्त कर्म निर्मूलयन्ति नाशयन्ति । एव च यत्र कुत्र वा वसन पाणिपात्रेण भिक्षान्न भुक्त्वा दिगम्बर उर्वीशयनो नि.सङ्गपरिणतचित्तेन सन्तुष्ट सन् त्यक्तदैन्यव्यतिकरनिकरो धन्य कर्मधारावाहिकजन्मपरम्पराप्रद कर्म निर्मूलयतीत्यभिप्राय. ॥ ९९ ॥

अपने आत्मामें सन्तोषवाले उन पुरुषोंको धन्य है कि जिनका हाथही पात्र है, जो भ्रमण करके भिक्षाका अन्न खाते हैं, जिनका निर्मल दिशारूपी दशावाला आकाश वस्त्र है, जिनकी छोटीसी पृथिवी शय्या है, जो परिणाममें असंग (इकले) रहनेका स्वीकार करते हैं और जिन्होंने दीनताके समूहको भली प्रकार छोड दिया है और जो कर्मकी जडको उखाड देते हैं ॥ ९९ ॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल ।
भ्रातर्व्योम निबद्ध एव भवतामंत्यः प्रणामाञ्जलिः ॥
युष्मत्संगवशोपजातसुकृतस्फारस्फुरन्निर्मल- ।
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ १०० ॥

१ पाणि' इति पाठान्तरम् । २ ... इति पाठान्तरम् ।
... इति पाठान्तरम् ।

अथ पञ्चभूतानि मन्त्रोप्याह—मातरिति ॥ हे मातः जननि मेदिनि वसुमति, हे तात जनक मरुत वायो, हे सखे सुहृत् तेजः, हे जल उदक सुम्बधो शोभनबन्धो, हे भ्रातः सहोदर व्योम अम्बर, भवतां युष्माकमन्त्यश्चरमः प्रणामांजलिः नमस्कारपूर्वकांजलिः निबद्ध एव । “ पाणिर्निकुब्ज. प्रसृतिस्तौ युतावञ्जलिः पुमान् । ” इत्यमरः । युष्माक संगस्य योगस्य वशेन अधीनेन उपजात यत्सुकृत तेन स्फार विस्तार स्फुरत् निर्मल च यज्ज्ञान तेन अपास्तो दूरतस्त्यक्त समस्तमोहमहिमा पुत्रमित्रकलत्राद्यभिनिवेशाज्ञानातिशयः सन् अह परे ब्रह्मणि सच्चिदानन्दस्वरूपिणि निर्विकारे निष्कलंके निरजने ब्रह्मणि लीये । एव च दारैषणावित्तैषणपुत्रैषणादित्रयरहितः सन् चिदानन्दस्वरूपः सन् विदेहकैवल्यपर्यंत जीवन्मुक्त. सन् अह वर्त्ते इत्यभिप्रायः॥ १००॥

हे माता पृथ्वी ! हे पिता वायु ! हे सखा तेज ! हे बन्धु जल ! हे भाई आकाश ! तुम्हें हाथ जोड अन्तसमय प्रणाम करते हैं, तुम्हारे संगसे पुण्य बना, पुण्य उदय होनेसे ज्ञान निर्मल हुआ और ज्ञान निर्मल होनेसे मोहमहिमा दूर हुई, अब हम परब्रह्ममें लय होते हैं अर्थात् पृथ्वी आदि पंचतत्त्वरचित देहको ब्रह्मज्ञानमें सहायक समझ प्रणाम करते हैं क्योंकि फिर तुमसे भेंट न होगी ॥ १०० ॥

विवेकव्याकोशे विदधति शमे शाम्यति तृषा ।
परिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणतिः ॥
जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपण- ।
स्तृषापात्रं यस्यां भवति मरुतामप्यधिपतिः ॥ १०१ ॥

यस्यां तृष्णायां तृणपात्रं भवति तुगे परिग्रहे छेत्तुमशक्तो भवति इत्यर्थः । मनुजानां तु का कथा । किंविशिष्टो मरुतामधिपतिः जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणः जराजीर्णं ऐश्वर्यं तस्य ग्रसनेन यद्गहनं तस्य आक्षेपे कृपणः विध्वंसे असमर्थः अतः कारणात् तृष्णा गरीयसी ॥ १०१ ॥

जब विवेकके प्रकाशसे शांतिका उदय होता है तब तृष्णाभी शांत हो जाती है और ऊंचे विषयके संसर्गसे वही तृष्णा ऐसी फैल जाती है जिसके होते जरासे जीर्ण ऐश्वर्यके कठोर त्यागनेमें इंद्रभी असमर्थ होता है अर्थात् महान् पदवीवाला इंद्रभी तृष्णाको नहीं त्याग सकता ॥ १०१ ॥

पुरा विद्वत्तासीदुपशमवतां क्लेशहतये ।
गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम् ॥
इदानीं तु प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखा- ।
नहो कष्टं सापि प्रतिदिनमधोऽधः प्रविशति ॥ १०२ ॥

पुरेति ॥ पुरा पूर्वं उपशमवतां विद्वत्ता वैदुष्यं क्लेशहतये संसारनिवारणायासीत् । असौ विद्वत्ता कालेन गता विषयिणां विषयसुखसिद्ध्यै गता । अहो इति खेदे । कष्टं विलोक्य इदानीं सापि विद्वत्ता प्रतिदिनं दिनं प्रति अधोऽधः प्रविशति । किं कृत्वा शास्त्रविमुखान् क्षितितलभुजः प्रेक्ष्य निरीक्ष्य ॥ १०२ ॥

पहिले जो विद्या पण्डितोंके चित्तके क्लेश दूर करनेके निमित्त थी, फिर कुछ दिन पर वह विषयी लोगोंको विषयसुखके सिद्ध होनेके लिये भई अर्थात् विद्यासे राजाओंको प्रसन्न करके धन आदि ले सुखभोग करना इन कामकी हुई, इस समयमें राजाओंको शास्त्र सुननेसे विमुख देखकर प्रतिदिन वह विद्या अधोगतिको प्राप्त होती जाती है यह बड़ा कष्ट है ॥ १०२ ॥

अतिक्रान्तः कालो लटभललनाभोगसुभगो ।
भ्रमन्तः श्रान्ताः स्मः सुचिरमिह संसारसरणौ ॥
इदानीं स्वः सिन्धोस्तटभुवि समाक्रन्दनगिरः ।
सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः १०३॥

अतीति ॥ हे बाले । लटभललनाभोगसुभगः कालोऽतिक्रान्तः अतिचक्राम सम्पूर्णीकृतः । लटभाः आप्तलावण्या या ललनास्तासां भोगेन सुभगो मनोज्ञः लटभललनाभोगसुभग इहास्मिन् मर्त्यलोके ससारसरणी सुचिर भ्रमन्तः श्रान्ताः स्मः । इदानी स्वःसिधोः स्वर्गंगायास्तटभुवि कच्छस्थलीषु शिव शिव शिवेति प्रतनुमः विस्तारयामः कथंभूता वय सुतारैः फूत्कारैः समाक्रन्दनगिरः । रे बाले त्व कासि तव मुख न विलोकयामः ॥ १०४ ॥

भूषण आदिसे शोभित जो स्त्री उनके भोगनेमें सुभग (योग्य) यौवन (समय) तो बीत गया और चिरकालतक इस संसारके मार्गमें भ्रमते २ हम थक गये, अब तो श्रीगंगाजीके तटकी भूमिपर उक्त स्त्रियोंकी निंदा करते हुए हम शिव शिव शिव यह जप करेंगे ॥ १०३ ॥

महादेवो देवः सरिदपि च सैषा सुरसरि- ।
द्गुहा एवागारं वसनमपि ता एव हरितः ॥
सुहृद्वा कालोऽयं व्रतमिदमदैन्यव्रतमिदं ।
कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता ॥१०४॥

महादेवही एक देव, गंगाही नदी, एक गुहाही घर, दिशाही वस्त्र, कालही मित्र, किसीसे दीन न होना यही व्रत और कहांतक कहें वटका वृक्षही हमारी वल्लभा हो ॥ १०४ ॥

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरा ।
वनान्ते चित्तान्तर्विषमविषयाशीविषगताः ॥
शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगां ।
नयन्ते ये रात्रिं सुकृतचयचित्तैकशरणाः ॥ १०५ ॥

सखे इति ॥ हे सखे मित्र, त एव धन्या ये एवंप्रकारेण रात्रिं नयन्ते । किम्भूतास्ते सुकृतचयचित्तैकशरणाः पुनः सुकृतानां चयः सुकृतचयश्चित्ते एकं शरणं येषां ते सुकृतचयचित्तैकशरणाः । पुनः किम्भूताः त्रुटितभवबन्धव्यतिकराः त्रुटितो भवबन्धस्य व्यतिकरो येषां ते । वनान्ते वनमध्ये चित्तान्तर्विषमविषयाशीविषगताः चित्तान्तर्मानसमध्ये विषमो यो विषय एव आशीविषः दृष्टिविषोरगो गतो येषां ते वा विषमविषयाशीविगलिताः. इति पाठ. । किम्भूतां रात्रिं शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगां शरच्चन्द्रस्य ज्योत्स्नया शरत्कालीनचन्द्रमसः ज्योत्स्ना धवलेन गगनाभोगेन विस्तारेण सुभगा मनोज्ञा सा शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगा ताम् ॥ १०५ ॥

हे मित्र ! उन पुरुषोंको धन्य है जो वनमें बैठे हुए शरदृतुकी चांदनीसे श्वेत, आकाशके विस्तारसे सुन्दर और मनोहर रात्रिको इस प्रकार बिताते हैं कि पुण्यका समूह जिनके मनमें शरण है और जिन्होंने भवबंधनके क्षोभको तोड दिया है और जिनके मनमेंसे भयानक कठोर सर्परूपी विषय निकल गया है ॥ १०५ ॥

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ॥
किं जातमधुना मित्र येन यूयं वयं वयम् ॥ १०६ ॥

अतिक्रान्तः कालो लटभललनाभोगसुभगो ।
भ्रमन्तः श्रान्ताः स्मः सुचिरमिह संसारसरणौ ॥
इदानीं स्वः सिन्धोस्तटभुवि समाक्रन्दनगिरः ।
सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः १०३॥

अतीति ॥ हे बाले । लटभललनाभोगसुभगः कालोऽतिक्रान्तः अतिचक्राम सम्पूर्णीकृतः । लटभाः आत्तलावण्या या ललनास्तासां भोगेन सुभगो मनोज्ञः लटभललनाभोगसुभग इहास्मिन् मर्त्यलोके ससारसरणौ सुचिरं भ्रमन्त. श्रान्ताः स्मः । इदानीं स्वःसिंधोः स्वर्गंगायास्तटभुवि कच्छस्थलीषु शिव शिव शिवेति प्रतनुमः विस्तारयामः कथंभूता वय सुतारैः फूत्कारैः समाक्रन्दनगिरः । रे बाले त्व कासि तव मुख न विलोकयाम' ॥ १०३ ॥

भूषण आदिसे शोभित जो स्त्री उनके भोगनेमें सुभग (योग्य) यौवन (समय) तो बीत गया और चिरकालतक इस संसारके मार्गमें भ्रमते २ हम थक गये, अब तो श्रीगंगाजीके तटकी भूमिपर उक्त स्त्रियोंकी निंदा करते हुए हम शिव शिव शिव यह जप करेंगे ॥ १०३ ॥

महादेवो देवः सरिदपि च सैषा सुरसरि- ।
द्गुहा एवागारं वसनमपि ता एव हरितः ॥
सुहृद्वा कालोऽयं व्रतमिदमदैन्यव्रतमिदं ।
कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता ॥१०४॥

महादेवही एक देव, गंगाही नदी, एक गुहाही घर, दिशाही वस्त्र, कालही मित्र, किसीसे दीन न होना यही व्रत और कहांतक कहें वटका वृक्षही हमारी वल्लभा हो ॥ १०४ ॥

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरा ।
वनान्ते चित्तान्तर्विषमविषयाशीविषगताः ॥
शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगां ।
नयन्ते ये रात्रिं सुकृतचयचित्तैकशरणाः ॥ १०५ ॥

सखे इति ॥ हे सखे मित्र, त एव धन्याः ये एवप्रकारेण रात्रिं नयन्ते । किम्भूतास्ते सुकृतचयचित्तैकशरणाः पुनः सुकृतानां चयः सुकृतचयश्चित्ते एकं शरणं येषां ते सुकृतचयचित्तैकशरणाः । पुनः किम्भूताः त्रुटितभवबन्धव्यतिकराः त्रुटितो भवबंधस्य व्यतिकरो येषां ते । वनांते वनमध्ये चित्तांतर्विषमविषयाशीविषगताः चित्तांतर्मानसमध्ये विषमो यो विषय एव आशीविषः दृष्टिविषोरगो गतो येषां ते वा विषमविषयाशीर्विगलिताः इति पाठः । किम्भूतां रात्रिं शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगां शरच्चद्रस्य ज्योत्स्नया शरत्कालीनचन्द्रमसः कांत्या धवलेन गगनाभोगेन विस्तारेण सुभगा मनोज्ञा सा शरच्चद्रज्योत्स्नाधवलगगनाभोगसुभगा ताम् ॥ १०५ ॥

हे मित्र ! उन पुरुषोंको धन्य है जो वनमें बैठे हुए शरदृतुकी चांदनीसे श्वेत, आकाशके विस्तारसे सुन्दर और मनोहर रात्रिको इस प्रकार विताते है कि पुण्यका समूह जिनके मनमें शरण है और जिन्होंने भवबंधनके क्षोभको तोड दिया है और जिनके मनमेंसे भयानक कठोर सर्परूपी विषय निकल गया है ॥ १०५ ॥

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ॥
किं जातमधुना मित्र येन यूयं वयं वयम् ॥ १०६ ॥

यूयमिति ॥ हे मित्र, पूर्वं आवयोः तव ममेति बुद्धिरासीत् । कथं यूयं भवतः वयमेव वयं यूयमित्यभेदबुद्धिरासीत् । अधुना किं जातं निमित्तं येन यूयं यूयमेव वयं वयमेवेति भेदबुद्धिर्जाता ॥ १०६ ॥

जो तुम हो सो हम हैं और जो हम हैं सो तुम हो इस प्रकार परस्परमें कुछ भेद नहीं है ऐसीही बुद्धि हमारी प्रथम थी, अब क्या नई बात हुई कि जिससे तुम तुम्हीं हो हम हमही हैं ॥१०६॥

जीर्णा कंथा ततः किं सितममलपटं पट्टसूत्रं ततः किं ।
एका भार्या ततः किं हयकरिसुगणैरावृतो वा ततःकिम्॥
भक्तं भुक्तं ततः किं कदशनमथवा वासरांते ततः किं ।
व्यक्तज्योतिर्नवांतर्मथितभवभयं वैभवं वा ततः किम् १०७

जीर्णेति ॥ जीर्णा कथा लब्धा ततः किम् । सित शुभ्रममल स्वच्छ पटं वस्त्रं वा पट्टसूत्र दुकूलादिकं ततः किम् । एका अद्वितीया भार्या ततः किम् । हया अश्वा करिणो गजाश्च तेषां शोभना गणाः समूहास्तैरावृतो व्याप्तो वा ततः किम् । भक्तमोदनं भुक्तं ततः किम् । अथवा वासरांते दिनांते कदशनं कुत्सितभोजनं ततः किम् । तथा व्यक्त प्रत्यक्षं ज्योतिर्ब्रह्म अंतस्तमोनिरासि मथितं भवभयं येन भवं हृदि वैभवमैश्वर्यं न ततः किम् ॥ १०७ ॥

पुरानी गुदड़ी धारण की तो क्या, उज्ज्वल निर्मल वस्त्र वा पीताम्बर धारण किया तो क्या, एकही स्त्री पास रही तो क्या, अथवा घोड़े हाथीमंडित कतेक मिला यहां तो क्या, अन्नके व्यञ्जन भोजन किये तो क्या वा कुत्सित अन्न सायंकालको खाये तो क्या, जिससे भवभय नष्ट हो जाय ऐसी ब्रह्मकी ज्योति हृदयमें न जानी तो क्या, बड़ा विभव पाया हो तोभी क्या॥१०७॥

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने ।
तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः ॥
भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते ।
यत्स्वादाद्विरसा भवन्ति विषयास्त्रैलोक्यराज्यादयः १०८

१ [illegible]

त्रैलोक्येति ॥ हे आत्मन्, तत्परब्रह्म लब्ध्वा भोगे रतिं मा कृथाः यस्मिन्परब्रह्मणि एव निश्चयेन त्रैलोक्याधिपतित्वं विरस वर्तते किंभूते भोगे आसनवस्त्रमानघटने आसन सिंहासनसुखासनादि वस्त्राणि चीरांशुकपट्टदुकूलादीनि मान महत्वास्तित्वमानादि तेषां घटन आसनवस्त्रमानघटन तस्मिन् एव त्रिविधे भोगे का रतिः कोऽपि समोगः एक एव परमब्रह्मनित्योदितः सन् जृंभते यत्स्वादात् यस्य ब्रह्मणो रसस्वादात् त्रैलोक्यराज्यादयो विषया विरसा भवन्ति मोक्षदायकत्वात् ॥ १०८ ॥

हे जीव ! जिस परब्रह्मज्ञानके आगे त्रैलोक्यका राज्य फीका हो जावा है उसे प्राप्त होकर भोजन वस्त्र और मानके लिये भोगोंमें प्रीति मत कर वही एक भोग सबसे श्रेष्ठ और नित्य उदित प्रकाशित है जिसके स्वादके सन्मुख त्रैलोक्यराज्य आदि सब ऐश्वर्य निरस हो जाते हैं ॥ १०८ ॥

ज्ञानं सतां मानमदादिनाशनं ।
केषांचिदेतन्मदमानकारणम् ॥
स्थानं विविक्तं यमिनां विमुक्तये ।
कामातुराणामतिकामकारणम् ॥ १०९ ॥

ज्ञानमिति ॥ सतां सत्पुरुषाणां ज्ञान मानमदादिनाशन भवति केषांचिदधमानां एतज्ज्ञान मदमानकारण भवति । उक्तमेवार्थं कविर्दृष्टांतेन दृढयति । संसारच्छेदयमिनां मुनीनां विविक्त स्थान एकांतप्रदेशः विमुक्तये भवति । कामातुराणां पुरुषाणां विविक्त जनरहित स्थानं अतिकामनाय स्यात् । कामातुराणां पुरुषाणां विविक्त जनरहित स्थानं अतिकामकारण भवति कामविकाराय स्यात् ॥ १०९ ॥

सत्पुरुषको ज्ञान मान मद आदि नष्ट करनेके हेतु है और वही ज्ञान दुर्जनोंको मद मान उत्पन्न करता है । जैसे एकांतस्थान संयमी पुरुषोंको मुक्तिसाधनका हेतु होता है और कामातुरोंके कामवासनाका कारण होता है ॥ १०९ ॥

धैर्यं यस्य पिता क्षमा च जननी शांतिश्चिरं गेहिनी ।
सत्यं मित्रमिदं दया च भगिनी भ्राता मनःसंयमः ॥
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं ।
एते यस्य कुटुंबिनो वद सखे कस्माद्भयं योगिनः ॥ ११०

दैवसंपद्रूपपरिवारवतः कुतोऽपि भयं नास्तीत्याह—धैर्यमिति ॥ हे सखे, त्वं वद ब्रूहि । एते कुटुंबिनो यस्य योगिनस्तस्य कस्माद्भयं न कुतोऽपीत्यर्थः । कुटुंबिन एवाह । यस्य योगिनो धैर्यं पितास्ति । क्षमा च सहिष्णुता जननी मातास्ति तयोरुभयोः पालकत्वात् । यस्य शांतिश्चिरं गेहिनी भार्यास्ति । तथा सत्यं यथादृष्टश्रुतकथनरूपमिदं मित्रमस्ति । दया च सर्वभूतहितेच्छा भगिनी, मनःसंयमो मनोनिग्रहो भ्राता, भूमितलं शय्या, दश दिश एव वसनं वस्त्रं, ज्ञानामृतं भोजनमित्येतादृशी यस्य सम्पत्ति तस्य कुतोऽपि भयं नास्तीति भावः । "दैवी संपद्विमोक्षाय निबंधायासुरी मता । इति भगवद्वचनात्तद्वतो न कुतो भयम् ॥" ॥ ११० ॥

हे सखे ! तुही बता कि धैर्य जिसका पिता है, क्षमा जिसकी जननी है, शांति जिसकी भार्या है, सत्य जिसका मित्र है, दया जिसकी बहन है, मनोनिग्रह जिसका भाई है, भूमि जिसकी शय्या है, दशों दिशा जिसका वस्त्र है और ज्ञानामृत जिसका भोजन है ऐसा जिसका कुटुंब है उस योगीको किसका भय है ॥ ११० ॥

शय्या शैलशिला गृहं गिरिगुहा वस्त्रं तरूणां त्वचः ।
सारंगाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः ॥
येषां निर्झरमम्बुपानमुचितं रत्यैव विद्यांगना ।
मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवाञ्जलिः ॥ १११ ॥

तरूणां त्वच. वस्त्रं, सुहृदः सारंगाः, ननु निश्चित क्षितिरुहाणां वृक्षाणां कोमलैः फलैर्वृत्तिः, निर्झरमम्बु पानं, एवं निश्चयेन रत्येव सहोचिता अंगना इव विद्या येषामिति ते ईश्वराः यैः शिरसि सेवांजलिर्न बद्धः॥ १११ ॥

पर्वतकी चट्टान जिनकी शय्या है, कंदराही घर है, वृक्षोंके वल्कलही वस्त्र हैं, वनके हिरनही मित्र हैं, वृक्षोंके कोमल फलादि भोजनसे जीवन और झरनेका स्वच्छ जल पान है, विद्यारूपी स्त्रीहीसे जिनकी प्रीति है उन पुरुषोंको हम परमेश्वर मानते हैं जिन्होंने सेवा करनेके हेतु औरोंको प्रणाम न किया॥ १११ ॥

सत्यामेव त्रिलोकीसरिति हरशिरश्चुम्बिनीवच्छटायां।
सद्वृत्तिं कल्पयन्त्यां वटविटपभवैर्वल्कलैः सत्फलैश्च ॥
कोऽयं विद्वान् विपत्तिज्वरजनितरुजातीवदुःश्वासिकानां।
वक्त्रं वीक्षेत दुःस्थे यदि हि न बिभृयात्स्वे कुटुंबेऽनुकंपाम्

सत्यमिति ॥ हि निश्चितं यदि चेत् दुःस्थे स्वकीये कुटुंबे अनुकंपां कृपां न बिभृयात्। यत्तदोर्नित्य सम्बन्ध इति न्यायात्। तदा कोऽयं विद्वान् अतीव दुःश्वासिकानां नागेणा वक्त्रं वीक्षेत अपि तु कोऽपि न। कया विपत्तिज्वरस्तेन जनिता रुक तया। कस्यां सत्यां त्रिलोकीसरिति गङ्गायां सत्यामेव। किंभूतायां त्रिलोकीसरिति हरशिरश्चुम्बिनीवच्छटायां हरशिरश्चुंबिनी ईश्वरमस्तकस्य रमणीव च्छटा वप्रदेशो यस्याः सा तस्यां। पुनः किंभूतायां त्रिलोकीसरिति सद्वृत्तिं सदा वरं कल्पयन्त्यां प्रेरयन्त्यां। कैः सत्फलैः किंभूतैः सत्फलैः वटविटपभवैर्वटवृक्षोद्भवैः ॥ ११२ ॥

महादेवका शिर जिसका तट है और जो गंगा वटकी डालियोंके वल्कल और उत्तम २ फलोंसे भली प्रकार निर्वाह करसकती है ऐसी श्रीगंगाजीके विद्यमान रहते और यदि अपने कुटुंबपर दया न करे तो ऐसा कौन विद्वान है जो ऐसी स्त्रियोंके

मुखको देखे जो विपत्तिके ज्वरसे पैदा हुए लंबे २ श्वासोंको लेती हैं अर्थात् कुटुंब बढानेकी इच्छाही उक्त स्त्रियोंका मुख दिखाती है. नहीं तो गंगातटपरही सर्वानन्द है ॥ ११२ ॥

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः ।
कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ॥
आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते ।
तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ११३

उद्यानेष्विति ॥ तां काशीं परिहृत्य परित्यज्य हन्त इति खेदे । विबुधैः किमन्यत्र स्थीयते । अपि तु न । यस्यां काश्यां उद्यानेषु विचित्रभोजनविधिः अन्यत्रातितीव्रं तपः अन्यत्र सुवस्त्र कौपीनावरणं मण्डनं अन्यत्र यस्यां अमितं भिक्षाटनं यस्यां काश्यां मङ्गलसमं आसन्नं मरणं समुत्पद्यते तां काशीं मुक्त्वा अन्यत्र कथं स्थीयते ॥ ११३ ॥

उपवनोंमें नाना प्रकारके भोजन बनाकरके खाना और जहां अतिशय कठिन तप और लंगोटी पहिननाही परम सुन्दर वस्त्र और भीख मांगनाही जहां भूषण है और मृत्यु आनाही जहां परम मङ्गल उत्पन्न होता है ऐसी काशीको छोड पण्डित लोग अन्यत्र क्यों बसते हैं ॥ ११३ ॥

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि ।
स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ॥
चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु- ।
र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥११४॥

चेतस्तान् प्रभूनपहाय विश्वेशितुः परमेश्वरस्य महेशस्य भवन याहि । किंभूतं भवन निर्दौवारिकनिर्दयोक्त्यपरुष निर्गतो दौवारिको यस्मात् तत् निर्दौवारिक प्रतीहाररहित निर्दयोक्त्या कठोरोक्त्याऽपरुषाः यस्मिन् तन्निर्दयोक्त्यपरुष निर्दौवारिक च तत् निर्दयोक्त्यपरुष च निर्दौवारिकनिर्दयोक्त्यपरुष तत्पुनः किंभूत निःसीमशर्मप्रद सीमारहित सर्वमोदय प्रददातीति अतिनिर्मलसौख्यदायकम् ॥ ११४ ॥

अभी समय नहीं, महाराज एकान्तमें बैठे कुछ विचार कर रहे हैं, अभी सोते हैं, डचोढीपरसे उठो, तुम्हें बैठे देखेंगे तो प्रभु इमपर क्रोध करेंगे ऐसे वचन जिनके द्वारपर द्वारपाल बोलते हैं उन्हें त्यागकर हे चित्त ! विश्वेश्वरकी शरणमे जा । जिसके द्वारपर कोई रोकनेवाला नहीं, वहा निर्दय और कठोर वाक्य नहीं सुननेमें आते और जो अनंत सुखदाई है ॥ ११४ ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा ।
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ॥
तृणे वा स्त्रैणे वा मम समदृशो यांति दिवसाः ।
क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ ११५॥

इति भर्तृहरिकृतं वैराग्यशतकं सम्पूर्णम ॥ ३ ॥

अहाविति ॥ अहौ सर्पे हारे मुक्ताफलहारे वा बलवति रिपौ शत्रौ सुहृदि हितकरे वा मणौ वा लोष्टे मृत्पिण्डे पाषाणे वा कुसुमशयने पुष्पशय्यायां दृषदि पाषाणे वा तृणे स्त्रैणे अपत्ये वा इत्यादिषु वा मम समा दृष्टिर्यस्य समदृशः दिवसाः कदा याति गच्छति । किंभूतस्य मम क्वचित् कुत्रचित् पुण्यारण्ये स्थित्वा शिवेति नामावलिं प्रलपतः उच्चैः आक्रोशेन वदतः ॥ ११५ ॥

इति श्रीभर्तृहरिकृतवैराग्यशतकव्याख्याने वैराग्यशतक सम्पूर्णम् ॥ ३ ॥

सर्प वा हार, बलवान् शत्रु वा मित्र, मणि और पाषाण, कुसुमरचित शय्या वा पत्थरकी चट्टान, तृण वा स्त्रियोंके समूहमें

मुखको देखे जो विपत्तिके ज्वरसे पैदा हुए लंबे २ श्वासोंको लेती हैं अर्थात् कुटुंब बढानेकी इच्छाही उक्त स्त्रियोंका मुख दिखाती हैं, नहीं तो गंगातटपरही सर्वानन्द है ॥ ११२ ॥

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः ।
कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ॥
आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते ।
तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ११३

उद्यानेष्विति ॥ तां काशीं परिहृत्य परित्यज्य हत इति खेदे । विबुधैः किं अन्यत्र स्थीयते । अपि तु न । यस्या काश्यां उद्यानेषु विचित्रभोजनविधिः चान्यत्तीव्रातितीव्र तपः चान्यत्सुवस्त्र कौपीनावरण मण्डन' चान्यद्यस्यां अमित भिक्षाटन यस्यां काश्यां मङ्गलसम आसन्न मरण समुत्पद्यते तां काशीं मुक्त्वा अन्यत्र कथ स्थीयते ॥ ११३ ॥

उपवनोंमें नाना प्रकारके भोजन बनायके खाना और जहां कठिनसे कठिन तप और लंगोटी पहिननाही परम सुन्दर वस्त्र और भीख मांगनाही जहां भूषण है और मृत्यु आनाही जहां परम मङ्गल उत्पन्न होता है ऐसी काशीको छोड पण्डित लोग अन्यत्र क्यों बसते हैं ॥ ११३ ॥

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि ।
स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ॥
चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु- ।
र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥११४॥

चेतस्तान् प्रभूनपहाय विभोशितुः परमेश्वरस्य महेशस्य भवन याहि । किंभूतं भवन निर्दौवारिकानिर्दयोक्त्यपरुष निर्गतो दौवारिको यस्मात् तत् निर्दौवारिक प्रतीहाररहित निर्दयोक्त्या कठोरोक्त्याऽपरुषाः यस्मिन् तन्निर्दयोक्त्यपरुष निर्दौवारिक च तत् निर्दयोक्त्यपरुष च निर्दौवारिकनिर्दयोक्त्यपरुष तत्पुन किंभूत नि.सीमशर्मप्रद सीमारहित सर्वसौख्य प्रददातीति अतिनिर्मलसौख्यदायकम् ॥ ११४ ॥

अभी समय नहीं, महाराज एकान्तमें बैठे कुछ विचार कर रहे हैं, अभी सोते हैं, ड्योढीपरसे उठो, तुम्हें बैठे देखेंगे तो प्रभु इसपर क्रोध करेंगे ऐसे वचन जिनके द्वारपर द्वारपाल बोलते हैं उन्हें त्यागकर हे चित्त ! विश्वेश्वरकी शरणमें जा । जिसके द्वारपर कोई रोकनेवाला नही, वहा निर्दय और कठोर वाक्य नहीं सुननेमें आते और जो अनंत सुखदाई है ॥ ११४ ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा ।
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ॥
तृणे वा स्त्रैणे वा मम समदृशो यांति दिवसाः ।
क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ ११५॥

इति भर्तृहरिकृतं वैराग्यशतकं सम्पूर्णम् ॥ ३ ॥

अहाविति ॥ अहौ सर्पे हारे मुक्ताफलहारे वा बलवति रिपौ शत्रौ सुहृदि हितकरे वा मणौ वा लोष्टे मृत्पिण्डे पाषाणे वा कुसुमशयने पुष्पशय्यायां दृषदि पाषाणे वा तृणे स्त्रैणे अपत्ये वा इत्यादिषु वा मम समा दृष्टिर्यस्य समदृश· दिवसाः कदा यांति गच्छति । किंभूतस्य मम क्वचित् कुत्रचित् पुण्यारण्ये स्थित्वा शिवेति नामावलि प्रलपतः उच्चैः आक्रोशेन वदतः ॥ ११५ ॥

इति श्रीभर्तृहरिकृतवैराग्यशतकव्याख्याने वैराग्यशतक सपूर्णम् ॥ ३ ॥

सर्प वा हार, बलवान् शत्रु वा मित्र, मणि और पाषाण, पुष्परचित शय्या वा पत्थरकी चट्टान, तृण वा स्त्रियोंके समूहमें

समदर्शी होकर पवित्र वनमें शिव शिव शिव जपते हमारे दिन कहीं व्यतीत होंगे हम यही चाहते हैं ॥ ११९ ॥

इति भर्तृहरिकृतवैराग्यशतकभाषाटीकायां वैराग्यशतक सम्पूर्णम् ॥ ३ ॥

इति श्रीपरमयोगींद्रवृंदमानसमिलन्मिलिंदसंदोहामंदानंदलाभाभिनंदित-
रघुनंदनचरणारविंदमकरंदास्वादनकृदलितसारसारस्वतेन अखंड-
तपःप्रचंडमुनिप्रकांडमंडलेश्वरशांडिल्यमहामुनिगोत्रावतंसस्या-
वंचान्वयसुधापारावारपारिजातस्य धन्वंतर्यवतारांतरस्या-
युर्वेदप्रमुखनिखिलविद्यानवद्यगद्यपद्यनिर्माणचातुरीधुरी-
णसकलकविकुलसार्वभौमस्य कोरिंडोपंडितवर्य्यस्य तनू-
जेन गंगाविकागर्भरत्नाकरसुधाकरेण रामचंद्र-
बुधेंद्रेण विरचितया सहृदयानंदिन्याख्यया
व्याख्यया सहितं शतकत्रयं समाप्तम् ।



अथ

भर्तृहरिशतकत्रयस्थश्लोकानामकारादिवर्णक्रमेण अनुक्रमणिका ।

* एतच्चिह्नाङ्किता श्लोका रामचन्द्रबुधेन्द्रेण न व्याख्याताः ।

श्लोकः	श०	सं०
उ.		
उत्खातं निधिशंकया.	३	३
उद्भासिताखिलखलस्य.	१	५७
उद्यानेषु विचित्र०	३	११३
उद्वृत्तः स्तनभार	२	१५
उन्मत्तप्रेमसंरंभात्	२	७७
उन्मीलत्त्रिवलीतरंग	२	५१
उपरि घनं घन	२	९४
उरसि निपातितानां	२	२५
ए, ऐ.		
एकाकी निःस्पृह. .	३	८२
एकेनापि हि शूरेण० .	१	८८
एको देवः केशवो०	१	६२
एको रागिषु राजते ...	३	१७
एतत्कामफलो लोके० .	२	२८
एतस्माद्विरमेन्द्रियार्थ ...	३	६३
[illegible] .	३	[illegible]
एते सत्पुरुषाः परार्थं ..	१	७४
ऐश्वर्यस्य विभूषणं	१	[illegible]

श्लोकः	श०	सं०
किमिह बहुभिरुक्तैः....	२	५०
किं कंदर्प शरं कदर्थ	२	६६
किं कन्दाः कंदरेभ्यः....	३	२५
किं गतेन यदि सा	२	६८
किं तेन हेमगिरिणा०	१	८१
किं वेदैः स्मृतिभिः	३	७१
कुंकुमपंककलंकित	२	१
कुसुमस्तबकस्येव ...	१	३१
कृच्छ्रेणामेध्यमध्ये	३	३७
कृमिकुलचित लाला....	१	१०
कृशः काणः खंज	२	८०
केयूराणि न भूषयंति ..	१	२०
केशानाकुलयन्दृशो	२	१०२
केशाः संयमिनः श्रुते	२	१२
को लाभो गुणिसंगमः०	१	११८
कौपीनं शतखंड	३	२१
क्वचित्पृथ्वीशय्यः	१	८४
क्वचित्सुभ्रूभंगैः ...	२	४
क्षणं बालो भूत्वा	३	५०
क्षान्तं न क्षमया	३	६

इति श्लोकानुक्रमणिका समाप्ता।

पुस्तक मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णदास,

" लक्ष्मीवेङ्कटेश्वर " छापाखाना

कल्याण—मुंबई.